ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# नव्यव्याकरणम् २

## मध्यमा १

## (ધોરણ 11)

### प्रतिज्ञापत्रम्

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि ।
प्रत्येकेन सह शिष्टव्यवहारं च करिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां कल्याणे समृद्धौ चैव मम सुखम् अस्ति ।

**मूल्यम् : ₹ 32.00**

गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्
'विद्यायनम्', सेक्टर 10-ए, गान्धीनगरम्-382 010

© गुजरात राज्य शाला पाठ्यपुस्तक मण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यशालापाठ्यपुस्तकमण्डलाधीनाः सन्ति।
अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रूपेण गुजरातराज्य-शालापाठ्यपुस्तकमण्डनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषय मार्गदर्शनम्**

डॉ. वाचस्पति पी. मिश्रा

**लेखनम्**

डॉ. नंदलालः पाठकः (कन्विनर)

डॉ. गौरीशंकरः जोषी

डॉ. जगतः तेरैया

श्री जयेशः दवे

**समीक्षणम्**

डॉ. क्षितीश्वरनाथः पाण्डेयः

डॉ. नरेन्द्रकुमारः पंड्या

डॉ. पंकजकुमार ठाकर

डॉ. धर्मेन्द्रकुमार भट्ट

श्री राघवेन्द्र झा

**भाषाशुद्धिः**

श्री क्षितीश्वरनाथःपांडे

**संयोजनम्**

डॉ. क्रिष्णा दवे

(विषय-संयोजकः -अंग्रेजी)

**निर्माणायोजनम्**

श्री हरेन शाह

(उपनियामकः - शैक्षणिकः)

**मुद्रणसंयोजनम्**

श्री हरेश एस. लीम्बाचीया

(उपनियामकः- उत्पादनम्)

## प्रस्तावना

प्राच्यगुरुकुल-परम्परानुसारम् अभ्यासं कुर्वतः संस्कृतपाठशालीय-विद्यार्थिनः लक्षीकृत्यप्राचीनार्वाचीनो-भयपद्धत्योः सरस-सरलसमन्वयपूर्वकं गुजरातराज्यमाध्यमिकोच्चतरमाध्यमिकशिक्षणबोर्डद्वारा अभ्यासक्रमसंरचना जाताऽस्ति, एते अभ्यासक्रमाः गुजरातसर्वकारद्वारा मानिताः प्रमाणीकृताश्च सन्ति।

गुजरातसर्वकारप्रमाणितस्य **नव्यव्याकरणम्-२, मध्यमा १ ( ધો૨ણ 11 )** इति विषयस्य संवर्द्धिताभ्यासक्रमानुसारं सज्जीभूतस्य पाठ्यपुस्तकस्य संवर्द्धितामावृत्तिं विद्यार्थिसमक्षं प्रस्तुवन्मण्डलम् आनन्दमनुभवति। अस्याः पाठ्यपुस्तकसंवर्द्धितावृत्तेः प्रकाशनात्प्राक् हस्तलिपीनां शिक्षणकार्यं कुर्वद्भिः शिक्षकैः तज्ज्ञैश्च सर्वाङ्गिसमीक्षणं कृतमस्ति। शिक्षकतज्ज्ञानां सूचनानुसारं हस्तलिपिषु योग्यां शुद्धिं कृत्वा पाठ्यपुस्तकमिदं प्राकाश्यं नीतमस्ति।

प्रस्तुतं पाठ्यपुस्तकं सरसम् उपयोगी क्षतिरहितं कर्तुं मण्डलं सश्रद्धं प्रायतत। तथापि शिक्षणरसिकेभ्यः पाठ्यपुस्तकस्य गुणवत्तावहाः सूचनाः स्वीकार्याः सन्ति।

**पी. भारती** (IAS)

नियामकः

ता.06-07-2019

कार्यवाहकःप्रमुखः

गान्धीनगरम्

**प्रथमावृत्ति : 2019**

**प्रकाशक** : गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, ‘विद्यायन’, सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामकः

**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

( क ) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

( ख ) स्वातन्त्र्याय अस्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

( ग ) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

( घ ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

( च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

( छ ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

( ज ) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

( झ ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

( ट ) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

( ठ ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

* भारतीयं संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| 1. | अथ हलन्तपुँल्लिङ्गप्रकरणम्-1 | 1 |
| 2. | हलन्तपुँल्लिङ्गप्रकरणम्-2 | 39 |
| 3. | हलन्तपुँल्लिङ्गप्रकरणम्-3 | 64 |
| 4. | हलन्तस्त्रीलिङ्गप्रकरणम् | 97 |
| 5. | हलन्तनपुँसकलिङ्गप्रकरणम् | 108 |
| 6. | अव्ययप्रकरणम् | 115 |
| 7. | स्त्रीप्रत्ययप्रकरणम् | 120 |
| 8. | कर्तृकारकम् | 150 |
| 9. | कर्मकारकम् | 153 |
| 10. | करणकारकम् | 169 |
| 11. | सम्प्रदानकारकम् | 175 |
| 12. | अपादानकारकम् | 183 |
| 13. | षष्ठी विभक्तिः | 191 |
| 14. | अधिकरणकारकम्। | 201 |
| 15. | विशिष्टपरिभाषाणां विमर्शः | 208 |
| 16. | वैयाकरणसिद्धान्तकौमुदीस्थनियतांशगणपाठः | 211 |
| ● | सूत्रसूचिः | 213 |


●

## १

# अथ हलन्तपुँल्लिङ्गप्रकरणम्-१

**प्रस्तावना**

श्रीमहर्षिपाणिनिना 'सूत्राष्टाध्यायी' नामकः व्याकरणग्रन्थः विरचितोऽस्ति। एवञ्च तस्य पाणिनीयव्याकरणसूत्राणामुपरि श्रीभट्टोजीदीक्षितेन 'वैयाकरणसिद्धान्तकौमुदी' नामकग्रन्थे वृत्तिः विरचिता, तस्याः वैयाकरणसिद्धान्तकौमुद्याः हलन्तशब्दानां प्रकरणमत्र गृहीतमस्ति।

अजन्तशब्दानां प्रकरणानन्तरम् इतः हल् अन्तः येषां ते हलन्ताः, तेषाम् हलन्तानां प्रकरणं हलन्तप्रकरणम्। हल्प्रत्याहारे प्रथमं हकारः अतो हकारान्तशब्दात् क्रमेण प्रारभ्यते। तेषु हलन्तेष्वपि-पुँल्लिङ्गशब्दानां प्रकरणमस्ति-हलन्तपुँल्लिङ्गप्रकरणम्। अस्मिन् प्रकरणे सूत्राधिक्यात् त्रयः विभागाः कृतास्सन्ति यथा- (१) हलन्तपुँल्लिङ्गप्रकरणम्-१,(२) हलन्तपुँल्लिङ्गप्रकरण-२, (३) हलन्तपुँल्लिङ्गप्रकरणम्-३। तेषु विभागेषु प्रथमं प्रकरणम् सूत्र-(३२४) 'हो ढः' ८।२।३१ इत्यारभ्य सूत्र-(३७२) 'अष्टाभ्य औश्' ७/१/२१ पर्यन्तमस्ति। हकारान्तादारभ्य नकारान्तशब्दनापर्यन्तमस्मिन् प्रकरणे वयं पठनं करिष्यामः।

**(३२४) हो ढः। ८।२।३१॥**

हस्य ढः स्याज्झलि पदान्ते च। 'हल्ङ्याप्...' (सू. २५२) इति सुलोपः। पदान्तत्वाद्धस्य ढः। जश्त्वचर्त्वे। लिट्-लिड्, लिहौ, लिहः। लिहम्, लिहौ, लिहः। लिहा, लिड्भ्याम् इत्यादि। लिट्त्सु-लिट्सु।

**३२४ - पदच्छेदः** - हः, ढः। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - पदस्य, झलि, अन्ते। **सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - झलि परे वा पदान्ते स्थितहकारस्य स्थाने ढकार आदेशो भवति।

**साधनिका :** - लिट्-लिड्, लिड्भ्याम् 'लिट्' इत्यत्र लिह्-आस्वादने इत्यस्माद्धातोः 'अन्येभ्योऽपि दृश्यते' इत्यनेन 'क्विप्' प्रत्यये, 'लिह्+क्विप्' इति स्थिते, ककारस्य 'लशक्वतिद्धते' इत्यनेन इत्संज्ञायाम्, लोपे च, पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायाम्, लोपे च इकार उच्चारणार्थः, लिह्+व् इति स्थिते, 'लिह्' इत्यस्माद् 'कृदतिङ्' इत्यतेने कृत्संज्ञायाम्, 'वेरपृक्तस्य' इत्यनेन वकारस्य लोपे, 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां, सुप्रत्ययेऽनुबन्धलोपे, लिह्+स् 'हल्ङ्याप्...' इत्यनेन सकारस्य लोपे, लिह् 'झलां जशोऽन्ते' इत्यनेन ढकारस्य डकारे 'वाऽवसाने' इत्यनेन विकल्पेन डकारस्य चर्त्वेन टकारे 'लिट्' इति रूपम्भवति। चर्त्वाभावे 'लिड्' इति रूपम्भवति। **'लिड्भ्याम्'** इत्यत्र लिह् इत्यस्माच्छब्दात् तृतीयाद्विवचनविवक्षायां भ्याम् प्रत्यये 'लिह्+भ्याम्' इति स्थिते, 'हो ढः' इति सूत्रेण हकारस्य ढकारे, 'झलां जश् झशि' इति सूत्रेण जश्त्वेन 'ढ' कारस्य डकारे, 'लिड्भ्याम्' इति रूपम्भवति।

**साधनिका : - लिट्त्सु-लिट्सु** इत्यत्र लिह् इत्यस्माच्छब्दात् सुप्-प्रत्ययेऽनुबन्धलोपे, 'लिह्+सु' इति स्थिते। 'हो ढः' इत्यनेन हकारस्य स्थाने ढकारे, 'झलां जशोऽन्ते' इति सूत्रेण जश्त्वेन ढकारस्य स्थाने डकारे 'लिड्+सु' इति स्थिते, 'डः सि धुट्' इत्यनेन विकल्पेन सकारस्य धुडागमे अनुबन्धलोपे, लिड्ध्+सु इति स्थिते, 'खरि च' इत्यनेन चर्त्वेन धकारस्य तकारे, एवं डकारस्य टकारे कृते सति, लिट्त्सु इति रूपम् भवति। लिट् सु इत्यत्र 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वेन सकारस्य स्थाने षकारे प्राप्ते 'न पदान्ताट्टोरनाम्' इत्येनेन निषेधे 'लिट्त्सु' इति रूपं भवति।

**लिह्** शब्दस्य रूपाणि यथा-

| | | | |
|---|---|---|---|
| लिट्-लिड् | लिहौ | लिहः | प्रथमा। |
| लिहम् | लिहौ | लिहः | द्वितीया। |
| लिहा | लिड्भ्याम् | लिड्भिः | तृतीया। |
| लिहे | लिड्भ्याम् | लिड्भ्यः | चतुर्थी। |
| लिहः | लिड्भ्याम् | लिड्भ्यः | पञ्चमी। |
| लिहः | लिहो | लिहाम् | षष्ठी। |
| लिहि | लिहोः | लिट्त्सु-लिट्सु | सप्तमी। |
| हे लिट्-लिड् | हे लिहौ | हे लिहः | सम्बोधनम्। |

**( ३२५ ) दादेर्धातोर्घः। ८।२।३२॥**

**उपदेशे दादेर्धातोर्हस्य घः स्याज्झलि पदान्ते च। उपदेशे किम्? अधोक् इत्यत्र यथा स्यात्। दामलिहमात्मन इच्छति दामलिह्यति ततः क्विपि दामलिट्। अत्र मा भूत्।**

---

३२५ - **पदच्छेदः** - दादेः धातोः घः। त्रिपदमिदं सूत्रम्।

**सूत्रप्रकारः** - दः आदिर्यस्य स दादिस्तस्य दादेः बहुव्रीहिः। दादेः षष्ठ्यन्तं, धातोः षष्ठ्यन्तं, घः प्रथमान्तम्।

**अनुवृत्तिः** - पदस्य, हः, झलि, अन्ते।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - उपदेशकाले यो धातुः दकारादिः वर्तते, तदवयवस्य हकारस्य स्थाने घकारो भवति, पदान्ते झलि च परे।

**विशेषार्थः** - उपदेशे किम? अधोक् इत्यत्र यथा स्यात्। अत्र उपदेशे पदस्य किम् प्रयोजनम्? अत्र द्वे प्रयोजने स्तः। अधोक् इत्यस्मिन् धत्वं भवति, एवं दामलिट् इत्यस्मिन् धत्वस्य निवृत्तिः। अधोक् इति 'दुह-प्रपूरणे धातोः लङ्लकारस्य रूपमस्ति। दुह् धातोः लङ्लकारे, तिप्रत्यय, सार्वधातुक संज्ञायां, शप् इत्यादिकृत्वा, अदादित्वात् लुक् कृते 'दुह् + ति' भवति। 'इतश्च' इत्यनेन इकारलोपे एवं अटः आगमे लघूपधगुणे च कृते 'अदोह् + त' इति जाते 'यदागमा स्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति परिभाषा-बलेन 'अदोह्'-धातु रजादिः भवति। 'हलङ्यादिसूत्रेण 'ति' इत्यस्य तकारस्य लोपे कृते अदोह् इत्येवं जातम्। अत्र पदान्ते हकारः विद्यमानोस्ति, अतः अस्मिन् सूत्रे उपदेशे इति पदस्य ग्रहणेन वर्तमाने अजादित्वं सन्, अपि उपदेशावस्थायां दकारादिं मत्वा अदोह् इत्यस्य हकारस्य घकारः भवति, यस्मिन् 'एकाचो बशो...' इति सूत्रेण भष्भावं कृत्वा अधोघ् भवति। धकारस्य जशत्वे चर्त्वे च कृते अधोक् रूपं सिद्धं भवति। यदि उपदेश पद न स्यात् तर्हि वर्तमाने दकारादि न भूत्वा अजादित्वात् घत्वमेव न भविष्यति। इत्थम् उपदेश-पदेन अव्याप्तिदोषस्य परिहारः कृतः।

**साधनिका : - दामलिट्**

ग्रीवासु गवादिपशुबन्धनार्थरज्जुपर्यायो दामशब्दः। दाम लेढीति लिह-आस्वादने दामलिट्। तमात्मन इच्छतीत्यर्थे 'सुप आत्मनः क्यच्' इति क्यचि, अनुबन्धलोपे 'सनाद्यन्ता धातवः' इति धातुत्वात्, ततः क्विप्, अनुबन्धलोपे, अल्लोपे यलोपे च 'दामलिह्' इति शब्दात् प्रातिपदिकत्वात् सुप्रत्यये, तस्य लोपे च कृते 'हो ढः' इति ढत्वे, जश्त्वे 'वाऽवसाने' इति चर्त्वविकल्पे दामलिट् - दामलिड् इति रूपम्भवति।

**( ३२६ ) एकाचो बशो भष् झषन्तस्य स्ध्वोः। ८।२।३७॥**

धातोरवयवो य एकाज् झषन्तस्तदवयवस्य बशः स्थाने भष् स्यात्सकारे ध्वशब्दे पदान्ते च। एकाचो धातोः इति समानाधिकरण्येनान्वये त्विह न स्यात् - गर्दभमाचष्टे गर्दभयति ततः क्विप् णिलोपः - गर्धप्। झलीति निवृत्तम्, स्ध्वोर्ग्रहण सामर्थ्यात्। तेनेह न दुग्धम्, दोग्धा। व्यपदेशिवद्भावेन धात्वयवत्वाद्भष्भावे; जत्वचर्त्वे धुक्-धुग्, दुहौ, दुहः। षत्वचर्त्वे-धुक्षु।

---

**३२६ - पदच्छेदः** - एकाचः, बशः, भष्, झषन्तस्य, स्ध्वोः। अनेकपदमिदं सूत्रम्।

**सूत्रप्रकारः** - एकोऽच् यस्मिन्, स एकाच, तस्य एकाचः। झष् अन्ते यस्य स झषन्तः, तस्य झषन्तस्य। स् च ध्व् च स्ध्वौ, तयोः स्ध्वोः एकाचः षष्ठ्यन्तं, बशः षष्ठयन्तं, भष् प्रथमान्तं, झषन्तस्य षष्ठ्यन्तं, स्ध्वोः सप्तम्यन्तम्।

**अनुवृत्तिः** - पदस्य, धातोः, अन्ते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - एकाच्कस्य झषन्तशब्दस्य अवयवो यो बश् प्रत्याहारः (ब, ग, ड, द) तत्स्थाने भष् प्रत्याहारः (भ, घ, ढ, ध) इति यथाक्रमं भष्भावो भवति, स्, च ध्व् च इति स्ध्वौ, तयोर्नाम सकारे ध्वशब्दे पदान्ते च।

**विशेषार्थः** - गर्दभमाचष्टे गर्दभयतीति विग्रहे गर्दभ् इति शब्दात् 'तत्करोति तदाचष्टे' इति णिच्प्रत्ययेऽनुबन्धलोपे, 'सनाद्यन्ता धातवः' इति धातुत्वात् कर्तरि क्विप्प्रत्ययः, कपावितौ, वेर्लोपः, 'णेरनिटि' इति णिलोपः, गर्दभ् इत्यस्मात् सुप्रत्ययः, हलङ्यादिलोपः, 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति भष्भावेन दकारस्य धकारः, 'वाऽवसाने' इति विकल्पेन चर्त्वेन् गर्धप् इति रूपम्भवति। अत्र एकाचो धातोः झषन्तस्य इत्यन्ये गर्दभ् इत्यस्य सुब्धातोरनेकाच्त्वात् दकारस्य भष्भावो न स्यात्, किन्तु धात्ववयवस्य झषन्तस्येत्यन्वये तु गर्दभ् इति एकाचो झषन्तस्य धात्वयवत्वात् तदवयवस्य दकारस्य भष्भावो भवत्येव।

**साधनिका : - धुक्-धुग्**

अत्र दुह-प्रपूरणे इत्यस्माद्धातोः क्विप्, सर्वापहारलोपे, प्रातिपदिकत्वात्, सुप्रत्ययः, हलङ्यादिलोपः, 'दादेर्धातोर्घः' इति धातोः हकारस्य घकारः, विशिष्टः अपदेशः व्यपदेशः मुख्यव्यवहारः, सोऽस्यास्तीति व्यपदेशी, तेन तुल्यं व्यपदेशिवत्, धातावेव धात्ववयवत्वव्यवहारो गौणः राहोश्शिरः इत्यादिवद्भावेन 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति भष्भावेन दकारस्य धकारः, घस्य स्थाने जश्त्वेन गकारः, तस्य चर्त्वेन विकल्पेन ककारः, धुक् इति भवति। विकल्पाभावे धुग् इति रूपम्भवति।

**दुह्** शब्दस्य रूपाणि यथा-

| | | | |
|---|---|---|---|
| धुक्-धुग् | दुहौ | दुहः | प्रथमा |
| दुहम् | दुहौ | दुहः | द्वितीया |
| दुहा | धुग्भ्याम् | धुग्भिः | तृतीया |
| दुहे | धुग्भ्याम् | धुग्भ्यः | चतुर्थी |
| दुहः | धुग्भ्याम् | धुग्भ्यः | पञ्चमी |
| दुहः | दुहोः | दुहाम् | षष्ठी |
| दुहि | दुहोः | धुक्षु | सप्तमी |
| हे धुक्-धुग् | हे दुहौ | हे दुहः | सम्बोधनम् |

**( ३२७ ) वा द्रुहमुहष्णुहष्णिहाम्। ८। २। ३३॥**

**एषां हस्य वा घः स्याज्झलि पदान्ते च। पक्षे ढः। ध्रुक्-ध्रुग्, ध्रुट्-ध्रुड्, द्रुहौ, द्रुहः। ध्रुग्भ्याम्-ध्रुड्भ्याम्। ध्रुक्षु-ध्रुट्त्सु-ध्रुट्सु। एवं मुहष्णुहष्णिहाम्।**

---

३२७ - **पदच्छेदः** - वा, द्रुहमुहष्णुहष्णिहाम्। द्विपदमिदं सूत्रम्।

**सूत्रसमास** - द्रुहश्च मुहश्च ष्णुहश्च ष्णिट् च तेषामितरेतरयोगद्वन्द्वो द्रुहमुहष्णुहष्णिहः, तेषां द्रुहमुहष्णुहष्णिहाम्। वा अव्ययपदं, ध्रुहमु-हष्णुहष्णिहाम् षष्ठ्यन्तम्।

**अनुवृत्तिः** - पदस्याधिकार, झलि, अन्ते, घः।

**सूत्रप्रकारः** - विधिसूत्रम् (विकल्प)

**सरलार्थः** - द्रुह्, मुह्, ष्णुह्, ष्णिह् एषाम् चतुर्ण्णां धातूनां हकारस्य स्थाने विकल्पेन घकारः भवति, झल् प्रत्याहारे परे भवति तदा वा, पदान्ते।

**साधनिका : - ध्रुक्-ध्रुग्, ध्रुट्-ध्रुड्**

अत्र द्रुह - जिघांसायाम् इति धातोः 'अन्येभ्योऽपि दृश्यते' इति सूत्रेण क्विप्प्रत्यये, क्विप् इत्यत्र ककारस्य 'लशक्वतद्धिते' इत्यनेन इत्संज्ञायाम्, लोपे च, पकारस्य 'हलन्त्यम्' इत्यनेन इत्संज्ञायाम्, लोपे च, इकार उच्चारणार्थं, वकारस्य 'वेरपृक्तस्य' इत्यनेन लोपे द्रुह इत्यस्माद् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां सु प्रत्यये अनुबन्धलोपे, 'हल्ङ्यायप,...' इत्यनेन सकारस्य लोपे, 'झलां जशोऽन्ते' इत्यनेन सूत्रेण हकारस्य स्थाने गकारे प्राप्ते 'हो ढः' इत्यनेन हकारस्य स्थाने ढकारे प्राप्ते 'वा द्रुहमुहष्णुहष्णिहाम्' इति सूत्रेण धातोः हकारस्य स्थाने विकल्पेन घकारे द्रुघ् इति दशायाम् 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति भष्भावेन धातोः दकारस्य धकारः 'ध्रुघ्' इत्यत्र 'झलां जशोऽन्ते' इति सूत्रेण घकारस्य स्थाने गकारे 'वाऽवसाने' इति सूत्रेण विकल्पेन गकारस्य स्थाने चर्त्वेन ककारे ध्रुक् इति। चर्त्वविकल्पाभावे ध्रुग् इति रूपम्भवति। 'वा द्रुहमुहष्णुहष्णिहाम्' इति विकल्पाभावे होढ इति ढ्त्वेन जश्त्वे च कृते ध्रुट्-ध्रुड् इति रूपम्भवति।

**द्रुह्** - इति शब्दस्य रूपाणि यथा- (द्रोही)

| | | | |
|---|---|---|---|
| ध्रुक्-ध्रुग्, ध्रुट्-ध्रुड् | द्रुहौ | द्रुहः | प्रथमा |
| द्रुहम् | द्रुहौ | द्रुहः | द्वितीया |
| द्रुहा | ध्रुग्भ्याम्-ध्रुड्भ्याम् | ध्रुग्भिः-ध्रुड्भि | तृतीया |
| द्रुहे | ध्रुग्भ्याम्-ध्रुड्भ्याम् | ध्रुग्भ्यः-ध्रुड्भ्यः | चतुर्थी |
| द्रुहः | ध्रुग्भ्याम्-ध्रुड्भ्याम् | ध्रुग्भ्यः-ध्रुड्भ्यः | पञ्चमी |
| द्रुहः | द्रुहोः | द्रुहाम् | षष्ठी |
| द्रुहि | द्रुहोः | ध्रुक्षु-ध्रुट्त्सु-ध्रुट्सु | सप्तमी |
| हे ध्रुक्-ध्रुग्, ध्रुट्-ध्रुड् | हे द्रुहौ | हे द्रुहः | सम्बोधनम् |

**साधनिका : - ध्रुक्षु-ध्रुट्त्सु-ध्रुट्सु**

द्रुह् इत्यस्माच्छब्दात् सप्तमीबहुवचनविवक्षायां सुप्प्रत्ययेऽनुबन्धलोपे द्रुह+सु, 'हो ढः' इत्यनेन हकारस्य स्थाने ढकारे प्राप्ते, 'वा द्रुहमुहष्णुहष्णिहाम्' इत्यनेन धातोः हकारस्य स्थाने विकल्पेन धकारे कृते द्रुध्+सु इति स्थिते। 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्यनेन भष्भावेन घकारे द्रुध् + सु। 'झलां जशोऽन्ते' इत्यनेन जश्त्वेन घकारस्य स्थाने गकारे द्रुग्+सु। 'झलां जशोऽन्ते' इत्यनेन जश्त्वेन घकारस्य स्थाने गकारे द्रुग्+सु।

चर्त्वेन ककारे द्रुक्+सु। 'आदेशप्रत्ययोः' इति षत्वे ककारषकारयोः योगे क्षकारे सति 'ध्रुक्षु' इति रूपम्भवति। विकल्पाभावे 'हो ढः' इत्यनेन हकारस्य स्थाने ढकारे, 'झलां जशोऽन्ते' इति सूत्रेण ढकारस्य स्थाने डकारे, 'डः सि धुट्' इत्यनेन विकल्पेन सकारस्य धुडागमेऽनुबन्धलोपे च कृते 'खरि च' इत्यनेन चर्त्वेन धकारस्य, तकारे एवं डकारस्य टकारे सति ध्रुट्त्सु इति रूपम्भवति। विकल्पाभावे ध्रुट्+सु इत्यत्र 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वेन सकारस्य स्थाने षकारे प्राप्ते 'न पदान्ताट्टोरनाम्' इति निषेधे ध्रुट्सु इति रूपम्भवति।

**( ३२८ ) इग्यणः सम्प्रसारणम्। १।१।४५॥**

**यणः स्थाने प्रयुज्यमानो य इक् स सम्प्रसारणसंज्ञः स्यात्।**

---

३२८ - **पदच्छेदः** - इक्, यणः, सम्प्रसारणम्। त्रिपदं सूत्रम्।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - यणः (य, व, र, ल) स्थाने विधीयमानानाम् इक् (इ, उ, ऋ, ल) एतेषां सम्प्रसारणसंज्ञा भवति।

**( ३२९ ) वाह ऊठ्। ६।४।३२॥**

**भस्य वाहः सम्प्रसारणमूठ् स्यात्।**

---

३२९ - **पदच्छेदः** - वाहः ऊठ्। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - मस्य (अधिकार), सम्प्रसारणम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - भसंज्ञक वाह् इत्यस्य शब्दावयवस्य वकारस्य स्थाने सम्प्रसारणसंज्ञाः ऊठादेशो भवति।

**( ३३० ) सम्प्रसारणाच्च। ६।१।१०८॥**

**सम्प्रसारणादचि पूर्वरूपमेकादेशः स्यात्। 'एत्येधत्यूठ्सु।' ( सू. ७३ ) विश्वौहः। विश्वौहेत्यादि 'छन्दस्येव ण्विः' इति पक्षे णिजन्ताद्विच्।**

---

३३० - **पदच्छेदः** - सम्प्रसारणात्, च। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - पूर्वः, अचि (एकः, पूर्वपरयोः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सम्प्रसारणाद् परे अच्प्रत्याहारो भवति तदा पूर्वपरयोः स्थाने पूर्वरूपम् एकादशो भवति।

**साधनिका :** - विश्वौहः इत्यत्र विश्वं वाहयतीति विग्रहे विश्व उपपदाद वह-प्रापणे इति धातोः णिच्प्रत्यये अनुबन्धलोपे, उपधावृद्धौ, विश्ववाहि इत्यस्माद् धातुसंज्ञत्वात् 'अन्येभ्योऽपि दृश्यते' इत्यनेन विच्प्रत्ययेऽनुबन्धलोपे, वलादित्वात् 'आर्धधातु-कस्येड् वलादेः' इति सूत्रेण इडागमे प्राप्ते, 'नेड्वशि कृति' इत्यनेन निषेधे, णिलोपे वेः वकारस्य लोपे च, विश्ववाह् इति भवति। एवञ्च विश्वोपपदाद् वहधातोः 'छन्दसि ण्विः' इति सूत्रेण ण्विप्रत्ययेऽनुबन्धलोपे च, उपधावृद्धौ, सत्यां, विश्ववाह् इत्यस्मात् शब्दात् प्रातिपदिकत्वात् शस्-प्रत्ययः, अनुबन्धलोपः, विश्ववाह्+अस् इति स्थिते, 'यचि भम्' इत्यनेन विश्ववाह् इत्यस्य भसंज्ञायाम्, 'वाह ऊठ्' इत्यनेन भसंज्ञकस्य 'वाह' इत्यस्य वकारस्य स्थाने ऊठादेशेऽनुबन्धलोपे, विश्व+ऊआह्+अस् इति स्थिते, 'इग्यणः सम्प्रसारणम्' इति सूत्रेण ऊकारस्य सम्प्रसारणसंज्ञायाम्, 'सम्प्रसारणाच्च' इत्यनेन ऊकार-आकारयोः स्थाने पूर्वरुपे ऊकारे विश्व+ऊह+अस् इति स्थिते 'एत्येधत्यूठ्सु' इत्यनेन वृद्धिरेकादेशे, विश्वौह्+अस् इति स्थिते, वर्णसम्मेलने सस्य रूत्व-विसर्गे च कृते विश्वौहः इति रूपं सिद्धम् भवति। विश्ववाह् शब्दस्य रूपाणि यथा-

| | | | |
|---|---|---|---|
| विश्ववाट्-विश्ववाड् | विश्ववाहौ | विश्ववाहः | प्रथमा |
| विश्ववाहम् | विश्ववाहौ | विश्वौहः | द्वितीया |
| विश्वौहा | विश्ववाड्भ्याम् | विश्ववाड्भिः | तृतीया |
| विश्वौहे | विश्ववाड्भ्याम् | विश्ववाड्भ्यः | चतुर्थी |
| विश्वौहः | विश्ववाड्भ्याम् | विश्ववाड्भ्यः | पञ्चमी |
| विश्वौहः | विश्वौहोः | विश्वौहाम् | षष्ठी |
| विश्वौहि | विश्वौहोः | विश्ववाट्त्सु-विश्ववाट्सु | सप्तमी |
| हे विश्ववाट्-विश्ववाड् | हे विश्ववाहौ | हे विश्ववाहः | सम्बोधनम् |

**( ३३१ ) चतुरनडुहोरामुदात्तः। ७।१।९८॥**

**अनयोराम् स्यात्सर्वनामस्थाने परे स चोदात्तः।**

---

३३१ - **पदच्छेदः** - चतुरनडुहोः, आम्, उदात्तः। त्रिपदमिदं सूत्रम्।

**सूत्रसमासः** - चतुश्च अनडुह् च तयोरितरेतद्वन्द्वः, चतुरनडुहौ तयोः चतुरनडुहोः। चतुरनडुहोः षष्ठ्यन्तम्, आम्, प्रथमान्तम्, उदात्तः प्रथमान्तं पदमस्ति।

**अनुवृत्तिः** - सर्वनाम-स्थाने।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - चतुरनडुहौ इत्यनयोः द्वयोः आम् आगमो भवति, सर्वनामस्थाने परे, स च आगमः उदात्तो भवति।

**( ३३२ ) सावनडुहः। ७।१।८२॥**

**अस्य नुम् स्यात्सौ परे। 'आत्' इत्यधिकारादवर्णात्परोऽयं नुम्। अतो विशेषविहितेनापि नुमा आम् न बाध्यते। अमा च नुम् न बाध्यते। सोर्लोपः। नुम्विधिसामर्थ्यात् 'वसुस्त्रंसु...' इति दत्वं न। संयोगान्त-लोपस्यासिद्धत्वान्नलोपो न। अनड्वान्।**

---

३३२ - **पदच्छेदः** - सौ, अनडुहः। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - नुम्, आत् (अधिकार)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'अनडुह्' इति शब्दस्य नुम् आगमो भवति, प्रथमा एकवचने सु प्रत्यये परे।

**विशेषार्थः** - तत्र 'चतुरनडुहोरामुदात्तः' इति आम् सर्वनामस्थान-निमित्तकः सामान्यविहितः। 'सावनडुहः' इति नुम् तु सर्वनामस्थानविशेषे सौ विहितत्वाद् विशेषविहितः। स च निरवकाशत्वात् सामान्यविहितम् आमं बाधेत, सोरन्यत्राम्विधेः चरितार्थत्वात्। तथा च अनडुह् स्यात्। अनड्वान् इति न स्यात्। किञ्च सम्बुद्धौ हे अनडुह+स् इति स्थिते 'अम् सम्बुद्धौ' इति सूत्रेणामागमः आमः अपवादोऽमनुपदमेव वक्ष्यते। तत्र 'सावनडुहः' इति नुमपि प्राप्तः, स च सम्बुद्धौ असम्बुद्धौ च विहितत्वान्न सामान्यविहित। 'अम् सम्बुद्धौ' इत्यम् तु सम्बुद्धावेव विहितत्वाद् विशेषविहितः। स च निरवकाशत्वात् सामान्यं विहितं नुमं बाधेत, असम्बुद्धौ सौ नुम्विधेश्चरितार्थत्वात् ततश्च हे अनड्वन् इति न स्यात्। 'हो ढः' इति ढत्वे हे+अनड्वन् इति स्यादिति आशङ्क्य आह-आत् इति अधिकारादित्यादि नुम् बाध्यत इत्यलम्।

**साधनिका : - अनड्वान्**

अनड्वान् इत्यत्र अनः नाम शकटं वहति इति विग्रहे अनस् उपपदात् 'वह्-प्रापणे' इति धातोः 'अनसोऽश्च' इत्युणादि सूत्रेण 'अनस्' इत्यस्य सकारस्य स्थाने डकारे क्विप्-प्रत्ययेऽनुबन्धलोपे, अनड्+वह् इति स्थिते कित्वात् 'वचिस्वपियजादीनां किति' इत्यनेन वह्धातोः वकारस्य स्थाने उकारे सम्प्रसारणे, उकार-अकारयोः पूर्वरूपे सति अनडुह् इति स्थिते। प्रातिपदिकत्वात् सुप्रत्यये 'हो ढः' इत्यनेन हकारस्य स्थाने ढकारे प्राप्ते, सर्वनामस्थान-संज्ञत्वात् 'चतुरनडुहोरामुदात्तः इत्यनेन आमागमे, मित्वात् 'अनडुह्' इत्यत्र अन्त्यादचः परे 'अनडुआह्+स्' इति स्थिते, 'सावनडुहः' इत्यनेन नुमागमेऽनुबन्धलोपे, अनडुआन्ह+स् इति स्थिते, उकारस्य स्थाने यणादेशे, सोः सकारस्य लोपे, 'संयोगान्तस्य लोपः' इत्यनेन हकारस्य लोपे 'अनड्वान्' इति रूपम्भवति। अत्र सुलोपे हकारस्य च लोपे कृते नुमो नकारस्य पदान्तत्वात् 'वसुस्रंसुध्वंस्वनडुहां दः' इत्यनेन नकारस्य स्थाने दकारे प्राप्ते, किन्तु नुम्विधिसामर्थ्याद् नकारस्य स्थाने दकारो न भवति, एवं 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन पदान्तत्वाद् नकारस्य लोपे प्राप्ते, किन्तु संयोगान्तस्य लोपस्य असिद्धत्वान्नलोपो न भवति।

**( ३३३ ) अम् सम्बुद्धौ। ७।१।९९॥**

चतुरनडुहोरम् स्यात्सम्बुद्धौ। आमोऽपवादः। हे अनड्वन्। अनड्वाहौ। अनड्वाहः। अनडुहः। अनडुहा।

---

**३३३ - पदच्छेदः** - अम्, सम्बुद्धौ। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - चतुरनडुहोः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - चतुर्एवम् अनडुह् इत्यनयोः अमागमो भवति, सम्बुद्धिसंज्ञके सु प्रत्यये परे।

**साधनिका - हे अनड्वन्!**

अनडुह् इति शब्दात् प्रातिपदिकत्वात् संबुद्धिविवक्षायां सुप्रत्ययः, अमागमे प्राप्ते, 'अम् सम्बुद्धौ' इति सूत्रेण अमागमः, मित्वादन्त्यादचः परः, यण्, नुमागमः, सुलोपः संयोगादिलोपश्च, अनड्वन् इति रूपम्भवति।

**( ३३४ ) वसुस्रंसुध्वंस्वनडुहां दः। ८।२।७२॥**

सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते। अनडुद्भ्याम् इत्यादि। सान्त इति किम्? विद्वान्। पदान्त इति किम्? स्रस्तम्। ध्वस्तम्।

---

**३३४ - पदच्छेदः** - वसुस्रंसुध्वंस्वनडुहां, दः। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - वसुश्च स्रंसुश्च ध्वंसुश्च अनडुह् च तेषाम् इतरेतरयोग-द्वन्द्वो वसुस्रंसुध्वंस्वनडुहः तेषाम् वसुस्रंसुध्वंस्वनडुहां षष्ठ्यन्तं, दः प्रथमान्तम्।

**अनुवृत्तिः** - पदस्य (अधिकार), सः, अन्ते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सान्तो वसुप्रत्ययान्तः शब्दः, स्रंसु ध्वंसु-अवस्रंसने इति धातू, एषां त्रयाणां सकारस्य, तथा अनडुह् शब्दस्य हकारस्य स्थाने दकारो भवति, पदान्ते।

**विशेषार्थः** - सान्त इति किम्? विद्वस्+स् इति स्थिते 'अत्वसन्तस्य चाधातोः' इत्यनेन दीर्घे, उगिदचामिति नुमागमे, सुलोपे, संयोगान्तलोपे च विद्वान् रूपम्भवति, अत्र वसोः सकारान्तत्वाभावान्न दत्वम्। स्रस्तं ध्वस्तम् इति क्तप्रत्ययान्तम्। अत्र पदान्तत्वाभावान्न दत्वम्भवति।

**साधनिका : – अनडुद्भ्याम्** अनडुह् इति शब्दात् प्रातिपदिकत्वात् तृतीयाद्विवचन विवक्षायां 'भ्याम्'-प्रत्ययः, 'स्वादिष्वसर्वनामस्थाने' इत्यनेन 'अनडुह्' इत्यस्य पदसंज्ञत्वाद् 'वसुस्रंसुध्वंस्वनडुहां दः' इत्यनेन हकारस्य स्थाने दकारे अनडुद्भ्याम् इति रूपम्भवति।

**अनडुह्** शब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| अनड्वान् | अनड्वाहौ | अनड्वाहः | प्रथमा। |
| अनड्वाहम् | अनड्वाहौ | अनडुहः | द्वितीया। |
| अनडुहा | अनडुद्भ्याम् | अनडुद्भिः | तृतीया। |
| अनडुहे | अनडुद्भ्याम् | अनडुद्भ्यः | चतुर्थी। |
| अनडुहः | अनडुद्भ्याम् | अनडुद्भ्यः | पञ्चमी। |
| अनडुहः | अनडुहोः | अनडुहाम् | षष्ठी। |
| अनडुहि | अनडुहोः | अनडुत्सु | सप्तमी। |
| हे अनड्वन्! | हे अनड्वाहौ! | हे अनड्वाह! | सम्बोधनम्। |

**( ३३५ ) सहेः साडः सः। ८।३।५६॥**

**साड्रूपस्य सहेः सस्य मूर्धन्यादेशः स्यात्। तुराषाट्-तुराषाड्, तुरासाहौ, तुरासाहः। तुराषाड्भ्यामित्यादि। तुरं सहत इत्यर्थे 'छन्दसि सहः' ( ३४०९ ) इति ण्विः। लोके तु साहयतेः क्विप्। 'अन्येषामपि...' ( ३५३९ ) इति सूत्रेण पूर्वपदस्य दीर्घः। इति हान्ताः।**

---

३३५ - **पदच्छेदः** – सहेः, साडः सः। त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** – मूर्धन्यः (अधिकार)।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – साह्धातुजन्य साड्रूपस्य सकारस्य स्थाने षकारो भवति।

**साधनिका : – तुराषाट्-तुराषाड्** इत्यत्र तुरं सहते इति विग्रहे तुरोपपदात् षह-मर्षणे इति धातोः 'छन्दसि सहः' इत्यनेन ण्वि प्रत्ययेऽनुबन्धलोपे, वेर्वकारस्यलोपे, उपधावृद्धौ, 'अन्येषामपि दृश्यते' इति तुरोत्तरवर्तिनोऽकारस्य दीर्घे, अथवा सहेर्ण्यन्तात् क्विपि, णिलोपे, अपृक्तलोपे, 'अन्येषामपि दृश्यते' इति तुरोत्तरवर्तिनोऽकारस्य दीर्घे, 'तुरासाह्' इति शब्दात् प्रातिपदिकत्वात् सुप्रत्यये हस्य ढत्वे, तस्य जश्त्वेन डकारे, तुरासाड्+स् इति स्थिते, 'सहेः साडः सः' इति षत्वं 'वाऽवसाने' इति चर्त्वेन तुराषाट् इति रूपम्भवति।

**तुरासाह्** शब्दस्य रूपाणि भवन्ति यथा–

| | | | |
|---|---|---|---|
| तुराषाट्-तुराषाड् | तुरासाहौ | तुरासाहः | प्रथमा। |
| तुरासाहम् | तुरासाहौ | तुरासाहः | द्वितीया। |
| तुरासाहा | तुराषाड्भ्याम् | तुराषाड्भिः | तृतीया। |
| तुरासाहे | तुराषाड्भ्याम् | तुराषाड्भ्यः | चतुर्थी। |
| तुरासाहः | तुराषाड्भ्याम् | तुराषाड्भ्यः | पञ्चमी। |
| तुरासाहः | तुरासाहोः | तुरासाहाम् | षष्ठी। |
| तुरासाहि | तुरासाहोः | तुराषाट्त्सु-तुराषाट्सु | सप्तमी। |
| हे तुराषाट्-तुराषाड्! | हे तुरासाहौ! | हे तुरासाहः! | सम्बोधनम्। |

इति हकारान्ताः शब्दाः।

**( ३३६ ) दिव औत्। ७।१।८४॥**

**दिविति प्रातिपदिकस्य औत्स्यात्सौ परे। अल्विधित्वेन स्थानिवत्त्वाभावाद् 'हल्ङ्याप्...' ( सू. २५२ ) इति सुलोपो न। सुद्यौः, सुदिवौ, सुदिवः। सुदिवम्, सुदिवौ**

---

**३३६ - पदच्छेदः** - दिवः, औत्। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - सौ (सावनडुहः)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - दिव् इति प्रातिपदिकसंज्ञकस्य वकारस्य स्थाने औकारादेशो भवति, सुप्रत्यये परे।

**साधनिका : - सुद्यौः**, शोभना द्यौः यस्मिन् सः, इति विग्रहे सुदिव् शब्दात् प्रातिपदिकत्वात् सुप्रत्ययः 'सुदिव्+सु' इति स्थिते, 'दिव औत्' इत्यनेन वकारस्य स्थाने औकारे, सुदिऔ+सु इन्यत्र इकारस्य यणादेशे, औकारस्य स्थानिवत्वेन हलत्वाद् वकारात्मकः परत्वमाश्रित्य प्रवर्तमानस्य सुलोपस्य अल्विधित्वात् स्थानिवत्वाभावाद् हल्ङ्यादिना सुलोपो न, सुद्यौः इति रूपम्भवति।

**( ३३७ ) दिव उत्। ६।१।१३१॥**

**दिवोऽन्तादेश उकारः स्यात्पदान्ते। सुद्युभ्याम्। सुद्युभ्याम्। सुद्युभिः इत्यादि इति वान्ताः। चत्वारः। चतुरः। चतुर्भिः। चतुर्भ्यः।**

---

**३३७ - पदच्छेदः** - दिवः, उत्। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - पदान्तात्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - दिव् इति प्रातिपदिकसंज्ञकस्य वकारस्य स्थाने उकारादेशो भवति, पदान्ते सति।

**साधनिका : - सुद्युभ्याम्** शोभना द्यौः यस्मिन् सः, इति विग्रहे सुदिव् शब्दात् प्रातिपदिकत्वात् तृतीयाद्विवचनविवक्षायां भ्याम्प्रत्ययः, 'सुदिव्+भ्याम्' इति स्थिते, 'दिव उत्' इत्यनेन वकारस्य स्थाने उकारे, सुदिउ+भ्याम् इत्यत्र इकारस्य यणादेशे सति सुद्युभ्याम् इति रूपम्भवति।

**सुदिव्** - शब्दस्य रूपाणि भवन्ति यथा-

| | | | |
|---|---|---|---|
| सुद्यौः | सुदिवौ | सुदिवः | प्रथमा। |
| सुदिवम् | सुदिवौ | सुदिवः | द्वितीया। |
| सुदिवा | सुद्युभ्याम् | सुद्युभिः | तृतीया। |
| सुदिवे | सुद्युभ्याम् | सुद्युभ्यः | चतुर्थी। |
| सुदिवः | सुद्युभ्याम् | सुद्युभ्यः | पञ्चमी। |
| सुदिवः | सुदिवोः | सुदिवाम् | षष्ठी। |
| सुदिवि | सुदिवोः | सुद्युषु | सप्तमी। |
| हे सुद्यौः! | हे सुदिवौ! | हे सुदिवः! | सम्बोधनम्। |

इति वकारान्ताः शब्दाः।

**( ३३८ ) षट्चतुर्भ्यश्च ७।१।५५॥**

**षट्संज्ञकेभ्यश्चतुरश्च परस्यामो नुडागमःस्यात्। णत्वम्। द्वित्वम्। चतुर्णाम्।**

३३८ - **पदच्छेदः** - षट्चतुर्भ्यः, च। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - षट् च, चत्वारश्च, षट्चत्वारः। तेषामितरेतरद्वन्द्वः, तेभ्यः षट्चतुर्भ्यः। षट्चतुर्भ्यः पञ्चम्यन्तं, च अव्ययपदम्।

**अनुवृत्तिः** - नुट्, आमि।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - षट्संज्ञकेभ्यः एवं चतुर्शब्दात् परस्य षष्ठीविभक्ति बहुवचनस्य आम् प्रत्ययस्य नुडागमो भवति।

**साधनिका : - चत्वारः** इत्यत्र चते-याचने इति धातोः 'चतेरूरन्' इत्युणादिसूत्रेण उरन्प्रत्ययेऽनुबन्धलोपे, 'चतुर्' इति शब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचनविवक्षायां जस् प्रत्ययः, अनुबन्धलोपः, चतुर्+अस् 'चतुरनडुहोरामुदात्तः' इत्यनेन आमागमः, मित्वादन्त्यादचः परः, चतुआर्+अस् इति स्थिते, यणादेशे, रेफस्य विसर्गे चत्वारः इति रूपम्भवति।

**साधनिका : - चतुरः** इत्यत्र चते-याचने इति धातोः, 'चतेरूरन्' इत्युणादिसूत्रेण उरन् प्रत्ययेऽनुबन्धलोपे, चतुर् इति शब्दात् प्रातिपदिकत्वाद द्वितीयाबहुवचनविवक्षायां शस्-प्रत्ययः, अनुबन्धलोपः, चतुर+अस् रेफस्य विसर्गे चतुरः इति रूपम् सिद्धम्।

**साधनिका : - चतुर्ण्णाम्** इत्यत्र चते-याचने इति धातोः 'चेतरूरन्' इति उणादिसूत्रेण उरन् प्रत्ययेऽनुबन्धलोपे, चतुर् इति शब्दात् प्रातिपादिकत्वात् षष्ठीबहुवचनविवक्षायां आम् प्रत्यये, अनुबन्धलोपे, चतुर्+आम् इति स्थिते, 'षट्चतुर्भ्यश्च' इति नुट् आगमेऽनुबन्धलोपे चतुर्+न्+आम् इति स्थिते, णत्वे, 'अचोरहाभ्यांद्वे' इति णकारस्य द्वित्वम्, चतुर्णाम् इति रूपम् सिद्धम्।

**( ३३९ ) रोः सुपि। ८।३।१६॥**

**सप्तमीबहुवचने रोरेव विसर्जनीयो नान्यरेफस्य। षत्वम्। षस्यद्वित्वे प्राप्ते।**

---

३३९ - **पदच्छेदः** - रोः, सुपि। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - खरि, विसर्जनीयः।

**सूत्रप्रकारः** - नियमसूत्रम्।

**सरलार्थः** - सप्तमीबहुवचने सुप् प्रत्यये परे रोः रेफस्यैव स्थाने विसर्गो भवति, अन्यस्य रेफस्य स्थाने विसर्गो न भवति।

**( ३४० ) शरोऽचि। ८।४।४९॥**

**अचि परे शरो न द्वे स्तः। चतुर्षु। प्रियचत्वाः। हे प्रयचत्वः। प्रियचत्वारौ। प्रियचत्वारः। गौणत्वे तु नुट् नेष्यते। प्रियचतुराम्। प्राधान्ये तु स्यादेव। परमचतुर्णाम्। इति रेफान्ताः। कमलं कमलां वा आचक्षणः कमल्, कमलौ, कमलः। षत्वम्। कमल्षु। इति लान्ताः।**

---

३४० - **पदच्छेदः** - शरः, अचि। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - द्वे, न।

**सूत्रप्रकारः** - विधि (निषेध) सूत्रम्।

**सरलार्थः** - शर् (श, ष, स, ह) प्रत्याहारस्य द्वित्वं न भवति, अच्प्रत्याहारे परे।

**साधनिका :** – चतुर्षु चतुर् इत्यस्माद् शब्दात् प्रातिपदिकत्वात् सप्तमी बहुवचनविवक्षायां सुप् प्रत्ययः, अनुबन्धलोपः, 'चतुर्+सु' इति स्थिते, 'आदेशप्रत्यययोः' इति षत्वे, 'खरवसानयोर्विसर्जनीयः' इति रेफस्य स्थाने विसर्गो न भवति, चतुर्षु इति रूपं सिद्धम्।

नित्यबहुवचनान्तः चतुर् शब्दः। तस्य रूपाणि भवन्ति यथा– चत्वारः। चतुरः। चतुर्भिः। चतुर्भ्यः। चतुर्भ्य। चतुर्णाम्। चतुर्षु।

**साधनिका :** – **प्रियचत्वाः** – प्रियाः चत्वारो यस्य सः प्रियचत्वाः इति विग्रहे प्रियचतुर् इति शब्दात् प्रातिपदिकत्वात् प्रथमैकवचनात् सु प्रत्ययः, अनुबन्धलोपः, प्रियचतुर्+स् 'चतुरनडुहोरामुदात्तः' इत्यनेन आम् आगमः, मित्वादन्त्यादचः परः, प्रियचतु आर+स् इति स्थिते, यणादेशः, सस्यलोपे, रेफस्य स्थाने रुत्वविसर्गो प्रियचत्वाः इति रूपं सिद्धम्।

**साधनिका :** – **प्रियचतुराम्** – प्रियाः चत्वारो यस्य सः, इति विग्रहे प्रियचतुर् इति शब्दात् प्रातिपदिकत्वात् षष्ठीबहुवचनविवक्षायाम् आम्–प्रत्ययः, चतुर्+आम् 'षट्चतुर्भ्यश्च' इति सूत्रेण नुट् आगमे प्राप्ते, गौणत्वाद् नुट् आगमो न भवति, प्रियचतुर्+आम् इति प्रियचतुराम्। प्रियचतुर् शब्दस्य रूपाणि यथा–

**प्रियचतुर्** शब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| प्रियचत्वाः | प्रियचत्वारौ | प्रियचत्वारः | प्रथमा। |
| प्रियचत्वारम् | प्रियचत्वारौ | प्रियचतुरः | द्वितीया। |
| प्रियचतुरा | प्रियचतुर्भ्याम् | प्रियचतुर्भिः | तृतीया। |
| प्रियचतुरे | प्रियचतुर्भ्याम् | प्रियचतुर्भ्यः | चतुर्थी। |
| प्रियचतुरः | प्रियचतुर्भ्याम् | प्रियचतुर्भ्यः | पञ्चमी। |
| प्रियचतुरः | प्रियचतुरोः | प्रियचतुराम् | षष्ठी। |
| प्रियचतुरि | प्रियचतुरोः | प्रियचतुर्षु | सप्तमी। |
| हे प्रियचत्वः! | हे प्रियचत्वारौ! | हे प्रियचत्वारः! | सम्बोधनम्। |

**साधनिका :** – **परमचतुर्णाम्** – परमाश्च ते चत्वारः इति विग्रहे परमचतुर् इति शब्दात् प्रातिपदिकत्वात् षष्ठीबहुवचनविवक्षायाम् आम्–प्रत्ययः परमचतुर् + आम् 'षट्चतुर्भ्यश्च' इति नुट् आगमे अनुबन्धलोपे, परमचतुर्+न्+आम् इति स्थिते, ण्त्वे, परमचतुर्णाम् इति रूपम् सिद्धम्।

इति रेफान्ताः शब्दाः।

**साधनिका :** – **कमल्** अत्र कमलं पद्मम्, अथवा कमला लक्ष्मीः अतः कमलमाचष्टे इत्यर्थे कमलशब्दात् अथवा कमलाशब्दात् 'तत्करोति तदाचष्टे' इति वार्तिकेन णिचि, 'सनाद्यन्ता धातवः' इति धातुत्वात् तदवयवस्य सुपो लुकि च कृते, 'णाविष्ठवत्' इति इष्ठवत्वात् टिलोपे, कमल् इति शब्दात् प्रातिपदिकत्वात् सुप्रत्ययः, अनुबन्धलोपे, कमल्+स् इति स्थिते, हल्ङ्यादिना सोर्लोपे, कमल्, इति सिद्धम्।

**कमल्** शब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| कमल् | कमलौ | कमलः | प्रथमा। |
| कमलम् | कमलौ | कमलः | द्वितीया। |
| कमला | कमल्भ्याम् | कमल्भिः | तृतीया। |
| कमले | कमल्भ्याम् | कमल्भ्यः | चतुर्थी। |
| कमलः | कमल्भ्याम् | कमल्भ्यः | पञ्चमी। |
| कमलः | कमलोः | कमलाम् | षष्ठी। |
| कमलि | कमलोः | कमल्सु | सप्तमी। |
| हे कमल् | हे कमलौ | हे कमलः | सम्बोधनम्। |

इति लकारान्ताः शब्दाः।

**( ३४१ ) मो नो धातोः। ८।२।८४॥**

**मान्तस्यधातोर्नः स्यात्पदान्ते। नत्वस्यासिद्धत्वान्नलोपो न।**

**प्रशाम्यतीति-प्रशान्, प्रशामौ, प्रशामः। प्रशान्भ्यामित्यादि।**

---

३४१ - **पदच्छेदः** - मः, नः, धातोः। त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** - पदस्य (अधिकार), अन्ते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - मकारान्तस्य धातोः मकारस्य स्थाने नकारो भवति, पदान्ते।

**साधनिका :** - प्रशान् इत्यत्र प्र उपसर्गात् 'शमु उपशमे' इति धातोः क्विप् प्रत्ययः, अनुबन्धलोपः, 'अनुनासिकस्य क्विझलोः' क्ङिति इत्यनेन उपधाभूतस्य अकारस्य दीर्घः प्रशाम् इति शब्दात् प्रातिपदिकत्वात् सुप्रत्ययः, अनुबन्धलोपः, प्रशाम्+स् इति स्थिते, 'मो नो धातोः' इति सूत्रेण मकारस्य स्थाने नकारे, प्रशान्+स् इति स्थिते, हल्ङ्यादिना सोः सलोपे, 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन नकारस्य लोपे प्राप्ते, किन्तु धातोर्मकारस्य स्थाने जातस्य नकारस्य असिद्धत्वात् नलोपो न भवति, प्रशान् इति रूपम्भवति।

**प्रशाम्** इति शब्दस्य रूपाणि यथा-

| | | | |
|---|---|---|---|
| प्रशान् | प्रशामौ | प्रशामः | प्रथमा। |
| प्रशामम् | प्रशामौ | प्रशामः | द्वितीया। |
| प्रशामा | प्रशाम्भ्याम् | प्रशान्भिः | तृतीया। |
| प्रशामे | प्रशान्भ्याम् | प्रशान्भ्यः | चतुर्थी। |
| प्रशामः | प्रशान्भ्याम् | प्रशान्भ्यः | पञ्चमी। |
| प्रशामः | प्रशामोः | प्रशामाम् | षष्ठी। |
| प्रशामि | प्रशामोः | प्रशान्सु | सप्तमी। |
| हे प्रशान्! | हे प्रशामौ! | हे प्रशामः! | सम्बोधनम्। |

**( ३४२ ) किमः कः। ७।२।१०३॥**

**किमः कः स्याद्विभक्तौ। अकच्सहितस्याप्ययमादेशः। कः, कौ, के। कम्, कौ, कान् इत्यादिसर्ववत्।**

---

३४२ - **पदच्छेदः** - किमः, कः। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - विभक्तौ।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - किम् शब्दस्य स्थाने कादेशो भवति, विभक्तिसंज्ञके प्रत्यये परे।

**विशेषार्थः** - 'अव्ययसर्वनाम्नामकच्प्राक्टेः' इति सूत्रेण विहितस्य अकच् प्रत्ययान्तस्य किम् शब्दस्य स्थाने कादेशो भवति, विभक्तिसंज्ञके प्रत्यये परे।

**साधनिका :** - कः इत्यत्र किम् सर्वनाम-शब्दात् प्रातिपदिकत् प्रथमैकवचनविवक्षायां सु-प्रत्यये, अनुबन्धलोपे, 'किम्+स्' इति स्थिते, 'किमः कः' इत्यनेन कादेशे, क+स् इति स्थिते, सस्य रूत्वे विसर्गे च कृते 'कः' इति रूपं सिद्धम्।

**मकारान्त पुँल्लिङ्ग किम्** शब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| कः | कौ | के | प्रथमा। |
| कम् | कौ | कान् | द्वितीया। |
| केन | काभ्याम् | कैः | तृतीया। |
| कस्मै | काभ्याम् | केभ्यः | चतुर्थी। |
| कस्मात्-द् | काभ्याम् | केभ्यः | पञ्चमी। |
| कस्य | कयोः | केषाम् | षष्ठी। |
| कस्मिन् | कयोः | केषु | सप्तमी। |

(त्यदादि-शब्देषु सम्बोधनं नास्ति - त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम् - इति त्यदादयः।)

**( ३४३ ) इदमो मः। ७।२।१०८॥**

**इदमो मस्य मः स्यात्सौ परे। त्यदाद्यत्वापवादः।**

---

३४३ - **पदच्छेदः** - इदमः, मः। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - तदोः सः सावनन्त्ययोः सौ।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इदम् शब्दस्य मकारस्य स्थाने मकारो भवति, सु प्रत्यये परे। 'त्यदादीनाम' इति अत्वस्यापवादः।

**( ३४४ ) इदोऽय् पुँसि। ७।२।१११॥**

**इदम इदोऽय स्यात्सौ पुंसि। सोर्लोपः। अयम्। त्यदाद्यत्वं पररुपत्वं च।**

---

३४४ - **पदच्छेदः** - इदः, अय्, पुंसि। त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** - इदमः, सौ।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इदम् शब्दरूप अङ्गस्य इद् भागस्य स्थाने अय् आदेशो भवति, पुँल्लिङ्गे सुप्रत्यये परे।

**साधनिका :** - अयम् इत्यत्र इदम् शब्दात् प्रातिपदिकत्वात् सुप्रत्ययः, अनुबन्धलोपः, इदम्+स् इति स्थिते, 'त्यदादीनामः' इत्यनेन सूत्रेण मकारस्य स्थाने अकारे प्राप्ते, 'इदमो मः' इति सूत्रेण मकारस्य स्थाने मकारे एव, 'इदोऽय् पुंसि' इत्यनेन इदम् शब्दस्य इद् भागस्य स्थाने अय् आदेशे अय् अम् + स् इति स्थिते, हल्ङ्यादिना सोः सकारस्य लोपे कृते अयम् इति रूपं सिद्धम्।

**( ३४५ ) दश्च। ७।२।१०९॥**

**इदमो दस्य मः स्याद्विभक्तौ। इमौ, इमे। त्यदादेः सम्बोधनं नास्ति, इत्युत्सर्गः।**

---

३४५ - **पदच्छेदः** - दः, च। द्विपदमिदं सूत्रम्

**अनुवृत्तिः** - विभक्तौ (अष्टन् आ विभक्तौ), मः (इदमोमः)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'इदम्'-शब्दस्य दकारस्य स्थाने मकारो भवति, विभक्तौ परे।

**साधनिका :** - इमौ इत्यत्र इदम्-शब्दात् प्रातिपदिकत्वात् प्रथमा-द्विवचनविवक्षायाम् औ-प्रत्ययः, इदम्+औँ इति स्थिते 'त्यादादीनामः' इति मकारस्य स्थाने अकारे, इदअ+औ इति स्थिते, 'अतो गुणे' इति अकार

अकारयोः स्थाने पररूपे 'इद+औ' इति स्थिते, 'दश्च' इत्यनेन दकारस्य स्थाने मकारे 'इम+औ' इत्यवस्थायाम् अकार-औकारयोः स्थाने आकारे पूर्वसवर्णदीर्घे प्राप्ते, 'नादिचि' इत्यनेन पूर्वसवर्णदीर्घ-निषेधे, वृद्धौ, इमौ इति रूपं सिद्धम्।

**( ३४६ ) अनाप्यकः। ७।२।११२॥**

**अककारस्येदम इदोऽन् स्यादापि विभक्तौ। आप् इति टा इत्यारभ्य सुपः पकारेण प्रत्याहारः। अनेन।**

---

३४६ - **पदच्छेदः** - अन्, आपि, अकः। त्रिपदमिदं सूत्रम्।

**सूत्रसमासः** - नास्ति क् यस्मिन् स अक्, तस्य अकः बहुव्रीहिः। अन् प्रथमान्तम्, आपि सप्तम्यन्तम्, अकः षष्ठ्यन्तम्।

**अनुवृत्तिः** - इदमः, इदः, विभक्तौ।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ककाररहितस्य 'इदम्' शब्दस्य इदः स्थाने अन् आदेशो भवति, आप् इति प्रत्याहारः, तृतीयैकवचनात् टाप्रत्ययात् सप्तमी बहुवचनं सुप् प्रत्ययं यावत्, इत्थं पञ्चदश प्रत्ययेषु परेषु भवति।

**साधनिका :** - अनेन इत्यत्र इदम् शब्दात् प्रातिपदिकत्वात् तृतीया बहुवचनविवक्षायां टाप्रत्यः, अनुबन्धलोपः, इदम्+आ इति स्थिते 'त्यदादीनामः' इति मकारस्य स्थाने अकारे, 'इदअ+आ' इति स्थिते, 'अतो गुणे' इति अकारअकारयोः स्थाने पररूपे अकारे 'इद+आ' इति स्थिते, 'दश्च' इति दकारस्य स्थाने मकारे प्राप्ते, 'अनाप्यकः' इति इदम्-शब्दस्य इद्-स्थाने अन् आदेशे अन+आ इति स्थिते, टा स्थाने इन आदेशे, अकारइकारयोः स्थाने गुणे, अनेन इति रूपं सिद्धम्।

**( ३४७ ) हलि लोपः। ७।२।११३॥**

**अककारस्येदम इदो लोपः स्यादापि हलादौ। 'नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे' ( प.-१०६ )**

---

३४७ - **पदच्छेदः** - हलि, लोपः। द्विपदमिदं सूत्रम्

**अनुवृत्तिः** - आपि (विभक्तौ), अकः, इदमः, इदः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ककाररहितस्य इदम् शब्दस्य 'इद्' इत्यस्य लोपो भवति, आप् इति प्रत्याहारः। हलादौ, तेषु भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस्, सुप् इत्थं सप्तसु प्रत्ययेषु परेषु।

**विशेषार्थः** - अलोऽन्त्यपरिभाषया इदो दकारस्य लोपमाशङ्क्य कथयति यद् 'नानर्थकेऽलोऽन्त्य-विधिरनभ्यासविकारे' इति परिभाषा स्वार्थमुपस्थापयति यद् अभ्यासविकारम् अपहाय अन्यत्र 'अलोऽन्त्यस्य' इति परिभाषा न प्रवर्तते। अतः 'हलि लोपः' इति सूत्रमिदं ककाररहितस्य इदम्-शब्दस्य 'इद्' इत्यस्य लोपङ्करोति।

**( ३४८ ) आद्यन्तवदेकस्मिन्। १।१।२१॥**

**एकस्मिन्क्रियमाणं कार्यमादाविवान्त इव च स्यात्। आभ्याम्।**

---

३४८ - **पदच्छेदः** - आद्यन्तवत्, एकस्मिन्। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - आदिश्च अन्तश्च तयोरितरेतद्वन्द्वः, आमन्तौ, तयोरिव आद्यन्तवत्। अव्ययपदम्। एकस्मिन् सप्तम्यन्तपदम्।

**सूत्रप्रकारः** - अतिदेशसूत्रम्।

**सरलार्थः** - एकस्मिन् वर्णयुक्ते शब्दे क्रियमाणं कार्यं यथा-देवदत्तस्य एकस्मिन् पुत्रे सति, स एव ज्येष्ठः, स एव मध्यमः, स एव कनिष्ठः, इति व्यवहारवद् आदावपि भवति, अन्ते चापि भवति।

**साधनिका : – आभ्याम्** इत्यत्र इदम् शब्दात् प्रातिपदिकत्वात् तृतीया द्विवचनविवक्षायां भ्याम् प्रत्ययः, 'इदम् + भ्याम्' इति स्थिते, 'त्यदादीनामः' इत्यनेन मकारस्य स्थाने अकारे इदअ + भ्याम् इति स्थिते, 'अतो गुणे' इति अकारअकारयोः स्थाने पररूपे अकारे कृते 'इद+भ्याम्' इति स्थिते 'दश्च' इत्यनेन दकारस्य स्थाने मकारे प्राप्ते, 'अनाप्यकः' इति इदम् शब्दस्य इद् स्थाने अन् आदेशे प्राप्ते, 'हलि लोपः' इति इदम् शब्दस्य इद् इत्यस्य लोपे, अ+भ्याम् इति स्थिते, 'सुपि च' इति सूत्रेण अकारस्य दीर्घे आकारे, आभ्याम् इति सिद्धम्।

**( ३४९ ) नेदमदसोर-कोः। ७।१।११॥**

**अककारयोरिदमदसोर्भिस ऐस् न स्यात्। एत्वम्। एभिः। अत्वम्। नित्यत्वाद ङे स्मै। पश्चाद्धलि लोपः। अस्मै, आभ्याम्, एभ्यः। अस्मात्। आभ्याम्। एभ्यः। अस्य, अनयोः, एषाम्। अस्मिन्, अनयोः एषु। ककारयोगे तु-अयकम्, इमकौ, इमके। इमकम्, इमकौ, इमकान्। इमकेन, इमकाभ्याम् इत्यादि।**

---

३४९ - **पदच्छेदः** - न, इदमदसोः, अकोः। त्रिपदमिदं सूत्रम्।

**सूत्रसमासः** - इदञ्च अदश्च तयोरितरेतद्वन्द्वः - इदमदसौ, तयोः -इद- मदसोः। नास्ति क् ययोः तौ अकौ, तयोः अकोः। न अव्ययपदम्, इदमदसोः षष्ठ्यन्तम्, अकोः षष्ठ्यन्तम्।

**अनुवृत्तिः** - भिसः। ऐस्।

**सूत्रप्रकारः** - विधि (निषेध) सूत्रम्।

**सरलार्थः** - ककाररहितस्य इदम्-अदस् शब्दयोः भिस् इत्यस्य स्थाने ऐस् आदेशो न भवति।

**साधनिका : – एभिः** इत्यत्र इदम् शब्दात् प्रातिपदिकत्वात् तृतीया-बहुवचनविवक्षायां भिस्-प्रत्ययः, 'इदम्+भिस्' इति स्थिते, 'त्यदादीनामः' इति मकारस्य स्थाने अकारे, इदअ+भिस् इति स्थिते, 'अतो गुणे' इति पररूपे अकारे, 'इद+भिस्' इति स्थिते, 'दश्च' इति सूत्रेण दकारस्य स्थाने मकारे प्राप्ते, 'अनाप्यकः' इति इदम् शब्दस्य इद् इत्यस्य स्थाने अन् आदेशे प्राप्ते, 'हलि लोपः' इत्यनेन इदम् शब्दस्य इद् इत्यस्य लोपे कृते, अ+भिस् इति स्थिते, 'अतो भिस् ऐस्' इति भिस स्थाने ऐस् आदेशे प्राप्ते, 'आद्यन्तवदेकस्मिन्' इति नियमसूत्रसहकारेण 'सुपि च' इत्यनेन इदम् अकारस्य दीर्घे आकारे प्राप्ते, 'बहुवचने झल्येत्' इत्यनेन अकारस्य स्थाने एकारे ए+भिस् इति स्थिते, 'नेदमदसोरको' इत्यनेन सूत्रेन ऐसादेशे निषेधे एभिः इति रूपम् सिद्धम्।

**साधनिका : – अस्मै** इत्यत्र इदम् शब्दात् प्रातिपदिकत्वात् चतुर्थ्यैकवचनविवक्षायां ङेप्रत्ययः, इदम्+ङे इति स्थिते, 'त्यदादीनामः' इति मकारस्य स्थाने अकारे, इदअ+ङे इति स्थिते, 'अतो गुणे' इत्यनेन पररूपे अकारे इद+ङे इति स्थिते, 'सर्वनाम्नः स्मै' इति सूत्रेण ङे इत्यस्य स्थाने स्मै आदेशे, इद+स्मै 'दश्च' इति दकारस्य स्थाने मकारे प्राप्ते, एवम् 'अनाप्यकः' इति इदम् शब्दस्य इद् स्थाने अत् आदेशे प्राप्ते, 'हलि लोपः' इत्यनेन, इद् इत्यस्य लोपे 'अस्मै' इति रूपं सिद्धम्।

**साधनिका : – अयकम्** इत्यत्र 'इदम्'-शब्दात् 'अव्ययसर्वनाम्नामकच प्राक् टेः' इत्यनेन इदम् शब्दस्य टेः प्राक् अकच् आदेशे, इद् अक् अम् इति इदकम् इत्यस्मात् प्रातिपदिकत्वात् सुप्रत्ययः, अनुबन्धलोपः, इदकम्+स् इति स्थिते, 'त्यदादीनामः' इति मकारस्य स्थाने अकारे प्राप्ते, 'इदमो मः' इत्यनेन मकारस्य स्थाने मकरो एव, 'इदोऽय् पुंसि' इत्यनेन इद् स्थाने अय् आदेशो अयकम्+स् इति स्थिते, हल्ङ्यादिना सोः सकारस्य लोपे अयकम् इति रूपं सिद्धम्।

**( ३५० ) इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ। २।४।३२॥**

**अन्वादेशविषयेदमोऽनुदात्तोऽशादेशः स्यात्तृतीयादौ। अश्वचनं साकच्कार्थम्।**

---

**३५० - पदच्छेदः** - इदमः, अन्वादेशे, अश्, अनुदात्तः, तृतीयादौ। पञ्चपदमिदं सूत्रम्।

**सूत्रसमासः** - तृतीया आदिर्यस्य स तृतीयादिः तस्मिन् तृतीयादौ। इदमः षष्ठ्यन्तम् अन्वादेशे सप्तम्यन्तम्, अश् प्रथमान्तम्, अनुदात्तः प्रथमान्तं, तृतीयादौ सप्तम्यन्तम्। अस्मिन् सूत्रे कस्यापि पदस्य अनुवृत्तिः नायाति।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इदम् शब्दस्य स्थाने अश् आदेशो भवति, स आदेश अनुदात्तो भवति, तृतीयादिविभक्तिपरे। अन्वादेशो नाम यस्य कस्यापि कार्यस्य प्रसङ्गस्य पुनःकथनम्, आभ्यां छात्राभ्यां रात्रौ अधीता, अथ पुनः वक्ति यद्-आभ्यां छात्राभ्याम् दिवसे विश्रामः कर्तव्यः इति।

**( ३५१ ) द्वितीयाटौस्स्वेनः। २।४।३४॥**

**द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यादन्वादेशे। किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः। यथा 'अनेन व्याकरणमधीतम् एनं छन्दोऽध्यापय' इति। 'अनयोः पवित्रं कुलम् एनयोः प्रभूतं स्वम्' इति। एनम्, एनौ, एनान्। एनयोः। इति मान्ताः। गणयतेर्विच्। सुगण्, सुगणौ, सुगणः। सुगण्ट्सु-सुगणट्सु-सुगण्सु। क्विप्। 'अनुनासिकस्य क्विझलोः' (सू-२६६) इति दीर्घः। सुगाण्, सुगाणौ, सुगणः। सुगाण्ठ्सु-सुगाण्ट्सु-सुगाण्सु। इति णान्ता। परत्वादुपधादीर्घः, हल्ङ्यादिलोपः, ततो नलोपः। राजा।**

---

**३५१ - पदच्छेदः** - द्वितीयाटौस्सु, एनः। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - द्वितीया, च टाच, ओस् च, एतेषामितरेतरद्वन्द्वः-द्वितीयाटौसः, तेषु द्वितीयाटौस्सु। द्वितीयाटौस्सु सप्तम्यन्तम्, एनः प्रथमान्तम्।

**अनुवृत्तिः** - इदमः, अनुदात्तः, अन्वादेशे, एतदः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'इदम्, एतत्' एतयोः द्वयोः स्थाने 'एन' इति आदेशो भवति, द्वितीयाटौस्सु। अम्, औट्, शस्। टा, ओस्, ओस्। इत्थं षट्सु प्रत्ययेषु परेषु, अन्वादेशविषये एव।

**विशेषार्थः** - किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरूपादानमन्वादेशः। कस्यापि कार्यस्य बोधं कारयितुं ग्रहणस्य पुनः अन्यस्य कार्यस्य बोधं कारयितुं ग्रहणस्य पुनः अन्यस्य कार्यस्य बोधं कारयितुम् ग्रहणम् अन्वादेशः। अथवा एकस्य कार्यस्य अनन्तरम् अन्यस्य कार्यस्य कथनं हि अन्वादेश उच्यत इति। यथा - अनेन व्याकरणमधीतमेनं छन्दोऽध्यापयेति। अनयोः पवित्रं कुलमेनयोः प्रभूतं स्वम् इति।

**साधनिका : - एनम्** इत्यत्र इदम् शब्दात् प्रातिपदिकत्वात् द्वितीयैकव-चनविवक्षायां अम्प्रत्ययः, इदम्+अम् इति स्थिते, 'त्यदादीनामः' इत्यनेन मकारस्य स्थाने अकारे इदअ+अम्, अतो गुणेति पररूपे अकारे इद+अम् इति स्थिते, 'द्वितीयाटौस्स्वेन' इति एनादेशे 'एन+अम्' इति स्थिते, 'अमि पूर्वः' इत्यनेन पूर्वरूपे एनम् इति सिद्धम् भवति।

**साधनिका : - सुगण्** इत्यत्र सु उपसर्गपूर्वक गण-सङ्ख्याने इतिधातोः 'सत्यापपाश...' इति णिच्, अनुबन्धलोपः, अलोपः, णित्वाद् उपधावृद्धिप्राप्ते, अल्लोपस्य स्थानिवत्वाद् न उपधावृद्धिः, तस्माद् 'अन्येभ्योऽपि दृश्यते' इति विच्प्रत्ययः, अनुबन्धलोपः सुगण् इ+व् इति स्थिते, णिलोपः, वेर्वस्य लोपः, सुगण् इत्यस्मात्प्रातिपदिकत्वात्, सुप्रत्ययः, हलङ्यादिना सुलोपः, सुगण् इति रूपं सिद्धम्।

**साधनिका : - सुगण्ट्सु-सुगण्सु** इत्यत्र सुगण् इत्यस्मात्प्राति-पदिकत्वात् सप्तमीबहुवचनविवक्षायां सुप्प्रत्ययेऽबन्धलोपे, सुगण्+सु इति स्थिते, 'ङ्णोः कुकटुक् शरि' इत्यनेन विकल्पेन टुकागमेऽनुबन्धलोपे, सुगण्ट्+सु इति स्थिते, 'झलां जशोऽन्ते' इति सूत्रेण टकारस्य स्थाने डकारे प्राप्ते, 'चयो द्वितीयाः शरि

पौष्करसादेरितिवाच्यम्' इति टकारस्य विकल्पेन ठकारे, सुगण्ठ्सु इति रूपं भवति। 'चयो द्वितीयाः...' इति विकल्पाभावे सुगण्ट्सु इति रूपं भवति। 'ङ्णोः कुक्टुक् शरि' इत्यनेन विकल्पाभावे सुगण्सु इति रूपं सिद्धम्।

**साधनिका :** – **सुगाण्** सु इत्युपसर्गपूर्वाद् गण-सङ्ख्याने इतिधातोः 'सत्यापपाश...' इति णिच्, अनुबन्धलोपः, अलोपः, णित्वाद् उपधावृद्धिप्राप्ते, अल्लोपस्य स्थानिवत्वात् न उपधावृद्धिः, 'अन्येभ्योऽपि दृश्यते' इति क्विप्-प्रत्ययः, अनुबन्धलोपः, सुगण इ+व् इति स्थिते, णिलोपः, वेर्वस्य लोपः, 'अनुनासिकस्य क्विझलोः क्ङिति' इत्यनेन दीर्घः, सुगाण् इत्यस्मात्प्रातिपदिकत्वात्, सुलोपः, हल्ङ्यादिना सुलोपः, सुगाण् इति सिद्धम्। णकारान्त सुगण् शब्दस्य रूपाणि यथा-

| | | | |
|---|---|---|---|
| सुगाण् | सुगाणौ | सुगाणः | प्रथमा। |
| सुगाणम् | सुगाणौ | सुगाणः | द्वितीया। |
| सुगाणा | सुगाण्भ्याम् | सुगाण्भिः | तृतीया। |
| सुगाणे | सुगाण्भ्याम् | सुगाण्भ्यः | चतुर्थी। |
| सुगाणः | सुगाण्भ्याम् | सुगाण्भ्यः | पञ्चमी। |
| सुगाणः | सुगाणोः | सुगाणाम् | षष्ठी। |
| सुगाणि | सुगाणोः | सुगाण्सु | |
| | | सुगाण्ठ्सु-सुगाणट्सु | सप्तमी। |
| हे सुगाण्! | हे सुगाणौ! | हे सुगाणः! | सम्बोधनम्। |

**(३५२) न ङिसम्बुद्ध्योः। ८।२।८॥**

**नस्य लोपो न स्याद् ङौ सम्बुद्धौ च। हे राजन्। ङौ तु छन्दस्युदाहरणम्। 'सुपां सुलुक्...' (सू.३५६१) इति ङेर्लुक्। निषेधसामर्थ्यात्प्रत्ययलक्षणम्। 'परमे वयोमन्।' 'ङावुत्तरपदे प्रतिषेधो वक्तव्यः' (वा.४७८५) ङौ विषये उत्तरपदे परे 'न ङिसम्बुद्ध्योः' इत्यस्य निषेधो वाच्यः इत्यर्थः। चर्मणि तिला अस्य चर्मतिलः। ब्रह्मनिष्ठः। राजानौ, राजानः। राजानम्। राजानौ। 'अल्लोपोऽनः' (सू.२३४)। श्चुत्वम्। न चाल्लोपः स्थानिवत् पूर्वत्रासिद्धे तन्निषेधात्। नापि बहिरङ्गतया असिद्धः यथोद्देशपक्षे षाष्ठीं परिभाषां प्रति श्चुत्वस्यासिद्धतयाऽन्तरङ्गभावे परिभाषया अप्रवृत्तेः। जञोर्ज्ञः। राज्ञः। राज्ञा।**

---

३५२ - **पदच्छेदः** – न, ङिसम्बुद्ध्योः। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** – ङिश्च सम्बुद्धिश्च तयोरितरेतरद्वन्द्वः, ङिसम्बुद्धी, तयोः ङिसम्बुद्ध्योः। न अव्ययपदम्, ङिसम्बुद्ध्योः सप्तम्यन्तम्।

**अनुवृत्तिः** – लोपः, न।

**सूत्रप्रकारः** – विधि (निषेध) सूत्रम्।

**सरलार्थः** – नकारस्य लोपो न भवति, ङिविभक्तिपरे अथवा सम्बुद्धिपरे।

**विशेषार्थः** – नन्वत्र ङिग्रहणं व्यर्थम्, राजनि इत्यत्र भत्वात्पदत्वा-भावात् नलोपस्याप्रसक्तेरित्यत आह-ङौ तु छन्दसीति। छन्दसि एव इत्यर्थः। ननु छन्दस्यापि ङौ परतो भत्वात् पदत्वाभावात् कथं नकारस्य लोपप्रसङ्गः, येन तन्निषेधोऽर्थवान् स्यादित्यत आह – 'परमे व्योमन्' – इत्यत्र 'परमे व्योम्नि' इति स्थिते, 'सुपां सुलुक्पूर्वसव-र्णाच्छेयाडाड्यायाजालः' इति 'व्योम्नि' इत्यस्य ङिप्रत्ययस्य लोपे, 'परमे व्योमन्' इति स्थिते, ङेर्लुका लुप्तत्वेऽपि प्रत्ययलक्षणमाश्रित्य 'न ङिसम्बुद्ध्योः' इति प्राप्तस्य नलोपस्य निषेधे परमे व्योमन् इति रूपं सम्भवतीति।

**साधनिका : - राजा** इत्यत्र राजृ-दीप्तौ इति धातोः 'कनिन्युवृषि-तक्षिराजिधन्विद्युप्रतिदिवः' इत्युणादिसूत्रेण कनिन्प्रत्ययेऽनुबन्धलोपे, राजन् इत्यस्मात्प्रातिपदिकत्वात्, सुप्रत्ययः, हल्ङ्यादिना सुलोपे प्राप्ते, परत्वात् 'सर्वनामस्थान चाऽसम्बुद्धौ' इति उपधादीर्घः, तत्पश्चात् सुलोपः, 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन नलोपः 'राजा' इति रूपं सिद्धम्।

**साधनिका : - हे राजन्!** राजृ-दीप्तौ इति धातोः 'कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः' इत्युणादिसूत्रेण कनिन्प्रत्ययेऽनुबन्धलोपे, राजन् इत्यस्मात्प्रातिपदिकत्वात्, सम्बुद्धिसंज्ञकसुप्रत्ययः, हल्ङ्यादिना सुलोपः, 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे प्राप्ते, 'न ङिसम्बुद्ध्योः' इत्यनेन नलोपस्य निषेधे हे राजन्! इति रूपं सिद्धम्।

**साधनिका : - चर्मतिलः** इत्यत्र चर्मणि तिला अस्येति लौकिकविग्रहे 'चर्मन् ङि+तिल जस्' इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इति समासे, 'सुपो धातुप्रातिपदिकयोः' इति ङि एवं जस् इत्यनयोः लोपे, चर्मन् तिल इति स्थिते इत्यत्र ङिलुकः प्रत्ययलक्षणमाश्रित्य 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे प्राप्ते, 'न ङिसम्बुद्ध्योः' इति नलोपनिषेधे प्राप्ते, 'ङावुत्तरपदे प्रतिषेधो वक्तव्यः' इति वार्तिकसूत्रेण नलोपे चर्मतिलः, एवं ब्रह्मणि निष्ठा यस्य स इति ब्रह्मनिष्ठ इत्यपि रूपं सिद्धम्भवति।

**साधनिका : - राज्ञः** राजृ-दीप्तौ इति धातोः 'कनिन्युवृषि...' इत्यादिना उणादिसूत्रेण कनिन्प्रत्ययेऽनुबन्धलोपे, राजन् इत्यस्मात्प्रातिपदिकत्वात्, द्वितीयाबहुवचनविवक्षायां शस्प्रत्यये, अनुबन्धलोपे, राजन्+अस् इति स्थिते, राजन् इत्यस्य भसंज्ञायाम् 'अल्लोपोऽनः' इत्यनेन जकारोत्तरवर्तिनः अकारस्य लोपे, राजन्+अस् इति स्थिते, 'अचः परस्मिन् पूर्वविधौ' इति अल्लोपस्य स्थानिवत्वात्, श्चुत्वनिषेधे प्राप्ते, किन्तु अल्लोपो भसंज्ञापेक्षो बहिर्भूतस्वादिप्रत्ययापेक्षो बहिरङ्गस्याल्लोपस्यासिद्धत्वात् अकारेण व्यवधानात्कथं श्चुत्वम्भवति? इति प्रश्नं मनसि संस्थाप्य कथयति यद्-उद्देशमनतिक्रम्य यथोद्देशम्, तस्मिन् यथोद्देशपक्षे इति षष्ठी परिभाषा त्रैपादिके श्चुत्वे कर्तव्ये अन्तरङ्गोऽपि न प्रवर्तते, अतः नकारस्य स्थाने श्चुत्वेन ञकारे, राज्ञ्+इ इति स्थिते, जञोर्ज्ञः इति राज्ञि इति रूपम्भवति। 'विभाषा ङिश्योः' इति सूत्रेण जकारोत्तरवर्तिनोऽकारस्य लोपाभाव पक्षे राजनि इति रूपम् सिद्धं भवति।

**( ३५३ ) नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति। ४।२।२॥**

**सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धः, नान्यत्र 'राजश्वः' इत्यादौ। इत्यसिद्धत्वादात्व मेत्वमैस्त्वं च न। राजभ्याम्, राजभिः। राज्ञे। राजभ्यः। राज्ञः, राज्ञोः, राज्ञाम्। राज्ञि-राजनि। प्रतिदीव्यतीति-प्रतिदिवा, प्रतिदिवानौ, प्रतिदिवानः। अस्य भविषयेऽल्लोपे कृते।**

---

३५३ - **पदच्छेदः** - नलोपः, सुप्स्वरसंज्ञातुग्विधिषु, कृति। त्रिपदमिदं सूत्रम्।

**सूत्रसमासः** - नस्य लोपो नलोपः षष्ठीतत्पुरुषः। सुप् च स्वरश्च संज्ञा च तुक् च तेषामितरेतरद्वन्द्वः सुप्स्वरसंज्ञातुकः, तेषां विधयः सुप्स्वरसंज्ञातुग्विधयः षष्ठीतत्पुरुषः, तेषु सुप्स्वरसंज्ञातुग्विधिषु। नलोपः प्रथमान्तम्। सुप्स्वरसंज्ञातुग्विधिषु सप्तम्यन्तम्। कृति सप्तम्यन्तम्।

**अनुवृत्तिः** - असिद्धः (पूर्वत्रासिद्धम्)।

**सूत्रप्रकारः** - नियमसूत्रम्।

**सरलार्थः** - सुब्विधिः, स्वरविधिः, संज्ञाविधिः, कृदन्ते परतः यस्तुक इति कृति तुग्विधिः, एतेषु चतुर्षु विधिषु सत्सु नकारस्य लोपोऽसिद्धो भवति। अन्येषु विधिषु नकारस्य लोपो असिद्धो न भवति।

**साधनिका : – राजभ्याम्** इत्यत्र नलोपस्य असिद्धत्वाद् राजृ-दीप्तौ इति धातोः 'कनिन्युवृषितक्षिराजिधन-विद्युप्रतिदिवः' इति उणादिसूत्रेण कनिन्प्रत्ययेऽनुबन्धलोपे, राजन् इत्यस्मात्प्रातिपदिकत्वात्, तृतीयाद्विवचनविवक्षायां भ्याम् प्रत्यये, अनुबन्धलोपे, राजन्+भ्याम् इति स्थिते, अकारस्य दीर्घे प्राप्ते 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इत्यनेन सूत्रेण नलोपस्यासिद्धत्वात् अकारस्य दीर्घो न भवति, 'राजभ्याम्' इति सिद्धम्।

**साधनिका : – राज्ञि-राजनि** इत्यत्र राजन् शब्दात् प्रातिपदिकत्वात् सप्तम्येकवचनविवक्षायां ङिप्रत्यये, राजन्+इ इति स्थिते, 'राजन्' इत्यस्य भसंज्ञायाम् 'अल्लोपोऽनः' इति जकारोत्तरवर्तिनोऽकारस्य लोपे प्राप्ते, 'विभाषा ङिश्योः' इति विकल्पेन अलोपे श्चुत्वे राज्ञ्+इ इति स्थिते, जञोर्ज्ञः, राज्ञि इति रूपम्भवति। अकारस्य लोपविकल्पाभावे राजनि इति सिद्धम्।

**साधनिका : – प्रतिदिवा** इत्यत्र प्रत्युपसर्गपूर्वाद् दिवु-क्रीडा विजिगीषा-व्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु इति धातोः 'कनिन्युवृषितक्षिरा-जिधन्विद्युप्रतिदिवः' इत्युणादिसूत्रेण कनिन्प्रत्ययेऽनुबन्धलोपे, प्रतिदिवन् इत्यस्मात्प्रातिपदिकत्वात् सुप्रत्ययः हल्ङ्यादिना सुलोपे प्राप्ते, परत्वात् 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्युपधादीर्घः 'प्रतिदिवान्+सु' इति स्थिते, तत्पश्चात् सुलोपः, 'नलोपः प्रातिपदिकान्तस्य' इति नलोपः प्रतिदिवा (प्रतिदिवा-दिवसः) इति रूपं सिद्धम्।

नकारान्त 'राजन्' शब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| राजा | राजानौ | राजानः | प्रथमा। |
| राजानम् | राजानौ | राज्ञः | द्वितीया। |
| राज्ञा | राजभ्याम् | राजभिः | तृतीया। |
| राज्ञे | राजभ्याम् | राजभ्यः | चतुर्थी। |
| राज्ञः | राजभ्याम् | राजभ्यः | पञ्चमी। |
| राज्ञः | राज्ञोः | राज्ञाम् | षष्ठी। |
| राज्ञि-राजनि | राज्ञोः | राजसु | सप्तमी। |
| हे राजन्! | हे राजानौ! | हे राजानः! | सम्बोधनम्। |

इत्थमिव अधोलिखित अन् अन्त शब्दानां रूपाणि भवन्ति यथा–

अणिमन्, कलिमन्, गरिमन्, जडिमन्, प्रथिमन्, प्रेमन्, भूमन्, मधुरिमन्, महिमन्, रक्तिमन्, लघिमन्, शुक्लिमन् इति।

**(३५४) हलि च। ८।२।७७॥**

**रेफवान्तस्य धातोरुपधाया इको दीर्घः स्याद्धलि। न चाल्लोपस्य स्थानिवत्वम्, दीर्घविधौ तन्निषेधात्। बहिरङ्गपरिभाषया तूक्तन्यायेन न प्रवर्तते। प्रतिदीव्नः। प्रतिदीव्ना इत्यादिः। यज्वा, यज्वानौ, यज्वानः।**

---

३५४ - **पदच्छेदः** – हलि, च। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** – (वोरुपधाया दीर्घ इकः) र्वोः, उपधायाः, दीर्घः, धातोः।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – रेफान्तस्य वान्तस्य च धातोः उपधायाः इकः स्थाने दीर्घो भवति, हलादौ प्रत्यये परे।

**साधनिका - प्रतिदीव्नः** प्रतिदिवन् इत्यस्मात्प्रातिपदिकत्वात्, द्वितीयाबहुवचनविवक्षायां शस्प्रत्यये, अनुबन्धलोपे, प्रतिदिवन्+अस् इति स्थिते, 'प्रतिदिवन्' इत्यस्य भसंज्ञायाम् 'अल्लोपोऽनः' इति वकारोत्तरवर्तिनोऽकारस्य लोपे, प्रतिदिव्न्+अस् इति स्थिते, 'हलि च' इति इकारस्य स्थाने दीर्घे प्राप्ते 'अचः परस्मिन् पूर्वविधौ' इति अल्लोपस्य स्थानिवद्भावे प्राप्ते, 'न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजरश्चर्विधिषु' इति दीर्घविधौ स्थानिवद्भावे निषेधे, तथा भसंज्ञापेक्षस्याल्लोपस्य बहिर्भूतप्रत्ययापेक्षत्वेन बहिरङ्गतयाऽन्तरङ्गे दीर्घे कर्तव्ये असिद्धत्वादकारेण व्यवधानाद् हल्परत्वाभावात् कथमिह दीर्घः? इत्यत आह यथोद्देशपक्षे षष्ठी परिभाषां प्रति श्चुत्वस्यसिद्धतया अन्तरङ्गाभावे परिभाषाया अप्रवृत्तेः, इति राजन् शब्दस्योक्तन्यानेन दीर्घस्यासिद्धतया तिद्वषये 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषा न प्रवर्तते, अतः 'हलि च' इति इकारस्य स्थाने दीर्घे 'प्रतिदीव्न्+अस्' इति स्थिते, अकारलोपे विसर्गे कृते, प्रतिदीव्नः इति सिद्धम्।

**'प्रतिदिवन्'** इति शब्दस्य रूपाणि यथा-

| | | | |
|---|---|---|---|
| प्रतिदिवा | प्रतिदिवानौ | प्रतिदिवानः | प्रथमा। |
| प्रतिदिवानम् | प्रतिदिवानौ | प्रतिदीव्नः | द्वितीया। |
| प्रतिदीव्ना | प्रतिदिवभ्याम् | प्रतिदिवभिः | तृतीया। |
| प्रतिदीव्ने | प्रतिदिवभ्याम् | प्रतिदिवभ्यः | चतुर्थी। |
| प्रतिदीव्नः | प्रतिदिवभ्याम् | प्रतिदिवभ्यः | पञ्चमी। |
| प्रतिदीव्नः | प्रतिदीव्नोः | प्रतिदीव्नाम् | षष्ठी। |
| प्रतिदीव्नि-प्रतिदिवनि | प्रतिदीव्नोः | प्रतिदिवसु | सप्तमी। |
| हे प्रतिदिवन्! | हे प्रतिदिवानौ! | हे प्रतिदिवानः! | सम्बोधनम्। |

**( ३५५ ) न संयोगा द्वमन्तात्। ६।४।१३७॥**

**वकारमकारान्तसंयोगात्परस्यानोऽकारस्य लोपो न स्यात्। यज्वनः, यज्वना, यज्वभ्याम् इत्यादि। ब्रह्मणाः, ब्रह्मभ्याम् इत्यादि।**

---

३५५ - **पदच्छेदः** - न, संयोगात्, वमन्तात्। त्रिपदमिदं सूत्रम्।

**सूत्रसमासः** - वश्च मश्च तयोरितरेतद्वन्द्वो वमौ, तौ अन्तौ यस्य स वमन्तः, द्वन्द्वगर्भो बहुव्रीहिः, तस्मात् वमन्तात्। न अव्ययपदं, संयोगात् पञ्चम्यन्तं, वमन्तात् पन्चम्यन्तम्।

**अनुवृत्तिः** - (अल्लोपोऽनः) अनः, अल्लोपः।

**सूत्रप्रकारः** - विधि (निषेध) सूत्रम्।

**सरलार्थः** - वकारान्त संयोगान्तात्, मकारान्त संयोगान्तात् परस्य अनः अकारस्य लोपो न भवति।

**साधनिका : - यज्वा** यज् - देवपूजासङ्गतिकरणदानेषु इति धातोः 'सुयजोर्ङ्वनिप्' इति सूत्रेण ङ्वनिप् प्रत्ययेऽनुबन्धलोपे, यज्वन् इत्यस्माद् प्रातिपदिकत्वात् सुप्रत्ययः, हल्ङ्यादिना सुलोपे प्राप्ते, परत्वात् 'सर्वनाम-स्थाने चाऽसम्बुद्धौ' इति सूत्रेण उपधादीर्धः, तत्पश्चात्, सुलोपः, 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन नलोपः, यज्वा इति रूपं सिद्धम्।

**साधनिका : – यज्वनः** इत्यत्र यज्वन् इत्यस्मात्प्रातिपदिकत्वात्, द्वितीयाविभक्तिबहुवचन-विवक्षायां शस्-प्रत्ययः, 'अल्लोपोऽन्' इति वकारोत्तरवर्तिनोऽकारस्य लोपे प्राप्ते, 'न संयोगाद्वमन्तात्' इति वकारोत्तरवर्तिनोऽकारस्य लोपे निषेधे, यज्वन्+अस् इति स्थिते सकारस्य रुत्वविसर्गे च कृते यज्वनः इति रूपम् सिद्धम्।

**'ब्रह्मन्'** शब्दस्य रूपाणि यथा-

| | | | |
|---|---|---|---|
| ब्रह्मा | ब्रह्माणौ | ब्रह्माणः | प्रथमा। |
| ब्रह्माणम् | ब्रह्माणौ | ब्रह्मणः | द्वितीया। |
| ब्रह्मणा | ब्रह्मभ्याम् | ब्रह्मभिः | तृतीया। |
| ब्रह्मणे | ब्रह्मभ्याम् | ब्रह्मभ्यः | चतुर्थी। |
| ब्रह्मणः | ब्रह्मभ्याम् | ब्रह्मभ्यः | पञ्चमी। |
| ब्रह्मणः | ब्रह्मणोः | ब्रह्मणाम् | षष्ठी। |
| ब्रह्मणि | ब्रह्मणोः | ब्रह्मसु | सप्तमी। |
| हे ब्रह्मन्! | हे ब्रह्माणौ! | हे ब्रह्माणः! | सम्बोधनम्। |

**साधनिका : – ब्रह्मणः** इत्यत्र बृहि-वृद्धौ इति धातोः अनुबन्ध लोपे, 'इदितो नुम्धातोः' इति नुमागमेऽनुबन्धलोपे, बृन्ह् इत्यस्मात् 'बृहिनौच्च' इति उणादिसूत्रेण नकारस्य स्थानेऽकारे मनिन्प्रत्यये, अनुबन्धलोपे, बृअह्+मन् इति स्थिते, 'इको यणचि' इति सूत्रेण ऋकारस्य स्थाने यणादेशे ब्रह्मन् इत्यस्मात्प्रातिपदिकत्वात् शस्प्रत्ययः, 'अल्लोपोऽनः' इति बकारोत्तरवर्तिनोऽकारस्य लोपे प्राप्ते, 'न संयोगाद्वमन्तात्' इति अकारस्य लोप् निषेधे, ब्रह्मन्+अस् इति स्थिते, सकारस्य रुत्वे विसर्गे च कृते ब्रह्मणः इति रूपम् सिद्धम्।

**'यज्वन्'** शब्दस्य रूपाणि यथा-

| | | | |
|---|---|---|---|
| यज्वा | यज्वानौ | यज्वानः | प्रथमा। |
| यज्वानम् | यज्वानौ | यज्वनः | द्वितीया। |
| यज्वना | यज्वभ्याम् | यज्वभिः | तृतीया। |
| यज्वने | यज्वभ्याम् | यज्वभ्यः | चतुर्थी। |
| यज्वनः | यज्वभ्याम् | यज्वभ्यः | पञ्चमी। |
| यज्वनः | यज्वनोः | यज्वनाम् | षष्ठी। |
| यज्वनि | यज्वनोः | यज्वसु | सप्तमी। |
| हे यज्वन्! | हे यज्वानौ! | हे यज्वानः! | सम्बोधनम्। |

**( ३५६ ) इन्हन्पूषार्यम्णां शौ। ६।४।१२॥**

**एषां शावेवोपधाया दीर्घः, नान्यत्र। इति निषेधे प्राप्ते।**

---

**३५६ – पदच्छेदः** – इन्हन्पूषार्यम्णां, शौ। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** – इन् च हन् च पूषा च अर्यमा च तेषामितरेतरद्वन्द्वः- इन्हन्पूषार्यमाणः, तेषाम् इन्हन्पूषार्यम्णाम्। इन्हन्पूषार्यम्णां षष्ठ्यन्तम्, शौ सप्तम्यन्तम्।

**अनुवृत्तिः** – उपधायाः (नोपधायाः), दीर्घः (ढ्रलोपे पूर्वस्य दीर्घोऽणः), अङ्गस्य (अधिकारः)

**सूत्रप्रकारः** - नियमसूत्रम्।

**सरलार्थः** - इन्नन्तस्य, हन्नन्तस्य, पूषन्, अर्यमन् इत्येषामेव शावेव (शि) परे सति उपधायाः दीर्घो भवति, न अन्यत्र भवति।

**(३५७) सौ च। ६।४।१३॥**

**इन्नादीनामुपधाया दीर्घः स्यादसम्बुद्धौ सौ परे। वृत्रहा। हे वृत्रहन्। 'एकाजुत्तरपदे...' (सू.३०७) इति णत्वम् - वृत्रहणौ, वृत्रहणः। वृत्रहणम्, वृत्रहणौ।**

---

३५७ - **पदच्छेदः** - सौ, च। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - इन्हन्पूषार्यम्णां, शौ, दीर्घः, उपधायाः, असम्बुद्धौ, अङ्गस्य।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सम्बुद्धि-भिन्ने सु-विभक्ति परे स्यात् तदा इन्नादि **(इन्नन्तस्य हन्नन्तस्य, पूषन्, अर्यमन्)** चतुर्णाम् उपधायाः दीर्घो भवति।

**साधनिका : - वृत्रहा** इत्यत्र वृत्रोपपदाद् हन्-हिंसागत्योः इति धातोः क्विप् प्रत्ययेऽनुबन्धलोपे, 'वृत्रहन्' इति शब्दात्प्रातिपदिकत्वात् सुप्रत्ययः, हल्ङ्यादिना सुलोपे प्राप्ते, परत्वात् 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति सूत्रेण उपधादीर्घे प्राप्ते, 'इन्हन्पूषार्यम्णां शौ' इत्युपधादीर्घे निषेधे प्राप्ते, 'सौ च' इत्युपधादीर्घे, वृत्रहान्+सु इति स्थिते, तत्पश्चात् सुलोपः, प्रातिपदिकान्तस्य नस्य लोपः, वृत्रहा इति रूपं सिद्धम्।

**(३५८) हो हन्तेर्ञ्णिन्नेषु। ७।३।५४॥**

**ञिति णिति च प्रत्यये नकारे च परे हन्तेर्हकारस्य कुत्वं स्यात्।**

---

३५८ - **पदच्छेदः** - हः, हन्तेः, ञ्णिन्नेषु। त्रिपदमिदं सूत्रम्।

**सूत्रसमासः** - ञ् च ण् च तयोरितरेतरद्वन्द्वः, ञ्णौ तौ इतौ ययोस्तौ ञ्णितौ बहुव्रीहिः। ञ्णितौ च नश्च तेषामितरेतरद्वन्द्वौ ञ्णिन्नाः, तेषु ञ्णिन्नेषु। हः प्रथमान्तम्, हन्तेः षष्ठ्यन्तम्, ञ्णिन्नेषु सप्म्यन्तम्।

**अनुवृत्तिः** - कु (चजोः कुघिण्ण्यतोः), अङ्गस्य (अधिकार)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ञित्प्रत्यये, णित्प्रत्यये, नकारे च परे हन्धातोः हकारस्य स्थाने कुत्वम्भवति।

**(३५९) (क) हन्तेः। ८।४।२२॥**

**उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णत्वं स्यात्। प्रहण्यात्।**

---

३५९ - **(क) पदच्छेदः** - हन्तेः। एकपदमिदं सूत्रम्। हन्तेः षष्ठ्यन्तम्।

**अनुवृत्तिः** - रषाभ्याम्, नः (रषाभ्यां नो णः समानपदे), णः (अट्कुप्वाङ्नुम्व्यवायेऽपि), उपसर्गात् (उपसर्गादसमासेऽपिणोपदेशस्य)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उपसर्गस्थाद् निमित्तात् परस्य हन्धातोः हकारस्य स्थाने कुत्वम्भवति।

**साधनिका : - प्रहण्यात्** इत्यत्र प्रोपसर्गपूर्वात् हन - हिंसागत्योः इति धातोः विधिर्लिङ्लकारः तिप्प्रत्ययः, तस्य सार्वधातुकत्वात् शप्, तस्य लुक्, यासुडागमः, सुडागमः, प्रहन्+यास्+स्+ति इति स्थिते, सकारयोः लोपे, प्रहन्+या+ति इति स्थिते, सकारयोः लोपे, प्रहन्+या+ति इति स्थिते, 'इतश्च' इति तिपः इकारस्य लोपे, प्रहन्+या+त् इति स्थिते, 'हन्तेः' इति नकारस्य णकारः, प्रहण्यात् इति।

**( ३५९ ) ( ख ) अत्पूर्वस्य। ८।४।२२॥**

**हन्तेरत्पूर्वस्यैव नस्य णत्वम्, नान्यस्य। प्रघ्नन्ति। योगविभाग सामर्थ्यात् 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' ( परि. ६२ ) इति न्यायं बाधित्वा 'एकाजुत्तरपदे णः' ( सू. ३०७ ) इति णत्वमपि निवर्तते। नकारे परे कुत्वविधिसामर्थ्यादल्लोपो न स्थानिवत्। वृत्रघ्नः। वृत्रघ्ना। इत्यादि। यत्तु वृत्रघ्नः इत्यादौ वैकल्पिकं णत्वं माधवेनोक्तं, तद्भाष्यवार्तिकविरुद्धम्। एवं शार्ङ्गिन्, यशस्विन्, अर्यमन्, पूषन्। यशस्विन्निति विन्प्रत्यये इनोऽनर्थकत्वेऽपि 'इन्हन्...' ( सू. ३५६ ) इत्यत्र ग्रहणं भवत्येव। 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' ( परि. १७ ) इति वचनात्। अर्यम्णि-अर्यमणि। पूष्णि-पूषणि।**

---

**३५९ - ( ख ) पदच्छेदः** - अत्पूर्वस्य। एकपदमिदं सूत्रम् (योगविभागः)।

**सूत्रसमासः** - अत् = ह्रस्वाकारः पूर्वो यस्मात् सोऽत्पूर्वस्तस्यात्पूर्वस्य। अत्पूर्वस्य षष्ठ्यन्तम्।

**अनुवृत्तिः** - हन्तेः, रषाभ्यां, नः, णः, उपसर्गात्।

**सूत्रप्रकारः** - नियमसूत्रम्।

**सरलार्थः** - उपसर्गस्याद् निमित्तात् परस्य हन्धातोः अत्पूर्वस्यैव नकारस्य स्थाने णकारो भवति, नान्यस्य।

**विशेषार्थः** - णत्वविधायक-सूत्राणाम् अष्टाध्यायां क्रमः यथा-प्रातिपदिकान्तनुम्विभक्तिषु च। एकाजुत्तरपदे णः। कुमति च। हन्तेरत्पूर्वस्य इति।

एकयोगस्य 'हन्तेरत्पूर्वस्य' इति सूत्रस्य योगविभागस्य किं तात्पर्यम्? प्रघ्नन्ति। योगविभागसामर्थ्यात् 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति न्यायं बाधित्वा 'एकाजुत्तरपदे णः' इति णत्वमपि निवर्तते। अर्थात् योगविभागसामर्थ्येन 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति परिभाषां बाधित्वा केवलं 'हन्तेः' सूत्रेण प्राप्तस्य णत्वस्यैव न अपितु तेन पूर्वस्थ 'एकाजुत्तरपदे णः' इत्यनेन प्राप्तस्य णत्वस्यापि 'अत्पूर्वस्य' सूत्रेण निवृत्तिः भवति। न परे सति कुत्वविधि-सामर्थ्यात् अकारलोपः स्थानिवत् न स्यात्। निष्कर्षो भवति यत् पाणिनिप्रणीत 'हन्तेरत्पूर्वस्य' इत्यस्य योगविभक्तः 'अत्पूर्वस्य' इति सूत्रं नियामकम् अस्ति। यदि 'अत्पूर्वस्य' इत्यनेन केवलं समीपस्थः पूर्वांशः 'हन्तेः' इति प्राप्तणत्वस्यैव निषेधो मन्यते चेत्, योगविभाग-स्यावश्यकता एव नास्ति। हन् धातोः णत्वविधिः तथा च 'प्रघ्नन्ति' इत्यस्मिन् णकारविधि निवृत्तिः इत्युभयोः सम्भवादपि पृथक्योगविभागेन द्वितीयांशस्योपयोगिता भवति। अर्थात् आन्तरबाधकनियामिकां परिभाषां बाधित्वा 'एकाजुत्तरपदे णः, प्रातिपदिकान्तनुम्विभक्तिषु च' इत्येनन प्राप्तणत्वस्यापि अयं निषेधको भवति। अस्य निष्कर्षोस्ति यत् अस्मिन् योगविभागविषये 'पुरस्तादपवाद अनन्तरान् विधीन् बाधन्ते नोत्तरान्' परिभाषायाः प्रवृत्तिः न भवति।

**साधनिका : - प्रघ्नन्ति** प्रोपसर्गपूर्वात् हन्-हिंसागत्योः इति धातोः लट्लकारः, झिप्रत्ययः तस्य सार्वधातुकत्वात् शप्, तस्य लुक्, झेरन्तादेशे, प्रहन्+अन्ति इति स्थिते, डिद्वाद् 'गमहन...' इत्यादिना सूत्रेण उपधालोपेः, प्रह्न्+अन्ति, 'हो हन्तेर्ञ्णिन्नेषु' इति नस्य घकारे, प्रघनन्ति इति रूपं सिद्धम्।

**साधनिका : - वृत्रघ्नः** इत्यत्र वृत्रोपपदात् हन्-हिंसागत्योः इति धातोः क्विप् प्रत्ययेऽनुबन्धलोपे, वृत्रहन् इत्यस्मात्प्रातिपदिकत्वात् शस्प्रत्ययः, 'अल्लोपोऽनः' इति वकारोत्तरवर्तिनोऽकारस्य लोपे, 'वृत्रहन्+अस्' इति स्थिते, अल्लोपस्य स्थानिवद्भावात् कुत्वन्न भवेत्, अतः कथयति यत् कुत्वविधिसामर्थ्याद् अल्लोपस्य स्थानिवद्भावो न भवति। 'हो हन्तेर्ञ्णिन्नेषु' इत्यनेन हकारस्य स्थाने कुत्वेन घकारे, वृत्रघ्न्+अस् इति स्थिते,

अत्र 'हन्तेः', 'अत्पूर्वस्य' एतयोः योगविभागसामर्थ्यात् 'अनन्तरस्य विधिर्वा भवति प्रतिषेधोवा' इति परिभाषां बाधित्वा 'एकाजुत्तरपदे णः' इति णत्वविधायकं सूत्रमपि न प्रवर्तते, सकारस्य स्थाने रुत्वविसर्गे च कृते 'वृत्रघ्नः' इति रूपं सिद्धम्।

**वृत्रहन्** इति शब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| वृत्रहा | वृत्रहणौ | वृत्रहणः | प्रथमा। |
| वृत्रहणम् | वृत्रहणौ | वृत्रघ्नः | द्वितीया। |
| वृत्रघ्ना | वृत्रहभ्याम् | वृत्रहभिः | तृतीया। |
| वृत्रघ्ने | वृत्रहभ्याम् | वृत्रहभ्यः | चतुर्थी। |
| वृत्रघ्नः | वृत्रहभ्याम् | वृत्रहभ्यः | पञ्चमी। |
| वृत्रघ्नः | वृत्रघ्नोः | वृत्रघ्नाम् | षष्ठी। |
| वृत्रघ्नि–वृत्रहणि | वृत्रघ्नोः | वृत्रहसु | सप्तमी। |
| हे वृत्रहन्! | हे वृत्रहणौ! | हे वृत्रहणः! | सम्बोधनम्। |

**साधनिका** – **शार्ङ्गी** इत्यत्र शार्ङ्गमस्यास्तीति विग्रहे शार्ङ्ग शब्दात् 'अत इनिठनौ' इत्यनेन इनिप्रत्ययः, शार्ङ्ग+इन् इति स्थिते, अलोपे च कृते शार्ङ्गिन् शब्दात्प्रातिपदिकत्वात्, सुप्रत्ययः हल्ङ्यादिना सुलोपे प्राप्ते, परत्वात् 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्युपधादीर्घे प्राप्ते, 'इन्हन्पूषार्यम्णां शौ' इत्युपधादीर्घ–निषेधे प्राप्ते, 'सौ च' इत्युपधादीर्घे, शार्ङ्गीन्+सु इति स्थिते, तत्पश्चात् सुलोपे शार्ङ्गीन् इति स्थिते, 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रेण नलोपे कृते शार्ङ्गी इति रूपं सिद्धम्।

**साधनिका** – **यशस्वी** इत्यत्र यशोऽस्यास्तीति विग्रहे यशस् शब्दाद् **'अस्मायामेधास्त्रजो विनिः'** इत्यनेन विनिप्रत्ययः, अनुबन्धलोपः, यशस्विन् शब्दात् प्रातिपदिकत्वात् सुप्रत्ययः, हल्ङ्यादिना सुलोपे प्राप्ते, परत्वात् **'सर्वनामस्थाने चाऽम्बुद्धौ'** इत्यनेन उपधादीर्घे प्राप्ते, 'सौ च' इत्युपधादीर्घे, यशस्वीन्+सु इति स्थिते, सुलोपः, 'नलोपः प्रातिपदिकान्तस्य' इति नलोपः, यशस्वी इति रूपम् सिद्धम्।

**साधनिका** : – **अर्यम्णि-अर्यमणि** इत्यत्र अर्यमन् शब्दात् सप्तम्येकवचनविवज्ञायां ङिप्रत्यये, अनुबन्धलोपे, अर्यमन्+इ इति स्थिते, अर्यमन् इत्यस्य भसंज्ञायाम् 'अल्लोपोऽनः' इति सूत्रेण मकारोत्तरवर्तिनोऽकारस्य लोपे प्राप्ते, 'विभाषाङिश्योः' इति विकल्पेन अलोपे, अर्यम्न्+इ अर्यम्णि, अकारस्य लोपविकल्पाभावे, 'अर्यमणि' इति रूपम् सिद्धम्।

**अर्यमन्** इति शब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| अर्यमा | अर्यमणौ | अर्यमणः | प्रथमा। |
| अर्यमणम् | अर्यमणौ | अर्यम्णः | द्वितीया। |
| अर्यम्णा | अर्यमभ्याम् | अर्यमभिः | तृतीया। |
| अर्यम्णे | अर्यमभ्याम् | अर्यमभ्यः | चतुर्थी। |
| अर्यम्णः | अर्यमभ्याम् | अर्यमभ्यः | पञ्चमी। |
| अर्यम्णः | अर्यम्णोः | अर्यम्णाम् | षष्ठी। |
| अर्यम्णि–अर्यमणि | अर्यम्णोः | अर्यमसु | सप्तमी। |
| हे अर्यमन्! | हे अर्यमणौ! | हे अर्यमणः! | सम्बोधनम्। |

**( ३६० ) मघवा बहुलम्। ६।४।१२८॥**

**मघवन्-शब्दस्य वा तृ इत्यन्तादेशः स्यात्। ऋ इत्।**

---

**३६० - पदच्छेदः** - मघवा, बहुलम्। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - तृ (अर्वणस्त्रसावनञः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - मघवन् इति शब्दस्य नकारस्य स्थाने 'तृ' इत्यादेशो भवति। 'तृ' इत्यस्य ऋकारस्य इत्संज्ञा भवति।

**विशेषार्थः** - बहुलशब्दस्य वैयाकरणैः चत्वारः अर्थाः कृताः यथा-

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।

शिष्टप्रयोगाननुसृत्य लोके विज्ञेयमेत्तद् बहुलग्रहे तु॥

यस्मिन् कस्मिन्नपि सूत्रे बहुलशब्दो भवति, तस्य सूत्रस्य लक्ष्यस्थले कदाचित्प्रवृत्तिर्भवति, कदाचित्प्रवृत्तिर्न-भवति, कदाचित् तस्यप्रवृत्तिर्विभाषया भवति, कदाचिद् अन्यदेव भवति, किन्तु शिष्टप्रयोगानुसारं तत्सूत्रं प्रवर्तते।

**( ३६१ ) उगिदचां सर्वनामस्थानेऽधातोः। ७।१।७०॥**

**अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे। उपधादीर्घः। मघवान्। इह दीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न भवति बहुलग्रहणात्। तथा च 'श्वन्नुक्षन्...' (उणा. १६५) इति निपातनान्मघशब्दान्मतुपा च भाषायामपि शब्दद्वयसिद्धिमाश्रित्यैतत्सूत्रं प्रत्याख्यातमाकरे। 'हविर्जक्षिति निःशङ्को मखेषु मघवानसौ' इति भट्टिः। मघवन्तौ। मघवन्तः। हे मघवन्। मघवन्तम्, मघवन्तौ, मघवतः। मघवता, मघवद्भ्याम् इत्यादि। तृत्वाभावे मघवा। 'छन्दसीवनिपौ च' इति वनिबन्तं मध्योदात्तं छन्दस्येव। अन्तोदात्तं ७तु लोकेऽपीति विशेषः। मघवानौ, मघवानः। सुटि-राजवत्।**

---

**३६१ - पदच्छेदः** - उगिदचां, सर्वनामस्थाने, अधातोः। त्रिपदमिदं सूत्रम्।

**सूत्रसमासः** - उक् इत् येषां ते उगितः बहुव्रीहिः। उगितश्च अच् च, तेषाम् इतरेतरद्वन्द्वः-उगिदचः, तेषाम् उगिदचाम्। न धातुः-अधातुः, तस्य अधातोः, नञ्तत्पुरुषः। उगिदचां षष्ठ्यन्तं, सर्वनामस्थाने सप्तम्यन्तम्, अधातोः षष्ठ्यन्तम्।

**अनुवृत्तिः** - नुम् (इदितो नुम् धातोः)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - धातुरहितस्य उगितः (उक्प्रत्याहारः -उ, ऋ, लृ) एवं नलोपिनः अञ्चतेः नुमागमो भवति, सर्वनामस्थानसंज्ञके प्रत्यये परे।

**विशेषार्थः** - मघवन्शब्दस्य छन्दोमात्रविषयः। मघशब्दात् 'छन्दसीवनिपौ च' इति वनिप्प्रत्ययेऽनुबन्धलोपे, मघवन्शब्दो भवति, किन्तु मघशब्दः 'फिषोऽन्त उदात्तः' इति फिट्सूत्रेण घकारोत्तरवर्तिनोऽकारस्य उदात्तः, 'अनुदात्तं पदमेकवर्जम्' इति सूत्रेण मकारादकारः वकारदकारश्चानुदात्तः, 'उदात्तानुदात्तस्य स्वरितः' इति वकारादकारः स्वरितः, तथा च मघवन्निति रूपं मध्योदात्तं सम्पद्यते। एतादृशं मघवन्शब्दविषयकं छान्दसत्वाभिधानम्। उणादिसूत्रेण विहिते कन्प्रत्ययान्ते तु मघवन्शब्दे वकारादकारः प्रत्ययस्वरेणोदात्तः। शिष्टस्वरेणसकारादकारो वकारादकारश्च अनुदात्तौ। तथा च मघवन्निति रूपमन्तोदात्तमिति स्थितिः।

एतादृशमघवन्शब्दस्तु लोकवेदसाधारणः, तस्य छन्दोमात्रविषयत्वे प्रमाणाभावात्। किं च 'वनो र च' इतिसूत्रे भाष्यम्–'मघवन्शब्दः अव्युत्पन्नम्प्रातिपदिकम्' इति। अयमपि मघवन्शब्दः फिट्स्वरेणान्तोदात्तः लोकसाधारण एव, छन्दोमात्र–विषयत्वे प्रमाणाभावादिति भावः। अतो मघवन्शब्दस्य सर्वस्यापि लोके असाधुत्वमेवेति प्रपञ्चितम्। महाभाष्येऽपि शब्दद्वयसिद्धिमाश्रित्य सूत्रमिदं प्रत्याख्यातमिति।

**साधनिका - मघवान्** इत्यत्र मह्यते पूज्यते इति विग्रहे **मह पूजायाम्** इति धातोः 'श्वन्नुक्षन्पूषन्...' इत्युणादिसूत्रेण धातोः हकारस्य घकारे, नुमागमे, कनिन्प्रत्ययेऽनुबन्धलोपे, मघवन् अथवा मघःनाम धनमस्यास्तीति विग्रहे 'तदस्यात्यस्मिन्निति मतुप्' इति मतुप्प्रत्ययेऽनुबन्धलोपे, मघ+मत् इति स्थिते, '**मादुपधायाश्चमतोर्वोऽयवादिभ्यः**' इति मकारस्य स्थाने वकारे मघवत् इति भवति। मघवत् इति शब्दात् 'प्रातिपदिकत्वात् सुप्रत्ययः', 'मघवा बहुलम्' इत्यनेन नकारस्य स्थाने 'तृ' आदेशेऽनुबन्धलोपे, मघवत्+सु इति स्थिते, सर्वनामस्थानसंज्ञायाम् 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमे अनुबन्धलोपे, मित्वात् अन्त्यादचः परे, मघवन्त्+स् इति स्थिते, हल्ङ्यादिना सुलोपे, 'संयोगान्तस्य लोपः' इति तकारस्य लोपे, इह दीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न भवति बहुलग्रहणात्, अतः 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्युपधादीर्घे, संयोगान्तलोपस्यासिद्धत्वात् 'नलोपः प्रातिपदिकान्तस्य' इत्यस्य प्रवृत्तिर्नभवति, मघवान् इति रूपं सिद्धम्।

**साधनिका - मघवा** इत्यत्र तृत्वाभावे तु मघवन् इति शब्दात् प्रातिपदिकत्वात्, सुप्रत्ययः, सर्वनामस्थानसंज्ञायाम्, 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्युपधादीर्घे, मघवान्+स् इति स्थिते, हल्ङ्यादिना सुलोपे, 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे, मघवा इति रूपं सिद्धम्।

**( ३६२ ) श्वयुवमघोनामतद्धिते। ६।४।१३३॥**

**अन्नन्तानां भसंज्ञकानामेषामतद्धिते परे सम्प्रसारणं स्यात्। 'सम्प्रसारणाच्च' ( सू. ३३० )। 'आद्गुणः' ( सू.६९ )। मघोनः। अन्नन्तानां किम? मघवतः। मघवता। स्त्रियां मघवती। अतद्धिते किम्? माघवनम्। मघोना। मघवभ्याम् इत्यादि। शुनः। शुना, श्वभ्यामित्यादि। युवन्शब्दे वस्योत्वे कृते।**

---

३६२ - **पदच्छेदः** - श्वयुवमघोनाम्, अतद्धिते। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - श्वा च युवा च मघवा च तेषामितरेतरद्वन्द्वः श्वयुवमघवानः, तेषाम् श्वयुवमघोनाम्। न तद्धितः अतद्धितस्तस्मिन्। श्वयुवमघोनां षष्ठ्यन्तम्, अतद्धिते सप्तम्यन्तम्।

**अनुवृत्तिः** - अनः (अल्लोपोऽनः), भस्य (अधिकार), सम्प्रसारणम् (वसोःसम्प्रसारणम्)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - श्वन्, युवन्, मघवन् एषां त्रयाणाम् अन्नन्तानां भसंज्ञकानां संप्रसारणं भवति, अतद्धिते प्रत्यये परे।

**विशेषार्थः** - मघवता इत्यत्र मघवन् शब्दात् टाप्रत्ययः, तृत्वादेशे सति, अनन्तत्वाभावे 'श्वयुवमघोनामतद्धिते' इति सूत्रस्य प्रवृत्तिर्नभवन्ति, अतः मघवत्+आ इत्यत्र वर्णसम्मेलने मघवता इति रूपम्भवति। एवं मघवति इत्यत्र मघवतः स्त्री मघवती इत्यत्रापि तृत्वादेशे सति, अन्नन्तत्वाभावे, 'श्वयुवमघोनामतद्धिते' इत्स्य सूत्रस्य प्रवृत्तिर्नभवति, 'उगितश्च' इति ङीपुप्रत्ययः, स्वादिकार्ये सति मघवती इति रूपम्भवति। मघवानम् इत्यत्र मघवान् वा मघवा देवता अस्य इत्यत्र 'साऽस्य देवता' इति सूत्रस्य प्रवृत्तिर्नभवति, आदिवृद्धिः, स्वादिकार्ये सति मघवानम् इति रूपम्भवति।

**साधनिका : - मघोनः** इत्यत्र तृत्वाभावे तु मघवन् इति शब्दात् प्रातिपदिकत्वात्, द्वितीयाबहुवचनविवक्षायां शस्प्रत्ययः, मघवन्+अस् इति स्थिते, 'मघवन्' इत्यस्य भसंज्ञायाम्, 'श्वयुवमघोनामतद्धिते' इति वकारस्य सम्प्रसारणे उकारे, मघउअन्+अस् इति स्थिते, 'सम्प्रसारणाच्च' इति उकारअकारयोः स्थाने उकारे पूर्वरूपे,

मघउन्+अस् इति स्थिते, 'आद्गुणः' इति अकार उकारयोः स्थाने ओकारे गुणे, 'मघोन्+अस्' इति रुत्वे विसर्गे च 'मघोनः' इति रूपं सिद्धम्।

नकारान्त **मघवन्** शब्दस्य '**तृ**' पक्षस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| मघवान् | मघवन्तौ | मघवन्तः | प्रथमा। |
| मघवन्तम् | मघवन्तौ | मघवतः | द्वितीया। |
| मघवता | मघवद्भ्याम् | मघवद्भिः | तृतीया। |
| मघवते | मघवद्भ्याम् | मघवद्भ्यः | चतुर्थी। |
| मघवतः | मघवद्भ्याम् | मघवद्भ्यः | पञ्चमी। |
| मघवतः | मघवतोः | मघवताम् | षष्ठी। |
| मघवति | मघवतोः | मघवत्सु | सप्तमी। |
| हे मघवन्! | हे मघवन्तौ! | हे मघवन्तः! | सम्बोधनम्। |

नकारान्त '**मघवन्**' शब्दस्य **तृत्वाभाव** पक्षे रूपाणि यथा–

| | | | |
|---|---|---|---|
| मघवा | मघवानौ | मघवानः | प्रथमा। |
| मघवानम् | मघवानौ | मघोनः | द्वितीया। |
| मघोना | मघवभ्याम् | मघवभिः | तृतीया। |
| मघोने | मघवभ्याम् | मघवभ्यः | चतुर्थी। |
| मघोनः | मघवभ्याम् | मघवभ्यः | पञ्चमी। |
| मघोनः | मघोनोः | मघोनाम् | षष्ठी। |
| मघोनि | मघोनोः | मघवसु | सप्तमी। |
| हे मघवन्! | हे मघवानौ! | हे मघवानः! | सम्बोधनम्। |

'श्वयुवमघोनामतद्धिते' सूत्रमाधारीकृत्य एकम् सुभाषितम् यथा–

(प्रश्न) काचं मणिं काञ्चनमेकसूत्रे ग्रन्थासि बाले किमिदं विचित्रम्।

(उत्तर) विचारवान् पाणिनिरेकसूत्रे श्वानं युवानं मघवानमाह॥

**साधनिका :** – **श्वा** (सारमेयः) इत्यत्र श्वयतीति श्वा इति विग्रहे टुओश्वि–गतिवृद्धयोः इति धातोः, 'श्वन्नुक्षन्पूषन्...' इत्यादिना उणादिसूत्रेण धातोः इकारस्य लोपे, कनिन्प्रत्ययेऽनुबन्धलोपे, श्व्+अन् श्वन् इति शब्दात् प्रातिपदिकत्वात्, सुप्रत्ययः, श्वन्+सु इति स्थिते, 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्युपधादीर्घे, संयोगान्तलोपस्यासिद्ध–त्वात् 'नलोपः प्रातिपदिकान्तस्य' इति नलोपः, श्वा इति रूपं सिद्धम्।

**(३६३) न सम्प्रसारणे सम्प्रसारणम्। ६।१।३७॥**

**सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात्। इति यकारस्य नेत्वम्। अत एव ज्ञापकादन्त्यस्य यणः पूर्वं सम्प्रसारणम्। यूनः। यूना। युवभ्यामित्यादि। अर्वा। हे अर्वन्।**

---

३६३ – **पदच्छेदः** – न, सम्प्रसारणे, सम्प्रसारणम्। त्रिपदमिदं सूत्रम्। प्रथमान्तम्।

**सूत्रप्रकारः** – विधि (निषेध) सूत्रम्

**सरलार्थः** – पूर्वस्य यणः स्थाने सम्प्रसारणं न भवति, किन्तु परस्य यणः स्थाने सम्प्रसारणं भवति।

**विशेषार्थः** - **अनर्वा** न अर्वा अनर्वा, इति विग्रहे अनर्वन् शब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायाम् सुप्रत्ययः, (प्रथमैकवचनं सुप्रत्ययं विहाय, 'अर्वणस्त्रसावनञः' इति नकारस्य स्थाने तृत्वाभावे तु) सर्वनामस्थानसंज्ञायां 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्यनेन उपधादीर्घे, अनर्वान्+सु इति स्थिते, हल्ङ्यादिना सुलोपे, 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन नलोपे अनर्वा इति रूपम्भवति।

**साधनिका : - यूनः** इत्यत्र यौतीति युवा इति विग्रहे यू-मिश्रणामिश्रणयोः च इति धातोः 'कनिन्युवृषितक्षिराजिधर्न्विद्युतप्रतिदिवः' इति उणादिसूत्रेण धातोः कनिन्प्रत्ययेऽनुबन्धलोपे यु अन् इति स्थिते, उवङादेशे, युवन् इति शब्दात् प्रातिपदिकत्वाद् द्वितीयाबहुवचनविवज्ञायां शस्प्रत्ययः, युवन्+शस्, अनुबन्धलोपे, युवन् इत्यस्य भसंज्ञायाम् 'श्वयुवमघोनामतद्धिते' इति यकारवकारयोः सम्प्रसारणे प्राप्ते, 'न सम्प्रसारणे सम्प्रसारणम्' इति सूत्रस्य नियमेन वकारस्य स्थाने उकारे सम्प्रसारणे, पूर्वरूपे युउन्+अस् इति स्थिते, उकारउकारयोः स्थाने दीर्घे, यून्+अस् इति स्थिते, सस्य रुत्वे विसर्गेच यूनः इति सिद्धम्।

**( ३६४ ) अर्वणस्त्रसावनञः। ६।४।१२७॥**

**नञा रहितस्यार्वन्नित्यस्याङ्गस्य तृ इत्यन्तादेशः स्यात्, न तु सौ। उगित्वान्नुम्। अर्वन्तौ। अर्वन्तः। अर्वन्तम्। अर्वन्तौ। अर्वतः। अर्वता। अर्वद्भ्याम् इत्यादि। अनञः किम्? अनर्वा यज्ववत्।**

---

३६४ - **पदच्छेदः** - अर्वणः, तृ, असौ, अनञः। अनेकपदमिदं सूत्रम्।

**सूत्रसमासः** - न सुः-असुः, तस्मिन् असौ। न विद्यते नञ् यस्य स अनञ्, तस्य अनञः। अर्वणः षष्ठ्यन्तं, तृ लुप्तप्रथमाकम्, असौ सप्तम्यन्तम्, अनञः षष्ठ्यन्तम्।

**अनुवृत्तिः** - अङ्गस्य (अधिकार)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - नञ्समासरहितस्य 'अर्वन्' इत्यस्य अङ्गस्य 'तृ' इति अन्तादेशो भवति, प्रथमैकवचने 'सु' प्रत्यभिन्ने प्रत्यये परे सति।

**साधनिका : - अर्वन्तौ** इत्यत्र ऋ-गतौ इति धातोः 'अन्येभ्योऽपि दृश्यते' इत्यनेन वनिप्प्रत्ययः, अनुबन्धलोपः, 'अर्' गुणे च कृते, अर्वन् इति शब्दात् प्रातिपदिकत्वात्, द्वितीया द्विवचनविवक्षायाम् औ प्रत्ययः 'अर्वणस्त्रसावनञः' इत्यनेन नकारस्य स्थाने तृ आदेशे, अनुबन्धलोपे, अर्वत्+औ इति स्थिते, सर्वनामस्थानसंज्ञायाम् 'उगिदचां सर्वनामस्थानेऽधातोः' इत्यनेन नुमागमेऽनुबन्धलोपे, मित्वात् अन्त्यादचः परे, 'अर्वन्त्+औ' इति स्थिते, वर्णसम्मेलने **अर्वन्तौ** इति साधु।

**अर्वन्** नाम अश्वः तस्य रूपाणि यथा-

| | | | |
|---|---|---|---|
| अर्वा | अर्वन्तौ | अर्वन्तः | प्रथमा। |
| अर्वन्तम् | अर्वन्तौ | अर्वतः | द्वितीया। |
| अर्वता | अर्वद्भ्याम् | अर्वद्भिः | तृतीया। |
| अर्वते | अर्वद्भ्याम् | अर्वद्भ्यः | चतुर्थी। |
| अर्वतः | अर्वद्भ्याम् | अर्वद्भ्यः | पञ्चमी। |
| अर्वतः | अर्वतोः | अर्वताम् | षष्ठी। |
| अर्वति | अर्वतोः | अर्वत्सु | सप्तमी। |
| हे अर्वन्! | हे अर्वन्तौ! | हे अर्वन्तः! | सम्बोधनम्। |

**अनर्वन्** इति शब्दस्य रूपाणि भवन्ति यथा–

| | | | |
|---|---|---|---|
| अनर्वा | अनर्वाणौ | अनर्वाणः | प्रथमा। |
| अनर्वाणम् | अनर्वाणौ | अनर्वणः | द्वितीया। |
| अनर्वणा | अनर्वभ्याम् | अनर्वभिः | तृतीया। |
| अनर्वणे | अनर्वभ्याम् | अनर्वभ्यः | चतुर्थी। |
| अनर्वणः | अनर्वभ्याम् | अनर्वभ्यः | पञ्चमी। |
| अनर्वणः | अनर्वणोः | अनर्वणाम् | षष्ठी। |
| अनर्वणि | अनर्वणोः | अनर्वसु | सप्तमी। |
| हे अनर्वन्! | हे अनर्वाणौ! | हे अनर्वाणः! | सम्बोधनम्। |

**( ३६५ ) पथिमथ्यृभुक्षामात्। ७।१।८५॥**

**एषामाकारोऽन्तादेशः स्यात्सौ परे। 'आ आत्' इति प्रश्लेषेण शुद्धाया एव व्यक्तेर्विधानान्नानुनासिकः।**

---

३६५ - **पदच्छेदः** - पथिमथ्यृभुक्षाम्, आत्। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - पन्थाश्च मन्थाश्च ऋभुक्षाश्च तेषामितरेतरद्वन्द्वः पथिमथ्यृभुक्षाणः, तेषां पथिमथ्यृभुक्षाम्। पथिमथ्यृभुक्षाम्, षष्ठ्यन्तम्, आत् प्रथमान्तम्।

**अनुवृत्तिः** - सौ।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पथिन्, मथिन्, ऋभुक्षिन् एतेषां त्रयाणां शब्दानां नकारस्य स्थाने आकारो भवति। सु प्रत्यये परे सति।

**विशेषार्थः** - ननु नकारस्य आन्तरतम्याद् आनुनासिक एव आकारः प्राप्नोति। न च निरनुनासिकस्यैव आकारस्योच्चारणात् शुद्ध एव आकार इति वाच्यम्, गुणानामभेदकत्वाद् भेदकत्वेऽपि तपरकरणेन अनुनासिकस्यापि आकारस्य ग्रहणात्, व्यक्तिपक्षेतपरसूत्रस्य अनण्सु दीर्घप्लुतेषु विध्यर्थत्वात्। न च ग्रहणकसूत्रे वर्णसमाम्नायिकत्वेन निश्चितस्याग्रहणस्य अप्रत्ययः, इत्यस्य च तपरसूत्रे अनुवृत्तेराकरस्येहानण्त्वाद् विधीयमानत्वाच्च न तत्काल इति वाच्यम्, तपरसूत्रे अण्ग्रहणस्य अप्रत्यय अण्ग्रहणस्य अप्रत्ययग्रहणस्य चानुवृत्तौ मानाभावादित्यत आह आ आदिति। सवर्णदीर्घेणाकारान्तरं प्रश्लिष्यते। ततश्चानुनासिकस्य आकारो भवतीति लभ्यते। न च सर्वादेशत्वं शङ्क्यम्। न ह्यत्र वर्णद्वयं विधीयते, विशेषणविशेष्यभावेनान्वयाभ्युपगमेन अनुनासिक आकारस्येकस्यैव विधानादिति भावः। भाष्ये तु अनुनासिकविधेः संभूतत्वे प्रतिपत्तिलाघवाय अनुनासिकस्यैव 'उञः' 'ऊँ' इत्यत्रैव उच्चार्य विधानसम्भवात्तदनुच्चारणाच्छुद्ध एव आकार इह विधेय इत्युक्तम्। तपरकरणं तु उच्चारणार्थः। अतोऽनुनासिकस्य नकारस्य स्थाने अनुनासिक आकारादेशो न भवति।

**( ३६६ ) इतोऽत्सर्वनामस्थाने। ७।१।८६॥**

**पथ्यादेरिकारस्याकारः स्यात् सर्वनामस्थाने परे।**

---

३६६ - **पदच्छेदः** - इतः, अत्, सर्वनामस्थाने। त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** - पथिमथ्यृमुक्षाम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पथिन्, मथिन्, ऋभुक्षिन् एतेषां त्रयाणां शब्दानां इकारस्य स्थाने अकारो भवति, सर्वनामस्थाने प्रत्यये परे।

**( ३६७ ) थोन्थः। ७।१।८७॥**

**पथिमथोस्थस्य न्थादेशः स्यात् सर्वनामस्थाने परे। पन्थाः पन्थानौ। पन्थानः। पन्थानम्। पन्थानौ।**

---

३६७ - **पदच्छेदः** - थः, न्थः। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - सर्वनामस्थाने, पथिमथ्यृभुक्षाम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पथिन्, मथिन्, एतयोर्द्वयोः शब्दयोः थकारस्य स्थाने 'न्थ' आदेशो भवति, सर्वनामस्थाने प्रत्यये परे।

**साधनिका - पन्थाः** (मार्गः) पथन्ति जना अनेन इति विग्रहे पथ-गतौ इति धातोः 'पथिमथिभ्यामिनिः' इत्युणादिसूत्रेण धातोः तकारस्य थकारे, इनिप्रत्यये चानुबन्धलोपे पथिन् इति शब्दात् प्रातिपदिकत्वात्, सु प्रत्ययः, पथिन्+सु इति स्थिते, 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति सूत्रेण उपधादीर्घे प्राप्ते, 'पथिमथ्यृभुक्षामात्' इत्यनेन नकारस्य स्थाने आकारे, पथिआ+सु इति स्थिते, यणादेशे प्राप्ते, 'इतोऽत्सर्वनामस्थाने' इत्यनेन थकारोत्तरवर्तिनः इकारस्य स्थाने अकारे, पथ् अआ+सु इति स्थिते, 'थोन्थः' इत्यनेन थकारस्य स्थाने 'न्थ' आदेशे, पन्थ् अआ+सु इति स्थिते, अकारआकारयोः सवर्णदीर्घे, सकारस्य रुत्वे विसर्गे च कृते पन्थाः इति रूपं सिद्धम्।

**साधनिका : - पन्थानौ** इत्यत्र पन्थाः इत्यनुसारेण पथिन् इति शब्दात् प्रातिपदिकत्वात्, औप्रत्ययः, पथिन्+औ इति स्थिते, 'इतोऽत्सर्वनामस्थाने' इति थकारोत्तरवर्तिनः इकारस्य अकारे, पथ्अन्+औ इति स्थिते 'थो न्थः' इत्यनेन थकारस्य न्थादेशे, पन्थ्अन्+औ स्थिते, 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्यनेन उपधादीर्घे पन्थान्+औ, इति पन्थानौ रूपं सिद्धम्।

**( ३६८ ) भस्य टेर्लोप। ७।१।८८॥**

**भसंज्ञकस्य पथ्यादेष्टेर्लोपः स्यात्। पथः। पथा। पथिभ्याम् इत्यादि। एवं मन्थाः। ऋभुक्षाः। स्त्रियां नान्तलक्षणे ङीपि भत्वाट्टिलोपः। सुपथी, सुमथी नगरी। अनृभुक्षी सेना। आत्त्वं नपुंसके न भवति, 'न लुमता...' (सू.२६३) इति प्रत्ययलक्षणनिषेधात्। सुपथि वनम्। 'सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः'। हे सुपथिन्! हे सुपथि। 'नलोपः सुप्-इति नलोपस्यासिद्धत्वाद्ह्रस्वस्य गुणो न द्विवचने भत्त्वाट्टिलोपः सुपथी। शौ सर्वंनामस्थान-त्वात् सुपन्थानि। पुनरपि सुपथि। सुपथी। सुपन्थानि। सुपथा। सुपथे। सुपथिभ्यामित्यादि।'**

---

३६८ - **पदच्छेदः** - भस्य, टेः, लोपः। त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** - पथिमथ्यृभुक्षाम्।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - पथिन्, मथिन्, ऋभुक्षिन् एतेषां त्रयाणां भसंज्ञाकानां शब्दानाम् इकारस्य टिलोपो भवति।

**साधनिका : - पथा** इत्यत्र पथिन् इति शब्दात् प्रातिपदिकत्वात्, तृतीयैकवचने 'टा' प्रत्ययः, पथिन्+आ इति स्थिते, 'यचि भम्' इति सूत्रेण 'पथिन्' इत्यस्य भसंज्ञायाम् 'भस्य टेर्लोपः' इति सूत्रेण 'पथिन्' इत्यस्य टिसंज्ञकस्य 'इन्' लोपे, पथ्+आ इति स्थिते, वर्णसम्मेलने पथा इति रूपं सिद्धम्।

नकारान्त **पथिन्** शब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| पन्थाः | पन्थानौ | पन्थानः | प्रथमा। |
| पन्थानम् | पन्थानौ | पथः | द्वितीया। |
| पथा | पथिभ्याम् | पथिभिः | तृतीया। |
| पथे | पथिभ्याम् | पथिभ्यः | चतुर्थी। |
| पथः | पथोः | पथाम् | पञ्चमी। |
| पथः | पथोः | पथिसु | षष्ठी। |
| पथि | पथोः | पथिसु | सप्तमी। |
| हे पन्थाः! | हे पन्थानौ! | हे पन्थानः! | सम्बोधनम्। |

**साधनिका : – मन्थाः** (मन्थदण्डः) मथ् – विलोडने इति धातोः 'पथिमथिभ्यामिनिः' इत्युणादिसूत्रेण 'इनि' प्रत्ययेऽनुबन्धलोपे, मथिन् इति शब्दात् प्रातिपदिकत्वात्, सुप्रत्ययः, मथिन्+सु इति स्थिते, 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्युपधादीर्घे प्राप्ते, 'पथिमथ्यृभुक्षामात्' इत्यनेन नकारस्य स्थाने आकारे, मथिआ+सु इति स्थिते, यणादेशे प्राप्ते, 'इतोऽत्सर्वनामस्थाने' इति सूत्रेण थकारोत्तरवर्तिनः इकारस्य अकारे मथ्अआ+सु इति स्थिते, 'थो न्थः' इत्यनेन थकारस्य न्थादेशे, मन्थ्अआ+सु इति स्थिते, अकारआकारयोः सवर्णदीर्घे, सु अनुबन्धलोपे मन्था+स् इति स्थिते सकारस्य रुत्वे विसर्गे च कृते मन्थाः इति रूपं सिद्धम्।

नकारान्त **मथिन्** इति शब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| मन्थाः | मन्थानौ | मन्थानः | प्रथमा। |
| मन्थानम् | मन्थानौ | मथः | द्वितीया। |
| मथा | मथिभ्याम् | मथिभिः | तृतीया। |
| मथे | मथिभ्याम् | मथिभ्यः | चतुर्थी। |
| मथः | मथिभ्याम् | मथिभ्यः | पञ्चमी। |
| मथः | मथोः | मथाम् | षष्ठी। |
| मथि | मथोः | मथिसु | सप्तमी। |
| हे मन्थाः! | हे मन्थानौ! | हे मन्थानः! | सम्बोधनम्। |

**साधनिका : – ऋभुक्षाः** (इन्द्रः) स्वर्गवाचकः ऋभुक्षः सोऽस्यातीति विग्रहे 'अत इनिठनौ' इति इनिप्रत्ययेऽनुबन्धलोपे, ऋभुक्ष+इन् इति स्थिते, 'यस्येति च' इति क्षकारोत्तरवर्तिनः अकारस्यलोपे, ऋभुक्षिन् इति शब्दात् प्रातिपदिकत्वात् सुप्रत्ययः, अनुबन्धलोपे ऋभुक्षिन्+स् इति स्थिते, 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्युपधादीर्घे प्राप्ते, 'पथिमथ्यृभुक्षामात्' इति सूत्रेण नकारस्य स्थाने आकारे ऋभुक्षिआ+सु इति स्थिते, यणादेशे प्राप्ते 'इतोऽत्सर्वनामस्थाने' इति थकारोत्तरवर्तिनः इकारस्य अकारे, ऋभुक्ष्अआ+स् इति स्थिते, सवर्णे दीर्घे, सस्य रुत्वे विसर्गे च कृते ऋभुक्षाः इति रूपं सिद्धम्। स्त्रियां नान्तलक्षणे ङीपि भत्वाट्टिलोपः सुपथी, सुमथी नगरी। अनृभुक्षी सेना। आत्त्वं नपुंसके न भवति। 'न लुमता...' इति प्रत्ययलक्षणनिषेधात्। सुपथि वनम्।

नकारान्त **ऋभुक्षिन्** शब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| ऋभुक्षाः | ऋभुक्षाणौ | ऋभुक्षाणः | प्रथमा |
| ऋभुक्षाणम् | ऋभुक्षाणौ | ऋभुक्षः | द्वितीया |
| ऋभुक्षा | ऋभुक्षिभ्याम् | ऋभुक्षिभिः | तृतीया। |
| ऋभुक्षे | ऋभुक्षिभ्याम् | ऋभुक्षिभ्यः | चतुर्थी। |
| ऋभुक्षः | ऋभुक्षिभ्याम् | ऋभुक्षिभ्यः | पञ्चमी। |
| ऋभुक्षः | ऋभुक्षोः | ऋभुक्षाम् | षष्ठी। |
| ऋभुक्षि | ऋभुक्षोः | ऋभुक्षिषु | सप्तमी। |
| हे ऋभुक्षिन्! | हे ऋभुक्षाणौ! | हे ऋभुक्षाणः! | सम्बोधनम्। |

**साधनिका – सुपथी नगरी** सु–शोभनः पन्था अस्य इति बहुव्रीहि–समासे सति सुपथिन् शब्दात् प्रातिपदिकत्वात् स्त्रीत्वविवक्षायां सु प्रत्यये, 'ऋन्नेभ्यो ङीप्' इति ङीप्प्रत्ययेऽनुबन्धलोपे, सुपथिन्+ई इति स्थिते, भसंज्ञायाम् 'भस्य टेर्लोपः' इति टिलोपे, हल्ङ्यादिना सुलोपे सति सुपथी इति रूपं सिद्धम्।

**साधनिका – अनृभुक्षी सेना** इत्यत्र अविद्यमानः ऋभुक्षाः (स्वामी) यस्या इति बहुव्रीहिसमासे सति अनृभुक्षिन् शब्दात् स्त्रीत्वविवक्षायां सुप्रत्यये, 'ऋन्नेभ्यो ङीप्' इति ङीप्प्रत्ययेऽनुबन्धलोपे, अनृभुक्षिन्+ई इति स्थिते, भसंज्ञायां 'भस्य टेर्लोपः' इति टिलोपे, अनृभुक्ष्+ई+स् इति स्थिते, हल्ङ्यादिना सुलोपे सति 'अनृभुक्षी' इति रूपं सिद्धम्।

**साधनिका – सुपथि वनम्** इत्यत्र सु–शोभन पन्थाः अस्य वनस्य तद् इति बहुव्रीहिसमासे सति सुपथिन् शब्दात् नपुंसकलिङ्गविवक्षायां सुप्रत्यये, 'स्वमोर्नपुंसकात्' इति सुलोपे, सुपथिन् इति स्थिते, भसंज्ञायाम्, 'भस्य टेर्लोपः' इति टिलोपे सुपथ् इति स्थिते, 'प्रत्ययलोपे प्रत्यलक्षणम्' इत्यनेन प्रत्ययलक्षणभावमाश्रित्य, सुप्परत्वसत्त्वात् 'पथिमथ्यृभुक्षामात्' इत्यनेन नकारस्य स्थाने आकारे प्राप्ते, 'इतोऽत्सर्वनामस्थाने' इति थकारोत्तरवर्तिनः इकारस्य अकारे प्राप्ते, 'थो न्थः' इत्यनेन थकारस्य न्थादेशे प्राप्ते, किन्तु 'न लुमताङ्गस्य' इति प्रत्ययलक्षणभावे निषेधे सति सुपथि वनम् इति रूपं सिद्धम्।

**साधनिका – हे सुपथिन् – हे सुपथि** इत्यत्र सु–शोभना पन्थाः अस्य वनस्य तद् इति बहुव्रीहिसमासे सति सुपथिन् शब्दात् नपुंसकलिङ्गे सम्बोधनविवक्षायां सुप्रत्यये, 'स्वमोर्नपुंसकात्' इति सुलोपे, सुपथिन् इति स्थिते, 'नलोपेः प्रातिपदिकान्तस्य' इत्यनेन नित्ये नलोपे प्राप्ते, 'सम्बुद्धौ नपुंसकानां नलोपो वाच्यः' इति वार्त्तिकसूत्रेण विकल्पेन नलोपे, हे सुपथि इति स्थिते, 'ह्रस्वस्य गुणः' इति इकारस्य स्थाने गुणे प्राप्ते, 'नलोपः सुप्स्वरसंज्ञा तुग्विधिषु कृति' इति नलोपस्यासिद्धत्वाद्ध्रस्वस्य गुणे निषेधे हे सुपथि, प्रकृतवार्त्तिकद्वारा नलोपविकल्पाभावे हे सुपथिन्! इति सिद्धम्।

**सुपथिन्** इति नपुंसकलिङ्गशब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| सुपथि | सुपथी | सुपन्थानि | प्रथमा। |
| सुपथि | सुपथी | सुपन्थानि | द्वितीया। |
| सुपथा | सुपथिभ्याम् | सुपथिभिः | तृतीया। |
| सुपथे | सुपथिभ्याम् | सुपथिभिः | चतुर्थी। |
| सुपथः | सुपथिभ्याम् | सुपथिभ्यः | पञ्चमी। |
| सुपथः | सुपथोः | सुपथाम् | षष्ठी। |
| सुपथि | सुपथोः | सुपथिषु | सप्तमी। |
| हे सुपथिन्! | हे सुपथी! | हे सुपन्थानि! | सम्बोधनम्। |

**( ३६९ ) ष्णान्ता षट्। १।१।२४॥**

**षान्ता नान्ता च सङ्ख्या षट्संज्ञा स्यात्। 'षड्भ्यो लुक्' ( सू. २६१ ) पञ्च। पञ्च। सङ्ख्या किम्? विप्रुषः, पामानः। 'शतानि' सहस्राणि इत्यत्र सन्निपातपरिभाषया न लुक्, सर्वनामस्थानसन्निपातेन कृतस्य नुमस्तदविघातकत्वात्। पञ्चभिः। पञ्चभ्यः। 'षट्चतुर्भ्यश्च' ( सू. ३३८ ) इति नुट्।**

---

३६९ - **पदच्छेदः** - ष्णान्ता, षट्। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - ष् च ण् च ष्णौ, ष्णौ अन्तौ यस्याः सा ष्णान्ता। ष्णान्तौ प्रथमान्तं, षट् प्रथमान्तम्।

**अनुवृत्तिः** - सङ्ख्या (बहुगणवतुडति सङ्ख्या)

**सूत्रप्रकारः** - संज्ञासूत्रम्

**सरलार्थः** - षकारान्तानां नकारान्तानां सङ्ख्यावाचिनां शब्दानां षट्संज्ञा भवति।

**विशेषार्थः - सङ्ख्या किम्? विप्रुषः, पामानः** अत्र विप्रुष् (बिन्दुः) शब्दात् प्रातिपदिकत्वात् प्रथमांबहुवचनविवक्षायां जस्प्रत्यये, 'विप्रुष्+जस्' इति स्थिते, संख्यावाचित्वाभावात् 'ष्णान्ता षट्' इति 'विप्रुष्' इत्यस्य षट्संज्ञा न भवति, अतः सस्य रूत्वे विसर्गे च 'विप्रुषः' इति रूपम्भवति। एवं पामानः अत्र पामन् (चर्मरोगः) शब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचनविवक्षायां जस्प्रत्यये, पामन्+जस् इति स्थिते, संख्यावाचित्वाभावात् 'ष्णान्ता षट्' इति 'पामन्' इत्यस्य षट्संज्ञा न भवति, अतः उपधादीर्घे, सस्य रूत्वे विसर्गे च 'पामानः' इति रूपं सिद्धम्। (खल्वाटः)

**'शतानि, सहस्राणि'** इत्यत्र शतन्शब्दसहस्रन्शब्दयोः नान्तसंख्याशब्दत्वात् 'ष्णान्ता षट्' इति शतन्, सहस्रन् इत्यनयोः षट्संज्ञायां सत्यां 'षड्भ्यो लुक्' इति जस्प्रत्ययस्य लोपे प्राप्ते, किन्तु सर्वनामस्थाने परत्वेन उपजीव्य प्रवृत्तस्य नुमः 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति सन्निपातपरिभाषयाः सर्वनामस्थानभूतजश्शसोः लुकम्प्रति निमित्तत्वाभावाद् जसः स्थाने शिभावे, अनुबन्धलोपे, 'नपुंसकस्य झलचः' इति नुमागमे, शतन्+इ इति स्थिते, 'सर्वनामस्थाने चाऽसम्बुद्धौ' इति उपधादीर्घे, शतानि इति रूपं भवति। एवं 'सहस्राणि' इत्यत्र 'अट्कुप्वाङ्' इति णत्वविशेषः।

**( ३७० ) नोपधायाः। ३।४।७॥**

**नान्तस्योपधाया दीर्घः स्यान्नामि परे। नलोपः, पञ्चानाम्। पञ्चसु। परमपञ्च। परमपञ्चानाम्। गौणत्वे तु न लुङ्नुटौ, प्रियपञ्च। प्रियपञ्चानौ। प्रियपञ्चानः। प्रियपञ्चाम्। एवं सप्तन्, नवन्, दशन्।**

---

३७० - **पदच्छेदः** - न, उपधायाः। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - दीर्घः, नामि, अङ्गस्य (अधिकार)।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - नान्तानां शब्दानां उपधादीर्घो भवति, नाम्प्रत्यये परे।

**साधनिका : - पञ्चानाम्** इत्यत्र पञ्चन्शब्दात् प्रातिपदिकत्वात् षष्ठीबहुवचनविवक्षायां आम्प्रत्ये, पञ्चन्+आम् इति स्थिते, 'ष्णान्ता षट्' इति 'पञ्चन्' इत्यस्य षट्संज्ञायाम्, 'षट्चतुर्भ्यश्च' इति नुटागमे, पञ्चन्+न् आम् इति स्थिते, 'नोपधायाः' इत्यनेन नान्तस्योपधादीर्घे पञ्चान+नाम् इति स्थिते, 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायाम्, नलोपे कृते 'पञ्चानाम्' इति रूपं सिद्धम्।

**साधनिका : - परमपञ्च** इत्यत्र परमाश्च ते पञ्चइति परमपञ्चन् इति शब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचनविवक्षायां जस्प्रत्यये, परमपञ्चन्+जस् इति स्थिते, 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति परिभाषाबलेन 'ष्णान्ता षट्' इत्यनेन 'पञ्चन्' इत्यस्य षट्संज्ञायां, 'षड्भ्यो लुक्' इति जस्प्रत्ययस्य लोपे, 'परमपञ्चन्' नकारस्यलोपे परमपञ्च इति रूपं सिद्धम्।

**साधनिका : – प्रियपञ्चा** इत्यत्र प्रियाः पञ्च यस्येति विग्रहे 'प्रियपञ्चन्' इति शब्दात् प्रातिपदिकत्वात् प्रथमैकवचनविवक्षायां सुप्रत्यये 'प्रियपञ्चन्+सु' इति स्थिते, 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्यनेन उपधादीर्घे, हल्ङ्यादिना सुलोपे, प्रातिपदिकान्त-नकारस्य च लोपे, 'प्रियपञ्चा' इति रूपम्भवति। अस्य प्रथमाबहुवचने 'ष्णान्ता षट्', 'षड्भ्यो लुक्' इति अनयोः गौणत्वात् प्रवृत्तिर्न भवति, अतः 'प्रियपञ्चानः' इति भवति।

नकारान्त **प्रियपञ्चन्** शब्दस्य गौणत्वे पुँसि रूपाणि यथा–

| | | | |
|---|---|---|---|
| प्रियपञ्चा | प्रियपञ्चानौ | प्रियपञ्चानः | प्रथमा। |
| प्रियपञ्चानम् | प्रियपञ्चानौ | प्रियपञ्चनः | द्वितीया। |
| प्रियपञ्चः | प्रियपञ्चभ्याम् | प्रियपञ्चभिः | तृतीया। |
| प्रियपञ्चे | प्रियपञ्चभ्याम् | प्रियपञ्चभ्यः | चतुर्थी। |
| प्रियपञ्चः | प्रियपञ्चभ्याम् | प्रियपञ्चभ्यः | पञ्चमी। |
| प्रियपञ्चः | प्रियपञ्चोः | प्रियपञ्चाम् | षष्ठी। |
| प्रियपञ्चि | प्रियपञ्चोः | प्रियपञ्चसु | सप्तमी। |
| हे प्रियपञ्चन्! | हे प्रियपञ्चानौ! | हे प्रियपञ्चानः! | सम्बोधनम्। |

एवं सप्तन्, नवन्, दशन्। इत्येषां शब्दानां बहुवचनरूपाणि यथा–

| **सप्तन्** | **नवन्** | **दशन्** | |
|---|---|---|---|
| सप्त। | नव। | दश। | प्रथमा |
| सप्त। | नव। | दश। | द्वितीया |
| सप्तभिः। | नवभिः। | दशभिः। | तृतीया |
| सप्तभ्यः। | नवभ्यः। | दशभ्यः। | चतुर्थी |
| सप्तभ्यः। | नवभ्यः। | दशभ्यः। | पञ्चमी |
| सप्तानाम्। | नवानाम्। | दशानाम्। | षष्ठी |
| सप्तसु। | नवसु। | दशसु। | सप्तमी |

**( ३७१ ) अष्टन आ विभक्तौ। ७।२।८४॥**

**अष्टन आत्वं स्याद्धलादौ विभक्तौ।**

---

**३७१ – पदच्छेदः** – अष्टनः आः, विभक्तौ। त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** – हलि (रायो हलि)।

**सूत्रप्रकारः** – विधिसूत्रम्

**सरलार्थः** – 'अष्टन्' इति शब्दस्य नकारस्य स्थाने आकारान्तादेशो भवति, हलादिविभक्तौ परे।

**( ३७२ ) अष्टाभ्य औश्। ७।१।२१॥**

**कृताकारादष्टनः परयोर्जश्शसोरौश् स्यात्। 'अष्टभ्यः' इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्त्वं ज्ञापयति। वैकल्पिक चेदमष्टन आत्त्वम् 'अष्टनो दीर्घात्' ( सू. ३७१८ ) इति सूत्रे दीर्घग्रहणाज्ज्ञापकात्। अष्टौ २। परमाष्टौ। अष्टाभिः। अष्टाभ्यः २। अष्टानाम्। अष्टासु। आत्त्वाभावे – अष्ट। अष्ट इत्यादि पञ्चवत्। गौणत्वे त्वात्वाभावे राजवत्। शसि प्रियाष्ट्नः। इह पूर्वस्मादपि विधावल्लोपस्य स्थानिवद्भावान्न ष्टुत्वम्, कार्यकालपक्षे बहिरङ्गस्याल्लोपस्यासिद्धत्वाद्वा। प्रियाष्ट्ना इत्यादि।**

**जश्शसोरनुमीयमानमात्त्वं प्राधान्य एव, न तु गौणतायाम्। तेन प्रियाष्ट्नो हलादावेव वैकल्पिकमात्त्वम्। प्रियाष्टाः प्रियाष्टाभ्याम्। प्रियाष्टाभिः। प्रियाष्टाभ्यः२। प्रियाष्टासु। 'प्रियाष्ट्नो राजवत्सर्वं हाहावच्चापरं हलि।' इति नान्ताः।**

**भष्भावः। जश्त्वचर्त्वे। भुत्-भुद्। बुधौ। बुधः। बुधा। भुद्भ्याम्। भुत्सु। इति धान्ताः।**

---

३७२ - **पदच्छेदः** - अष्टाभ्यः, औश्। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - जश्शसोः (जश्शसोः शिः)।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - कृताकारादेशाद् 'अष्टन्' इति शब्दात् परयोः जश्शसोः स्थाने 'औश्' इति आदेशो भवति।

**विशेषार्थः** - आत्वाभावे 'अष्टन्' इत्यस्य रूपाणि पञ्चवद् भवन्ति, यथा अष्ट, अष्ट, अष्टभिः, अष्टभ्यः, अष्टभ्यः अष्टानाम्, अष्टसु इति।

'अष्टन्' इति शब्दस्य गौणत्वान्नाम शब्दार्थस्य अप्राधान्यम्, तस्मिन् भवति, किन्तु आत्वाभावे राजवद् रूपाणि भवन्ति।

'अष्टाभ्य औश्' इति जश्शसोः औशादेशविधौ कृतात्वनिर्देशाद् ज्ञाप्यमानम् आत्वम् अष्टन्शब्दस्य प्राधान्ये सत्ये भवति, न तु उपसर्जनत्वेऽपि, अष्टाभ्य इति बहुवचननिर्देशात्। अन्यथा 'हाहाः' इति पञ्चम्यन्तवत् 'अष्टाभ्य औश्' इति निर्देशात् इति 'ष्णान्ता षट्' इति सूत्रे भाष्ये स्पष्टम्।

प्रियाष्टन् इति शब्दस्याजादिषु विभक्तिषु राजवदेव सर्वं भवति, हलादिषु विभक्तिषु तु हाहाशब्दवद् अन्यानि रूपाणि भवन्ति इति दिक्।

'अष्टाभ्य औश्' इति सूत्रे 'अष्टाभ्यः' इति वक्तव्ये कृतात्व निर्देशो जश्शसोर्विषये आत्वं ज्ञापयति। वैकल्पिकं चेदमष्टन आत्वम्, कथं यद् अष्टन आत्त्वं नित्यं स्यात्, तर्हि अष्टभिरिति ह्रस्वान्तव्यावृत्तये क्रियमाणं दीर्घग्रहणमनर्थकं स्यात्, व्यावर्त्याभावात्। आत्वस्य विकल्पत्वे तु तदभावपक्षे अष्टभिरिति व्यावर्त्यस्य सत्त्वात् दीर्घग्रहणमनर्थवत्। अतो दीर्घग्रहणम् अष्टन आत्वस्य वैकल्पिकत्वे ज्ञापकम् 'अष्ट नो दीर्घात्' इति सूत्रे दीर्घग्रहणाज्ज्ञापकात्।

**साधनिका : - प्रियाष्ट्नः** इत्यत्र प्रियाश्च ते अष्टौ चेति विग्रहे प्रियाष्टन् इति शब्दात् प्रातिपदिकत्वात् द्वितीयाबहुवचनविवक्षायां शस्प्रत्यये, अनुबन्धलोपे प्रियाष्टन्+अस् इति स्थिते, भसंज्ञत्वाद् 'अल्लोपोऽनः' इति अकारस्य लोपे, प्रियाष्ट्न्+अस् इति स्थिते, 'ष्टुना ष्टुः' इति नकारस्य स्थाने ष्टुत्वेन णकारे प्राप्ते, 'अचः परस्मिन् पूर्वविधौ' इति अल्लोपस्य स्थानिवद्भावात् ष्टुत्वं न भवति, अथवा अल्लोपः अङ्गसञ्ज्ञाभसञ्ज्ञापेक्षत्वाद् बहिरङ्गः, ष्टुत्वं तु पदपेक्षया अल्पापेक्षत्वादन्तरङ्गम्, तस्मिन् कर्त्तव्ये बहिरङ्गस्याल्लोपस्यासिद्धत्वाद् अकारव्यवहितत्वाद् न ष्टुत्वम्, सस्य रुत्वे विसर्गे च प्रियाष्ट्नः इति रूपं सिद्धम्।

**साधनिका : - अष्टौ** इत्यत्र अष्टन् शब्दात् प्रातिपदिकत्वात् प्रथमा-बहुवचनविवक्षायां जस्प्रत्यये, अष्टन्+जस् इति स्थिते, 'ष्णान्ता षट्' इति 'अष्टन्' इत्यस्य षट्संज्ञायाम् 'षड्भ्यो लुक्' इति जस्प्रत्ययस्य लोपे प्राप्ते, 'अष्टन आ विभक्तौ' इति नकारस्य स्थाने आकारे, अष्टआ+जस् इति स्थिते, सवर्णदीर्घे, 'अष्टा+जस्' इति स्थिते, 'अष्टाभ्य औश्' इत्यनेन सूत्रेण जसः स्थाने औश् आदेशेऽनुबन्धलोपे अष्टा+औ इति स्थिते, आकारौकारयोः स्थाने औकारे वृद्धौ, 'अष्टौ' इति रूपं सिद्धम्।

**साधनिका : - अष्टानाम्** इत्यत्र **'अष्टन्'** शब्दात् प्रातिपदिकत्वात् षष्ठीबहुवचनविवक्षायाम् आम्प्रत्यये, अष्टन्+आम् इति स्थिते, 'ष्णान्ता षट्' इति अष्टन् इत्यस्य षट्संज्ञायाम् 'षट्चतुर्भ्यश्च' इत्यनेन नुडागमे अनुबन्धलोपे, अष्टन्+नाम् इति स्थिते, 'नोपधायाः' इत्युपधादीर्घे, नलोपे, अष्टानाम् इति रूपं सिद्धम्।

**साधनिका : – प्रियाष्टाः** इत्यत्र प्रियाः अष्टौ यस्येति विग्रहे प्रियाष्टन् शब्दात् प्रातिपदिकत्वात् सुप्रत्यये प्रियाष्टन्+सु इति स्थिते, 'अष्टन आ विभक्तौ' इत्यनेन सूत्रेण नकारस्य स्थाने आकारे 'प्रियाष्टआ+सु' इति स्थिते, सवर्णदीर्घे, सस्य रुत्वे विसर्गे च कृते प्रियाष्टाः इति रूपं सिद्धम्।

नित्य बहुवचनान्तस्य नकारान्तस्य **अष्टन्** शब्दस्य रूपाणि यथा–

| **आत्वपक्षे** | **आत्वाभावपक्षे** | |
|---|---|---|
| अष्टौ | अष्ट | प्रथमा |
| अष्टौ | अष्ट | द्वितीया |
| अष्टाभिः | अष्टभिः | तृतीया |
| अष्टाभ्यः | अष्टभ्यः | चतुर्थी |
| अष्टाभ्यः | अष्टभ्यः | पञ्चमी |
| अष्टानाम् | अष्टानाम् | षष्ठी |
| अष्टासु | अष्टसु | सप्तमी |

**प्रियाष्टन्** इति शब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| प्रियाष्टा–प्रियाष्टाः | प्रियाष्टानौ | प्रियाष्टानः | प्रथमा |
| प्रियाष्टानम् | प्रियाष्टानौ | प्रियाष्ट्नः | द्वितीया |
| प्रियाष्ट्ना | प्रियाष्टाभ्याम्– | प्रियाष्टाभिः | तृतीया |
| | प्रियाष्टभ्याम् | प्रियाष्टभिः | |
| प्रियाष्ट्ने | प्रियाष्टाभ्याम् | प्रियाष्टाभ्यः | चतुर्थी |
| | प्रियाष्टभ्याम् | प्रियाष्टभ्यः | |
| प्रियाष्ट्नः | प्रियाष्टाभ्याम् | प्रियाष्टाभ्यः | पञ्चमी |
| | प्रियाष्टभ्याम् | प्रियाष्टभ्यः | |
| प्रियाष्ट्नः | प्रियाष्ट्नोः | प्रियाष्टानाम् | षष्ठी |
| प्रियाष्टानि | प्रियाष्टनोः | प्रियाष्टासु | सप्तमी |
| प्रियाष्टनि | | प्रियाष्टसु | |
| हे प्रियाष्टन् | हे प्रियाष्टानौ | हे प्रियाष्टानः | सम्बोधनम् |
| हे प्रियाष्टाः | | | |

**॥ इति नकारान्ताः ॥**

**साधनिका : – भुत्-भुद्** इत्यत्र बुध–अवगमने इति धातोः कर्तरि क्विप्प्रत्ययेऽनुबन्धलोपे, बुध् इत्यस्मात् शब्दात् प्रातिपदिकत्वात् सुप्रत्यये, बुध्+सु इति स्थिते, हल्ङ्यादिना सुलोपे सति प्रत्यय–लक्षणमाश्रित्य सकारपरकत्वाद् वा पदान्तत्वाद् 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति धातोः बकारस्य स्थाने भष्भावेन भकारे भुध् इति स्थिते, धकारस्य 'झलां जशोऽन्ते' इत्यनेन जश्त्वेन दकारे कृते भुद् इति जाते, 'वाऽवसाने' इति विकल्पेन दकारस्य चर्त्वेन तकारे भुत् इति रूपम्भवति। चर्त्वाभावे भुद् इति रूपम्भवति।

**बुध्** इति शब्दस्य रूपाणि भवन्ति यथा–

| | | | |
|---|---|---|---|
| भुत्-भुद् | बुधौ | बुधः | प्रथमा। |
| बुधम् | बुधौ | बुधः | द्वितीया। |
| बुधा | भुद्भ्याम् | भुद्भिः | तृतीया। |
| बुधे | भुद्भ्याम् | भुद्भ्यः | चतुर्थी। |
| बुधः | भुद्भ्याम् | भुद्भ्यः | पञ्चमी। |
| बुधः | बुधोः | बुधाम् | षष्ठी। |
| बुधि | बुधोः | भुत्सु | सप्तमी। |
| हे भुत्-भुद्! | हे बुधौ! | हे बुधः! | सम्बोधनम्। |

**॥ इति धकारान्ताः ॥**

**॥ इति हलन्तपुँल्लिङ्गप्रकरण्-१ ॥**

## स्वाध्यायः

**१. प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) हकारस्य स्थाने ढकारः केन सूत्रेण भवति?

(क) दादेर्धातोर्धः (ख) हो ढः (ग) वाह ऊठ् (घ) सावनडुहः

(२) 'वाद्रुहमुहष्णुहष्णिहाम्' सूत्रमिदं किं करोति?

(क) हस्य घः (ख) हस्य लोपः (ग) हस्य ढः (घ) हस्य दीर्घः

(३) सु प्रत्यये परे अनडुह् शब्दस्य नुमागमो केन सूत्रेण भवति?

(क) चतुरनडुहोरामुदात्तः (ख) अम् सम्बुद्धौ (ग) सावनडुहः (घ) वाह ऊठ्

(४) 'चतुरनडुहारोमुदात्त' इति सूत्रं किं करोति?

(क) सम्प्रसारणम् (ख) दीर्घः (ग) नुडागमः (घ) आमागमः

(५) नुडागमः केन सूत्रेण भवति?

(क) षट्चतुर्भ्यश्च (ख) दिव उत् (ग) रोः सुपि (घ) एकमपि न

(६) 'अनाप्यकः' सूत्रेऽस्मिन् किमुदाहरणम्?

(क) एभिः (ख) इमकेन (ग) अनेन (घ) एभ्यः

(७) ऐसादेशः निषेधः केन सूत्रेण भवति?

(क) हलि लोपः (ख) आद्यन्तवदेकस्मिन् (ग) दश्च (घ) नेमदसोरकोः

(८) 'न ङिसम्बुद्धयोः' सूत्रमिदं कस्य निषेधं करोति?

(क) नलोपस्य (ख) सुलोपस्य (ग) नुमागमस्य (घ) दीर्घस्य

(९) विकल्पेन 'तृ' आदेशः केन सूत्रेण भवति?

(क) सौ च। (ख) मघवा बहुलम्। (ग) होहन्तेर्ञ्णिन्नेषु। (घ) द्वितीयाटौस्स्वेन।

(१०) 'अष्टानाम्' इत्यत्र नुडागमः केन सूत्रेण भवति?

(क) नामि। (ख) सौ च। (ग) नोपधायाः। (घ) षट्चतुर्भ्यश्च।

२. **एकैकवाक्येन उत्तराणि लिखत।**

(१) एकाज् झषन्तधातोरवयवस्य बशः स्थाने भष् केन सूत्रेण भवति?

(२) 'वाह ऊठ्' सूत्रमिदं किं करोति?

(३) 'तुराषाट्' इत्यस्मिन् सस्य मूर्धन्यादेशः केन भवति?

(४) 'दिव उत्' इति सूत्र किं करोति?

(५) 'सुदिवे' इत्यस्य विभक्तिवचनं किम्?

(६) प्रशाम्+सु इत्यस्मिन् मकारस्य स्थाने नकारः केन सूत्रेण भवति?

(७) 'दादेर्धातोर्घः' इति सूत्रस्य समासो विधेयः।

(८) 'इन्हन्पूषार्यम्णां शौ' इति सूत्रम् विधिसूत्रं वा नियमसूत्रम्?

३. **सविस्तरम् उत्तराणि लिखत।**

(१) 'नकारे परे कुत्वविधिसामर्थ्यादल्लोपो न स्थानिवत्' इत्यस्यार्थविस्तारं करोतु।

(२) 'ब्रह्मन्' शब्दस्य सप्तषु विभक्तिषु रूपाणि लिखत।

(३) 'इदमोऽन्वादेशे....' इत्यस्य पूर्तिङ्कृत्वा सोदाहरणमर्थो लिखत।

(४) 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति सोदाहरणं व्याख्यायत।

(५) 'बहुलम्' इत्यस्य कति अर्थाः भवन्ति? के च ते?

४. **(अ) विभागेन सह (ब) विभागं योजयत।**

| (अ) | (ब) |
|---|---|
| (१) सुपथे | प्रथमाबहुवचनम् |
| (२) प्रियपञ्चा | तुतीयैकवचनम् |
| (३) सुदिवः | चतुर्थ्येकवचनम् |
| (४) अर्वताम् | प्रथमैकवचनम् |
| (५) प्रियाष्ट्ना | षष्ठीबहुवचनम् |

५. **निम्नलिखितानि रूपाणि साधयत।**

(१) लिट्त्सु (२) धुग्भिः (३) विश्वौहः (४) अनड्वान्

(५) सुद्युभ्याम् (६) चतुरः (७) अनेन (८) राज्ञः

(९) ब्रह्माणः (१०) मघवान्

६. **अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायत।**

(१) एकाचो बशो भष् झषन्तस्य स्ध्वोः।

(२) सम्प्रसारणाच्च।

(३) वसुस्त्रंसुध्वंस्वनडुहां दः।

(४) वाह ऊठ्।

(५) द्वितीयाटौस्स्वेन।

●

# २

# हलन्तपुँल्लिङ्गप्रकरणम्-२

**प्रस्तावना**

हलन्तपुँल्लिङ्गप्रकरणस्य प्रथमविभागे हकारान्त, मकारान्त, नकारान्त, धकारान्त शब्दाः पठिताः। अथ द्वितीयभागे हलन्तपुँल्लिङ्गप्रकरणम्-२ इत्यस्मिन् सूत्र-(३७३) 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चा ञ्च' ३/२/५९ तः सूत्र (४१५) 'पादः पत्' ६/४/१३० यावत् जकारान्तशब्दादारभ्य थकारान्तशब्दपर्यन्तम् इतः वयं पठिष्यामः।

---

**( ३७३ ) ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च। ३।२।५९॥**

**एभ्यः क्विन् स्यात्। अलाक्षणिकमपि किञ्चित्कार्यं निपातनाल्लभ्यते। निरूपपदाद्युजेः क्विन्। कनावितौ।**

---

३७३ - **पदच्छेदः** - ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाम्, च। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - ऋत्विक् च, दधृक् च, स्रक् च, दिक् च, उष्णिक् च, अञ्चुश्च, युजिश्च, क्रुङ् च तेषामितरेतरद्वन्द्वः- ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चस्तेषाम् ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाम्। 'ऋत्विग्दधृक्...' इति पञ्चम्यर्थे षष्ठी। च अव्ययपदम्।

**अनुवृत्तिः** - स्पृशोऽनुदके क्विन्, धातोः (अधिकार)।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - ऋतुपूर्वक यज्धातुः, कृतद्वित्व धृष्धातुः, सज्धातुः, दिश्धातुः, उत्पूर्वकष्णिह्धातुः, अञ्चुधातुः, उपपदरहित युज्धातुः, क्रुञ्चधातुः। एभ्यः अष्टभ्यो धातुभ्यः क्विन् प्रत्ययो भवति। एवं क्रुन्च नकारस्य लोपाभाव निपातनेन भवति।

**विशेषार्थः** - लक्षणानि सूत्राणि, तद् विहितं कार्यं लाक्षणिकम्। सूत्रतः प्रत्यक्षानुपदिष्टमपि कार्यं निपातनात् सिद्धरूपनिर्देशात् लभ्यते, तेन ऋतावुपपदे यजेः क्विन्, तस्य कित्वात् 'वचिस्वपियजादीनाम्...' इति सम्प्रसारणम्, 'वश्चभ्रस्ज...' इति षत्वापवादः कुत्वं च, धृषेः क्विनि द्वित्वमन्तोदात्त्वं च, सृजेः कर्मणि क्विन् अमागमश्च, दिशेः कर्मणि क्विन्, उत्पूर्वात् स्निहे उदेर्दलोपः षत्वं च, अञ्चेः सुप्युपपदे क्विन्, युजेः केवलात् क्विन्, क्रुञ्चेः क्विन् नलोपाभावश्च निपात्यते यद्यपि अञ्चेः केवलस्योपादानम् तथापि उष्णिक् शब्दसाहचर्यात् सोपपदस्यैवाञ्चेर्ग्रहणमित्याहुः। क्विन् इत्यत्र ककारनकारौ इत्संज्ञकौ वर्तेते।

**( ३७४ ) कृदतिङ्। ३।१।९३॥**

**सन्निहिते धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात्।**

---

३७४ - **पदच्छेदः** - कृत्, अतिङ्। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - तत्र, धातोः (अधिकार), प्रत्ययः।

**सूत्रप्रकारः** - संज्ञासूत्रम्

**सरलार्थः** - धातोः अधिकारे यः तिङ्भिन्नः प्रत्ययः, सः कृत्संज्ञः भवति।

**( ३७५ ) वेरपृक्तस्य। ६।१।६७॥**

**अपृक्तस्य वस्य लोपः स्यात्। 'कृत्तद्धितसमासाश्च' ( सू. १७९ ) प्रातिपदिकत्वात् स्वादयः**

३७५ - **पदच्छेदः** - वेः, अपृक्तस्य। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - लोपः (लोपो व्योर्वलि)।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - 'व्' इति अपृक्तसंज्ञकस्य लोपो भवति।

**( ३७६ ) युजेरसमासे। ७।१।७१॥**

**युजेः सर्वनामस्थाने 'नुम्' स्यादसमासे। सुलोपः, संयोगान्तलोपः।**

---

३७६ - **पदच्छेदः** - युजेः, असमासे। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - न समासः असमासः, तस्मिन् असमासे। युजेः षष्ठ्यन्तम्, असमासे सप्तम्यन्तम्।

**अनुवृत्तिः** - सर्वनास्थाने, (उगिदचां सर्वनामस्थानेऽधातोः) नुम् (इदितो नुम्धातोः)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युज् शब्दस्य समासं विहाय नुमागमो भवति, सर्वनामस्थानसंज्ञके प्रत्यये परे।

**( ३७७ ) क्विन्प्रत्ययस्य कुः। ८।२।६२॥**

**क्विन्प्रत्ययो यस्मात्तस्य कवर्गोऽन्तादेशः स्यात्पदान्ते। नस्य कुत्वेनानुनासिको ङकारः, युङ्। 'नश्चापदान्तस्य...' ( सू. १२३ ) इति नुमोऽनुस्वारः। परसवर्णः। तस्यासिद्धत्वात् 'चोः कुः' ( सू. ३७८ ) इति कुत्वं न। युञ्जो। युञ्जः। युञ्जम्। युञ्जौ। युजः। युजा। युग्भ्यामित्यादि। असमासे किम्?**

---

३७७ - **पदच्छेदः** - क्विन्प्रत्यस्य, कुः। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - क्विन् प्रत्ययो यस्मात् सः क्विन्प्रत्ययः, तस्य क्विन्प्रत्ययस्य। क्विन्प्रत्ययस्य षष्ठ्यन्तं, कुः प्रथमान्तम्।

**अनुवृत्तिः** - अन्ते, पदस्य (अधिकार)।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - क्विन् प्रत्ययो यस्मात् सः क्विन्प्रत्ययः, तस्य कवर्गोऽन्तादेशो भवति, पदान्ते।

**विशेषार्थः** - असमासे किम्? असमासे 'युजेरसमासे' इति सूत्रस्य प्रवृत्तिर्भवति, समासेऽस्य सूत्रस्य प्रवृत्तिर्न भवति। यथा - सुयुक् - सुयुग् अग्रे वक्ष्यते।

**साधनिका : - युङ्** इत्यत्र युजिर् - योगे इति धातोः 'इर्' इत्यस्य इत्संज्ञायां लोपे च 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इति क्विन्प्रत्ययेऽनुबन्धलोपे, 'वेरपृक्तस्य' इति सूत्रेण वकारस्य लोपे, 'कृदतिङ्' इति कृत्संज्ञायां कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, युज्+सु इति स्थिते, 'युजेरसमासे' इति नुमागमेऽनुबन्धलोपे, युनज्+सु इति स्थिते, हल्ङ्यादिना सुलोपे, 'संयोगान्तरस्य लोपः' इति जकारस्य लोपे, नकारस्य अनुस्वारे, परसवर्णे च कृते 'युङ्' इति रूपं सिद्धम्।

**साधनिका : - युजः, युजा, युजे, युजोः, युजाम्, युजि** इत्यत्र शसादि-परे (असर्वनामस्थाने) सति 'युजेरसमासे' इत्यनेन नुमागमाभावे सिद्ध्यन्ति। 'युग्भ्याम् युग्भिः, युग्भ्यः इत्यत्र 'चोः कुः' इति सूत्रेण कुत्वेन गकारो भवति।

क्विन्प्रत्ययान्त जकारान्त **'युज्'** शब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| युङ् | युञ्जौ | युञ्जः | प्रथमा। |
| युञ्जम् | युञ्जौ | युजः | द्वितीया। |
| युजा | युग्भ्याम् | युग्भिः | तृतीया। |
| युजे | युग्भ्याम् | युग्भ्यः | चतुर्थी। |
| युजः | युग्भ्याम् | युग्भ्यः | पञ्चमी। |
| युजः | युजोः | युजाम् | षष्ठी। |
| युजि | युजोः | युक्षु | सप्तमी। |
| हे युङ्! | हे युञ्जौ! | हे युञ्जः! | सम्बोधनम्। |

**( ३७८ ) चोः कुः। ८।२।३०॥**

**चवर्गस्य कवर्गः स्याज्झलि पदान्ते च। इति कुत्वम्। 'क्विन्प्रत्ययस्य...' (सू. ३७७) इति कुत्वस्यासिद्धत्वात्। सुयुक्-सुयुग्-सुयुजम्। सुयुजौ। सुयुजः। 'युजेः' इति धातुपाठपठितेकारविशिष्टस्यानुकरणम्, न त्विका निर्देशः। तेनेह न - युज्यते समाधत्ते इति युक्। 'युज-समाधौ' दैवादिक आत्मनेपदी। संयोगान्तलोपः। खन्। खञ्जौ। खञ्जः इत्यादि। 'व्रश्चभ्रस्ज...' (सू. २९४) इति षत्वम्। जश्त्वचर्त्वे। राट्-राड्। राजौ। राजः। राट्त्सु-राट्सु। एवं विभ्राट्। देवेट्-देवेड्। देवेजौ। देवेजः। विश्वसृट-विश्वसृड्। विश्वसृजौ। विश्वसृजः। इह सृजियज्योः कुत्वं नेति क्लीबे वक्ष्यते। परिमृट्। षत्वविधौ राजिसाहचर्यात्। 'टुभ्राजृ-दीप्तौ' इति फणादिरेव गृह्यते। यस्तु 'एजृ, भ्रेजृ, भ्राजृ-दीप्तौ' इति तस्य कुत्वमेव। विभ्राक्-विभ्राग्। विभ्राग्भ्याम् इत्यादि। 'परौ व्रजेः षः पदान्ते' (उ.सू. २१७)। परावुपपदे व्रजेः क्विप्स्यात् दीर्घश्च पदान्तविषये षत्वं च। परित्यज्य सर्वं व्रजतीति परिव्राट्-परिव्राड्। परिव्राजौ। परिव्राजः।**

---

३७८ - **पदच्छेदः** - जोः, कुः। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - झलि, अन्ते, पदस्य (अधिकार)।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - झल् परे पदान्ते च चवर्गस्य स्थाने कवर्ग आदेशो भवति।

**विशेषार्थः** - 'युजेरसमासे' इति सूत्रे 'युजेः' इति एवम् 'ऋत्विग्...' इति सूत्रे च युजीति इकारविशिष्टस्यैव निर्देशात् 'युज समाधौ' इति दैवादिकस्य धातोः अकारान्तग्रहणात् ततः 'क्विप् च' इति क्विपि नुमभावे कुत्वे 'युक्' सिद्ध्यतीति, 'इक्स्तिपौ धातुनिर्देशे' इति इक्प्रत्ययान्तस्य उभयत्रापि सम्भवेन उभाभ्यां क्विनि नुमि युङित्येवापत्तेरित्यत आह यद् - युज्यते समाधत्ते इति युक्। अत्र 'युज-समाधौ' इति दिवादिगणीयो धातुरात्मने पदी च। अतोऽत्र 'युजेरसमासे' इति सूत्रेण नुमागमो न भवति, युक् इति रूपम्भवति।

**साधनिका :** - **सुयुक्-सुयुग्** इत्यत्र **'सुष्ठु युनक्ति'** इति विग्रहे सु उपसर्गपूर्वक युजिर्-योगे इति धातोः, 'इर इत्संज्ञा वाच्या' इति वार्त्तिकेन 'इर्' इत्यस्य इत्संज्ञायां लोपे च, 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इति क्विन्प्रत्ययेऽनुबन्धलोपे, 'वेरपृक्तस्य' इति सूत्रेण वकारस्य लोपे, 'कृदतिङ्' इति कृत्संज्ञायां कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, सुयुज्+सु इति स्थिते, हल्ङ्यादिना सुलोपे, 'चोः कुः' इति जकारस्य स्थाने कुत्वेन गकारे, सुयुग् इति स्थिते, कुत्वस्यासिद्धत्वात् 'क्विन्प्रत्यस्य कुः' इत्यस्य 'सुयुक्' इति रूपम्भवति। चर्त्वाभावे 'सुयुग्' इति रूपम्भवति।

'**सुयुज्**' इति शब्दस्य रूपाणि यथा–

| | | | |
|---|---|---|---|
| सुयुक्–सुयुग् | सुयुजौ | सुयुजः | प्रथमा। |
| सुयुजम् | सुयुजौ | सुयुजः | द्वितीया। |
| सुयुजा | सुयुग्भ्याम् | सुयुग्भिः | तृतीया। |
| सुयुजे | सुयुग्भ्याम् | सुयुग्भ्यः | चतुर्थी। |
| सुयुजः | सुयुग्भ्याम् | सुयुग्भ्यः | पञ्चमी। |
| सुयुजः | सुयुजोः | सुयुजाम् | षष्ठी। |
| सुयुजि | सुयुजोः | सुयुक्षु | सप्तमी। |
| हे सुयुक्–सुयुग् | हे सुयुजौ | हे सुयुजः | सम्बोधनम्। |

**साधनिका : – खन्** (पादेन खञ्जः) इत्यत्र खजि–गतिवैकल्ये इति धातोः, इदित्वाद् 'इदितो नुम्धातोः' इति नुमागमेऽनुबन्धलोपे च, नकारस्य स्थानेऽनुस्वारे परसवर्णे च, खञ्ज् इति, क्विन्प्रत्ययेऽनुबन्धलोपे, च क्विन्प्रत्ययस्य 'कृदतिङ्' इति कृत्संज्ञायां 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, खञ्ज्+सु इति स्थिते, हल्ङ्यादिना सुलोपे, जकारस्य संयोगान्तत्वात् लोपे, खञ् इति स्थिते, 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन अनुस्वारपरसवर्णयोः निवृत्तिः, 'खन्' इति रूपं सिद्धम्।

'**खञ्ज**' इति शब्दस्य रूपाणि भवन्ति यथा–

| | | | |
|---|---|---|---|
| खन् | खञ्जौ | खञ्जः | प्रथमा। |
| खञ्जम् | खञ्जौ | खञ्जः | द्वितीया। |
| खञ्जा | खन्भ्याम् | खन्भिः | तृतीया। |
| खञ्जे | खन्भ्याम् | खन्भ्यः | चतुर्थी। |
| खञ्जः | खन्भ्याम् | खन्भ्यः | पञ्चमी। |
| खञ्जः | खञ्जोः | खञ्जाम् | षष्ठी। |
| खञ्जि | खञ्जोः | खन्सु | सप्तमी। |
| हे खन् | हे खञ्जौ | हे खञ्जः | सम्बोधनम्। |

**साधनिका : – राट्–राड्** इत्र राजृ–दीप्तौ इति धातोः क्विन्प्रत्ययेऽनुबन्धलोपे, 'वेरपृक्तस्य' इति वकारस्य लोपे, 'कृदतिङ्' इति कृत्संज्ञायां, कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकत्वात् सुप्रत्यये, विभ्राज्+सु इति स्थिते, हल्ङ्यादिना सुलोपे, 'व्रश्चभ्रस्जसृजमृजयजराजभ्रा–जच्छशां षः' इति सूत्रेण जकारस्य षकारे, 'विभ्राष्' इति स्थिते, 'झलां जशोऽन्ते' इत्यनेन षकारस्य जश्त्वेन डकारे, विभ्राड् 'वाऽवसाने' इत्यनेन डकारस्य स्थाने चर्त्वेन टकारे 'विभ्राट्' इति रूपम्भवति। चर्त्वस्याभावे 'विभ्राड्' इति रूपं भवति।

**साधनिका : – देवेट्–देवेड्** (देवान् यजते) इत्यत्र देवान् यजतीति विग्रहे, देवोपपदाद् यज–देवपूजासङ्गतिकरणदानेषु इति धातोः, क्विन्प्रत्ययेऽनुबन्धलोपे, 'वेरपृक्तस्य' इत्यनेन वकारस्य लोपे, देवयज् इति स्थिते, 'वचिस्वपियजादीनां किति' इति धातोः यकारस्य सम्प्रसारणे इकारे, पूर्वरूपे च कृते 'देवइज्' इति स्थिते, 'आद् गुणः' इत्यनेन अकारइकारयोः स्थाने एकारे गुणैकादेशे, देवेज् इत्यवस्थायां 'कृदतिङ्' इति

क्विन्प्रत्ययस्य कृत्संज्ञायां, कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, देवेज्+सु इति स्थिते, हल्ङ्यादिना सुलोपे, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति सूत्रेण जकारस्य षकारे, 'देवेष्' इति स्थिते, 'झलां जशोऽन्ते' इत्यनेन षकारस्य जश्त्वेन डकारे, देवेड् 'वाऽवसाने' इत्यनेन डकारस्य स्थाने चर्त्वेन टकारे कृत 'देवेट्' इति रूपम्भवति। चर्त्वाभावे 'देवेड्' इति रूपं भवति।

**साधनिका : – विश्वसृट्-श्विसृड्** (विश्वसर्जकः) इत्यत्र विश्वं सृजतीति विग्रहे 'सृज-विसर्गे' इति धातोः क्विन्प्रत्ययेऽनुबन्धलोपे, 'वेरपृक्तस्य' इत्यनेन वकारस्य लोपे, 'कृदतिङ्' इति क्विन्प्रत्ययस्य कृत्संज्ञायां, कृदन्दत्वात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, विश्वसृज्+सु इति स्थिते, हल्ङ्यादिना सुलोपे, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति सूत्रेण जकारस्य षकारे, 'विश्वसृष्' इति स्थिते, 'झलां जशोऽन्ते' इत्यनेन षकारस्य जश्त्वेन डकारे, विश्वसृड् 'वाऽवसाने' इत्यनेन डकारस्य स्थाने चर्त्वेन टकारे कृते 'विश्वसृट्' इति रूपम्भवति। चर्त्वस्य विकल्पाभावे 'विश्वसृड्' इति रूपम्भवति।

**साधनिका : – परिमृट्-परिमृड्** (शुद्धकर्ता) इत्यत्र परि उपसर्गपूर्वक मृज-शुद्धौ इति धातोः, क्विन्प्रत्ययेऽनुबन्धलोपे, कृत्संज्ञायाम्, अपृक्तसंज्ञायां च कृते 'वेरपृक्तस्य' इति वकारस्य लोपे परिमृज् इति स्थिते, कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, परिमृज्+सु इति स्थिते, हल्ङ्यादिना सुलोपे, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति सूत्रेण जकारस्य षकारे, 'परिमृष्' इति स्थिते, 'झलां जशोऽन्ते' इत्यनेन षकारस्य जश्त्वेन डकारे, परिमृड् इति स्थिते, 'वाऽवसाने' इत्यनेन डकारस्य स्थाने चर्त्वेन टकारे कृते 'परिमृट्' इति रूपम्भवति। चर्त्वस्य विकल्पाभावे 'परिमृड्' इति रूम्भवति।

**विशेषार्थः** – 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इत्यस्मिन् सूत्रे राजिसाहचर्याद् 'टुभ्राजृ-दीप्तौ' इति भ्वादिगणान्तर्गतस्य फणादिगणस्यैव धातुः गृह्यते, तेन 'एजृ, भ्राजृ-दीप्तौ' अस्य 'भ्राजृ' इति धातोः षत्वन्न भवति, किन्तु कुत्वमेव भवति। विभ्राक्-विभ्राग् इत्यत्र व्युपसर्गाद् 'भ्राजृ दीप्तौ' इति धातोः प्रथमैकवचनस्य रूपमिदं वर्तते।

**( ३७९ ) विश्वस्य वसुराटोः। ६।३।१२८॥**

**विश्वशब्दस्य दीर्घोऽन्तादेशः स्याद्वसौ राट्शब्दे परे। विश्वं वसु यस्य स विश्वावसुः। राडिति पदान्तोपलक्षणार्थम्। चर्त्वमविवक्षितम्। विश्वाराट्-विश्वाराड्। विश्वराजौ। विश्वराजः। विश्वाराड्भ्याम् इत्यादि।**

---

३७९ – **पदच्छेदः** – विश्वस्य, वसुराटोः। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** – वसुश्च राट् च तयोरितरेतरद्वन्द्वः वसुराटौ, तयोः वसुराटोः।

**अनुवृत्तिः** – दीर्घः (ढ्रलोपे पूर्वस्य दीर्घोऽणः)।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – वसुशब्दे परे अथवा राट्शब्दे परे, विश्वशब्दस्य अकारस्य स्थाने दीर्घो भवति।

**विशेषार्थः** – 'राट्' कृतचर्त्वस्य शब्दस्य सूत्रेऽस्मिन् निर्देशाद् जश्त्वे सति दीर्घो न स्यादित्यत आह– राट् इत्यत्र चर्त्वस्य विवक्षा नास्ति, किन्तु पदान्तस्य उपलक्षणमस्ति, अतः 'राट्-राड्' इत्यनयोः परयोः सतोः। विश्वशब्दस्य दीर्घो भवतीति राडिति पदान्तोपलक्षणार्थम्। चर्त्वमविवक्षितम्।

**साधनिका : – विश्वावसुः** इत्यत्र विश्वं वसु (धनम्) यस्य स इति विग्रहे विश्ववसुशब्दात् प्रातिपदिक-संज्ञायां सुप्रत्यये कृते विश्ववसु+सु इति स्थिते, 'विश्वस्य वसुराटो' इति विश्वशब्दस्य अकारस्य दीर्घे विश्वावसु+सु इति स्थिते, सकारस्यरुत्वे, विसर्गे च कृते 'विश्वावसुः' इति रूपं सिद्धम्। विश्वावसुशब्दस्य रूपसिद्धिः अजन्तवद् भवति, भानुशब्दवत् रूपाणि च भवन्ति।

**साधनिका : - विश्वाराट्-विश्वाराड्** (सन्यासी) विश्व उपपादाद् राजृ-दीप्तौ इति धातोः क्विन्प्रत्ययेऽनुबन्धलोपे, 'वेरपृक्तस्य' इत्यनेन वकारस्य लोपे, 'कृदतिङ्' इति क्विन्प्रत्ययस्य कृतसंज्ञायां, कृदन्तवात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, विश्वराज्+सु इति स्थिते, हल्ङ्यादिना सुलोपे, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति सूत्रेण जकारस्य षकारे, 'विश्वराष्' इति स्थिते, 'झलां जशोऽन्ते' इत्यनेन षकारस्य जश्त्वेन डकारे, विश्वराड् इति स्थिते, 'वाऽवसाने' इत्यनेन डकारस्य स्थाने विकल्पेन चर्त्वेन टकारे कृते 'विश्वराट्' इति स्थिते, 'विश्वस्य वसुराटोः' इति विश्वशब्दस्य अकारस्य दीर्घे 'विश्वाराट्' इति रूपम्भवति। चर्त्वस्याभावे 'विश्वाराड्' इति रूपं भवति।

**'विश्वराज्'** इति शब्दस्य रूपाणि भवन्ति यथा-

| | | | |
|---|---|---|---|
| विश्वाराट्-विश्वाराड् | विश्वराजौ | विश्वराजः | प्रथमा। |
| विश्वराजम् | विश्वराजौ | विश्वराजः | द्वितीया। |
| विश्वराजा | विश्वाराड्भ्याम् | विश्वाराड्भिः | तृतीया। |
| विश्वराजे | विश्वाराड्भ्याम् | विश्वाराड्भ्यः | चतुर्थी। |
| विश्वराजः | विश्वराड्भ्याम् | विश्वाराड्भ्यः | पञ्चमी। |
| विश्वराजः | विश्वराजोः | विश्वराजाम् | षष्ठी। |
| विश्वराजि | विश्वराजोः | विश्वाराट्त्सु-विश्वराट्सु | सप्तमी। |
| हे विश्वाराट्-विश्वाराड्! | हे विश्वराजौ! | हे विश्वराजः! | सम्बोधनम्। |

**(३८०) स्कोः संयोगाद्योरन्ते च। ८।२।२९॥**

**पदान्ते झलि च परे यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यात्। भृट्-भृड्। सस्य श्चुत्वेन शः। तस्य जश्त्वेन जः। भृज्जौ। भृज्जः। 'ऋत्विग्...' (सू. ३७३) इत्यादिना ऋतावुपपदे यजेः क्विन्। क्विनन्तत्वात्कुत्वम्। ऋत्विक्-ऋत्विग्। ऋत्विजौ। ऋत्विजः। 'रात्सस्य' (सू. २८०) इति नियमान्न संयोगान्तलोपः। ऊर्क्-ऊर्ग्। ऊर्जौ। ऊर्जः। इति जान्ताः।**

---

३८० - **पदच्छेदः** - स्कोः, संयोग्, आद्योः, अन्ते, च। एकपदमिदं सूत्रम्।

**सूत्रसमासः** - स् च क् च तयोरितरेतरद्वन्द्वः स्कौ, तयोः स्कोः। संयोग् इति लुप्तषष्ठीकं पदम्। आदिश्च आदिश्च आदी, तयोराद्योः।

**अनुवृत्तिः** - लोपः, झलि।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - पदान्ते अथवा झलि परे स्कोः (सकारककारयोः) संयोगाद्योः एतयोर्लोपो भवति।

**साधनिका : - भृट्-भृड्** इत्यत्र भ्रस्ज-पाके इति धातोः क्विप्प्रत्यये, 'ग्रहिज्या...' इत्यादिना सूत्रेण धातोः रेफस्य स्थाने सम्प्रसारणे ऋकारे 'भ् ऋ अ स्ज्' इति स्थिते, 'सम्प्रसारणाच्च' इत्यनेन ऋकारअकारयोः स्थाने पूर्वरूपे, 'भृस्ज्' इत्यस्य 'कृदतिङ्' इति क्विप्प्रत्ययस्य कृत्संज्ञायां, कृदन्तवात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, भृस्ज्+सु इति स्थिते, हल्ङ्यादिना सुलोपे, 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण सकारस्य लोपे, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति सूत्रेण जकारस्य षकारे, 'भृष्' इति स्थिते, 'झलां जशोऽन्ते' इत्यनेन षकारस्य जश्त्वेन डकारे, भृड् इति स्थिते, 'वाऽवसाने' इत्यनेन डकारस्य स्थाने विकल्पेन चर्त्वेन टकारे कृते 'भृट्' इति रूपम्भवति। चर्त्वस्याभावे 'भृड्' इति रूपं भवति।

**साधनिका : – भृज्जौ** इत्यत्र भ्रस्ज–पाके इति धातोः क्विप्प्रत्यये, 'ग्रहिज्या...' इत्यादिना सूत्रेण धातोः रेफस्य स्थाने ऋकारे स्म्प्रसारणे, 'सम्प्रसारणाच्च' इति पूर्वरूपे च कृते 'भृस्ज्' इत्यस्य 'कृदतिङ्' इति क्विप्प्रत्ययस्य कृत्संज्ञायां कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायाम्, द्विवचनविवक्षायाम् औप्रत्यये, भृस्ज्+औ इति स्थिते, 'स्तोः श्चुना श्चुः' इति सकारस्य श्चुत्वेन शकारे, भृश्ज्+औ इति स्थिते, 'झलां जश् झशि' इति सूत्रेण जश्त्वेन शकारस्य स्थाने जकारे 'भृज्जौ' इति रूपम्भवति।

**साधनिका : – ऋत्विक्–ऋत्विग्** इत्यत्र ऋतु–पूर्वक यज–देवपूजासंगतिकरणदानेषु इति धातोः क्विन्प्रत्ययेऽनुबन्धलोपे, 'ग्रहिज्या...' इति धातोः यकारस्य सम्प्रसारणे इकारे, ऋतु इअज् इति स्थिते, इकारअकारयोः स्थाने पूर्वरूपे, ऋतु+इज् इति स्थिते, 'इको यणचि' इति उकारस्य स्थाने यणादेशे, 'कृदतिङ्' इति क्विन्प्रत्ययस्य कृत्संज्ञायां कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां सुप्रत्यये, ऋत्विज्+सु हल्ङ्यादिना सुलोपे, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति जकारस्य षकारे प्राप्ते, 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन जकारस्य स्थाने गकारे, ऋत्विग् इति स्थिते, 'वाऽवसाने' इति गकारस्य स्थाने चर्त्वेन ककारे, ऋत्विक् इति रूपम्भवति।

'**ऋत्विज्**' इति शब्दस्य रूपाणि भवन्ति यथा–

| | | | |
|---|---|---|---|
| ऋत्विक्–ऋत्विग् | ऋत्विजौ | ऋत्विजः | प्रथमा। |
| ऋत्विजम् | ऋत्विजौ | ऋत्विजः | द्वितीया। |
| ऋत्विजा | ऋत्विग्भ्याम् | ऋत्विग्भिः | तृतीया। |
| ऋत्विजे | ऋत्विग्भ्याम् | ऋत्विग्भ्यः | चतुर्थी। |
| ऋत्विजः | ऋत्विग्भ्याम् | ऋत्विग्भ्यः | पञ्चमी। |
| ऋत्विजः | ऋत्विजोः | ऋत्विजाम् | षष्ठी। |
| ऋत्विजि | ऋत्विजोः | ऋत्विक्षु | सप्तमी। |
| हे ऋत्विक्–ऋत्विग्! | हे ऋत्विजौ! | हे ऋत्विजः! | सम्बोधनम् |

**साधनिका : – ऊर्क् – ऊर्ग्** (बलवान्) इत्यत्र ऊर्ज–बलप्राणनयोः इति धातोः क्विप्प्रत्ययेऽनुबन्धलोपे, ऊर्ज् इत्यस्य प्रातिपदिकसंज्ञायां, सुप्रत्यये, हल्ङ्यादिना सुलोपे, 'संयोगान्तस्यलोपः' इति जकारस्य लोपे प्राप्ते, 'रात्सस्य' इति नियमान्निषेधे, 'झलां जशोऽन्ते' इति जकारस्य जश्त्वेन गकारे, 'वाऽवसाने' इति गकारस्य स्थाने चर्त्वेन ककारे **ऊर्क्** इति रूपम्भवति। चर्त्वाभावे **ऊर्ग्** इति रूपं सिद्धम्।

**॥ इति जकारान्ताः ॥**

**त्यदाद्यत्वं पररूपत्वं च।**

**( ३८१ ) तदोः सः सावनन्त्ययोः। ७। २। १०६॥**

**त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात् सौ परे। स्यः। त्यौ। त्ये। त्यम्। त्यौ। त्यान्। सः। तौ। ते। परमसः। परमतौ। परमते। द्विपर्यन्तानामित्येव, नेह त्वम्। न च तकारोच्चारणसामर्थ्यान्नेति वाच्यम्। अतित्वमिति गौणे चरितार्थत्वात्। संज्ञायां गौणत्वे चात्वसत्वे न। त्यद्। त्यदौ। त्यदः। अतित्यद्। अतित्यदौ। अतित्यदः। यः। यौ। ये। एषः। एतौ। एते। अन्वादेशे तु–एनम्। एनौ। एनान्। एनेन। एनयोः। एनयोः।**

---

३८१ – **पदच्छेदः** – तदोः, सः, सौ, अनन्त्ययोः। अनेकपदमिदं सूत्रम्।

**सूत्रसमासः** – तश्च द्श्च तयोरितरेतरद्वन्द्वः तदौ, तयोस्तदोः। न अन्त्यौ–अनन्त्यौ, तयोरनन्त्ययोः। तदोः षष्ठ्यन्तं, सः प्रथमान्तं, सौ सप्तम्यन्तम्, अनन्त्ययोः षष्ठ्यन्तम्।

**अनुवृत्तिः** – (त्यदादीनामः) त्यदादीनाम्।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – त्यदादीनां द्वादशशब्दानाम् अन्त्यभिन्नयोः तकारदकारयोः स्थाने सकारो भवति, सुप्रत्यये परे।

**विशेषार्थः** – युष्मच्छब्दस्य प्रथमैकवचनविवक्षायां त्वम् इति भवति, अत्र तकारस्य स्थाने 'द्विपर्यन्तानामेवेष्टिः' इति नियमात् त्यच्छब्दतो द्विपर्यन्तानाम् अष्टानामेव तकारदकारयोः स्थाने सकारो भवति। त्यद् कस्यचित्पुरूषस्य संज्ञेयम् अतः अत्र 'त्यदादीनामः' इति दकारस्य स्थाने अकारो न भवति, एवं 'तदोः' सः सावनन्त्ययोः इति तकारस्य स्थाने सकारो न भवति, इत्थं त्यदादीनां शब्दानां संज्ञायां गौणत्वे चार्थे इति अत्वं सत्वं च न भवति। एवम् अतित्यद् त्यमतिक्रान्त इति विग्रहे अर्थस्य गौणतायां सत्याम् अत्वसत्त्वेऽत्र न भवतः।

**साधनिका :** – **स्यः** त्यद् इति शब्दात् प्रातिपदिकत्वात् सुप्रत्यये त्यद्+सु इति स्थिते, 'त्यदादीनामः' इति दकारस्य स्थाने अकारे, 'त्य अ+स्' इति स्थिते, 'अतो गुणे' इति पररूपे त्य+स् 'तदोः सः सावनन्त्ययोः' इति तकारस्य स्थाने सकारे 'स्य+स्' सकारस्यरूत्वे विसर्गे च कृते 'स्यः' इति रूपं सिद्धम्।

**'त्यद्'** इति शब्दस्य रूपाणि भवन्ति यथा–

| | | | |
|---|---|---|---|
| स्यः | त्यौ | त्ये | प्रथमा। |
| त्यम् | त्यौ | त्यान् | द्वितीया। |
| त्येन | त्याभ्याम् | त्यैः | तृतीया। |
| त्यस्मै | त्याभ्याम् | त्येभ्यः | चतुर्थी। |
| त्यस्मात् | त्याभ्याम् | त्येभ्यः | पञ्चमी। |
| त्यस्य | त्ययोः | त्येषाम् | षष्ठी। |
| त्यस्मिन् | त्ययोः | त्येषु | सप्तमी। |

त्यदादेः सम्बोधनं नास्ति।

**साधनिका :** – **सः** 'तद्' इति शब्दात् प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे, 'तद्+स्' इति स्थिते, 'त्यदादीनामः' इति अकारअकारयोः स्थाने अकारे पररूपे, 'तदोः सः सावनन्त्ययोः' इति तकारस्य स्थाने सकार, सकारस्यरूत्वे विसर्गे च 'सः' इति रूपं सिद्धम्।

**साधनिका :** – **परमसः** 'परमश्च सः' इति विग्रहे 'परमतद्' इति शब्दात् प्रातिपदिकत्वात् सुप्रत्यये, परमतद्+स् इति स्थिते, 'त्यदादीनामः' इति दकारस्य स्थाने अकारे, परमतअ+स् इति स्थिते, 'अतो गुणे' इति अकारअकारयोः पररूपे अकारे, सस्यरूत्वे विसर्गे च 'परमसः' इति रूपं सिद्धम्।

दकारान्त **'तद्'** इति शब्दस्य रूपाणि भवन्ति यथा–

| | | | |
|---|---|---|---|
| सः | तौ | ते | प्रथमा। |
| तम् | तौ | तान् | द्वितीया। |
| तेन | ताभ्याम् | तैः | तृतीया। |
| तस्मै | ताभ्याम् | तेभ्यः | चतुर्थी। |
| तस्मात्–द् | ताभ्याम् | तेभ्यः | पञ्चमी। |
| तस्य | तयोः | तेषाम् | षष्ठी। |
| तस्मिन् | तयोः | तेषु | सप्तमी। |

दकारान्त **'यद्'** इति शब्दस्य रूपाणि भवन्ति यथा–

| | | | |
|---|---|---|---|
| यः | यौ | ये | प्रथमा। |
| यम् | यौ | यान् | द्वितीया। |
| येन | याभ्याम् | यैः | तृतीया। |
| यस्मै | याभ्याम् | येभ्यः | चतुर्थी। |
| यस्मात्-द् | याभ्याम् | येभ्यः | पञ्चमी। |
| यस्य | ययोः | येषाम् | षष्ठी। |
| यस्मिन् | ययोः | येषु | सप्तमी। |

**( ३८२ ) ङे प्रथमयोरम्। ७।१।२८॥**

**युष्मदस्मद्भ्यां परस्य 'ङे' इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्।**

---

३८२ - **पदच्छेदः** - ङे, प्रथमयोः, अम्। त्रिपदमिदं सूत्रम्।

**सूत्रसमासः** - प्रथमा च प्रथमा च द्वन्द्वापवाद एकशेषः प्रथमे, तयोः प्रथमयोः।

**अनुवृत्तिः** - युष्मदस्मद्भ्याम्।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - युष्मदस्मद्भ्यां ङे, सु, औ, जस्, अम्, औट्, शस् एतेषां सप्तप्रत्ययानां स्थाने 'अम्' आदेशो भवति।

**( ३८३ ) मपर्यन्तस्य। ७।२।९१॥**

**इत्यधिकृत्य।**

---

३८३ - **पदच्छेदः** - मः, पर्यन्तम्। द्विपदमिदं सूत्रम्।

**सूत्रप्रकारः** - अधिकारसूत्रम्

**सरलार्थः** - नियामकं सूत्रम्। युष्मदस्मच्छब्दयोः स्थाने प्रवृत्तानां सूत्राणां कृते नियममिदं सूत्रङ्करोति यद् - एतयो मपर्यन्तमेव। युष्म्, अस्म्। कार्यं भवतु इति।

**( ३८४ ) त्वाहौ सौ। ७।२।९४॥**

युष्मदस्मदोर्मपर्यन्तस्य 'त्व' 'अह' इत्येतावादेशौ स्तः सौ परे।

---

३८४ - **पदच्छेदः** - त्वाहौ, सौ। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - त्वश्च अहश्च तयोरितरेतरद्वन्द्वः त्वाहौ।

**अनुवृत्तिः** - युष्मदस्मदोः, अङ्गस्य (अधिकारः)

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - युष्मदस्मच्छब्दयोः मपर्यन्तस्य (युष्म्-त्व, अस्म्-अह) त्वाहौ आदेशौ स्तः, सुप्रत्यये परे।

**( ३८५ ) शेषे लोपः ७।२।९०॥**

**आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्। 'अतो गुणे' ( सू. १९१ ), 'अमि पूर्वः' ( सू. १९४ ) त्वम्। अहम्। ननु 'त्वम् स्त्री' 'अहम् स्त्री' इत्यत्र 'त्व अम्' 'अह अम्' इति स्थिते अमि पूर्वरूपं परमपि बाधित्वान्तरङ्गत्वाट्टाप् प्राप्नोति। सत्यम्। अलिङ्गे युष्मदस्मदी तेन स्त्रीत्वाभावान्न टाप्। यद्वा शेष इति सप्तमी स्थानिनोऽधिकरणत्वविवक्षया, तेन मपर्यन्ताच्छेषस्य 'अद्' इत्यस्य लोपः, स च परोऽप्यन्तरङ्गे अतो गुणे कृते प्रवर्तते। अदन्तत्वाभावान्न टाप्। परमत्वम्। परमाहम् अतित्वम्। अत्यहम्।**

---

३८५ - **पदच्छेदः** - शेषे लोपः। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - युष्मदस्मदोः विभक्तौ।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - आत्वयत्वनिमित्तभिन्ने विभक्तौ परे युष्मद्, अस्मद् अनयोः शब्दयोः अन्त्यवर्णस्य लोपो भवति। (यूष्मदस्मदोरनादेशे, द्वितीयायां च, प्रथमायाश्च द्विवचने भाषायम्, योऽचि) एतेषां सूत्राणां प्रवृत्तिर्यत्र न भवति, स शेषशब्दस्यार्थः भवति।

**विशेषार्थः** - अह + अम्, 'त्व + अम्' इति स्थिते, इत्यत्र 'अजाद्यतष्टाप्' इति टापः परनिमित्तापेक्षतया 'अमि पूर्वः' इति पररूपादन्तरङ्गत्वम् अस्ति, तेन टाप्प्राप्तिः, किन्तु लिङ्गरहितौ युष्मदस्मच्छब्दौ, तेन स्त्रीत्वाभावात् न टाप्, अथवा 'विवक्षातः कारकाणि भवन्ति' इत्यनुसारं यदि हि 'शेषे लोपः' इत्यस्मिन् 'शेषे' इति विभक्तिविशेषणं स्यात्। तर्हि व्यर्थमेव स्यात् आत्वयत्वाभ्यां विशेषविहिताभ्यां स्वविषये लोपस्य बाधसम्भवात्। अतः शेषस्येत्यर्थम् आस्थेयः। ततः किम्? इति प्रश्ने सति शेषस्य स्थाने इत्यर्थाश्रयणेनेत्यर्थः। मपर्यन्तस्येत्यपकृष्टं पञ्चम्या विपरिणम्यते इति भावः। एतच्च 'त्यदादीनामः' इति सूत्रे 'टिलोपष्टाबभावार्थः' कर्तव्य इति स्मृतः। अथवा शेषसप्तम्या 'शेषे लोपो विधीयते' इति वार्त्तिकतद्भाष्ययोः स्पष्टम्। न च मपर्यन्तस्य त्व इति अह इत चादेशे कृते शिष्टस्य अद् इत्यस्य मपर्यन्तात्परत्वं नास्तीति वाच्यम्, त्वाहादेशयो कृतयोः अदो लोपप्रवृत्तिवेलायां मपर्यन्ताच्छेषत्वाभावेऽपि त्वाहादेशप्रवृत्तेः पूर्वकालिकमपर्यन्तशेषत्वमादाय तदुपपत्तेः। नन्वस्तु मपर्यन्ताच्छेषस्य अद्शब्दस्य लोपः तथाऽपि त्व अद् अम् अह अह + अम् इति स्थिते पररूपापेक्षया परत्वाददो लोपे अदन्तत्वात् टाप् दुर्वारः। अतः कथयति यत्-शेषे लोप इत्यर्थः। 'अतो गुणे' इत्यस्य बहिर्भूतविभक्त्यपेक्षलोपापेक्षया अन्तरङ्गत्वम्, त्व अद् अम् अह अद् + अम् इत्यत्र पररूपे सति त्वद् अहद् इति स्थिते 'अतो लोपे' त्व् अह् इत्यनयोः अदन्तत्वाभावान्न टाबित्यर्थः। 'शेषे लोपः' इत्यनेन 'अद्' इत्यस्य लोपो भवति।

**साधनिका : - त्वम्** युष-इति सौत्र धातोः 'युष्यसिभ्यां मदिक्' इत्युणादिसूत्रेण मदिक् प्रत्ययेऽनुबन्धलोपे, युष्मद् इति शब्दात् प्रातिपदिकत्वात् सुप्रत्यये, युष्मद्+सु इति स्थिते, 'ङे प्रथमयोरम्' इति सु स्थाने अमादेशे 'युष्मद् + अम्' इति स्थिते 'त्वाहौ सौ' इति मपर्यन्तभाग युष्म् इत्यस्य स्थाने त्व आदेशे, त्व अद् + अम् 'शेषे लोपः' इति दकारस्य लोपे, 'अतो गुणे' इति पररूपे त्व + अम् 'अमि पूर्वः' इति अकारस्य पूर्वरूपे 'त्वम्' इति रूपं सिद्धम्।

**साधनिका : - अहम्** अस-गतिदीप्त्यादानेषु इति धातोः 'युप्यसिभ्यां मदिक्' इत्युणादिसूत्रेण मदिक् प्रत्ययेऽनुबन्धलोपे, युष्मद् इति शब्दात् प्रातिपदिकत्वात् सुप्रत्यये, अस्मद् + सु इति स्थिते, 'त्यदादीनामः' इति दकारस्य स्थाने अकारे प्राप्ते, 'द्विपर्यन्तानामेवेष्टिः' इति नियमात् निषेधे, 'ङे प्रथमयोरम्' इति सु स्थाने अमादेशे 'अष्मद् + अम्' इति स्थिते, 'त्वाहौ सौ' इति मपर्यन्तभाग अष्म् इत्यस्य स्थाने 'अह' आदेशे, अह अद् + अम् 'शेषे लोपः' इति दकारस्य लोपे, 'अतो गुणे' इति पररूपे अह + अम् 'अमि पूर्वः' इति अकारस्य पूर्वरूपे 'अहम्' इति रूपं सिद्धम्।

**(३८६) युवावौ द्विवचने।। ७।२।९२॥**

**द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ।**

---

३८६ - **पदच्छेदः** - युवावौ, द्विवचने। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - युवश्च आवश्च तयोरितरेतरद्वन्द्वो युवावौ। द्वयोर्वचनं-कथनं द्विवचनं तस्मिन् द्विवचने।

**अनुवृत्तिः** - युष्मदस्मदोः, विभक्तौ, मपर्यन्तस्य (अधिकार)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युष्मदस्मच्छब्दयोः मपर्यन्तस्य 'युव' 'आव' इति क्रमेण आदेशौ स्तः, द्विवचने प्रत्यये परे।

**( ३८७ ) प्रथमायाश्च द्विवचने भाषायाम्। ७।२।८८॥**

**इह युष्मदस्मदोराकारोऽन्तादेशः स्यात्। युवाम् आवाम्। 'औङि' इत्येव सुवचम्। भाषायाम् किम्? युवं वस्त्राणि। 'मपर्यन्तस्य' (सू. ३८३) किम् साकच्कस्य मा भूत्, युवकाम्। आवकाम्। 'त्वया' 'मया' इत्यत्र 'त्व्या' 'म्या' इति मा भूत्। 'युवकाभ्याम् आवकाभ्याम्' इति च न सिध्येत्।**

---

३८७ - **पदच्छेदः** - प्रथमायाः, च, द्विवचने, भाषायाम्। चतुष्पदमिदं सूत्रम्।

**अनुवृत्तिः** - आ, युष्मदस्मदोः, विभक्तौ।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युष्मदस्मच्छब्दयोः दकारयोः स्थाने आकार-आदेशो भवति, प्रथमाद्वितीययोः द्विवचने प्रत्यये परे भाषायां नाम लौकिकव्यवहारेऽर्थे सति।

**विशेषार्थः** - 'औङि' इत्येव सुवचम् - 'प्रथमायाश्च द्विवचने भाषायाम्' इति सूत्रे द्वितीयाद्विवचनेऽप्यात्वस्य इष्टत्वात् 'प्रथमायाश्च द्विवचने भाषायाम्' इति सूत्रस्य स्थाने 'औङि भाषायाम्' इत्यनेन कार्यं भवितुमर्हति, अनेन सूत्रमपि लघु भविष्यति, यथा- 'औङः आपः' इत्यनेन प्रथमाद्वितीययोः औप्रत्ययस्य ज्ञाने भवतः, तद्वत् सूत्रेऽस्मिन् भवेत्। **भाषायां किम्? युवं वस्त्राणि।** अत्र युष्मद् औ इति स्थिते, मपर्यन्तस्य युवादेशे सति शेषलोपे रूपम् 'प्रथमायाश्च द्विवचने भाषायाम्' इति सूत्रस्य प्रवृत्तिर्न भवति। **मपर्यन्तस्य किम्?** युष्मदस्मदो समस्तयोरेव युवावादेशयोः कृतयोरपि आत्वे पूर्वरूपे च युवाम् आकमिति सिद्धम्। **साकच्कस्य मा भूत्।** युष्मद् प्रातिपदिकत्वात् औप्रत्यये, 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इत्यनेन टेः प्राग् अकच्प्रत्यये, युष्मकद् + अम् इति स्थिते, 'प्रथमायाश्च द्विवचने भाषायाम्' इति दकारस्य आकारे, युवक अ आ + अम् इति स्थिते, 'अतो गुणे' इति अकारअकारयोः स्थाने पररूपे अकारे, अकारआकारयोः स्थाने सवर्णदीर्घे 'युवका + अम्' 'अमि पूर्वः' इति पूर्वरूपे 'युवकाम्' इति रूपम्भवति। एवम् 'आवकाम्' इति रूपम्भवति। अतः साकच्कस्य कार्याणि न भवन्ति। 'त्वया' 'मया' इत्यत्र 'त्व्या' 'म्या' इति मा भूत्। यदि मपर्यन्तस्येति न स्यात्, तदा 'त्वमावेकवचने' इति त्वमादेशौ समस्तयोः स्याताम्। ततश्च तृतीयैकवचने 'युष्मद् + आ' 'अस्मद् + आ' इति स्थिते, समस्तयोः स्थाने त्वमादेशयोः त्व+आ, म+आ इति स्थिते 'योऽचि' इति अकारस्य यत्वे त्व्या म्या इति स्यात्। अतः सूत्रे 'मपर्यन्तस्य' इति वचनं कृतम्।

**साधनिका** - **युवाम्** युष इति सौत्र धातोः 'युष्यसिभ्यां मदिक्' इत्युणादिसूत्रेण मदिक् प्रत्ययेऽनुबन्धलोपे, युष्मद् इति शब्दात् प्रातिपदिकत्वात् आप्रत्यये, युष्मद् + औ इति स्थिते, 'त्यदादीनाम' इति दकारस्य स्थाने अकारे प्राप्ते 'द्विपर्यन्तानामेवेष्टि' इति नियमाद् अकारे निषेधे, 'ङे प्रथमयोरम्' इति 'औ' स्थाने अकारे प्राप्ते, तन्निषेधे, युष्मद् + अम् इति स्थिते, 'प्रथमायाश्च द्विवचने भाषायाम्' इति अकारस्य आकारे, युव अ आ + अम् 'अतो गुणे' इति पररूपे, सवर्णदीर्घे च कृते युवा + अम् 'अमि पूर्वः' इति पूर्वरूपे 'युवाम्' इति रूपम्भवति। एवम् 'आवाम्' इत्यपि रूपम्भवति।

**( ३८८ ) यूयवयौ जसि। ७।२।९३॥**

**स्पष्टम्। यूयम्। वयम्। परमयूयम्। परमवयम्। अतियूयम्। अतिवयम्। इह शेषे लोपोऽन्त्यलोप इति पक्षे जसः शी प्राप्तः, 'अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्' ( प. ९३ ) इति न भवति। 'ङेप्रथमयोरम्' ( सू.३८२ ) इत्यत्र मकारान्तं प्रश्लिष्य 'अम् मान्त एवावशिष्यते, न तु विक्रियते' इति व्याख्यानाद्वा।**

---

३८८ - **पदच्छेदः** - यूयवयौ, जसि। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - युष्मदस्मदोः, मपर्यन्तस्य (अधिकार)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युष्मद्, अस्मद् एतयोः मपर्यन्तस्य यूयवयौ आदेशौ स्तः, प्रथमाबहुवचने जस्प्रत्यये परे।

**साधनिका :** - **वयम्** अस-गतिदीप्त्यादानेषु इति धातोः 'युष्यसिभ्यां मदिक्' इत्युणादिसूत्रेण मदिक् प्रत्ययेऽनुबन्धलोपे, अस्मद् इति शब्दात् प्रातिपदिकत्वात् जस्प्रत्यये, अस्मद् + जस् इति स्थिते, 'त्यदादीनामः' इति दकारस्य स्थाने अकारे प्राप्ते, 'द्विपर्यन्तानामेवेष्टिः' इति नियमात् निषेधे, 'यूयवयौ जसि' इति अस्म् इत्यस्य स्थाने वयादेशे, वय अद्+जस् इति स्थिते, 'शेषे लोपः' इति अद् इत्यस्यलोपे वय+जस् इति स्थिते, 'ङेप्रथमयोरम्' इति जस् स्थाने अमादेशे, वय+अम् इति स्थिते, अत्र स्थानिवद्भावेन 'जसः शी' इति 'अम्' इत्यस्य स्थाने 'शी' आदेशे प्राप्ते, 'अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्'। अङ्गाधिकारविहिते कार्ये कृते सति पुनः अङ्गाधिकारविहितं कार्यं न भवति। शी आदेशो न भवति, अथवा 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति परिभाषया शी आदेशो न भवति, अथवा 'ङे प्रथमयोरम्' इत्यत्र अम् म् इति मकारान्तरं प्रश्लिष्यते। अम् च म् चेति द्वन्द्वः। अन्त्यो मकारः संयोगान्तलोपेन लुप्तः। प्रश्लिष्टः मकारः अमो विशेषणम्, तदन्तविधिः। अतोऽर्थो भवति यद् मकारान्तः अम् स्यादिति। मकारान्तस्य अमः पुनर्मान्तविधानाद् अम् मान्त एव भवति, न तु तस्य विकारो भवतीति लभ्यते, अतो न शीभाव इत्यर्थ। 'अमि पूर्वः' इति पूर्वरूपे 'वयम्' इति रूपम्भवति। एवं यूयम् इत्यपि रूपम्भवति।

**( ३८९ ) त्वमावेकवचने। ७।२।९७॥**

**एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ।**

---

३८९ - **पदच्छेदः** - त्वमौ, एकवचने। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - त्वश्च मश्च तयोरितरेतरद्वन्द्वः त्वमौ। एकस्य वचनं-कथनम् एकवचनम् तस्मिन् एकवचने।

**अनुवृत्तिः** - युष्मदस्मदोः, विभक्तौ, मपर्यन्तस्य (अधिकार)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युष्मदस्मच्छब्दयोः मपर्यन्तस्य 'त्व' 'म' इति क्रमेण आदेशौ स्तः, एकवचने प्रत्यये परे।

**( ३९० ) द्वितीयायां च। ७।२।८७॥**

**युष्मदस्मदोराकारः स्यात्। त्वाम्। माम्। युवाम्। आवाम्।**

---

३९० - **पदच्छेदः** - त्वमौ, एकवचने। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - युष्मदस्मदोः, विभक्तौ।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युष्मद् अस्मद् एतयोः आकारोऽन्तादेशो भवति, द्वितीयाविभक्तौ परे।

**साधनिका :** - **त्वाम्** युष्-सौत्र इति धातोः 'युष्यसिभ्यां मदिक्' इत्युणादिसूत्रेण मदिक् प्रत्ययेऽनुबन्धलोपे, युष्मद् इति शब्दात् प्रातिपदिकत्वात् अम्प्रत्यये, युष्मद्+अम् इति स्थिते, 'त्यदादीनामः' इति दकारस्य स्थाने

अकारे प्राप्ते, 'द्विपर्यन्तानामेवेष्टिः' इति नियमाद् अकारे निषेधे, 'ङे प्रथमयोरम्' इति 'अम्'-स्थाने अमादेशे प्राप्ते, 'त्वमावेकवचने' इति 'युष्म्' इत्यस्य स्थाने त्वादेशे, त्व अद्+अम् इति स्थिते, 'द्वितीयायां च' इति दकारस्य आकारे, त्व आ+अम् इति स्थिते, अकारआकारयोः स्थाने सवर्णदीर्घे आकारे त्वा+अम् इति स्थिते, पूर्वरूपे 'त्वाम्' इति रूपं सिद्धम्। एवं 'माम्' इत्यपि सिद्ध्यति।

**( ३९१ ) शसो न। ७।१।२९॥**

**नेत्यविभक्तिकं पदम्। युष्मदस्मद्भ्यां परस्य शसो नकारः स्यात्। अमोऽपवादः। 'आदेः परस्य' ( सू. ४४ )। 'संयोगान्तस्य लोपः' ( सू. ५४ )। युष्मान्। अस्मान्।**

---

३९१ - **पदच्छेदः** - शसः, न। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - अम्, युष्मदस्मद्भ्याम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युष्मद्-अस्मद्-आभ्यां परस्य द्वितीयाबहुवचनस्य 'शस्' इति प्रत्ययस्य स्थाने नकारो भवति, 'आदेः परस्य' इति परिभाषानियमात् शस्ः अकारस्य स्थाने नकारो भवति।

**साधनिका : - यष्मान्** युष्मद् इति शब्दात् प्रातिपदिकत्वात् 'शस्' प्रत्ययेऽनुबन्धलोपे, युष्मद्+अस् इति स्थिते, 'शसो न' इति अकारस्य स्थाने नकारे युष्मद्+नस् इति स्थिते, 'द्वितीयायां च' इति दकारस्य आकारे, युष्म आ+नस् अकारआकारयोः स्थाने सवर्णदीर्घे आकारे, युष्मा+नस् इति स्थिते, 'संयोगान्तस्य लोपः' इति सकारस्य लोपे, **'युष्मान्'** इति रूपं सिद्धम्। एवम् अस्मान् इत्यपि रूपम्भवति।

**( ३९२ ) योऽचि। ७।२।८९॥**

**अनयोर्यकारादेशः स्यादनादेशेऽजादौ परतः। त्वया। मया।**

---

३९२ - **पदच्छेदः** - यः, अचि। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - युष्मदस्मदोः, अनादेशे, विभक्तौ

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युष्मदस्मदोः दकारस्य स्थाने यकारादेशो भवति, आदेशरहिते अजादिविभक्तौ परे सति।

**साधनिका : - त्वया**-युष्मद् इति शब्दात् प्रातिपदिकत्वात् टा प्रत्ययेऽनुबन्धलोपे, 'युष्मद्+आ' इति स्थिते, 'त्वमावेकवचने' इति 'युष्म्' इत्यस्य स्थाने त्वादेशे त्व अद्+आ इति स्थिते, 'योऽचि' इति दकारस्य स्थाने यकारे त्व अय्+आ इति स्थिते, 'अतो गुणे' इति पररूपे, त्वय्+आ वर्णसम्मेलने 'त्वया' इति रूपं सिद्धम्। एवं मया इत्यपि रूपं भवति।

**( ३९३ ) युष्मदस्मदोरनादेशे। ७।२।८६॥**

**अनयोराकारः स्यादनादेशे हलादौ विभक्तौ। युवाभ्याम्। आवाभ्याम्। युष्माभिः। अस्माभिः।**

---

३९३ - **पदच्छेदः** - युष्मदस्मदोः, अनादेशे। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - युष्मच्च अस्मच्च तयोरितरेतरयोग द्वन्द्वो युष्मदस्मदौ, तयोः युष्मदस्मदोः। नास्ति आदेशो यस्य (हलादिप्रत्ययस्य) स अनादेशः तस्मिन् अनादेशे।

**अनुवृत्तिः** - आ, विभक्तौ, हलि।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युष्मदस्मदोः दकारस्य स्थाने आकारो भवति, आदेशरहिते हलादिविभक्तौ परे सति।

**साधनिका :** – **आवाभ्याम्** अस्मद् इति शब्दात् प्रातिपदिकत्वात् भ्याम्प्रत्यये अस्मद्+भ्याम् इति स्थिते, 'युवावौ द्विवचने' इति 'अस्म्' इत्यस्य स्थाने आवादेशे, 'आव अद्+भ्याम्' इति स्थिते, 'युष्मदस्मदोरनादेशे' इति अकारस्य आकारे 'आव अ आ+भ्याम्' इति स्थिते, 'अतो गुणे' इति पररूपे, आव आ+भ्याम्, सवर्णदीर्घे 'आवाभ्याम्' इति रूपं सिद्धम्। एवं युवाभ्याम् इत्यपि सिद्ध्यति। एवं युष्माभिः, अस्माभिः।

**(३९४) तुभ्यमह्यौ ङयि। ७।२।९५॥**

**अनयोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि। अमादेशः 'शेषे लोपः' (सू. ३८५)। तुभ्यम्। मह्यम्। परमतुभ्यम्। परममह्यम्। अतितुभ्यम्। अतिमह्यम्। युवाभ्याम्। आवाभ्याम्।**

---

३९४ – **पदच्छेदः** – तुभ्यमह्यौ, ङयि। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** – तुभ्यश्च मह्यश्च तयोरितरेतरद्वन्द्वः, तुभ्यमह्यौ।

**अनुवृत्तिः** – युष्मदस्मदोः, मपर्यन्तस्य (अधिकार)।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – युष्मदस्मच्छब्दयोः मपर्यन्तस्य 'युष्म्' इत्यस्य स्थाने 'तुभ्य्' अस्म इत्यस्य स्थाने 'मह्य्' इत्यादेशौ भवतः, ङे प्रत्यये परे।

**साधनिका :** – **तुभ्यम्** युष्मद् इति शब्दात् प्रातिपदिकत्वाद् ङेप्रत्यये, युष्मद्+ङे इति स्थिते, 'ङेप्रथमयोरम्' इति 'ङे' स्थाने अमादेशे, युष्मद्+अम् 'तुभ्यमह्यौ ङयि' इति मपर्यन्तस्य स्थाने तुभ्यादेशे, 'तुभ्य अद्+अम्' इति स्थिते, पररूपे, 'शेषे लोपः' इति दकारस्य लोपे, तुभ्य+अम् इति स्थिते, पूर्वरूपे च कृते 'तुभ्यम्' इति रूपम्भवति। एवं मह्यम् इत्यपि भवति। एवं गौणार्थे परमतुभ्यम् इति।

**(३९५) भ्यसो भ्यम्। ७।१।३०॥**

**भ्यसो भ्यम् अभ्यम् वा आदेशः स्यात्। आद्यः शेषे लोपस्यान्त्यलोपत्व एव। तत्राङ्गवृत्तपरिभाषया एत्त्वं न। अभ्यम् तु पक्षद्वयेऽपि साधुः। युष्मभ्यम्। अस्मभ्यम्।**

---

३९५ – **पदच्छेदः** – भ्यसः, भ्यम्। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** – तुभ्यश्च मह्यश्च तयोरितरेतरद्वन्द्वः, तुभ्यमह्यौ।

**अनुवृत्तिः** – युष्मदस्मद्भ्याम्।

**सूत्रप्रकारः** – विधिसूत्रम्

**सरलार्थः** – युष्मदस्मच्छब्दाभ्याम् परस्य 'भ्यस्' इत्यस्य स्थाने 'भ्यम्' अथवा 'अभ्यम्' इत्यादेशो भवति।

**विशेषार्थः** – ननु भ्यम् आदेशपक्षे 'शेषे लोपः' इत्यादिना लोपे युष्मभ्यम् अस्मभ्यम् इति मकारदकारौ न श्रूयेतेत्यत आह– भ्यमादेशपक्षे लक्ष्यानुरोधादिह अन्त्यलोपपक्ष एवाश्रयणीयः। ननु अन्त्यलोपपक्षे दकारस्य लोपे सति 'बहुवचने झल्येत्' इत्येवं स्यादिति आह– 'अङ्गवृत्ते पुनर्वृत्तावविधिः' इति परिभाषा स्वार्थं कथयति यद् अङ्गे वृत्तं वर्तनं यस्य तद् अङ्गवृत्तं, अस्मिन् कार्ये प्रवृत्ते सति अन्यस्य अङ्गकार्यस्य वृत्तौ प्रवृत्तिविषये अविधिः, विधिर्नास्तीत्यर्थः। प्रकृते च शेषलोपे अङ्गकार्ये प्रवृत्ते सति अन्यद् अङ्गकार्यस्य 'बहुवचने झल्येत्' इत्यनेन एत्वन्न भवति। अभ्यम् आदेशो तु टिलोपे अन्त्यलोपे चानुकूलः। तत्र अन्त्यलोपपक्षे अभ्यमौ अझलादित्वभावात्तस्मिन् परे 'बहुवचने झल्येत्' इत्यनेन एत्वन्न किन्तु पररूपे सति 'युष्मभ्यम्, अस्मभ्यम्' इति रूपद्वयं सिद्ध्यति।

**(३९६) एकवचनस्य च। ७।१।३२॥**

**आभ्यां पञ्चम्येकवचनस्य अत् स्यात्। त्वत्। मत्। 'ङसेश्च' इति सुवचम्। युवाभ्याम्। आवाभ्याम्।**

---

३९६ - **पदच्छेदः** - एकवचनस्य, च। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - युष्मदस्मद्भ्याम्, पञ्चम्याः, अत्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युष्मदस्मच्छब्दाभ्यां परस्य पञ्चम्येकवचनस्य 'ङसि' इत्यस्य स्थाने 'अत्' आदेशो भवति।

**विशेषार्थः** - 'ङसेश्च' इत्येव सुवचनम्। अत्र तात्पर्यं कथयति यद् - 'एकवचनस्य च' इत्यस्य स्थाने 'ङसेश्च' इत्येव न्यासः उचितः अस्ति। अनेन सति 'पञ्चम्याः' इति पदस्य आवश्यकतैव न भवति, एवं मात्रालाघवं तु भवत्येव।

**साधनिका :** - **मत्** अस्मद् इति शब्दात् प्रातिपदिकत्वात् ङसिप्रत्यये, अनुबन्धलोपे 'अस्मद्+ङस्' इति स्थिते, 'एकवचनस्य च' इति सूत्रेण ङस् इत्यस्य स्थाने अत् आदेशे, अस्मद्+अत् इति जाते, 'त्वमावेकवचने' इत्यनेन अस्म् इत्यस्य स्थाने मादेशे, म अद्+अत् 'अतो गुणे' इति अकारअकारयोः स्थाने पररूपे अकारे, मद्+अत् इति स्थिते, 'शेषे लोपः' इति टिलोपे म्+अत् वर्णसम्मेलने 'मत्' इति रूपं सिद्धम्।

**( ३९७ ) पञ्चम्या अत्। ७। १। ३१॥**

**आभ्यां पञ्चम्या भ्यसोऽत् स्यात्। युष्मत्। अस्मत्।**

---

३९७ - **पदच्छेदः** - पञ्चम्याः, अत्। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - युष्मदस्मद्भ्याम्, भ्यसः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युष्मदस्मच्छब्दाभ्यां परस्य पञ्चमीबहुवचनस्य 'भ्यस्' इत्यस्य स्थाने 'अत्' आदेशो भवति।

**साधनिका :** - **युष्मत्** युष्मद् इति शब्दात् प्रातिपदिकत्वात् भ्यस्प्रत्यये, युष्मद्+भ्यस् इति स्थिते 'पञ्चम्या अत्' इति अद् आदेशे, युष्मद्+अत् इति स्थिते, 'शेषे लोपः' इति टिलोपे युष्म्+अत्, वर्णस्म्मेलने '**युष्मत्**' इति सिद्धम्। एवम् **अस्मत्** इत्यपि सिद्ध्यति।

**( ३९८ ) तवममौ ङसि। ७। २। ९६॥**

**अनयोर्मपर्यन्तस्य तवममौ स्तो ङसि।**

---

३९८ - **पदच्छेदः** - तवममौ, ङसि। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - तवश्च ममश्च तयोरितरेतरद्वन्द्वः तवममौ।

**अनुवृत्तिः** - युष्मदस्मदोः, मपर्यन्तस्य।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - षष्ठ्येकवचनस्य 'ङस्' प्रत्यये परे युष्मदस्मदोः मपर्यन्तस्य स्थाने क्रमेण 'तव' 'मम' इत्यादेशो भवतः।

**( ३९९ ) युष्मदस्मद्भ्यां ङसोऽश्। ७। १। २७॥**

**स्पष्टम्। तव। मम। युवयोः। आवयोः।**

---

३९९ - **पदच्छेदः** - युष्मदस्मद्भ्याम्, ङसः, अश्। त्रिपदमिदं सूत्रम्।

**सूत्रसमासः** - युष्मच्च अस्मच्च तयोरितरेतरद्वन्द्वो युष्मदस्मदौ, ताभ्यां युष्मदस्मद्भ्याम्।

**अनुवृत्तिः** - अङ्गस्य (अधिकारः)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युष्मदस्मच्छब्दाभ्याम् परस्य 'ङस्' इत्यस्य स्थाने 'अश्' आदेशो भवति।

**साधनिका : – मम** अस्मद् इति शब्दात् प्रातिपदिकत्वात् 'ङस्प्रत्यये', 'अस्मद्+ङस्' इति स्थिते, 'तवममौ ङसि' इति सूत्रेण मपर्यन्तस्य स्थाने 'मम' आदेशे, 'मम अद्+ङस्' इति स्थिते, 'युष्मदस्मद्भ्यां ङसोऽश्' इति सूत्रेण 'ङस्' इत्यस्य स्थाने 'अश्' आदेशे, 'मम अद्+अश्' इति स्थिते, 'अतो गुणे' इति पररूपे, 'ममद्+अ' इति स्थिते, 'शेषे लोपः' इति टिलोपे, वर्णसम्मेलने 'मम' इति रूपम्भवति। एवं तव इत्यति रूपं भवति।

**साधनिका : – युवयोः** युष्मद् इति शब्दात् प्रातिपदिकत्वात् ओस्प्रत्यये, 'युष्मद्+ओस्' इति स्थिते, 'युवावौ द्विवचने' इति सूत्रेण 'युष्म' इत्यस्य स्थाने 'युव' आदेशे, 'युव अद्+ओस्' इति स्थिते, 'योऽचि' इति सूत्रेण दकारस्य स्थाने यकारे, युव अय्+ओस् इति स्थिते, 'अतो गेणे' इति पररूपे, 'युवय्+ओस्' इति स्थिते, सस्यरूत्वे विसर्गे च कृते वर्णसम्मेलने 'युवयोः' इति रूपम्भवति। एवं 'आवयोः' इत्यपि रूपं भवति।

**( ४०० ) साम आकम्। ७।१।३३॥**

आभ्यां परस्य साम आकम् स्यात्। भाविनः सुटो निवृत्त्यर्थं ससुट्कनिर्देशः। युष्माकम्। अस्माकम्। त्वयि। मयि। युवयोः। आवयोः। युष्मासु। अस्मासु।

**समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी।**
**समासार्थोऽन्यसङ्ख्यश्चेत्स्तो युवावौ त्वमावपि॥ १॥**
**सुजस्ङेङस्सु परत आदेशाः स्युः सदैव ते।**
**त्वाहौ यूयवयौ तुभ्यमह्यौ तवममाविति॥ २॥**
**एते परत्वाद् बाधन्ते युवावौ विषये स्वके।**
**त्वमावपि प्रबाधन्ते पूर्वविप्रतिषेधतः॥ ३॥**
**द्व्येकसङ्ख्यः समासार्थो बह्वर्थे युष्मदस्मदी।**
**तयोरद्व्येकतार्थत्वान्न युवावौ त्वमौ च न॥ ४॥**

त्वां मां वा अतिक्रान्त इति विग्रहे अतित्वम्, अत्यहम्। अतित्वाम्, अतिमाम्। अतियूयम्, अतिवयम्, अतित्वाम्, अतिमाम्। अतित्वान्, अतिमान्। अतित्वया, अतिमया। अतित्वाभ्याम्, अतिमाभ्याम्। अतित्वाभिः, अतिमाभिः। अतितुभ्यम्, अतिमह्यम्। अतित्वाभ्याम्, अतिमाभ्याम्। अतित्वभ्यम्, अतिमभ्यम्। ङसिभ्यसोः–अतित्वत्, अतित्वत्, भ्यामि प्राग्वत्। अतितव, अतिमम। अतित्वयोः, अतिमयोः। अतित्वाकम्, अतिमाकम्। अतित्वयि, अतिमयि। अतित्वयोः, अतिमयोः। अतित्वासु, अतिमासु॥

युवाम् आवां वा अतिक्रान्त इति विग्रहे सुजस्ङेङस्सु प्राग्वत्। औ–अम्–औट्सु अतियुवाम्, अतियुवाम्, अतियुवाम्। अत्यावाम् अत्यवाम्, अत्यवाम्। अतियुवान्, अत्यावान्। अतियुवया, अत्यावया। अतियुवाभ्याम् ३, अत्यावाभ्याम्। अतियुवाभिः, अत्यावाभिः। भ्यसि–अतियुवभ्यम् अत्यावभ्यम्। ङसिभ्यसोः–अतियुवत् अतियुवत्। अत्यावत् अत्यावत्। ओसि–अतियुवयोः अतियुवयोः। अत्यावयोः अत्यावयोः। अतियुवाकम्, अत्यावाकम्। अतियुवयि, अत्यावयि। अतियुवासु, अत्यावासु।

युष्मानस्मान्वा अतिक्रान्त इति विग्रहे सुजस्ङेङस्सु प्राग्वत्। औ–अम्–औट्सु अतियुष्माम् अतियुष्माम् अतियुष्माम्। अत्यस्माम् अत्यस्माम् अत्यस्माम्। अतियुष्मान्, अत्यस्मान्। अतियुष्मया, अत्यस्मया। अतियुष्माभ्याम् ३। अत्यस्माभ्याम् ३। अतियुष्माभिः, अत्यस्माभिः। भ्यसि–अतियुष्मभ्यम्, अत्यस्मभ्यम्। ङसिभ्यसोः–अतियुष्मत् २। अत्यस्मत् २। ओसि–अतियुष्मयोः अतियुष्मयोः। अत्यस्मयोः अत्यस्मयोः। अतियुष्माकम्, अत्यस्माकम्। अतियुष्मयि, अत्यस्मयि। अतियुष्मासु, अत्यस्मासु॥

४०० - **पदच्छेदः** - सामः, आकम्। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - युष्मस्मद्भ्याम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युष्मदस्मच्छब्दाभ्यां परस्य षष्ठीबहुवचनस्य 'साम्' इत्यस्य स्थाने 'आकम्' आदेशो भवति।

**विशेषार्थः** - सकारेण सहितः आम् (साम्) तस्य आकमादेशो भवति। ससुट्कस्य आम इति। ननु युष्मद् आम्, अस्मद् आम्, इति स्थिते अवर्णात् परत्वाभावात् सुटो न प्रसक्तिः। न च 'शेषे लोपः' इति दस्य लोपे कृते अवर्णात् परत्वमस्ति इति वाच्यम्। आकमादेशात् प्राग् अनादेशतया शेषलोपस्यैवात्राप्रसक्तेः ससुट्कनिर्देशोऽनुपपन्नः व्यर्थश्चेत्याह- भाविन सुटो निवृत्यर्थं ससुट्कनिर्देशः। यदि तु 'आम् आकम्' इति कथयेत्, तर्हि आम् आकमादेश कृते दकारस्य शेषलोपे सति स्थानिवत्वेन आकमादेशस्य आत्मवात् तस्य च अवर्णात्परत्वात् सुटागमः स्यात्। तत एत्वषत्वयोर्युष्मेषाकम् अस्मेषाकम् इति स्यात्, अतः ससुट्कनिर्देशः यद्यपि आकमादेशप्रवृत्तिकाले सुटो न प्रसक्तिः, तथाऽपि आकमादेशोत्तरम् अकारलोपे कृते स्थानिवत्त्वेन यः सुट् भविष्यति, तस्यापि स्थानषष्ठ्याः स्वीकरणान्निवृत्तिर्भवति। अन्यथा ससुट्कनिर्देश वैयर्थ्यादिति भावः। यदि शेषे लोपे वाश्रीयते तदा कृतेऽप्याकमादेशे अदो लोपे अवर्णात् परत्वाभावादेव सुटः प्रसक्त्याभावात् ससुट्कनिर्देशो मास्तु।

**साधनिका :** - **अस्माकम्** अस्मद् इति शब्दात् प्रातिपदिकत्वात् आम्प्रत्यये, अस्मद्+आम् इति स्थिते, आमि सर्वनाम्नः सुट् इति सुडागमेऽनुबन्धलोपे, अस्मद्+साम् 'साम आकम्' इति सूत्रेण 'साम्' इत्यस्य स्थाने 'आकम्' आदेशे, अस्मद्+आकम् इति स्थिते, 'शेषे लोपः' इति टिलोपे, अस्म्+आकम् इति स्थिते, वर्णसम्मेलन '**अस्माकम्**' इति रूपम्भवति। एवं '**युष्माकम्**' इत्यपि रूपं भवति॥

**साधनिका :** - **त्वयि** युष्मद् इति शब्दात् प्रातिपदिकत्वात् सप्तम्येकवचनविवक्षायां ङिप्रत्ययेऽनुबन्धलोपे, 'युष्मद्+इ' इति स्थिते, 'त्वमावेकवचने' इति सूत्रेण मपर्यन्तस्य 'युष्म्' इत्यस्य स्थाने 'त्व' आदेशे, त्व अद्+इ इति स्थिते, 'अतो गुणे' इति पररूपे, 'त्वद्+इ' इति स्थिते, 'योऽचि' इत्यनेन दकारस्य स्थाने यकारादेशे, 'त्वय्+इ' वर्णसम्मेलने '**त्वयि**' इति रूपं सिद्धम्। एवम् '**मयि**' इत्यपि सिद्ध्यति।

**श्लोकार्थः** - 'त्वमावेकवचने' इत्यत्र 'युवावौ द्विवचने' इत्यत्र च एकवचनद्विवचनशब्दौ यौगिकौ, न तु प्रत्ययपरौ इति स्थितम्। एतैः चतुर्भिः श्लोकैः कथयति यद्- यदि समस्यमाने युष्मदस्मदी द्व्येकत्ववाचिनी, तदा समासार्थः अन्य स्याच्चेदपि युष्मदस्मदोः 'युवावौ, त्वमौ' आदेशौ भवतः। 'त्वाम्' मां वा अतिक्रान्तः, अतिक्रान्तौ, अतिक्रान्ताः इति युवां वा आवाम् अतिक्रान्तः, अतिक्रान्तौ, अतिक्रान्ताः, इति च विग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासे लक्षमाने युष्मदस्मदौ द्वित्वैकत्वान्यतरविशिष्टार्थवाचिनौ यदा, तदा समासार्थो मुख्यविशेष्यभूतः अन्यसङ्ख्याश्चेदपि युष्मदस्मदर्थगत युवानौ तदर्थगत्वे त्वमौ च द्विवचनैकवचन-प्रत्ययपरत्वाभावेऽपि भवतः युवावादेशविधौ द्विवचनशब्दस्य, त्वमादेशविधौ एकवचनशब्दस्य च यौगिकत्वाश्रयणात् एकवचने प्रत्यये परतस्त्व-आदेशो द्विवचने प्रत्यये परतो युवावादेशौ इत्यर्थाश्रयणे तु त्वां मां वा अतिक्रान्तौ, अतिक्रान्ता इति विग्रहे अतियुष्मद्-शब्दे अत्यस्मच्छब्दे च युष्मस्मदोर्द्विवचने बहुत्ववचने च प्रत्यये परे त्वमौ न स्यातां तथा युवाम् आवाम् वा अतिक्रान्तः, अतिक्रान्तौ, अतिक्रान्ताः, इति विग्रहे युष्मदस्मदोरेकवचने बहुवचने च प्रत्यये परे युवावौ न स्यातामिति अतिव्याप्तिः॥ १॥

ननु द्वितीयश्लोकस्यार्थो भवति यत्- 'त्वाहौ सौ', 'यूयवयौ जसि', 'तुभ्यमह्यौ ङयि', 'तवममौ ङसि' इति सुजस्ङेङस्सु ये आदेशा भवन्ति, ते अतियुष्मदस्मच्छब्दाभ्याम् एकवचनद्विवचनबहुवचनेषु प्रत्ययेषु परेषु भवन्तीत्यर्थः॥ २॥

तृतीयश्लोकस्यार्थो भवति यद्- एते त्वाहादयः स्वके स्वीये विषये सुजसादौ युवावौ बाधन्ते। कुतः ? परत्वात्- युवावादेशापेक्षया परत्वादितिभावः। नन्वस्त्वेव त्वाहादिभिर्युवावयोर्बाधः।

चतुर्थश्लोकस्यार्थो भवति यद्- युष्मान् वा अतिक्रान्तो, अतिक्रान्ताः इति विग्रहे समासे सति द्वित्वैकत्वविशिष्टः समासार्थः, समासस्य मुख्यविशेष्यभूतः युष्मदस्मदी तु बह्वर्थके, तदा युवावौ त्वमौ च न स्तः, तयोः युष्मदस्मदोः द्वित्वैकत्वविशिष्टार्थकत्वाभावात्। युवावविधौ त्वम् अविधौ च युष्मदस्मदोर्द्वित्वैकत्वविशिष्टवाचित्वे सत्येव प्रवृत्तेराश्रयणात्। द्विवचने एकवचने च प्रत्यये परतः इत्यर्थाश्रयणे तत्रातिव्याप्तिः स्यादित्यर्थः। अत्र 'युवावौ द्विवचने' इत्यत्र द्विवचनैकवचनशब्दयौर्योगिकत्वाश्रयणमुपक्षिप्य युवाम् आवां वा अतिक्रान्तः - अतिक्रान्तौ - अतिक्रान्ताः इति विग्रहान् प्रदर्श्य, अतियुष्मदस्मच्छब्दयोः सुजस्ङेङस्सु तु त्वाहौ, यूयवयौ, तुभ्यमह्यौ, तवममौ च इत्येता उदाहृत्य प्रदर्शिताः॥ ४॥

दकारन्त **'युष्मद्'** शब्दस्य **'अस्मद्'** शब्दस्य रूपाणि यथा-

| | | | | | | |
|---|---|---|---|---|---|---|
| त्वम् | युवाम् | यूयम्। | अहम् | आवाम् | वयम्। | प्र. |
| त्वाम् | युवाम् | युष्मान्। | माम् | आवाम् | अस्मान्। | द्वि. |
| त्वया | युवाभ्याम् | युष्माभिः। | मया | आवाभ्याम् | अस्माभिः। | तृ. |
| तुभ्यम् | युवाभ्याम् | युष्मभ्यम्। | मह्यम् | आवाभ्याम् | अस्मभ्यम्। | च. |
| त्वत् | युवाभ्याम् | युष्मत्। | मत् | आवाभ्याम् | अस्मत्। | पं. |
| तव | युवयोः | युष्माकम्। | मम | आवयोः | अस्माकम्। | षष्ठी |
| त्वयि | युवयोः | युष्मासु। | मयि | आवयोः | अस्मासु। | स. |

**(४०१) -पदस्य। - ८।१।१६॥**

**(४०२) -पदात्। - ८।१।१७॥**

**(४०३) -अनुदात्तं सर्वमपादादौ। - ८।१।१८॥**

**इत्यधिकृत्य।**

---

४०१ - **पदच्छेदः** - पदस्य। एकपदमिदं सूत्रम्।

**अनुवृत्तिः** - अङ्गस्य (अधिकारः)।

**सूत्रप्रकारः** - अधिकारसूत्रम्।

**सरलार्थः** - 'पदस्य' इति सूत्राद् 'विभाषितं विशेषवचने बहुवचनम्' इति सूत्रं यावत् (५७ सूत्राणि पर्यन्तम्) अस्य सूत्रस्याधिकारः। एतैः सप्तपञ्चाशत् सूत्रैः विहितानि यानि कार्याणि सन्ति, तानि कार्याणि सम्पूर्णपदस्य स्थाने वक्ष्यमाणा आदेशा अनुदात्ता भविष्यन्ति।

४०२ - **पदच्छेदः** - पदात्। एकपदमिदं सूत्रम्।

**सूत्रप्रकारः** - अधिकारसूत्रम्।

**सरलार्थः** - 'पदात्' इति सूत्रात् 'कुत्सने च सुप्यगोत्रादौ' इत्यतः प्राग् (५४ सूत्राणि पर्यन्तम्) अस्य सूत्रस्याधिकारः एतैः चतुष्पञ्चाशत् सूत्रैः विहितानि यानि कार्याणि सन्ति, तानि कार्याणि पदात् परे भविष्यन्ति।

४०३ - **पदच्छेदः** - अनुदात्तं, सर्वम्, अपादादौ। त्रिपदमिदं सूत्रम्।

**सूत्रसमासः** - पादस्यादिः पादादिः, न पादादिरपादादिस्तस्मिन् अपादादौ, षष्ठीगर्भनञ्तत्पुरुषः।

**सरलार्थः** - 'अनुदात्तं सर्वमपादादौ' इति सूत्रात् 'कुत्सने च सुप्यगोत्रादौ' इत्यतः प्राग् (५४ सूत्राणि पर्यन्तम्) अस्य सूत्रस्याधिकारः एतैः चतुष्पञ्चाशत् सूत्रैः विहितानि यानि कार्याणि सन्ति, तानि कार्याणि पदात् परे भविष्यन्ति।

**(४०४) -युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ। ८।१।२०॥**

**पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वां नौ इत्यादेशौ स्तः, तौ चानुदात्तौ।**

---

४०४ - **पदच्छेदः** - युष्मदस्मदोः, षष्ठीचतुर्थीद्वितीयास्थयोः, वांनावौ। त्रिपदमिदं सूत्रम्।

**सूत्रसमासः** - युष्मच्च अस्मच्च तयोरितरेतरद्वन्द्वः युष्मदस्मदौ (युष्मदस्मदी) तयोः - युष्मदस्मदोः। षष्ठी च चतुर्थी च द्वितीया च तयोरितरेतरद्वन्द्वः षष्ठीचतुर्थीद्वितीयाः, तासु तिष्ठतः इति षष्ठीचतुर्थीद्वितीयास्थौ, तयोः षष्ठीचतुर्थीद्वितीयास्थयोः।

**अनुवृत्तिः** - पदस्य, पदात्, अनुदात्तं सर्वमपादादौ (त्रयाणाम् अधिकारः)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पदात्परस्य अपदादौ (पादस्यादौ अविद्यमानः, पादः-चरणम्) षष्ठीचतुर्थीद्वितीयासु विभक्तिषु क्रमेण युष्मच्छब्दस्य द्विवचनस्य स्थाने 'वाम्' आदेशः, अस्मच्छब्दस्य स्थाने 'नौ' आदेशः भवति, तौ चादेशौ अनुदात्तौ स्तः।

**विशेषार्थः** - सम्पूर्णपदस्य स्थाने आदेशत्वात् अयं पदादेश इत्युच्यते, अस्मिन् पदादेशप्रकरणे क्रमेण चत्वारि सूत्राणि सन्ति, अत्र ध्यातव्यमस्ति यत् प्रथमं तु युष्मदस्मच्छब्दयोः पूर्वं कस्यापि पदस्य आवश्यकता वर्तते। परन्तु पद्यरचनायां, छन्दसिः आदौ युष्मदस्मच्छब्दौ श्लोकस्य मन्त्रस्य वा पादस्य आदौ न भवेताम्।

**(४०५) -बहुवचनस्य वस्नसौ। ८।१।२१॥**

**उक्तविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः। वांनावोरपवादः।**

---

४०५ - **पदच्छेदः** - बहुवचनस्य, वस्नसौ। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - वस् च नस् च तयोरितरेतरद्वन्द्वः वस्नसौ।

**अनुवृत्तिः** - पदस्य, पदात्, अनुदात्तं सर्वमपादादौ (त्रयाणाम् अधिकारः)। युष्मदस्मदोः, षष्ठीचतुर्थीद्वितीयास्थयोः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पदात्परस्य अपदादौ (पादः-चरणम्) षष्ठीचतुर्थीद्वितीयासु विभक्तिषु क्रमेण युष्मच्छब्दस्य-बहुवचनस्य स्थाने 'वस्' आदेशः, अस्मच्छब्दबहुवचनस्य स्थाने 'नस्' आदेशः भवति, तौ चादेशौ अनुदात्तौ स्तः। 'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ' इत्यनेन विहितयोः (वाम्, नौ) इत्यस्यापवादो भवत्यनेन सूत्रेण।

**(४०६) -तेमयावेकवचनस्य। ८।१।२२॥**

**उक्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः।**

---

४०६ - **पदच्छेदः** - तेमयौ, एकवचनस्य। द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - ते च मे च तयोरितरेतरद्वन्द्वः, तेमयौ।

**अनुवृत्तिः** - पदस्य, पदात्, अनुदात्तं सर्वमपादादौ (त्रयाणाम् अधिकारः)। युष्मदस्मदोः, षष्ठीचतुर्थीस्थयोः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पदात्परस्य अपदादौ षष्ठीचतुर्थीविभक्त्योः क्रमेण युष्मच्छब्दैकवचनस्य स्थाने 'ते' आदेशः, अस्मच्छब्दैकवचनस्य स्थाने 'मे' आदेशः भवति, तौ चादेशौ अनुदात्तौ स्तः।

**(४०७) -त्वामौ द्वितीयायाः। ८।१।२३॥**

**द्वितीयैकवचनान्तयोस्त्वा, मा एतौ स्तः।**

**श्रीशस्त्वावस्तु मापीह दत्तात्ते मेऽपि शर्म सः।**
**स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः॥१॥**
**सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः।**
**सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः॥२॥**

पदात्परयोः किम्? वाक्यादौ मा भूत्। त्वां पातु। मां पातु। अपादादौ किम्? - **वेदैरशेषैः संवेद्योऽस्मान्कृष्णः सर्वदाऽवतु।** स्थग्रहणाच्छ्रूयमाणविभक्तिकयोरेव। नेह- इति युष्मत्पुत्रो ब्रवीति, इत्यस्मत्पुत्रो ब्रवीति। 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' (वा.४७१४)। 'एकतिङ् वाक्यम्' (वा.११९९)। तेनेह न- ओदनं पच, तव भविष्यति। इह तु स्यादेव - 'शालीनां ते ओदनं दास्यामि' इति। 'एते वांनावादय आदेशा वा अनन्वादेशे वक्तव्या' (वा. ४७१७)। अन्वादेशे तु नित्यं स्युः। धाता ते भक्तोऽस्ति, धाता तव भक्तोऽस्तीति वा। तस्मै ते नम इत्येव।

---

४०७ - **पदच्छेदः** - त्वामौ, द्वितीयायाः द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - त्वा च मा च तयोरितरेतरद्वन्द्वः त्वामौ।

**अनुवृत्तिः** - पदस्य, पदात्, अनुदात्तं सर्वमपादादौ (त्रयाणाम् अधिकारः)। युष्मदस्मदोः, एकवचनस्य।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पदात्परस्य अपदादौ द्वितीयाविभक्तेः क्रमेण युष्मच्छब्दैकवचनस्य स्थाने 'त्वा' आदेशः अस्मच्छब्दैकवचनस्य स्थाने 'मा' आदेशः भवति, तौ चादेशौ अनुदात्तौ स्तः।

**विशेषार्थः** - आभ्यां द्वाभ्यां श्लोकाभ्यां विभक्तिक्रमक्लृप्तद्वितीयाचतुर्थीषष्ठी - क्रमेण एकवचनद्विवचन- बहुवचनक्रमेण उदाहरति। तत्र **श्रीशस्त्वावतु माऽपीह** इति प्रथमः पादः। श्रिया ईशः पतिः विष्णुः त्वा मा अपि पातु इत्यन्वयः अत्र त्वाम् माम् इति द्वितीयैकवचनान्तयोः त्वा मा इत्यादेशौ भवतः। **दत्तात्ते मेऽपि शर्म सः।** स श्रीशः ते मेऽपि शर्म सुखं दत्तादित्यर्थः। अत्र तुभ्यम्, मह्यम् इति चतुर्थ्येकवचनान्तयोः ते मे इत्यादेशौ। **स्वामी ते मेऽपि स हरिरिति।** तत्र तव मम इति षष्ठ्येकवचनान्तयोः ते मे आदेशौ स्तः। **स्वामी पातु वामपि नौ विभुरिति।१।** विभुः सर्वव्यापकः वां नौ अपि पातु इत्यन्वयः। अत्र युवाम् आवाम् इति द्वितीयाद्विवचनयोः वा नौ इत्यादेशौ। **सुखं वां नौ ददात्वीश इति।** नौ इत्यनन्तरमपिशब्दोऽध्याहार्यः। अत्र युवाभ्याम् इति चतुर्थीद्विवचनान्तयोः वांनावौ। **पतिर्वामपि नौ हरिः।** अत्र युवयोः आवयोः इति षष्ठीद्विवचनान्तयोः वांनावौ। **सोऽव्याद्वो नः।** स हरिः वः नः अपि अव्यात् रक्षतात् इत्यर्थः। अत्र युष्मान् अस्मान् इति द्वितीयाबहुवचनान्तयोः वस्नसौ। **शिवं वो नो दद्यात्।** शिवमिति शुभमुच्यते। न इत्यनन्तरम् अपीत्यध्याहार्यम्। अत्र युष्मभ्यम्, अस्मभ्यम् इति चतुर्थीबहुवचनान्तयोः वस्नसौ। **सेव्योऽत्र वः स नः।२।** स हरिः वः नः अपि सेव्यः भजनीय इत्यर्थः। अत्र 'कृत्यानां कर्तरि वा' इति कर्तुः षष्ठी। अत्र युष्माकम् अस्माकम् इति षष्ठीबहुवचनान्तयोः वस्नसौ।

**विशेषार्थः** - **त्वां मां पातु इति।** अत्र युष्मदस्मदोः पदात् परत्वाभावात् 'त्वामौ द्वितीयायाः' इति न भवतीत्यर्थः। यद्यप्यत्र अस्मच्छब्दस्य पात्विति पदात् परत्वमस्ति, तथापि भिन्नकालं वाक्यद्वयमिह विवक्षितमित्यदोषः। अपादादौ किम्? 'वेदैरशेषैः संवेद्योऽस्मान्कृष्णः सर्वदाऽवतु' अत्र अस्मच्छब्दस्य पादादौ स्थितत्वान्नादेशः। यद्यप्यनुष्टुप्छन्दसोऽयं श्लोकः। तत्र एकैकः पादः अष्टाक्षरो भवति। तत्र सन्ध्यभावे 'अस्मान् कृष्णः सर्वदाऽवतु' इत्यस्य नवाक्षरत्वान्न पादत्वम्। कृते सन्धौ ओकारस्य परादित्वे सति अष्टाक्षरत्वव्याघातः संवेद्य इत्यस्य परत्वाभावाद् अस्मदः पदात् परत्वाभावश्च।

ननु 'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ' इत्यस्य स्थाने 'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयान्तयोः' इत्येव सूत्रमिदं भवेदिति, किं स्थग्रहणे? स्थग्रहणेऽपि कथञ्चित्तस्यैवास्य लाभो भवत्यतःकथयति यत् स्थग्रहणादिति? स्थाधातुः तिष्ठतीति स्थः। अत्र द्वितीयादिषु विभक्तिषु सति एतानि कार्याणि भवन्ति। पुत्रोऽत्र न भवति यथा- युष्मत्पुत्रो ब्रवीति, अस्मत्पुत्रो ब्रवीति। अत्र युवयोर्युष्माकं वा पुत्रः, आवयोरस्माकं वा पुत्र इति विग्रहः। अत्र विभक्तेर्लुका लुप्तत्वात् श्रूयमाणविभक्तिकत्वाभावाद् आदेशस्य न प्रवृत्तिर्भवति।

**साधनिका : - त्वा** युष्मद् इति शब्दात् प्रातिपदिकत्वात् अम्प्रत्यये, 'युष्मद्+अम्' इति स्थिते, 'त्वामौ द्वितीयाया:' इति सूत्रेण 'युष्मद्+अम्' इति प्रकृतिप्रत्यययो: स्थाने त्वा आदेशे 'त्वा' इति रूपम्भवति। एवं मा इत्यपि भवति।

**वार्त्तिकार्थ:** - 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या:' निमित्तनिमित्तिनो: एकत्वं समानवाक्यत्वम्, तस्मिन्नेव विधीयमाना: (वाम् नौ, ते, मे, व:, न:) इत्यादेशा भवन्ति।

**वार्त्तिकार्थ:** - 'एकतिङ् वाक्यम्' एकतिङ् यस्य तद् एकतिङ् वाक्यम्भवति, तिङित्यनेन तिङन्तं विवक्षितम्।

**वार्त्तिकार्थ:** - 'एते वांनावादय आदेशा वा अनन्वादेशे वक्तव्या:' एते वांनावादय: (वाम्, नौ, ते, मे, व:, न:) इत्यादेशा अनन्वादेशे विकल्पेन भवन्ति, अन्वादेशे तु नित्यं भवन्ति, अन्वादेशो नाम 'किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं बोधयितुं पुनरुपादानमन्वादेश:' यथा- अनेन व्याकरणमधीतम् एनं छन्दोऽध्यापय। विशेषे- धाता ते भक्तोऽस्ति, धाता तव भक्तोऽस्तीति वा तस्मै ते नम:। महादेवं प्रति वचनमेतत्। अत्र अन्वादेशेऽर्थे सति 'एते वांनावादय आदेशा वा अनन्वादेशे वक्तव्या:' इति वार्त्तिकेन विकल्पेन 'ते' आदेशो भवति, विकल्पाभावे 'तव' इति भवति।

**(४०८) -न चवाहाहैवयुक्ते। ८।१।२४॥**

**चादिपञ्चकयोगे नैते आदेशा: स्यु:। हरिस्त्वां मां च रक्षतु, कथं त्वां मां वा न रक्षेदित्यादि। युक्तग्रहणात्साक्षाद्योगेऽयं निषेध:। परम्परासम्बन्धे त्वादेश: स्यादेव। हरो हरिश्च मे स्वामी।**

---

४०८ - **पदच्छेद:** - न, चवाहाहैवयुक्त। द्विपदमिदं सूत्रम्।

**सूत्रसमास:** - चश्च वाश्च हश्च अहश्च एवश्च तेषामितरेतरद्वन्द्व: चवाहाहैवास्तैर्युक्तं चवाहाहैवयुक्तं तस्मिन् चवाहाहैवयुक्ते, न अव्ययपदम्।

**अनुवृत्ति:** - पदस्य, पदात्, (अधिकार)। युष्मदस्मदो:, षष्ठीचतुर्थीद्वितीयास्थयो:।

**सूत्रप्रकार:** - विधि (निषेध) सूत्रम्।

**सरलार्थ:** - च (समुच्चये), वा (विकल्पे), य (अद्भुते), अह (खेदे), एव (अवधारणे) एतेषाम् पञ्चानां योगे सति युष्मदस्मदो: (वाम्, नौ, ते, मे, व:, न:) इति आदेशा न भवन्ति।

**(४०९) -पश्यार्थैश्चानालोचने। ८।१।२५॥**

**अचाक्षुषज्ञानार्थैर्धातुभिर्योगे एते आदेशा न स्यु:। चेतसा त्वां समीक्षते। परम्परासम्बन्धेऽप्ययं निषेध:। भक्तस्तव रूपं ध्यायति। आलोचने तु भक्तस्त्वा पश्यति चक्षुषा।**

---

४०९ - **पदच्छेद:** - पश्यार्थै:, च, अनालोचने। त्रिपदमिदं सूत्रम्।

**सूत्रसमास:** - पश्योऽर्थो येषां ते पश्यार्थास्तै: पश्यार्थै:। न आलोचन अनालोचनं, तस्मिन् अनालोचने।

**अनुवृत्ति:** - बहुवचनस्य वस्नसौ, तेमयावेकवचनस्य, त्वामौ द्वितीयाया:, युष्मदस्मदो: षष्ठीचतुर्थीद्वितीयास्थयो:।

**सूत्रप्रकार:** - विधि (निषेध) सूत्रम्।

**सरलार्थ:** - पश्य: दर्शनम् अर्थो येषां ते पश्यार्था:, तै: पश्यार्थै:, आलोचनं चाक्षुषं ज्ञानं तद्भिन्नम् अनालोचनम्, तस्मिन्ननालोचनेऽर्थे सति दर्शनार्थैर्धातुभिर्योगे युष्मदस्मदो: (वाम्, नौ, ते, मे, व:, न:) इति आदेशा न भवन्ति।

**विशेषार्थ: - भक्तस्तव रूपं ध्यायति।** अत्र तव इत्यस्य रूपेणान्वय:, न तु साक्षाद् ध्यायति। अतोऽत्र अनेन सूत्रेण निषेधो भवति। भक्तस्त्वा पश्यति चक्षूषा। अत्र चाक्षूषज्ञानत्वाद् त्वादेशो भवति।

**साधनिका : - चेतसा तं समीक्षते हे देव। मनसा त्वां चिन्तयामीत्यर्थ:।** अत्र युष्मद् अम् इति स्थिते, 'त्वामौ द्वितीयाया:' इति प्रकृतिप्रत्यययो: स्थाने त्वा आदेशे प्राप्ते 'पश्यार्थैश्चानालोचने' इति सूत्रेण अनालोचनत्वात् त्वादेशे निषेधे पूर्ववत्कार्ये त्वामिति रूपम्भवति।

**(४१०) -सपूर्वायाः प्रथमाया विभाषा। ८।१।२६॥**

**विद्यमानपूर्वात् प्रथमान्तात् परयोरनयोरन्वादेशेऽप्येते आदेशा वा स्युः। 'भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम्'। त्वा मा इति वा।**

---

४१० - **पदच्छेदः** - सपूर्वायाः, प्रथमायाः, विभाषा। त्रिपदमिदं सूत्रम्।

**सूत्रसमासः** - सह- विद्यमानं पूर्व यस्याः सा सपूर्वा, तस्याः सपूर्वायाः।

**अनुवृत्तिः** - बहुवचनस्य वस्नसौ, तेमयावेकवचनस्य, त्वामौ द्वितीयायाः, युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोः।

**सूत्रप्रकारः** - विधि (विकल्प) सूत्रम्।

**सरलार्थः** - सहशब्दोऽत्र विद्यमानवाची, तस्मात् विद्यमानपूर्वात् प्रथमान्तात् युष्मदस्मदोः वाम्, नौ, इत्याद्यादेशा अन्वादेशेऽपि विकल्पेन भवन्ति।

**साधनिका : - भक्तस्त्वामप्यहं तेन हरिस्त्वां त्रायते स माम्।** अत्र तेनेत्येतत् पूर्व विद्यमानं पदं ततः परं हरिरिति प्रथमान्तं, ततः परस्य **युष्मच्छब्दस्यान्वादेशेऽपि त्वादेशविकल्पः।** तथा '**त्रायते**' इत्येतत् पूर्वं विद्यमानं पदं ततः परं 'सः' इति प्रथमान्तम्, ततः परस्यास्मच्छब्दस्यान्वादेशेऽपि माइत्यादेशविकल्पः। 'त्रायते' इत्येतद् मध्यमणिन्यायेन उभयत्र सम्बध्यते। तेन निमित्तनिमित्तिनोः समानवाक्यस्थत्वं, सः इत्यस्य विद्यमानपूर्वत्वं च बोध्यम्।

**(४११) -सामन्त्रितम्। २।३।४८॥**

**सम्बोधने या प्रथमा तदन्तमामन्त्रितसंज्ञं स्यात्।**

---

४११ - **पदच्छेदः** - सा, आमन्त्रितम्। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - सम्बोधने, प्रथमा।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - सम्बोधने प्रथमान्तशब्दस्वरूपस्य आमन्त्रितसंज्ञा भवति।

**(४१२) -आमन्त्रितं पूर्वमविद्यमानवत्। ८।१।७२॥**

**स्पष्टम्। अग्ने तव। देवास्मान् पाहि। अग्ने नय। अग्न इन्द्र वरुण। इह युष्मदस्मदोरादेशस्तिङन्तनिघात आमन्त्रितनिघातश्च न। 'सर्वदा रक्ष देव नः' इत्यत्र तु 'देव' इत्यस्याविद्यमानवद्भावेऽपि ततः प्राचीनं 'रक्ष' इत्येतदाश्रित्यादेशः। एवम् 'इमं मे गङ्गे यमुने' इति मन्त्रे यमुन इत्यादिभ्यः प्राचीनानामामन्त्रितानाम् अविद्यमानवद्भावेऽपि मेशब्दमेवाश्रित्य सर्वेषां निघातः।**

---

४१२ - **पदच्छेदः** - आमन्त्रितं, पूर्वम्, अविद्यमानवत्। त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** - पदस्य।

**सूत्रप्रकारः** - अतिदेशसूत्रमिदम्।

**सूत्रसमासः** - न विद्यमानम् अविद्यमानम् तेन तुल्यम् अविद्यमानवत्।

**सरलार्थः** - वाक्ये पूर्वपदरूपेण विद्यमानं य आमन्त्रितसंज्ञकपदम् अस्ति, स अविद्यमानवद् भवति। अर्थात् - अविद्यमानवद्भावाद् युष्मदस्मदोः स्थाने (वाम्, नौ, ते, मे, वः, नः) इत्यादय आदेशा न भवन्ति।

**साधनिका : - अग्ने तव। देवास्मान्पाहि। अग्ने नय। अग्न इन्द्र वरुण।** इत्यादिषु प्रयोगेषु 'सामन्त्रितम्' इत्यनेन अविद्यमानवद्भावात् 'तव' इत्यस्य स्थाने 'ते' रूपन्न भवति, 'सामन्त्रितम्' इत्यनेन 'देव' इति पदस्य आमन्त्रितसंज्ञायाम् 'आमन्त्रितं पूर्वमविद्यमानवत्' इत्यनेन अविद्यमानवद्भावात् 'अस्मान्' इत्यस्य स्थाने 'नः' इति रूपन्न भवति, '**अग्ने नय**' इत्यत्र नयेति तिङन्तस्य 'तिङ्ङतिङः' इत्यनेनानुदात्तत्वं न भवति। '**अग्न इन्द्र वरुण**' इत्यत्र अग्ने शब्दस्य अविद्यमानवत्वेन पदात् परत्वाभावात् इन्द्रशब्दस्य न अनुदात्तत्वम्। एवं वरुणंशब्दस्यापि न अनुदात्तत्वम्, ततः, प्राचीनयोः 'अग्ने इन्द्र' इत्यनयोरविद्यमानवत्त्वात्। ननु 'सर्वदा रक्ष देव नः' इत्यत्र

कथं नसादेशः, तर्हि 'देव' इति पदस्य अविद्यमानवद्भावात्पूर्व 'रक्ष' इति पदमाश्रित्य नसादेशो भवति। एवं वरुणशब्दस्यापि न अनुदात्तत्वम्, ततः प्राचीनयोः 'अग्ने इन्द्र' इत्यनयोरविद्यमानवत्त्वात्।

**(४१३) -नामन्त्रिते समानाधिकरणे सामान्यवचनम्। ८।१।७३॥**

**विशेष्यं समानाधिकरणे विशेषणे आमन्त्रिते परे नाविद्यमानवत् स्यात्। हरे दयालो नः पाहि। अग्ने तेजस्विन्। 'विभाषितं विशेषवचने' (सू. ३६५५)। अत्र भाष्यम् 'बहुवचनमिति वक्ष्यामि' इति। बहुवचनान्तं विशेष्यं समानाधिकरणे आमन्त्रिते विशेषणे परे अविद्यमानवद्वा। यूयं प्रभवः देवाः शरण्याः। युष्मान् भजे, वो भजे इति वा। इहान्वादेशेऽपि वैकल्पिका आदेशाः। सुपात्, सुपाद्। सुपादौ। सुपादः। सुपादम्। सुपादौ।**

---

४१३ - **पदच्छेदः** - न, आमन्त्रिते, समानाधिकरणे, सामान्यवचनम्। चतुष्पदमिदं सूत्रम्।

**सूत्रसमासः** - समानम् अधिकरणं यस्य तत् समानाधिकरणम्, तस्मिन् समानाधिकरणे। सामान्यस्य वचनं सामान्यवचनम्।

**अनुवृत्तिः** - आमन्त्रितं, पूर्वम्, अविद्यमानवत्, पदस्य।

**सूत्रप्रकारः** - अतिदेश-(निषेध) सूत्रम्।

**सरलार्थः** - समानम् अधिकरणं यस्य तदिति समानाधिकरणम् (समानविभक्तिक)। समानशब्द एकत्वपरः। समानाधिकरणे विशेषणे आमन्त्रितसंज्ञके परे अविद्यमानवद्भावो न भवति।

**विशेषार्थः** - 'विभाषितं विशेषवचने' इति सूत्रस्य भाष्ये भाष्यकारेण लिखितं यद् बहुवचनान्तविशेष्यवाचकपदस्य अविद्यमानवद्भावो विकल्पेन भवति, अतः 'यूयं प्रभवो देवाः शरण्याः, युष्मान्भजे, वो भजे' इत्यत्र विकल्पेन अन्वादेशे 'युष्मान्' इति पदस्य स्थाने 'वस्' आदेशो भवति।

**साधनिका : - 'हरे दयालो नः पाहि'** इत्यत्र समानाधिकरणे विशेषणे परे सति 'सामन्त्रितम्' इत्यनेन 'हरे' इति पदस्य आमन्त्रितसंज्ञायाम् 'आमन्त्रितं पूर्वमविद्यमानवत्' इत्यनेन अविद्यमानवद्भावे प्राप्ते 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' इत्यनेन अविद्यमानवद्भावे निषेधे सति नसादेशो भवति।

**साधनिका : - सुपात् - सुपाद्** इत्यत्र पद्यते अनेन इति विग्रहे पद-गतौ इति धातोः 'हलश्च' इति घञ्प्रत्ययेऽनुबन्धलोपे, उपधावृद्धौ पादः, शोभनौ पादौ यस्येति विग्रहे 'सुपाद' इत्यत्र 'संख्यासुपूर्वस्य' इति पादशब्दान्त्यलोपे सुपाद् इत्यस्माद् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां, सुप्रत्ययेऽनुबन्धलोपे, हल्ङ्यादिना सकारस्य लोपे, 'वाऽवसाने' इत्यनेन विकल्पेन दकारस्य चर्त्वन तकारे 'सुपात्' इति रूपम्भवति। विकल्पाभावे 'सुपाद्' इति रूपम्भवति।

**(४१४) -पादः पत्। ६।४।१३०॥**

**पाच्छब्दान्तं यदङ्गं भं तदवयवस्य पाच्छब्दस्य पदादेशः स्यात्। सुपदः। सुपदा। सुपद्भ्याम्। इत्यादि। इति दान्ताः। अग्निं मथ्नाति इत्यग्निमत्, अग्निमद्। अग्निमथौ। अग्निमथः। अग्निमद्भ्यामित्यादि। इति थान्ताः।**

---

४१४ - **पदच्छेदः** - पादः, पत्। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - भस्य, अङ्गस्य।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पाच्छब्दान्तस्य भसंज्ञकस्य शब्दस्य स्थाने 'पद' इत्यादेशो भवति, 'निर्दिश्यमानस्यादेशा भवन्ति' इति 'पाद' इत्यस्यैव स्थाने 'पद्' आदेशो भवति।

**साधनिका : - सुपदः** पद्यते एभिः आभ्याम् विग्रहे पद-गतौ इति धातोः 'हलश्च' इति घञ्प्रत्ययेऽनुबन्धलोपे, उपधावृद्धौ पादः, शोभनौ पादौ यस्येति विग्रहे 'सुपाद' इत्यत्र **'संख्यासुपूर्वस्य'** इति पादशब्दान्त्यलोपे सुपाद् इत्यस्माद् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां, शस्प्रत्ययेऽनुबन्धलोपे, सुपाद् अस् इति स्थिते, 'पादः पत्' इत्यनेन 'पाद्' इत्यस्य स्थाने 'पद्' आदेशे, सकारस्य त्वे विसर्गे च कृते **'सुपदः'** इति रूपम्भवति।

**साधनिका : - अग्निमत्-अग्निमद्** अग्निं मथ्नाति इति विग्रहे 'अग्नि' इत्युपपदाद् मन्थ-विलोऽने इति धातोः 'अन्येभ्योऽपि दृश्यते' इति सूत्रेण क्विप्प्रत्यये, क्विप् इत्यत्र ककारस्य 'लशक्वतद्धिते' इत्यनेन इत्संज्ञायाम्, लोपे च, पकारस्य 'हलन्त्यम्' इत्यनेन इत्संज्ञायां लोपे च, इकार उच्चारणार्थः, वकारस्य 'वेरपृक्तस्य' इत्यनेन लोपे, 'अनिदितां हल उपधाया क्ङिति' इति नलोपे, 'अग्निमथ्' इत्यस्माद् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां, सुप्रत्ययेऽनुबन्धलोपे, अग्निमथ्+स् इति स्थिते, 'हल्ङ्याप्...' इत्यनेन सकारस्य लोपे, 'झलां जशोऽन्ते' इत्यनेन थकारस्य स्थाने दकारे, अग्निमद् इति स्थिते, 'वाऽवसाने' इत्यनेन विकल्पेन दकारस्य स्थाने चर्त्वेन तकारे 'अग्निमत्' इति रूपम्भवति। विकल्पाभावे 'अग्निमद्' इति भवति।

**अग्निमथ्** इति शब्दस्य रूपाणि भवन्ति यथा-

| | | | |
|---|---|---|---|
| अग्निमत् - अग्निमद् | अग्निमथौ | अग्निमथः | प्र. |
| अग्निमथम् | अग्निमथौ | अग्निमथः | द्वि. |
| अग्निमथा | अग्निमद्भ्याम् | अग्निमद्भिः | तृ. |
| अग्निमथे | अग्निमद्भ्याम् | अग्निमद्भ्यः | च. |
| अग्निमथः | अग्निमद्भ्याम् | अग्निमद्भ्यः | पं. |
| अग्निमथः | अग्निमथोः | अग्निमथाम् | ष. |
| अग्निमथि | अग्निमथोः | अग्निमत्सु | स. |
| हे अग्निमत् - अग्निमद्! | हे अग्निमथौ! | हे अग्निमथः! | सम्बो. |

**॥ इति थकारान्ताः ॥**

**॥ इति हलन्तपुँल्लिङ्गप्रकरणम् - २ समाप्तम् ॥**

## स्वाध्यायः

**१. प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) 'विश्वावसुः' इत्यत्र विश्वशब्दस्य दीर्घः केन सूत्रेण भवति?
(क) त्वाहौ सौ। (ख) यूयवयौ जसि। (ग) द्वितीयायाञ्च। (घ) विश्वस्य वसुराटोः

(२) 'त्वत्' इत्यत्र ङसि स्थाने 'अत्' आदेशः केन सूत्रेण भवति?
(क) एकवचनस्य च। (ख) तुभ्यमह्यौ ङयि। (ग) योऽचि। (घ) पञ्चम्या अत्।

(३) 'विश्वराज्' इति शब्दस्य चतुर्थ्येकवचने किं रूपं भवति?
(क) विश्वराजा (ख) विश्वराजि (ग) विश्वराजे (घ) विश्वराजः

(४) 'साऽऽमन्त्रितम्' सूत्रमिदं किं करोति?
(क) वामादेशः। (ख) आमन्त्रितसंज्ञा। (ग) सादेशः। (घ) लोपः।

(५) 'मपर्यन्तमस्य' इति सूत्रस्य प्रकारः कः?
(क) विधिसूत्रम्। (ख) निषेधसूत्रम्। (ग) संज्ञासूत्रम्। (घ) अधिकारसूत्रम्।

(६) 'युवाम्' इत्यत्र दकारस्य स्थाने आकारादेशो केन सूत्रेण भवति?
(क) प्रथमायाश्च द्विवचने भाषायाम्। (ख) त्वमावेकवचने।
(ग) शसो न। (घ) युष्मदस्मदोरनादेशे।

(७) षष्ठीचतुर्थ्येकवचनयोः स्थाने 'ते, मे' त्यादेशौ केन सूत्रेण भवतः?
(क) पदात् (ख) तेमयावेकवचने (ग) न चवाहाहैवयुक्ते (घ) योऽचि

(८) 'अत्यस्मद्' शब्दस्यबहुवचने विग्रहे सति पञ्चम्येकवचने किं रूपं भवति?

(क) अत्यस्मात् (ख) अतिमह्यम् (ग) अत्यस्मत् (घ) अतिमम

(९) सर्वनामस्थाने परे युज् शब्दस्य नुमागमः केन सूत्रेण भवति?

(क) वेरपृक्तस्य। (ख) कृदतिङ्। (ग) क्विन्प्रत्ययस्य कुः। (घ) युजेरसमासे

(१०) 'स्कोः संयोगाद्योरन्ते च' सूत्रमिदं किं करोति?

(क) सलोपः। (ख) सागमः। (ग) सादेशः। (घ) वृद्धिः।

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) 'स्कोः संयोगाद्योरन्ते च' सूत्रमिदं कतिपदमस्ति?

(२) 'त्यस्मै' इत्यस्य शब्द-विभक्ति-वचनं किम्?

(३) 'त्वामौ द्वितीयायाः' इति सूत्रं किम् करोति?

(४) 'न चवाहाहैवयुक्ते' सूत्रमिदं केषामादेशानां निषेधः करोति?

(५) 'पश्चार्थैश्चानालोचने' इति सूत्रस्य प्रकारः कः?

(६) 'बहुवचनस्य वस्नसौ' इत्यस्मिन् सूत्रे कस्य अनुवृत्तिः आयाति?

(७) 'सपूर्वायाः प्रथमाया विभाषा' इति सूत्रस्य समासो विधेयः।

(८) 'प्रथमायाश्च द्विवचने भाषायाम्' इति सूत्रस्य पदच्छेदो विधेयः?

**३. सविस्तरम् उत्तराणि लिखत।**

(१) 'औङि इत्येव सुवचम्' इत्यस्य व्याख्यां करोतु।

(२) 'एते परत्वाद्बाधन्ते... पूर्वविप्रतिषेधतः॥' श्लोकपूर्तिङ्कृत्वा व्याख्यात।

(३) 'खञ्ज्' इत्यस्य व्युत्पत्तिं कृत्वा सप्तसु विभक्तिषु रूपाणि लिखत।

(४) 'युष्मदस्मदोरनादेशे' इति सूत्रस्य समासं विलिख्य अर्थञ्च लिखत।

**४. 'अ' विभागेन सह 'ब' विभागं योजयत।**

| (अ) | (ब) |
|---|---|
| (१) तदोः सः सावनन्त्ययोः | ते, मे इत्यादेशौ भवतः। |
| (२) द्वितीयायाञ्च | आमन्त्रितसंज्ञां करोति। |
| (३) युष्मदस्मदोरनादेशे | सादेशः करोति सौ परे। |
| (४) तेमयावेकवचनस्य | युष्मदस्मदोराकारः करोति। |
| (५) साऽऽमन्त्रितम् | दकारस्य स्थाने आकारो भवति। |

**५. निम्नलिखितानि रूपाणि सविस्तरं साधयत।**

(१) युङ् (२) विभ्राट् (३) भृज्जौ (४) त्वम्

(५) युवाम् (६) युष्मान् (७) मम (८) त्वयि

(९) शरिस्त्वां मां च रक्षतु (१०) अग्ने नय।

**६. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यात।**

(१) विश्वस्य वसुराटोः।

(२) तदोः सः सावनन्त्ययोः।

(३) प्रथमायाश्च द्विवचने भाषायाम्।

(४) भ्यसो भ्यस्।

(५) एकवचनस्य च।

●

# ३

# हलन्तपुँल्लिङ्गप्रकरणम्-३

**प्रस्तावना**

हलन्तपुँल्लिङ्गप्रकरणस्य द्वितीयविभागे धकारान्त-जकारान्त-थकारान्त-शब्दाः पठिताः। अथ तृतीयविभागे (हलन्तपुँल्लिङ्गप्रकरणम्-३) इत्यस्मिन् सूत्र-(४१६) 'अनिदितां हल उपधाया क्ङिति' ६/४/२४ तः सूत्र-(४४०) 'न मुने' ८/२/३३ पर्यन्तं सूत्राणि सन्ति, तेषु सूत्रेषु चकारान्तशब्दादारभ्य सकारान्तशब्दपर्यन्तम् इतः वयमध्ययनं करिष्यामः।

'ऋत्विग्-'(सू. ३७३) इत्यादिसूत्रेणाञ्चेः सुप्युपपदे क्विन्।

**(४१५) अनिदितां हल उपधायाः क्ङिति। ६।४।२४॥**

**हलन्तानामनिदितामङ्गानामुपधायाः नस्य लोपः स्यात्किति ङिति च। 'उगिदचाम्...' (सू. ३६१) इति नुम्। 'संयोगान्तस्य लोपः' (सू. ५४)। नुमो नकारस्य 'क्विन्प्रत्ययस्य कुः' (सू. ३७७) इति कुत्वेन ङकारः। प्राङ्। अनुस्वारपरसवर्णौ। प्राञ्चौ, प्राञ्चः। प्राञ्चम्, प्राञ्चौ।**

४१५ - **पदच्छेदः** - अनिदितां, हलः, उपधायाः क्ङिति।

**अनुवृत्तिः** - अङ्गस्य, नलोपः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इत् = ह्रस्वः इकारः इत्संज्ञकः येषां ते इदितः, न इदितः इति अनिदितः, तेषां अनिदितां हलन्तानां धातूनामुपधाभूतनकारस्य लोपः भवति, किति ङिति च प्रत्यये परे स्यात्तदा।

**साधनिका : - प्राङ् (पूर्वदिशा) प्राञ्चतीति विग्रहे** प्र उपसर्गाद् 'अञ्चु गतिपूजनयोः'। इति धातोरनुबन्धलोपे (प-अन्च्) 'ऋत्विग्दधृग्स्रग्दि-गुष्णिगञ्चुयुजिक्रुञ्चां च' इत्यनेन क्विन् प्रत्यये 'प्र+अञ्च्+क्विन्' क्विन् प्रत्ययस्यानुबन्धलोपे, 'वेरपृक्तस्य' इति सूत्रेण वकारस्य लोपे 'अनिदितां हल उपधायाः क्ङिति' सूत्रेण उपधाभूतनकारस्य लोपे, 'अकः सवर्णे दीर्घः' आकारे सवर्णे दीर्घे 'प्राच्' अत्र 'कृदतिङ्' इति क्विन्प्रत्ययस्य कृत्संज्ञायाम्, कृदन्तत्वात् 'प्राच्' शब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायाम्, 'स्वौजसमौट्...' सु प्रत्यये, 'सुडनपुंसकस्य' इति सर्वनामस्थानसंज्ञायाम्, 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमे अनुबन्धलोपे 'प्रानच्+सु' इति सुलोपे, 'संयोगान्तस्य लोपः' इति चकारस्य लोपे, 'क्विन्प्रत्ययस्य कुः' इति सूत्रेण नकारस्य कुत्वेन ङकारे, 'प्राङ्' इति रूपं सिद्धम्॥

**प्राञ्चौ** - 'प्रानच्+औ' इति स्थिते 'नश्चापदान्तस्य झलि' नकारस्य अनुस्वारे 'अनुस्वारस्य ययि परसवर्णः' इत्यनेन ञकारे परसवर्णे **'प्राञ्चौ' इति रूपं सिद्धम्**॥

**प्राञ्चः** - 'प्राञ्च+जस्' अत्र चुटू जकारस्य इत्संज्ञायाम् लोपे रुत्त्वविसर्गे।

**प्राञ्चम्** - 'प्राञ्च+अम्' इति।

**विशेषार्थः** - लक्षणानि सूत्राणि, तैः विहितं कार्यं लाक्षणिकम्। सूत्रतः प्रत्यक्षानुपदिष्टमपि कार्यं निपातनात् सिद्धरूपनिर्देशात् लभ्यते, तेन ऋतावुपपदे यजेः क्विन् तस्य कित्वात् 'वचिस्वपि...' इति सम्प्रसारणम्, 'व्रश्चभ्रस्जसृजमृज...' इति षत्वापवादः कुत्वं च, धृषेः क्विनि द्वित्वमन्तोदात्तत्वं च, सृजेः कर्मणि क्विन्,

उत्पूर्वात् स्निहेः क्विन् उदो लोपः षत्वं च, अञ्चेः सुप्युपपदे क्विन्, युजेः केवलात् क्विन्, क्विन् नलोपाभावश्च निपात्यते। यद्यपि अञ्चेः केवलस्यैवोपादानं तथाप्युष्णिकृशब्दसाहचर्यात् सोपपदस्यैवाञ्चेर्ग्रहणमित्याहुः। क्विन् इत्यत्र ककारनकारौ इत्संज्ञकौ वर्त्ते। अतस्त्वत्र प्र उपपदात् 'अञ्चु गतिपूजनयोः' धातो ''ऋत्विग्...'' सूत्रेण क्विन् प्रत्यये जाते सति अग्रे नलोपविधानङ्क्रियते।

**(४१६) -अचः। १६।४।१३८**

**लुप्तनकारस्याञ्चतेर्भस्याकारस्य लोपः स्यात्।**

---

**४१६ - पदच्छेदः** - अचः।

**अनुवृत्तिः** - भस्य (अधिकारः), अत्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - लुप्तनकारस्य भसंज्ञकस्य अञ्चतेः अकारस्य लोपो भवति।

**विशेषार्थ** - सर्वनामस्थानभिन्नाजादिविभक्त्यः परे सति पूर्वस्य भ-संज्ञा भवति। 'प्र-अच्+अस्' इत्यत्र 'अच्' इत्यस्य अकारस्य सूत्रेणानेन लोपो भवति।

**(४१७) -चौ। ६।३।१३८॥**

**लुप्ताकारनकारेऽञ्चतौ परे पूर्वस्याणो दीर्घः स्यात्। प्राचः। प्राचा। प्राग्भ्यामित्यादि। प्रत्यङ्, प्रत्यञ्चौ, प्रत्यञ्चः। प्रत्यञ्चम्, प्रत्यञ्चौ। 'अचः' (सू. ४१६) इति लोपस्य विषयेऽन्तरङ्गोऽपि यण् न प्रवर्तते, 'अकृतव्यूहाः...' (प. ५७) इति परिभाषया। प्रतीचः। प्रतीचा। 'अमुमञ्चति' इति विग्रहे 'अदस्-अञ्च्' इति स्थिते।**

---

**४१७ - पदच्छेदः** - चौ।

**अनुवृत्तिः** - पूर्वस्य, दीर्घः, अणः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - लुप्तनकारे लुप्ताकारे अञ्चतौ परे ततः पूर्वस्य अणः (अ, इ, उ) स्थाने दीर्घो भवति।

**साधनिका : - प्राचः** प्राञ्चतीति विग्रहे प्र उपसर्गाद् 'अञ्चु गतिपूजनयोः' इति धातोरनुबन्धलोपे 'ऋत्विगद...' इत्यनेन क्विन् प्रत्यये क्विन् इत्यस्य सर्वोपहारि लोपे, 'प्र+अन्च्+इत्यत्र' 'अनिदितां हल उपधायाः क्ङिति' उपधाभूतनकारस्य लोपे, 'प्र+अच्' अत्रकृदन्तत्वात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, 'स्वैजसमौट्...' शस् प्रत्ययेऽनुबन्धलोपे कृते अस् 'प्र+अच्+अस्' इति स्थिते 'यचि भम्' भ-संज्ञायाम्, 'अचः' इत्यनेन अञ्चतेः अकारस्य लोपे, 'प्र+च्+अस्' अत्र 'चौ' इत्यनेन प्र इत्यत्र अकारस्य स्थाने आकारे दीर्घे, 'प्रा+च्+अस्' सस्य रुत्वे विसर्गे च कृते **'प्राचः' इति रूपं भवति।**

**'प्राच्'** इति शब्दस्य रूपाणि भवन्ति। यथा-

| | | | | | |
|---|---|---|---|---|---|
| प्राङ् | प्राञ्चौ | प्राञ्चः। | प्राचः | प्राग्भ्याम् | प्राग्भ्यः। |
| प्राञ्चम् | प्राञ्चौ | प्राचः। | प्राचः | प्राचोः | प्राचाम्। |
| प्राचा | प्राग्भ्याम् | प्राग्भिः। | प्राचि | प्राचोः | प्राक्षु। |
| प्राचे | प्राग्भ्याम् | प्राग्भ्यः। | हे प्राङ् | हे प्राञ्चौ | हे प्राञ्चः |

**साधनिका : - प्रत्यङ्** (पश्चिमदिशा) **प्रत्यञ्चतीति विग्रहे** प्रति उपसर्गाद् 'अञ्चु गतिपूजनयोः' इति धातोरनुबन्धलोपे, 'प्रति, अञ्च्' अत्र 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इति क्विन्प्रत्ययेऽनुबन्धलोपे, वकारस्य 'वेरपृक्तस्य' वकारस्य लोपे, 'अनिदितां हल उपधाया क्ङिति' इति नलोपे, 'इको यणचि' यणादेशे,

'कृदतिङ' इत्यनेन क्विन्प्रत्ययस्य कृत्संज्ञायाम्, कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, 'स्वौजसमौट्...' सु प्रत्यये, सर्वनामस्थानसंज्ञायाम्, 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमेऽनुबन्धलोपे, 'प्रत्यन्च्+सु' इत्यत्र हल्ङ्यादिना सुलोपे, 'संयोगान्तस्य लोपः' चकारस्य लोपे, 'क्विन्प्रत्ययस्य कुः' इति नकारस्य कुत्वेन ङकारे **'प्रत्यङ्' इति रूपं जातम्।**

**साधनिका : - प्रतीचः** 'प्रति+अञ्च्' इत्यत्र 'अनिदितां हल...' इत्यादिना नकारस्य लोपे 'प्रति+अच्' कृदन्तत्वात् 'कृतद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, 'स्वौजसमौट्...' इति शस् प्रत्ययेऽनुबन्धलोपे, 'प्रति+अच्+अस्' इति स्थिते भसंज्ञायाम्, 'अचः' इति अकारस्य लोपे, **'चौ',** इत्यनेन **'प्रति'** इत्यस्य इकारस्य दीर्घे, 'प्रती+च्+अस्' अत्र सस्य रुत्वे विसर्गे **'प्रतीचः' इति रूपं भवति।**

**विशेषार्थः** - 'प्रति, अच्+अस्' इति स्थिते, अत्र 'अचः' इति अकारस्य लोपेन 'अकृतव्यूहाः पाणिनीयाः' इति परिभाषया यण्निमित्तस्याकारस्य विनाशोन्मुखत्वादिह यण्न भवति।

**'प्रत्यच्'** इति शब्दस्य रूपाणि भवन्ति यथा-

| | | | | | |
|---|---|---|---|---|---|
| प्रत्यङ् | प्रत्यञ्चौ | प्रत्यञ्चः | प्रतीचः | प्रत्यग्भ्याम् | प्रत्यग्भ्यः |
| प्रत्यञ्चम् | प्रत्यञ्चौ | प्रतीचः | प्रतीचः | प्रतीचोः | प्रतीचाम् |
| प्रतीचा | प्रत्यग्भ्याम् | प्रत्यग्भिः | प्रतीचि | प्रतीचोः | प्रत्यक्षु |
| प्रतीचे | प्रत्यग्भ्याम् | प्रत्यग्भ्यः | हे प्रत्यङ् | हे प्रत्यञ्चौ | हे प्रत्यञ्चः |

**(४१८) -विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये। ६।३।९२॥**

**अनयोः सर्वनाम्नश्च टेरद्र्यादेशः स्यादप्रत्ययान्ते अञ्चतौ परे। 'अदद्रि अञ्च्' इति स्थिते यण्।**

---

**४१८ - पदच्छेदः** - विष्वग्देवयोः, च, टेः अद्र्यञ्चतौ, अप्रत्यये।

**सूत्रसमासः** - अविद्यमानः प्रत्ययः इति अप्रत्ययः, तस्मिन् अप्रत्यये, बहुव्रीहिः।

**अनुवृत्तिः** - सर्वनाम्नः, उत्तरपदे।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अनयोः (विष्वग्, देव) एवं सर्वनामशब्दानां टिसंज्ञकस्य (अन्त्याचः समुदायम्) 'अद्रि' इत्यादेशो भवति, अविद्यमानः प्रत्ययः यस्मात्, तस्मिन् (प्रत्ययस्य अंशरहिते) अञ्चुधातुपरे।

**(४१९) -अदसोऽसेर्दादुदो मः। ८।२।८०॥**

**अदसोऽसान्तस्य दात्परस्य ऊदूतौ स्तो दस्य मश्च। उ इति ह्रस्वदीर्घयोः समाहारद्वन्द्वः। आन्तरतम्याद्ध्रस्वव्यञ्जनयोर्ह्रस्वो दीर्घस्य दीर्घः। अमुमुयङ्, अमुमुयञ्चौ, अमुमुयञ्चः, अमुमुयञ्चम्, अमुमुयञ्चौ। अमुमुईचः। अमुमुईचा। अमुमुयग्भ्याम्, इत्यादि। मुत्वस्यासिद्धत्वान्न यण्। 'अन्त्यबाधेऽन्त्य-सदेशस्य' (प. १०४) इति परिभाषामाश्रित्य परस्यैव मुत्वं वदतां मते 'अदमुयङ्'। 'अः सेः सकारस्य स्थाने यस्य सः असिः तस्य असेः' इति व्याख्यानात् 'त्यदाद्यत्वविषय एव मुत्वं नान्यत्र' इति पक्षे 'अदद्र्यङ्'। उक्तं च (भाष्ये)-**

**अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छन्ति लत्ववत्।**
**केचिदन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते॥ इति।**

**'विष्वग्देवयोः' किम्? अश्वाची। 'अञ्चतौ' किम्? विष्वग्युक्। 'अप्रत्यये' किम्? विष्वगञ्चनम्। अप्रत्ययग्रहणं ज्ञापयति- 'अन्यत्र धातुग्रहणे तदादिविधिः' इति। तेनायस्करः। 'अतः कृकमि...' (सू. १६०) इति सः। उदङ्। उदञ्चौ उदञ्चः। शसादावचि-**

४१९ - **पदच्छेदः** - अदसः, असेः, दात्, उ, दः, मः। (उश्च ऊश्च = ३ (स.दृ.))

**अनुवृत्तिः** - स्वतः पूर्णं सूत्रमिदमतः अनुवृत्तिर्नायाति।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** – न विद्यते सिः यस्य सः असिः, तस्य असेः सकारान्तरहितस्य अदस् शब्दस्य टकारात् परस्य अर्धमात्रस्य व्यञ्जनस्य ईषत्सदृशो मात्रिको उकारः, दीर्घस्य तु द्विमात्र अकारः, एवं दकारस्य मकारो भवति।

**साधनिका : - अमुमुयङ् - अमुमञ्चति नाम पूजयति** इति विग्रहे अदस् उपपदात् 'अञ्चु गतिपूजनयोः' धातोरनुबन्धलोपे, 'ऋत्विग्द...' इति क्विन् प्रत्येऽनुबन्धलोपे, 'वेरपृक्तस्य' इति वकारस्य लोपे, 'अनिदितां हल उपधायाः क्ङिति' इत्यनेन नकारस्य लोपे, 'अदस्+अच्' इत्यत्र 'अदस्' इत्यस्य 'अस्' इत्यस्य 'अचोऽन्त्यादि टि' टि संज्ञायां **'विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये'** इत्यनेन टिसंज्ञकस्य 'अस्' स्थाने 'अद्रि' इति आदेशे 'अदद्रि+अच' इत्यत्र 'इको यणचि' यणादेशे, 'कृदतिङ्' इति क्विन्प्रत्ययस्य कृत्संज्ञायां, कृदन्तत्वात् 'अदद्र्यच्' इति शब्दात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायां, 'स्वौजस...' सु प्रत्यये, 'अदद्र्यच्+सु' अत्र सर्वनामस्थानसंज्ञायां, 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमेऽनुबन्धलोपे, 'अदद्र्यन्च्+सु' इति स्थिते 'अदसोऽसेर्दादुदो मः' इत्यनेन द्वयोः दकारयोः स्थाने मकारे एवम् अकाररेफयोः स्थाने उकारे, 'अमुमुयन्च्+सु' इत्यत्र सकारोत्तरवर्ति उकारस्यानुबन्धलोपे, 'हल्ङ्याभ्यो...' सलोपे, 'संयोगान्तस्य लोपः' इति चकारस्य लोपे, 'क्विन्प्रत्ययस्य कुः' इति नकारस्य कुत्वेन ङकारे कृते **'अमुमुयङ्' इति रूपं भवति॥**

**साधनिका : - अमुमुयञ्चौ** - 'अदद्रयङ्' इति शब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां, 'स्वौजस...' औ प्रत्यये, 'अदद्र्यच्+औ' इति स्थिते सर्वनामस्थानसंज्ञायाम्, **'उगिदचां सर्वनामस्थानेऽधातोः'** इत्यनेन नुमागमेऽनुबन्धलोपे, 'अदद्र्यन्च्+औ' इत्यत्र 'अदसोऽसेर्दादुदो मः' इति सूत्रेण दकारयोः स्थाने मकारे, एवं अकाररेफयोः स्थाने उकारे, 'अमुमुयन्च्+औ' इति स्थिते 'अनुस्वारस्य ययि परसवर्णः' अनुस्वारस्य ञकारे परसवर्णे कृते **'अमुमुयञ्चौ' इति रूपं जातम्।**

**साधनिका : - अमुमुईचः** - 'अदद्रि-अच्' इत्यवस्थायां प्रातिपदिकत्वात् 'स्वौजस...' शस् प्रत्ययेऽनुबन्धलोपे, 'अदद्रि+अच्+अस्' इत्यत्र **'अदसोऽसेर्दादुदो मः'** इति सूत्रेण दकारयोः स्थाने मकारे एवम् अकाररेफयोः स्थाने उकारे, 'अमुमु-इ+अच्+अस्' इत्यत्र 'यचि भम्' इति भसंज्ञायाम्, 'अचः' इति अलोपे, 'अमुमु-इ+च्+अस्' इत्यत्र **'चौ'** इत्यनेन इकारस्य दीर्घे, 'अमुमुईच्+अस्' इति स्थिते सकारस्य रुत्वविसर्गे, **'अमुमुईचः' इति रूपं सिद्धम्।**

**विशेषार्थः** – 'अमुमुईचः' इत्यत्र मुत्वस्यासिद्धत्वान्न यण्, 'अदसोऽसेर्दादुदो मः' इत्यनेन विहितस्य ईकारे परे मकारादुकारस्य यणमाशङ्क्य कथयति यद्- 'अलोऽन्त्यस्य' इति परिभाषया अप्रवृत्त्या कार्याभावे सति अन्त्यसमीपवर्तिनः कार्यं भवति। अदमुयङ् - इत्यत्र पूर्वस्य दकारस्य तदुत्तरस्याकारस्य च न मुत्वमिति विशेषः। अत्र मतान्तरं कथयति यद्- 'अः सः सकारस्य स्थाने यस्य सः असिः तस्य असेः।' असेरिति नायं नञ्तत्पुरुषसमासः किन्तु 'अः सेः यस्य सः असिः' तस्य असेरिति विग्रहः। सेः इत्यत्र तु स्थानषष्ठी, इकारोच्चारणार्थः, सकारस्थानिकस्य मकारवत् इत्यर्थः। 'अदस्' इति शब्दस्य त्यदाद्यत्वे कृते अतः त्यदाद्यत्ववतः एवादस्शब्दस्य मुत्वं नान्यस्य भवति। अतः अद्र्यादेशे जाते सति सकारस्थानिकाकारत्त्वाभावान्न मुत्त्वमित्यर्थः। तदिदं पक्षत्रयमपि महाभाष्यसम्मतमित्याह - अदसः टेः अद्रेर्विधौ सति अदद्र्यच् इत्यत्र प्रथमद्वितीययोः दकारयोः पृथङ् मुत्वं तदुत्तरयोः अवर्णरेफयोरुत्त्वं च युगपदेव। अद्र्यादेशे सति प्रथमद्वितीययोश्च मुत्वं तदुत्तरयोः अवर्णरेफयोरूत्त्वं च युगपदेव। अद्र्यादेशे सति प्रथमद्वितीययोश्च मुत्वं नैव केचिदिच्छन्ति। हि यतः असेः सकार-स्थानकाकारत एव मुत्वं दृश्यते, अतः अदद्र्यङ् इति भवति।

**–'अदद्रयच्' इति शब्दस्य रूपाणि भवन्ति यथा–**

| | | |
|---|---|---|
| अमुमुयङ् | अमुमुयञ्चौ | अमुमुयञ्चः। |
| अमुमुयञ्चम् | अमुमुयञ्चौ | अमुमुईचः। |
| अमुमुईचा | अमुमुयग्भ्याम् | अमुमुयग्भिः। |
| अमुमुईचे | अमुमुयग्भ्याम् | अमुमुयग्भ्यः। |
| अमुमुईचः | अमुमुयग्भ्याम् | अमुमुयग्भ्यः। |
| अमुमुईचः | अमुमुईचोः | अमुमुईचाम्। |
| अमुमुईचि | अमुमुईचोः | अमुमुयक्षु। |
| हे अमुमुयङ् | हे अमुमुयञ्चौ | हे अमुमुयञ्चः। |

**विशेषार्थः** – अश्ववाची अश्वमञ्चति नाम पूजयति विग्रहे अश्वोपपदात् 'अञ्चु' गतिपूजनयोः इति धातोः विश्वोपपदस्य अभावात् 'विष्वग्देवयोश्च टेरद्र्यञ्चतावतप्रत्यये' इत्यनेन टि–संज्ञकस्य 'अग्' इत्यस्य स्थाने अद्रि आदेशः तु अञ्चुधातोरभावान्न भवति। 'विष्वगञ्चनम्' इत्यत्र 'विष्वग्देवयोश्च टेरद्रयञ्चतावप्रत्यये' इत्यनेन टि संज्ञकस्य 'अस्' इत्यस्य स्थाने अद्रि आदेशः अञ्चुधातोः परे प्रत्ययत्वाद् न भवति। अप्रत्ययग्रहणं ज्ञापयति। इत्यत्र अन इति ल्युडादेशस्य श्रूयमाणतया अञ्चतेरप्रत्ययान्तत्वं नेति भवति इति भावः। अत्र 'अप्रत्ययः' इति पदं ज्ञापयति यद् – 'धातुग्रहणे तदादिविधिर्भवति।' उत्तरपदाधिकारादञ्चुरूपे उत्तरपद इत्यर्थाद् विष्वगञ्चनम् इत्यत्र अयस्कारः। अन्यथा 'अयः+कारः' इत्यत्र 'अतः कृकमिकंस...' इति सूत्रेण उत्तरपदाक्षेपात् कृ–धातुरूपे उत्तरपदे इत्यर्थलाभाद् विसर्गस्य स्थाने सकारः कथं स्यात्? इत्यर्थ–लाभादत्र विसर्गस्य सकारो भवति, अतः सूत्रेऽस्मिन् प्रत्ययग्रहणाद् सूत्रमिदमपहाय अन्यत्र धातुग्रहणे सर्वत्र तदादिविधिर्भवति। अतः 'अयस्कारः' इति रूपं भवति।

**साधनिका : – उदङ्** (उत्तरदिशा) **उदञ्चति नाम पूजयति इति विग्रहे** उद् उपसर्गात् 'अञ्चु गतिपूजनयोः' धातोरनुबन्धलोपे, 'ऋत्विग्दधृ...' क्विन् प्रत्ययेऽनुबन्धलोपे 'वेरपृक्तस्य' वकारस्य लोपे, 'अनिदितां' हल उपधयाः क्ङिति इति नकारस्य लोपे 'उद्+अच्' अत्र 'कृदतिङ्' इत्यनेन क्विन्प्रत्ययस्य कृत्संज्ञायाम्, कृदन्तत्वात् 'उदच्' शब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपादिकसंज्ञायाम् 'स्वौजसमौट्...' सु प्रत्यये 'उदच्+सु' इत्यत्र 'सुडनपुंसकस्य' सर्वनामस्थानसंज्ञायाम् 'उगिदचां सर्वनामस्थानेऽधातोः' इति सूत्रेण नुमागमेऽनुबन्धलोपे, 'उदनच्+सु' इति स्थिते हल्ङ्यादिना सुलोपे, 'संयोगान्तस्य लोपः' चकारस्य लोपे, 'क्विन्प्रत्ययस्य कुः' इति सूत्रेण नकारस्य कुत्वेन ङकारे **'उदङ्' इति रूपम्भवति।**

**साधनिका : – उदञ्चौ** – 'उदच्+औ' इत्यत्र नुमागमेऽनुबन्धलोपे 'उदन्च्+औ' इति स्थिते 'नश्चापदान्तस्य झलि' नकरस्यानुस्वारे, 'अनुस्वारस्य ययि परसवर्णः' नकारस्य स्थाने मकारेऽनुस्वारे, 'उदञ्च्+औ' वर्णसम्मेलने कृते **'उदञ्चौ' इति रूपम्भवति।**

**साधनिका : – उदञ्चः** – 'उदच्' शब्दात् प्रथमाबहुवचने जस् प्रत्ययेऽनुबन्ध लोपे 'उदच्+अस्' इत्यत्र नुमागमे, अनुबन्धलोपे, अनुस्वारे परसवर्णे च, सस्य रूत्त्वविसर्गे **'उदञ्चः' इति रूपम्भवति।**

**(४२०) –उद ईत्। ८।१।२४॥**

**उच्छब्दात्परस्य लुप्तनकारस्याञ्चतेर्भस्याकारस्य ईत्स्यात्। उदीचः। उदीचा, उदग्भ्यामित्यादि।**

---

४२० – **पदच्छेदः** – उदः, ईत्। (उदः – षष्ठ्यन्तपदम्)

**अनुवृत्तिः** – भस्य, अचः, अत्।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – 'उद्' इत्युपसर्गात् भसंज्ञकस्य नलोपिनः अञ्चतेः अकारस्य स्थाने ईकारादेशो भवति।

**साधनिका : – उदीचः** – 'उदच्' इति शब्दात् कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां, 'स्वौजसमौट्...' जस् प्रत्ययेऽनुबन्धलोपे, 'उदच्+अस्' इति स्थिते 'यचि भम्' इत्यनेन भ-संज्ञायाम्, 'उद ईत्' इति सूत्रेण अकारस्य स्थाने ईकारे दीर्घे, 'उदीच्+अस्' इति स्थिते सकारस्य रुत्त्वविसर्गे **'उदीचः' इति रूपम्भवति।**

| | | | | | |
|---|---|---|---|---|---|
| उदङ् | उदञ्चौ | उदञ्चः। | उदीचः | उदग्भ्याम् | उदग्भ्यः। |
| उदञ्चम् | उदञ्चौ | उदीचः। | उदीचः | उदीचोः | उदीचाम्। |
| उदीचा | उदग्भ्याम् | उदग्भिः। | उदीचि | उदीचोः | उदक्षु। |
| उदीचे | उदग्भ्याम् | उदग्भ्यः। | हे उदङ् | हे उदञ्चौ | हे उदञ्चः। |

**(४२१) -समः समि। ६।१।९३॥**

**अप्रत्ययान्तेऽञ्चतौ परे समः समिरादेशः स्यात्। सम्यङ्, सम्यञ्चौ, सम्यञ्चः। समीचः। समीचा।**

---

४२१ – **पदच्छेदः** – समः, समि।

**अनुवृत्तिः** – अञ्चतौ, अप्रत्यये।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – 'सम्' इत्यस्य स्थाने 'समि' इत्यादेशो भवति, यदि नलोपिनः 'अञ्च्' धातुः परे स्यात्तदा।

**साधनिका : – सम्यङ्** (ठीक चलनेवाला) **समञ्चति नाम गच्छति इति विग्रहे** 'सम्' उपसर्गाद् 'अञ्चु गतिपूजनयोः' धातोरनुबन्धलोपे, क्विन्प्रत्ययेऽनुबन्धलोपे, 'वेरपृक्तस्य' वकारस्य लोपे, 'अनिदितां हल उपधायाः क्ङिति' नकारस्य लोपे, 'समच्' इति स्थिते 'कृदतिङ्' इत्यनेन क्विन्प्रत्ययस्य कृत्संज्ञायां, कृदन्तत्वात् 'समच्' शब्दात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायां, 'स्वौजसमौट्...' सु इति प्रत्यये **'समच्+सु'** इति स्थिते 'समः समि' इत्यनेन 'सम्' इत्यस्य स्थाने 'समि' आदेशे, **'समि+अच्+सु'** इत्यत्र 'इको यणचि' इकारस्य स्थाने यणादेशे, **'सम्यच्+सु'** इति स्थिते सर्वनामस्थानसंज्ञायाम्, 'उगिदचां सर्वनामस्थानेऽधातोः' इत्यनेन नुमागमेऽनुबन्धलोपे, **'सुम्यन्च्+सु'** इत्यत्र 'हल्ङ्याब्भ्यो...' सुलोपे 'संयोगान्त्य लोपः' चकारस्य लोपे, 'क्विन्प्रत्ययस्य कुः' इत्यनेन चकारस्य स्थाने कुत्वेन ङकारे **'सम्यङ्' इति रूपम्भवति।**

**साधनिका – सम्यञ्चौ** – 'समच्+औ' इत्यत्र 'सर्वनामस्थानसंज्ञायाम्' 'उगिदचां सर्वनामस्थानेऽधातोः' नुमागमेऽनुबन्धलोपे, 'समः समिः' सम् स्थाने 'समि' इत्यादेशे, यणादेशे, 'सम्यन्च्+औ' इति स्थिते अनुस्वारे परसवर्णे च कृते **सम्यञ्चौ इति रूपम्भवति।**

**साधनिका – सम्यञ्चः** – 'सम्यञ्च्+अस्' रुत्त्वविसर्गे कृते सिद्धम्।

**साधनिका – समीचः** – 'समच्' इति शब्दात् 'कृत्तद्धितसमासाश्च' प्रातिपादिकसंज्ञायां, 'स्वौजसमौट्...' शस्प्रत्ययेऽनुबन्धलोपे, 'समः समि' सम् इत्यस्य स्थाने 'समि' आदेशे, 'समि+अच्+अस्' इति स्थिते 'यचि भम्' इत्यनेन भसंज्ञायाम्, अचः इत्यनेन अञ्चतेः अकारस्य लोपे, 'चौ' इत्यनेन इकारस्य दीर्घे ईकारे 'समीच्+अस्' इति स्थिते सस्य रुत्वविसर्गौ 'समीचः' इति रूपम्भवति।

**समच् – इति शब्दस्य रूपाणि भवन्ति। यथा–**

| | | | | | |
|---|---|---|---|---|---|
| सम्यङ् | सम्यञ्चौ | सम्यञ्चः। | समीचः | सम्यग्भ्याम् | सम्यग्भ्यः। |
| सम्यञ्चम् | सम्यञ्चौ | समीचः। | समीचः | समीचोः | समीचाम्। |
| समीचा | सम्यग्भ्याम् | सम्यग्भिः। | समीचि | समीचोः | सम्यक्षु। |
| समीचे | सम्यग्भ्याम् | सम्यग्भ्यः। | हे सम्यङ् | हे सम्यञ्चौ | हे सम्यञ्चः। |

**(४२२) -सहस्य सध्रिः। ६।३।९५॥**

**अप्रत्ययान्तेऽञ्चतौ परे। सध्र्यङ्।**

---

४२२ - **पदच्छेदः** - सहस्य, सध्रिः।

**अनुवृत्तिः** - अञ्चतौ, अप्रत्यये।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सर्वपहारिक्विनादिप्रत्ययान्ते अञ्चतौ परे 'सह' इत्यस्य स्थाने 'सध्रि' इत्यादेशो भवति।

**साधनिका : - सध्र्यङ्** (साथ चलनेवाला) **सह अञ्चति वा गच्छति इति विग्रहे 'सह' उपपदात्** अञ्चु गतिपूजनयोः धातोरनुबन्धलोपे, 'ऋत्विग्...' क्विन्-प्रत्ययेऽनुबन्धलोपे, 'वेरपृक्तस्य' वकारस्य लोपे, 'अनिदितां हल उपधायाः क्ङिति' नकारस्य लोपे, 'सह+अच्' इति स्थिते 'कृदतिङ्' इत्यनेन क्विन्-प्रत्ययस्य कृत्संज्ञायाम्, कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम् 'स्वौजसमौट्...' सु प्रत्यये 'सह+अच्+सु' इत्यत्र 'सहस्य सध्रिः' इत्यनेन सह स्थाने सध्रि आदेशे, 'सध्रि+अच्+सु' इति स्थिते सर्वनामस्थानसंज्ञायाम् 'उगिदचां सर्वनामस्थानेऽधातोः' नुमागमेऽनुबन्धलोपे, 'इको यणचि' यणादेशे, 'सध्यन्च्+सु' इत्यत्र 'हल्ङ्याब्भ्यो...' इत्यादिना सुलोपे, 'संयोगान्तस्य लोपः' चकारस्य लोपे, 'क्विन्प्रत्ययस्य कुः' इति सूत्रेण नकारस्य कुत्वेन ङकारे, **'सध्र्यङ्' इति रूपम्भवति।** एवं प्रथमाद्विवचने 'सध्र्यञ्चौ', प्रथमाबहुवचने 'सध्र्यञ्चः' इति।

**साधनिका : - सध्रीचः** 'सहाच्' शब्दात् प्रातिपदिकसंज्ञायां, 'स्वौजसमौट्...' शस् प्रत्ययेऽनुबन्धलोपे 'सहाच्+अस्' इत्यत्र 'सहस्य सध्रिः' इति सूत्रेण सह स्थाने सध्रि आदेशे, 'सध्रि+अच्+अस्' इति स्थिते भसंज्ञायां, 'अचः' अञ्चतेः अकारस्य लोपे, 'चौ' इकारस्य दीर्घे ईकारे, 'सध्री+च्+अस्' इति स्थिते सस्य रुत्वे विसर्गे **'सध्रीचः' इति रूपम्भवति।**

**-सहाच् - इति शब्द्य रूपाणि भवन्ति। यथा-**

| | | | | | |
|---|---|---|---|---|---|
| सध्र्यङ् | सध्र्यञ्चौ | सध्र्यञ्चः। | सध्रीचः | सध्र्यग्भ्याम् | सध्र्यग्भ्यः। |
| सध्र्यञ्चम् | सध्र्यञ्चौ | सध्रीचः। | सध्रीचः | सध्रीचोः | सध्रीचाम्। |
| सध्रीचा | सध्र्यग्भ्याम् | सध्र्यग्भिः। | सध्रीचि | सध्रीचोः | सध्र्यक्षु। |
| सध्रीचे | सध्र्यग्भ्याम् | सध्र्यग्भ्यः। | हे सध्र्यङ् | हे सध्र्यञ्चौ | हे सध्र्यञ्चः। |

**(४२३) -तिरसस्तिर्यलोपे। ६।३।९४॥**

**अलुप्ताकारेऽञ्चतावप्रत्ययान्ते परे तिरसस्तिर्यादेशः स्यात्। तिर्यङ्, तिर्यञ्चौ तिर्यञ्चः। तिर्यञ्चम्, तिर्यञ्चौ, तिरश्चः। तिरश्चा, तिर्यग्भ्यामित्यादि।**

---

४२३ - **पदच्छेदः** - तिरसः, तिरि, अलोपे। (तिरसः - षष्ठ्यन्तपदम्)

**अनुवृत्तिः** - अञ्चतौ, अप्रत्यये।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अलुप्ताकारे सर्वापहारिक्विन्प्रत्ययान्ते च अञ्चतौ परे 'तिरस्' इत्यस्य स्थाने 'तिरि' आदेशो भवति।

**साधनिका : - तिर्यङ्** (तिर्यग्योनि, पशु-पक्षी आदि) **तिरस् अञ्चति नाम गच्छति** इति विग्रहे तिरस् उपपदाद् 'अञ्चु गतिपूजनयोः' धातोरनुबन्धलोपे, क्विन्-प्रत्ययेऽनुबन्धलोपे, वकारस्य 'वेरपृक्तस्य' इत्यनेन लोपे, 'अनिदितां हल उपधायाः क्ङिति' इत्यनेन नकारस्य लोपे, 'तिरस्+अच्' इत्यत्र 'कृदतिङ्' इत्यनेन क्विन्प्रत्ययस्य कृत्संज्ञायाम्, कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां, 'स्वौजसमौट्...' सु प्रत्यये, 'तिरस्+अच्+सु' इति स्थिते 'तिरसस्तिर्यलोपे' इति सूत्रेण तिरस् इत्यस्य स्थाने 'तिरि' आदेशे, 'तिरि+अच्+सु'

इति स्थिते सर्वनामस्थानसंज्ञायां, 'उगिदचां सर्वनामस्थानेऽधातोः' नुमागमेऽनुबन्धलोपे, 'इको यणचि' यणादेशे, 'तिर्यन्च्+सु' इति स्थिते 'हल्ङ्याब्भ्यो...' इति सुलोपे, 'संयोगान्तस्य लोपः' वकारस्य लोपे, 'क्विन्प्रत्ययस्य कुः' इत्यनेन कुत्वेन चकारस्य स्थाने ङकारे, **'तिर्यङ् इति रूपम्भवति।'**

**तिर्यञ्चौ** - 'तिर्यन्च्+औ' इति स्थिते अनुस्वारे परसवर्णे च कृते सिद्धम्।

**तिर्यञ्चः** - 'तिर्यन्च्+जस्' इत्यत्र नकारस्यानुबन्धलोपेऽनुस्वारे परसवर्णे विसर्गे च।

**साधनिका : - तिरश्चः** - 'तिरस्+अच्' इति स्थिते कृदन्तत्वात् **'कृत्तद्धितसमासाश्च'** इत्यनेन प्रातिपदिकसंज्ञायाम्, 'स्वौजसमौट्...' इति शस्-प्रत्ययेऽनुबन्धलोपे, 'तिरस्+अच्+अस्' इति स्थिते 'यचि भम्' इत्यनेन भसंज्ञायाम् 'अचः' इति सूत्रेण अञ्चतेः अकारस्य लोपे, अलोपत्वात् इह 'तिरसस्तिर्यलोपे' इत्यनेन तिरस् स्थाने तिरि आदेशो न भवति अतः 'तिरस्+च्+अस्' इति स्थिते 'स्तोः श्चुना श्चुः' सकारस्य स्थाने शकारे श्चुत्वे, सस्य रुत्वे विसर्गे, **'तिरश्च' इति रूपम्भवति।**

**तिर्यञ्च् - इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | | | | |
|---|---|---|---|---|---|
| तिर्यङ् | तिर्यञ्चौ | तिर्यञ्चः। | तिरश्चः | तिर्यग्भ्याम् | तिर्यग्भ्यः। |
| तिर्यञ्चम् | तिर्यञ्चौ | तिरश्चः। | तिरश्चः | तिरश्चोः | तिरश्चाम्। |
| तिरश्चा | तिर्यग्भ्याम् | तिर्यग्भिः। | तिरश्चि | तिरश्चोः | तिर्यक्षु। |
| तिरश्चे | तिर्यग्भ्याम् | तिर्यग्भ्यः। | हे तिर्यङ् | हे तिर्यञ्चौ | हे तिर्यञ्चः। |

(४२४) -**नाञ्चेः पूजायाम्। ६।४।३०॥**

**पूजार्थस्याञ्चतेरुपधाया नस्य लोपो न स्यात्। अलुप्तनकारत्वान्न नुम्। प्राङ्, प्राञ्चौ, प्राञ्चः। नलोपाभावादकारलोपो न। प्राञ्चः। प्राञ्चा, प्राङ्भ्याम् इत्यादि। प्राङ्ख्षु-प्राङ्क्षु-प्राङ्षु। एवं पूजार्थे प्रत्यङ्ङादयः। 'क्रुञ्च कौटिल्याल्पीभावयोः।' अस्य 'ऋत्विग्...' ( सू. ३७३ ) आदिना नलोपाभावेऽपि निपात्यते। कुङ्, क्रुञ्चौ, क्रुञ्चः। क्रुङ्भ्यामित्यादि। 'चोः कुः' ( सू. ३७८ )। पयोमुक् - पयोमुग्, पयोमुचौ, पयोमुचः। 'व्रश्चभ्रस्ज...' ( सू. २९४ ) इति षत्वम्। 'स्कोः' ( सू. ३८० ) इति सलोपः। जश्त्वचर्त्वे। सुवृट्-सुवृड्, सुवृश्चौ, सुवृश्चः। सुवृट्त्सु-सुवृट्सु।**

---

४२४ - **पदच्छेदः** - न, अञ्चेः, पूजायाम्। (न - अव्ययपदम्, पूजायाम् - सप्तम्येकवचनम्)

**अनुवृत्तिः** - उपधायाः, क्ङिति, नलोपः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पूजार्थकः अञ्चुधातुः स्यात्तदा अञ्चुधातोः उपधाभूतस्य नकारस्य लोपो न भवति। अलुप्तनकारत्वादत्र 'उगिदचाम्' इत्यनेन नुमागमो न भवति।

**साधनिका : - प्राङ्** (पूर्वदिशा) प्राञ्चति नाम पूजयति इति विग्रहे प्र उपसर्गाद् 'अञ्चु गतिपूजनयोः' इति धातोरनुबन्धलोपे, 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इति सूत्रेण क्विन्प्रत्येऽनुबन्धलोपे, वकारस्य 'वेरपृक्तस्य' इत्यनेन लोपे, 'अनिदितां हल उपधायाः क्ङिति' इत्यनेन नकारस्य लोपे प्राप्ते 'नाञ्चेः पूजायाम्' इति सूत्रेण नलोपनिषेधे, 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे, 'प्राञ्च्' इत्यत्र 'कृदतिङ्' इत्यनेन क्विन्प्रत्ययस्य कृत्संज्ञायां, कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायां, 'स्वौजस...' सु प्रत्यये, 'प्राञ्च्+सु' इत्यवस्थायां 'हल्ङ्याब्भ्यो...' सुलोपे, 'संयोगान्तस्य लोपः' चकारस्य लोपे, 'क्विन्प्रत्ययस्य कुः' इत्यनेन नकारस्य स्थाने कुत्वेन ङकारे, **'प्राङ्' इति रूपं सिद्धम्।**

- **प्राञ्चौ** - 'प्राञ्च्+औ' प्रथमाद्विवचने।

- **प्राञ्चः** - 'प्राञ्च+जस्' जकारस्यानुबन्धलोपे, सस्य रुत्वे विसर्गे च।

**प्राञ्च् इति शब्दस्य पूजार्थे रूपाणिभवन्ति। यथा-**

| | | | | | |
|---|---|---|---|---|---|
| प्राङ् | प्राञ्चौ | प्राञ्चः। | प्राञ्चः | प्राङ्भ्याम् | प्राङ्भ्यः। |
| प्राञ्चम् | प्राञ्चौ | प्राञ्चः। | प्राञ्चः | प्राञ्चोः | प्राञ्चाम्। |
| प्राञ्चा | प्राङ्भ्याम् | प्राङ्भिः। | प्राञ्चि | प्राञ्चोः | प्राङ्क्षु। |
| प्राञ्चे | प्राङ्भ्याम् | प्राङ्भ्यः। | हे प्राङ्! | हे प्राञ्चौ! | हे प्राञ्चः! |

**विशेषार्थः** - एवम्पूजार्थके (प्रति+अञ्च्) प्रत्यङादीति रूपाणि भवन्ति।

**साधनिका : - क्रुङ्** (कुटिलगामी) 'क्रुञ्च कौटिल्याल्पीभावयोः' इति धातोरनुबन्धलोपे 'ऋत्विग्दधृक्स्रग्दिग्उष्णिगञ्चुयुजिक्रुञ्चां च' इत्यनेन क्विन्प्रत्ययेऽनुबन्धलोपे वकारस्य 'वेरपृक्तस्य' इत्यनेन लोपे, नलोपाभावे च, 'कृदतिङ्' इत्यनेन सूत्रेण क्विन्प्रत्ययस्य कृत्संज्ञायां, कृदन्तत्वात् 'क्रुञ्च्' शब्दात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, 'स्वौजस...' सु प्रत्यये, 'क्रुञ्च्+सु' इत्यत्र 'हल्ङ्याब्भ्यो...' सुलोपे, 'संयोगान्तस्य लोपः' चकारस्य लोपे, 'क्विन्प्रत्ययस्य कुः' नकारस्य कुत्वेन ङकारे, **'क्रुङ्' इति रूपम्भवति।**

**- क्रुञ्च् इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | | | | |
|---|---|---|---|---|---|
| क्रुङ् | क्रुञ्चौ | क्रुञ्चः। | क्रुञ्चः | क्रुङ्भ्याम् | क्रुङ्भ्यः। |
| क्रुञ्चम् | क्रुञ्चौ | क्रुञ्चः। | क्रुञ्चः | क्रुञ्चोः | क्रुञ्चाम्। |
| क्रुञ्चा | क्रुङ्भ्याम् | क्रुङ्भिः। | क्रुञ्चि | क्रुञ्चो | क्रुङ्क्षु-क्रुक्षु। |
| क्रुञ्चे | क्रुङ्भ्याम् | क्रुङ्भ्यः। | हे क्रुङ्! | हे क्रुञ्चौ! | हे क्रुञ्चः! |

**साधनिका : - पयोमुक् (मेघ) पयः** मुञ्चति इति विग्रहे पयस् उपपदात् 'मुच्लृ मोक्षणे' धातोरनुबन्धलोपे, 'अन्येभ्योऽपि दृश्यते' इति सूत्रेण क्विप्प्रत्ययेऽनुबन्धलोपे, 'वेरपृक्तस्य' इत्यनेन वकारस्य लोपे, सस्य रुत्वे विसर्गे, 'पयः+मुच्' इति स्थिते 'हशि च' इत्यनेन रेफस्य स्थाने उकारे, 'आद्गुणः' इति सूत्रेण अकार-उकारयोः स्थाने ओकारे गुणे, 'पयोमुच्' इति शब्दात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां, 'स्वौजस...' सु प्रत्ययेऽनुबन्धलोपे, 'पयोमुच्+सु' इत्यत्र 'हल्ङ्याब्भ्यो...' सुलोपे, 'चोः कुः' इत्यनेन चकारस्य स्थाने ककारे, 'झलां जशोऽन्ते' इत्यनेन ककारस्य स्थाने जश्त्वेन गकारे, 'वाऽवसाने' इति सूत्रेण विकल्पेन गकारस्य स्थाने चर्त्वेन ककारे **'पयोमुक्' इति रूपं सिद्धम्।** विकल्पाभावे तु 'पयोमुग्' इति रूपम्भवति।

**साधनिका : - सुवृट्। सुवृड्** (अच्छी तरह काटनेवाला, सुछेदक) इत्यत्र सुष्ठु वृश्चति इति विग्रहे सु उपसर्गात् 'ओव्रश्चू छेदने' इति धातोरनुबन्धलोपे 'अन्येभ्योऽपि' दृश्यते 'इति सूत्रेण क्विन्प्रत्ययेऽनुबन्धलोपे, 'वेरपृक्तस्य' वकारस्य लोपे, 'सु+व्रश्च्' इत्यत्र 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' इति सूत्रेण रेफस्य स्थाने ऋकारे, **(सु + व् र् अ श, च)** 'सु+व् ऋ अ, श, च्' इति स्थिते 'सम्प्रसारणाच्च' इत्यनेन ऋकाराकारयोः स्थाने ऋकारे पूर्वरूपे, 'सुवृश्च्' इत्यस्माद् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, 'स्वौजसमौट्...' सु प्रत्यये 'सुवृश्च्+सु' इति स्थिते 'हल्ङ्याब्भ्यो...' सुलोपे, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति सूत्रेण चकारस्य स्थाने षकारे, 'स्कोः संयोगाद्योरन्ते च' दन्त्यसकारस्य लोपे, 'सुवृष्' इति स्थिते 'झलां जशोऽन्ते' षकारस्य स्थाने जश्त्वेन डकारे, 'वाऽवसाने' इति सूत्रेण विकल्पेन डकारस्य स्थाने चर्त्वेन टकारे, **'सुवृट्' इति रूपं सिद्धम्।** विकल्पाभावे तु 'सुवृड्' इति रूपम्भवति।

**सुवृश्च् - इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | | | | |
|---|---|---|---|---|---|
| सुवृट्-सुवृड् | सुवृश्चौ | सुवृश्चः। | सुवृश्चः | सुवृड्भ्याम् | सुवृड्भ्यः। |
| सुवृश्चम् | सुवृश्चौ | सुवृश्चः। | सुवृश्चः | सुवृश्चोः | सुवृश्चाम्। |
| सुवृश्चा | सुवृड्भ्याम् | सुवृड्भिः। | सुवृश्चिः | सुवृश्चोः | सुवृट्त्सु-सुवृट्सु। |
| सुवृश्चे | सुवृड्भ्याम् | सुवृड्भ्यः। | हे सुवृट्-सुवृड्! | हे सुवृश्चौ! | हे सुवृश्चः! |

**॥ इति चकारान्तप्रकरणम् ॥**

*

---

**॥ अथ तकारान्तप्रकरणम् ॥**

**'वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' ( उ. २४१ )। एते निपात्यन्ते, शतृवच्चैषां कार्यं स्यात्। उगित्त्वान्नुम्। 'सान्तमहतः...' ( सू. ३१४ ) इति दीर्घः। मह्यते पूज्यत इति महान्, महान्तौ, महान्तः। हे महन्। महतः। महता, महद्भ्यामित्यादि।**

**विशेषार्थः** - पृषु सेचने, बृहि वृद्धौ, सह पूजायाम्, गम्लृ गतौ एभ्यः चतुर्भ्यः धातुभ्यः पृषत्, बृहत्, जगत् महत् एते प्रयोगाः निपात्यन्ते, एवमेतेषां शतृप्रत्ययनवत्कार्याणि भवन्ति।

**साधनिका : - महान् - महयते पूज्यते** इति विग्रहे 'मह पूजायाम्' धातोः 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' इत्युणादिसूत्रेण अति-प्रत्यये शतृवद्भावे च, अनुबन्धलोपे, 'महत्' इत्यस्माद् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, 'स्वौजस...' सुप्रत्ययेऽनुबन्धलोपे, 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमेऽनुबन्धलोपे, 'महन्त्+स्' इति स्थिते 'सान्महतः संयोगस्य' इति सूत्रेण उपधादीर्घे, 'महान्त्+स्' इति स्थिते 'हल्ङ्याब्भ्यो...' इति सलोपे, 'संयोगान्तस्य लोपः' तकारस्य लोपे, **'महान्' इति रूपम्भवति।**

**साधनिका : - महान्तौ** - 'महान्त्+औ' प्रथमाद्विवचने भवति।

**साधनिका : - महतः** - 'महत्' शब्दात् द्विबहुवचने शस् प्रत्ययेऽनुबन्धलोपे, भ-संज्ञायाम्, नुमभावे च 'महत्+अस्' इति स्थिते सस्य रुत्वे विसर्गे च कृते **'महतः' इति रूपम्भवति।**

**महत् - इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | | | | |
|---|---|---|---|---|---|
| महान् | महान्तौ | महान्तः। | महतः | महद्भ्याम् | महद्भ्यः। |
| महान्तम् | महान्तौ | महतः। | महतः | महतोः | महताम्। |
| महता | महद्भ्याम् | महद्भिः। | महति | महतोः | महत्सु। |
| महते | महद्भ्याम् | महद्भ्यः। | हे महन् | हे महान्तौ! | हे महान्तः! |

**(४२५) -अत्वसन्तस्य चाधातोः। ६।४।१४॥**

**अन्वन्तस्योपधाया दीर्घः स्याद्धातुभिन्नासन्तस्य चासम्बुद्धौ सौ परे। परं नित्यं च नुमं बाधित्वा वचनसामर्थ्यादादौ दीर्घः। ततो नुम्। धीमान्, धीमन्तौ, धीमन्तः। हे धीमन्। शसादौ महद्वत्। धातोरप्यत्वन्तस्य दीर्घः। गोमन्तमिच्छति, गोमानिवाचरतीति वा क्यजन्तादाचारक्विबन्ताद्वा कर्तरि क्विप्। 'उगिदचाम्...' ( सू. २६१ ) इति सूत्रेऽज्ग्रहणं नियमार्थम् - 'धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेव' इति। तेन 'स्रत्' 'ध्वत्' इत्यादौ न। 'अधातोः' इति त्वधातुभूतपूर्वस्यापि नुमर्थम्। गोमान्, गोमन्तौ, गोमन्तः इत्यादि। 'भातेर्डवतुः' ( उ. ६३ )। भवान्, भवन्तौ, भवन्तः। शत्रन्तस्य त्वत्वन्तत्वाभावान्न दीर्घः। भवतीति भवन्।**

---

४२५ - **पदच्छेदः** - अत्वसन्तस्य, च, अधातोः। (अत्वसन्तस्य - षष्ठ्यन्तपदम्)

**अनुवृत्तिः** - उपधायाः, सौ, दीर्घः।

**समासः** - अतुश्च अस् चेति अत्वसौ, तावन्ते यस्य स अत्वसन्तः, तस्येति अत्वसन्तस्य।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सम्बुद्धिभिन्नः सुप्रत्ययः परे स्यात्तदा 'अतु' प्रत्ययान्तस्य तथा धातुभिन्नस्य 'अस्' प्रत्ययान्तस्य उपधायाः दीर्घो भवति।

**साधनिका : - धीमान्** (बुद्धिमान्) **ध्यायन्त्यनया इति विग्रहे** 'ध्यै चिन्तायाम्' इति धातोः 'ध्यायते सम्प्रसारणं च' इति वार्तिकेन क्विप्-प्रत्यये, धातोः यकारस्य इकारे सम्प्रसारणे च, इकार अकारयोः स्थाने इकारे पूर्वरूपे, 'धि' इति स्थिते 'हलः' इति इकारस्य दीर्घे, स्वादिकार्ये सति धीः, धीरस्ति अस्य इति विग्रहे 'तदस्या-स्त्यस्मिन्नितिमतुप्' इति मतुप् प्रत्ययेऽनुबन्धलोपे, 'धीमत्' इत्यस्मात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायां, 'स्वौजसमौट्...' सुप्रत्ययेऽनुबन्धलोपे, 'धीमत्+स्' इत्यत्र 'अत्वसन्तस्य चाधातोः' इत्युपधादीर्घे, 'धीमात्+सु' अत्र सर्वनामस्थानसंज्ञायाम्, 'उगिदचां सर्वनामस्थानेऽधातोः' नुमागमेऽनुबन्धलोपे, 'धीमन्त्+स्' अत्र 'हल्ङ्या...' सलोपे, 'संयोगान्तस्य लोपः' तकारस्य लोपे कृते **'धीमान्' इति रूपम्भवति।**

**धीमत् - इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | | | | |
|---|---|---|---|---|---|
| धीमान् | धीमन्तौ | धीमन्तः। | धीमतः | धीमद्भ्याम् | धीमद्भ्यः। |
| धीमन्तम् | धीमन्तौ | धीमतः। | धीमतः | धीमतोः | धीमताम्। |
| धीमता | धीमद्भ्याम् | धीमद्भिः। | धीमति | धीमतोः | धीमत्सु। |
| धीमते | धीमद्भ्याम् | धीमद्भ्यः। | हे धीमन्! | हे धीमन्तौ! | हे धीमन्तः! |

**विशेषार्थः** - ननु धातोरित्येतद् असन्तस्येव अत्वन्तस्यापि विशेषणं कुतो न? तर्हि अत्वन्तस्य धातुत्वेऽपि दीर्घार्थम्, अधातोरित्येतस्य विशेषणं न, अतः अत्वन्तस्य धातोरपि दीर्घोऽनेन सूत्रेण भवति।

धातोश्चेदुगितः कार्यं स्यात्तर्हि अञ्चतेः एव, न तु धात्वन्तरस्येति नियमार्थम्, अतः स्रंसु ध्वंसु अधः पतने एताभ्यां क्विपि, 'अनिदितां हल उपधायाः क्ङिति' इत्यनेन नलोपे, स्रस् इत्यस्मात् सुबुत्पत्तौ, सोर्हल्ङ्यादिना लोपे, 'वसुस्रंसुध्वंस्वनडुहां दः' इत्यनेन धातोः सकारस्य दकारे स्रत् इति रूपं भवति, एवं **ध्वत्** इति रूपम्भवति। अधातोः। अधातुः पूर्वे भूतः अधातुभूतपूर्वः, पूर्वम् अधातुभूतस्यापि नुमर्थमधातोरित्येतदित्यर्थः। अतोऽधोलिखितो नुमागमो भवति।

**साधनिका : - गोमान् - गच्छतीति इति विग्रहे 'गम्लृ गतौ' धातोः 'गमेर्डोः'** इत्युणादि-सूत्रेणि डो-प्रत्ययेऽनुबन्धलोपे, 'डित्वसामर्थ्यादभस्यापि टेर्लोपः' इति टिलोपे, स्वादिकार्ये सति गौः इति, गावः सन्ति अस्येति विग्रहे 'तदस्यास्त्यस्मिन्निति मतुप्' इति सूत्रेण 'मतुप्' प्रत्ययेऽनुबन्धलोपे, स्वादिकार्ये गोमान् इति, 'गोमन्तमिच्छति इति' विग्रहे 'सुपः आत्मनः क्यच्' इति क्यच्प्रत्ययेऽनुबन्धलोपे, 'गोमत्+य' इत्यत्र 'झलां जशोऽन्ते' इति तकारस्य स्थाने जश्त्वेन दकारे प्राप्ते, 'नः क्ये' इति नियमात् पदत्वाभावाजशत्वाभावे, 'गोमत्य' शब्दात् 'सनाद्यन्ताः धातवः' इत्यनेन धातुसंज्ञायां धातुत्वात् कर्तरि क्विपि, 'यस्य हलः' इति यलोपे, 'अतो लोपः' इति अलोपे 'गोमत्' अथवा गोमानिवाचरतीत्यर्थे तु 'सर्वप्रातिपदिकेभ्यः क्विप्वा वक्तव्यः' इति वार्तिकेन क्विपि, 'सनाद्यन्ताः धातवः' इति धातुसंज्ञायां, धातुत्वात् कर्तरि क्विपि, गोमत् इत्यस्माद् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां, 'स्वौजसमौट्...' सुप्रत्ययेऽनुबन्धलोपे, 'अत्वसन्तस्य चाधातोः' इत्युपधादीर्घे 'गोमात्+स्' इति स्थिते 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमेऽनुबन्धलोपे 'गोमान्त्+स्' इत्यत्र 'हल्ङ्याब्भ्यो...' सलोपे, 'संयोगान्तस्य लोपः' तकारस्य लोपे, **'गोमान्' इति रूपम्भवति।**

**गोमत् - इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | | | | |
|---|---|---|---|---|---|
| गोमान् | गोमन्तौ | गोमन्तः। | गोमतः | गोमद्भ्याम् | गोमद्भ्यः। |
| गोमन्तम् | गोमन्तौ | गोमतः। | गोमतः | गोमतोः | गोमताम्। |
| गोमता | गोमद्भ्याम् | गोमद्भिः। | गोमति | गोमतोः | गोमत्सु। |
| गोमते | गोमद्भ्याम् | गोमद्भ्यः। | हे गोमन्! | हे गोमन्तौ! | हे गोमन्तः! |

**साधनिका : - भवान्** (आप) **भाति इति विग्रहे** 'भा दीप्तौ' इति धातोः 'भातेर्डवतुः' इत्युणादिसूत्रेण डवतुप्रत्ययेऽनुबन्धलोपे, 'डित्वसामर्थ्यादभस्यापि टेर्लोपः' इत्यनेन टिलोपे, 'भवत्' इत्यस्माद् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, 'स्वौजस...' सुप्रत्ययेऽनुबन्धलोपे, 'भवत्+सु' इति स्थिते 'अत्वसन्तस्य चाऽधातोः' इति सूत्रेण उपधायाः दीर्घे, 'भवात्+स्' इत्यत्र 'उगिदचां सर्वनामस्थानेऽधातोः' इत्यनेन नुमागमेऽनुबन्धलोपे, 'हल्ङ्याब्भ्यो...' इति सलोपे, 'संयोगान्तस्य लोपः' तकारस्य लोपे, **'भवान्' इति रूपम्भवति।**

**विशेषार्थः** - शतृप्रत्ययान्तस्य भवत् इति शब्दे 'भू' धातोः शतृप्रत्ययेऽनुबन्धलोपे अत्, शपागमे, ऊकारस्य ओकारे, गुणे, अवादेशे, पररूपमेकादेशे तथा प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे, नुमागमेऽनुबन्धलोपे, 'भवन्त्+स्' इत्यवस्थायां 'हल्ङ्या...' सलोपे, 'संयोगान्तस्य लोपः' तकारस्य लोपे, अत्र 'अतु' अन्तत्वात् (भू+अत्) दीर्घं न भवत्यतः **'भवन्' इति रूपम्भवति।**

| **डवतुप्रत्ययान्तः 'भवत्' शब्दः** | | | **शतृप्रत्ययान्तः 'भवत्' शब्दः** | | |
|---|---|---|---|---|---|
| भवान् | भवन्तौ | भवन्तः। | भवन् | भवन्तौ | भवन्तः! |
| भवन्तम् | भवन्तौ | भवतः। | भवन्तम् | भवन्तौ | भवतः! |
| भवता | भवद्भ्याम् | भवद्भिः। | भवता | भवद्भ्याम् | भवद्भिः! |
| भवते | भवद्भ्याम् | भवद्भ्यः। | भवते | भवद्भ्याम् | भवद्भ्यः! |
| भवतः | भवद्भ्याम् | भवद्भ्यः। | भवतः | भवद्भ्याम् | भवद्भ्यः! |
| भवतः | भवतोः | भवताम्। | भवतः | भवतोः | भवताम्! |
| भवति | भवतोः | भवत्सु। | भवति | भवतोः | भवत्सु! |
| हे भवन्! | हे भवन्तौ! | हे भवन्तः! | हे भवन्! | हे भवन्तौ! | हे भवन्तः! |

**(४२६) -उभे अभ्यस्तम्। ६।१।५॥**

**षाष्ठद्वित्वप्रकरणे ये द्वे विहिते उभे समुदिते अभ्यस्तसंज्ञे स्तः।**

---

४२६ - **पदच्छेदः** - उभे, अभ्यस्तम्।

**अनुवृत्तिः** - द्वे

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - सूत्राष्टाध्याय्यां षष्ठाध्यायस्य द्वित्वप्रकरणस्य द्वे सम्मिलिते रूपे अभ्यस्तसंज्ञे भवतः।

**विशेषार्थः** - सूत्राष्टाध्याय्याम् द्वित्वप्रकरणद्वयं वर्तते, तत्र षष्ठाध्यायस्य प्रथमपादस्य (१ तः १२) द्वादशसूत्राणि द्वित्वविधायकानि सन्ति एवम् अष्टमाध्यायस्य प्रथमपादस्य (१ तः १५) पञ्चादशसूत्राणि द्वित्वविधायकानि सन्ति। अतः एतयोः द्वित्व-प्रकरणयोः षाष्ठद्वित्वसूत्रैः ते द्वे सम्पूर्णरूपस्य अभ्यस्तसंज्ञे स्तः।

**(४२७) -नाभ्यस्ताच्छतुः। ७।१।७८॥**

**अभ्यस्तात्परस्य शतुर्नुम् न स्यात्। ददत्-ददद्-ददतौ, ददतः।**

---

४२७ - **पदच्छेदः** - न, अभ्यस्तात्, शतुः। (अभ्यस्तात्-पञ्चम्यन्तपदम्)

**अनुवृत्तिः** - नुम्

**सूत्रप्रकारः** - विधिसूत्रम्। (निषेधसूत्रम्)

**सरलार्थः** - अभ्यस्तसंज्ञकात् परस्य शतृप्रत्ययान्तस्य नुमागमो न भवति।

**साधनिका : - ददत्-ददद्** (देता हुआ) **'डुदाञ् दाने'** इति धातोः वर्तमाने लट्लकारे 'लटः शतृशानचावप्रथमासमानाधिकरणे' इत्यनेन लटः शत् आदेशेऽनुबन्धलोपे कृते 'दा+अत्' इति स्थिते सार्वधातुकत्वात् शप् 'जुहोत्यादिभ्यः श्लुः' इति श्लुत्वे, 'श्लौ' इति सूत्रेण द्वित्वे अभ्याससंज्ञायां, ह्रस्वे च कृते, 'ददा+अत्' इति स्थिते 'आतो लोप इटि च' इत्यनेन आलोपे, 'ददत्' इत्यस्माद् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, सुप्रत्ययेऽनुबन्धलोपे, 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमे प्राप्ते, 'उभे अभ्यस्तम्' इत्यनेन अभ्यस्तसंज्ञायाम्, 'नाभ्यस्ताच्छतुः' इति नुमागमे निषेधे, 'झलां जशोऽन्ते' तकारस्य स्थाने दकारे जश्त्वे, 'ददद्+स्' इत्यत्र 'हल्ङ्या...' इत्यनेन सकाररस्य लोपे, 'वाऽवसाने' इति चर्त्वेन दकारस्य स्थाने विकल्पेन तकारे **'ददत्' इति रूपम्भवति।** विकल्पाभावे **'ददद्' इति भवति।**

**(४२८) -जक्षित्यादयः षट्। ६।१।६॥**

**षड् धातवोऽन्ये जक्षितिश्च सप्तमः एतेऽभ्यस्तसंज्ञाः स्युः। जक्षत् - जक्षद्, जक्षतौ, जक्षतः। एवं जाग्रतः दरिद्रत्, शासत्, चकासत्। दीधीवेव्योर्ङित्त्वेऽपि छान्दसत्वाद्व्यत्ययेन परस्मैपदम्। दीव्यत्, वेव्यत्।**

---

४२८ - **पदच्छेदः** - जक्षित्यादयः, षट्।

**अनुवृत्तिः** - अभ्यस्तम्।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - जक्ष् भक्षणहसनयोः, जागृ निद्राक्षये, दरिद्रा-दुर्गतौ, चकासृ-दीप्तौ, शासु-अनुशिष्टौ, दीधीङ् दीप्तिदेवनयोः, वेविङ् वेतिना तुल्ये, एतेषां सप्तधातूनां अभ्यस्तसंज्ञा भवति।

**विशेषार्थः** - जक्षादि-सप्तधातूनां परिगणनं कारिकायामस्यामस्ति। यथा-

**'जक्षि-जागृ-दरिद्रा-शास्-दीधीङ्-वेवीङ्-चकासृ च।**

**अभ्यस्तसंज्ञा विज्ञेया धातवो मुनिभाषिताः॥'**

**साधनिका : - जक्षत्-जक्षद्** (खाता हुआ) 'जक्ष भक्षणहसनयोः' इत्यस्माद्धातोः शतृप्रत्ययेऽनुबन्धलोपे कृते 'जक्षत्' शब्दात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, 'स्वौजसमौट्...' सुप्रत्ययेऽनुबन्धलोपे, 'जक्षत्+स्' इत्यत्र 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमे प्राप्ते, 'जक्षित्यादयः षट्' इति सूत्रेण अभ्यस्तसंज्ञायाम्, 'नाभ्यस्ताच्छतुः' इति नुमागमे निषेधे, 'झलां जशोऽन्ते' तकारस्य स्थाने जशत्वेन दकारे, 'जक्षद्+स्' इत्यत्र 'हल्ङ्याब्भ्यो...' सलोपे, अवसानसंज्ञायाम्, 'वाऽवसाने' विकल्पेन दकारस्य स्थाने तकारे **'जक्षत्' इति रूपं सिद्धम्।** विकल्पाभावे तु **'जक्षद्' इति भवति।**

**जक्षत् इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | | | | |
|---|---|---|---|---|---|
| जक्षद्-जक्षत् | जक्षतौ | जक्षतः। | जक्षतः | जक्षद्भ्याम् | जक्षद्भ्यः। |
| जक्षतम् | जक्षतौ | जक्षतः। | जक्षतः | जक्षतोः | जक्षताम्। |
| जक्षता | जक्षद्भ्याम् | जक्षद्भिः। | जक्षति | जक्षतोः | जक्षत्सु। |
| जक्षते | जक्षद्भ्याम् | जक्षद्भ्यः। | हे जक्षत्, जक्षद्! | हे जक्षतौ! | हे जक्षतः! |

**विशेषार्थः** - जक्षादि-सप्तधातूनां सर्वाणि रूपाणि 'ददत्' शब्दवदेव भवन्ति। जक्षत् = (खाता हुआ), जाग्रत् = (जागता हुआ), दरिद्रत् = (दुर्गतिको प्राप्त होता हुआ), शासत् = (शासन करता हुआ), चकासत् = (चमकता हुआ), दीध्यत्, वेयत् = (देता हुआ) इत्यर्थाः। 'दीधीङ् दीप्तिदेवनयोः' एवं 'वेविङ् वेतिना तुल्ये' अनयोः द्वयोः छान्दसः विषयत्वाद् 'व्यत्ययोबहुलम्' इत्यनेन परस्मैपदं भवति।

**॥ इति तकारान्तप्रकरणम् ॥**

गुप्-गुब्, गुपौ, गुपः। गुब्भ्यामित्यादि।

पकारान्तशब्दस्य रूपाणां विषये चर्चा विद्यते।

**साधनिका : - गुप्-गुब्** (रक्षा करना) **'गुप् रक्षणे'** इति धातोः आयप्रत्ययाभावपक्षे, क्विप् प्रत्ययेऽनुबन्धलोपे, वकारस्य 'वेरपृक्तस्य' इत्यनेन लोपे, 'पुगन्तलघूपधस्य च' उकारस्य गुणे प्राप्ते, कित्वात् 'क्ङिति च' इति गुणनिषेधे, 'गुप्' इत्यस्माद् 'कृत्तद्धितसमासाश्च' इत्यनेन सूत्रेण प्रातिपदिकसंज्ञायां, 'स्वौजसमौट्...' सुप्रत्ययेऽनुबन्धलोपे, 'गुप्+स्' इति स्थिते 'झलां जशोऽन्ते' इत्यनेन पकारस्य स्थाने जश्त्वेन बकारे, 'गुब्+स्' इत्यत्र 'हल्ङ्या...' सलोपे, अवसानसंज्ञायाम्, 'वाऽवसाने' विकल्पेन षकारस्य स्थाने चर्त्वेन पकारे, **'गुप्' इति रूपं सिद्धम्।** विकल्पाभावे तु **'गुब्' इति रूपम्भवति।**

**साधनिका : - गुब्भ्याम्** - 'गुप्' धातोः तृतीया बहुवचने भ्याम् प्रत्यये 'झलां जशोऽन्ते' पकारस्य स्थाने बकारे जश्त्वे, **'गुब्भ्याम्' इति रूपम्भवति।**

**गुप् - इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | | | | |
|---|---|---|---|---|---|
| गुप्-गुब् | गुपौ | गुपः। | गुपः | गुब्भ्याम् | गुब्भ्यः। |
| गुपम् | गुपौ | गुपः। | गुपः | गुपोः | गुपाम्। |
| गुपा | गुब्भ्याम् | गुब्भिः। | गुपि | गुपोः | गुप्सु। |
| गुपे | गुब्भ्याम् | गुब्भ्यः। | हे गुप्, गुब्! | हे गुपौ! | हे गुपः! |

**॥ इति पकारान्तप्रकरणम् ॥**

*

**॥ अथ शकारान्तप्रकरणम् ॥**

**(४२९) -त्यदादिषु दृशोऽनालोचने कञ्च। ३।२।६०॥**

**त्यदादिषूपपदेष्वज्ञानार्थाद् दृशेर्धातोः कञ् स्यात्, चात् क्विन्।**

---

४२९ - **पदच्छेदः** - त्यदादिषु, दृशः, अनालोचने, कञ्, च।

**सूत्रसमासः** - त्यद् आदिर्येषां ते त्यदादयः, तेषु त्यदादिषु बहुव्रीहिः।

**अनुवृत्तिः** - क्विन्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - त्यदादिसर्वनामवाचिषु शब्देषु उपपदेषु अज्ञानार्थकात् 'दृशिर् प्रेक्षणे' इति धातोः कञ्प्रत्ययः क्विन्प्रत्ययश्च भवति।

(४३०) -आः सर्वनाम्नः। ६।३।९१॥

**सर्वनाम्नः आकारोऽन्तादेशः स्याद् दृग्दृश्वतुषु। कुत्वस्यासिद्धत्वात् 'व्रश्च...' ( सू. २९४ ) इति षः। तस्य जश्त्वेन डः। तस्य कुत्वेन गः। चर्त्वेन पक्षे कः। तादृक्-तादृग्, तादृशौ, तादृशः। 'षत्वापवादत्वात्कुत्वेन खकारः' इति कैयटहरदत्तादिमते तु चर्त्वाभावपक्षे ख एव श्रूयते, न तु गः, जश्त्वं प्रति कुत्वस्यासिद्धत्वात्। 'दिगादिभ्यो यत्' ( सू. १४२९ ) इति निर्देशान्नासिद्धत्वमिति वा बोध्यम्। 'व्रश्च...' ( सू. २९४ ) इति षत्वम्। जश्त्वचर्त्वे। विट्-विड्, विशौ, विशः।**

---

४३० - **पदच्छेदः** - आः, सर्वनाम्नः।

**अनुवृत्तिः** - दृग्दृश्वतुषु।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - दृग्, दृश्, वतुप्रत्ययान्तेषु शब्देषु परतः सर्वनामसंज्ञकस्य आकारः अन्तादेशो भवति।

**साधनिका : - तादृक्-तादृग् ( वैसा ) 'स इवायं पश्यति'** इति विग्रहे 'दृशिर् प्रेक्षणे' धातोः 'त्यदादिषु दृशोऽनालोचने कञ्च' इत्यनेन क्विन्प्रत्यये, 'तद्+दृश्+क्विन्' इत्यत्र क्विन्-इत्यस्यानुबन्धलोपे, 'वेरपृक्तस्य' वकारस्य लोपे, 'पुगन्तलधूपधस्य च' इत्यनेन उपधायाः गुणे प्राप्ते, कित्वात् 'क्ङिति च' इति सूत्रेण गुणे निषेधे, 'तद्+दृश्' इति स्थिते, 'आ सर्वनाम्नः' इत्यनेन दकारस्य स्थाने आकारेऽन्तादेशे, 'त+आ+दृश्' इत्यत्र 'अकः सवर्णे दीर्घः' इति सूत्रेण अकार-आकारयोः स्थाने आकारे सवर्णे दीर्घे, 'तादृश्' इत्यस्मात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायां 'स्वौजस...' सुप्रत्ययेऽनुबन्धलोपे, 'हल्ङ्या...' सलोपे, 'तादृश्' इति स्थिते 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इत्यनेन सूत्रेण शकारस्य स्थाने षकारे, 'झलां जशोऽन्ते' षकारस्य स्थाने डकारे, 'क्विन्प्रत्ययस्य कुः' डकारस्य स्थाने कुत्वेन गकारे, 'वाऽवसाने' गकारस्य स्थाने विकल्पेन चर्त्वेन ककारे 'तादृक्' इति रूपं जातम्। चर्त्वस्य विकल्पे 'तादृग्' इति रूपम्भवति।

**विशेषार्थः** - कैयटहरदत्तादिमते षत्वस्यापवादं सूत्रमिदमस्त्यतः तादृश् इत्यत्र शकारस्य स्थाने 'क्विन्प्रत्ययस्य कुः' इति अघोषमहाप्राणसाम्यात् खकारे, तस्य 'वाऽवसाने' इति विकल्पेन ककारे, तादृक् चर्त्वस्य विकल्पाभावे तादृख इत्येव स्यात्, तादृग् इति गकारो न श्रूयतेत्यर्थः। ननु अस्तु शकारस्य खकारः। अथापि तस्य चर्त्वाभावे जश्त्वेन गकारे। निर्बाध इत्यत आह - जश्त्वं प्रतीति। जश्त्वेन गकारे कर्तव्ये शकारस्थानकस्य कुत्वसम्पन्नखकारस्यासिद्धतया झलोऽभावेन 'दिगादिभ्यो यत्' इति निर्देशाद् जश्त्वा-सम्भवादित्यर्थः।

**तादृश् - इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | |
|---|---|---|
| तादृक्-तादृग् | तादृशौ | तादृशः। |
| तादृशम् | तादृशौ | तादृशः। |
| तादृशा | तादृग्भ्याम् | तादृग्भिः। |
| तादृशे | तादृग्भ्याम् | तादृग्भ्यः। |
| तादृशः | तादृग्भ्याम् | तादृग्भ्यः। |
| तादृशः | तादृशोः | तादृशाम्। |
| तादृशि | तादृशोः | तादृक्षु। |
| हे तादृक्-तादृग्! | हे तादृशौ! | हे तादृश। |

**साधनिका : - विट्-विड्** (प्रवेशकर्ता) **विशति इति विग्रहे 'विश प्रवेशते'** इति धातोः क्विप्प्रत्ययेऽनुबन्धलोपे, 'पुगन्तलघूपधस्य च' इत्युपधाभूतस्य इकारस्य गुणे प्राप्ते, कित्वात् 'क्ङिति च' इति गुणनिषेधे, 'विश्' इत्यस्मात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, 'स्वौजसमौट्...' सुप्रत्ययेऽनुबन्धलोपे, 'विश्+स्' इति स्थिते 'हल्ङ्या...' सलोपे, 'व्रश्चभ्रस्जसृज...' इति शकारस्य स्थाने षकारे, 'झलां जशोऽन्ते' इति षकारस्य स्थाने डकारे, 'वाऽवसाने' डकारस्य विकल्पेन टकारे 'विट्' इति रूपम्भवति। चर्त्वस्य विकल्पाभावे 'विड्' इति भवति।

**(४३१) -नशेर्वा। ८।२।६३॥**

**नशेः कवर्गोऽन्तादेशो वा स्यात्पदान्ते। नक्-नग्, नट्-नड्, नशौ, नशः। नग्भ्याम्-नड्भ्यामित्यादि।**

---

४३१ - **पदच्छेदः** - नशेः, वा।

**अनुवृत्तिः** - पदस्य (अधिकारः), अन्ते, कुः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पदान्ते नशेः शकारस्य स्थाने विकल्पेन कवर्गा देशोभवति।

**साधनिका : - नक्-नग्, नट्-नड्** (नश्वर, न दिखाई देना) **नश्यति इति विग्रहे** 'णश् अदर्शने' इति धातोः 'णो नः' इत्यनेन सूत्रेण धातोः णकारस्य स्थाने नकारे, 'नश्' इति स्थिते, क्विनप्रत्ययेऽनुबन्धलोपे, 'नश्' इत्यस्माद् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायाम्, 'स्वौजसमौट्...' सुप्रत्ययेऽनुबन्धलोपे 'हल्ङ्या...' इत्यनेन सकारस्य लोपे, 'व्रश्चभ्रस्जसृजमृज...' इति सूत्रेण शकारस्य स्थाने षकारे, 'नष्' इति स्थिते 'झलां जशोऽन्ते' इति षकारस्य जश्त्वेन डकारे, 'नशेर्वा' इति विकल्पेन डकारस्य कुत्वेन गकारे, 'वाऽवसाने' इति सूत्रेण गकारस्य विकल्पेन ककारे **'नक्'** इति रूपम्भवति। चर्त्वस्य विकल्पे **'नग्'** इति रूपम्भवति। 'नशेर्वा' इति सूत्रेण कुत्वस्य अभावपक्षे 'व्रश्चभ्रस्ज...' इति शकारस्य स्थाने षकारे, 'झलां जशोऽन्ते' इति षकारस्य स्थाने डकारे, 'वाऽवसाने' विकल्पेन डकारस्य स्थाने टकारे **'नट्'** इति रूपम्भवति। चर्त्वस्य विकल्पे **'नड्'** इति रूपम्भवति।

**नश् - शब्दस्य रूपाणि भवन्ति। यथा- (नश्वरः)**

| | | |
|---|---|---|
| नक्-नग्, नट्-नड् | नशौ | नशः। |
| नशम् | नशौ | नशः। |
| नशा | नग्भ्याम्, नड्भ्याम् | नग्भिः, नड्भिः। |
| नशे | नग्भ्याम्, नड्भ्याम् | नग्भ्यः, नड्भ्यः। |
| नशः | नग्भ्याम्, नड्भ्याम् | नग्भ्यः, नड्भ्यः। |
| नशः | नशोः | नशाम्। |
| नशि | नशोः | नट्त्सु, नट्सु, नक्षु। |
| हे नक्-नग्, हे नट्-नड्! | हे नशौ! | हे नशः। |

**(४३२) -स्पृशोऽनुदके क्विन्। ३।२।५८॥**

**अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात्। घृतस्पृक्-घृतस्पृग्, घृतस्पृशौ, घृतस्पृशः। क्विन्प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणात् क्विप्यपि कुत्वम्। स्पृक्। षडगकाः प्राग्वत्।**

---

४३२ - **पदच्छेदः** - स्पृशः, अनुदके, क्विन्।

**अनुवृत्तिः** - सुपि।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** – (जलभिन्ने) उदकभिन्ने सुबन्ते उपपदे सति स्पृश संस्पर्शते इति धातोः क्विन्प्रत्ययो भवति।

**साधनिका : – घृतस्पृक् – घृतस्पृग्** (घृत का स्पर्श करनेवाला) घृतं स्पृशति इति विग्रहे 'स्पृश् संस्पर्शने' धातोः 'स्पृशोऽनुदके क्विन्' इत्यनेन सूत्रेण क्विन्प्रत्ययेऽनुबन्ध लोपे, 'पुगन्तलघुपधस्य च' इति सूत्रेण उपधायाः ऋकारस्य गुणे प्राप्ते, कित्वाद् 'क्ङिति च' इति गुणनिषेधे, 'घृतस्पृश्' इत्यस्माद् 'कृत्तद्धितसमासाश्च' इत्यनेन सूत्रेण प्रातिपदिकसंज्ञायाम्, 'स्वौजसमौट्...' सुप्रत्ययेऽनुबन्धलोपे, 'हल्ङ्या...' सुप्रत्ययस्य लोपे, 'घृतस्पृश्' इति स्थिते, 'व्रश्चभ्रस्ज...' शकारस्य षकारे, 'झलां जशोऽन्ते' इति षकारस्य डकारे, 'क्विन्प्रत्ययस्य कुः' डकारस्य स्थाने चर्त्वस्य विकल्पाभावे **'घृतस्पृग्' इति रूपम्भवति।**

**विशेषार्थः** – अथ 'क्विन्प्रत्ययस्य कुः' इत्यत्र 'क्विनः कुः' इत्यतावतैव क्विन्नतस्येति लब्धे प्रत्ययग्रहणं क्विनप्रत्ययौ यस्मादिति बहुव्रीहिलाभायात्युक्तं तस्य प्रयोजनं कथयति। यद्-अनुदके सुप्युपपदे तावत् स्पृशेः क्विन्प्रत्ययो विहितः अतो निरूपदात् स्पृशेः क्विबेव। तस्य सम्प्रति क्विन्नन्तत्वाभावेऽपि कुत्वं भवत्येव, बहुव्रीह्याश्रयणेन कदाचित् क्विन्नन्तमात्रेणापि क्विन्प्रत्ययान्तत्वयोग्यतालाभादिति भावः। षडगकाः प्राग्वत्। स्पृक् इत्यत्र शकारस्य पूर्वे षत्वं पश्चाद् 'झलां जशोऽन्ते' इति षकारस्य डकारः, तदनन्तरं डकारस्य कुत्वेन गकारः तत्पश्चाद् 'वाऽवसाने' गकारस्य ककारो भवति, इत्थं षडगकेषु कार्येषु सत्सु स्पृक् इति रूपम्भवति।

**घृतस्पृश् – इति शब्दस्य रूपाणि भवन्ति। यथा–**

| | | | | | |
|---|---|---|---|---|---|
| घृतस्पृक्-धृतस्पृग् | घृतस्पृशौ | घृतस्पृशः। | घृतस्पृशः | घृतस्पृग्भ्याम् | घृतस्पृग्भ्यः। |
| घृतस्पृशम् | घृतस्पृशौ | घृतस्पृशः। | घृतस्पृशः | घृतस्पृशोः | घृतस्पृशाम्। |
| घृतस्पृशो | घृतस्पृग्भ्याम् | घृतस्पृग्भिः। | घृतस्पृशि | घृतस्पृशोः | घृतस्पृक्षु। |
| घृतस्पृशे | घृतस्पृग्भ्याम् | घृतस्पृग्भ्यः। | हे घृतस्पृक्! घृतस्पृग् | हे घृतस्पृशौ! | हे घृतस्पृशः! |

**॥ इति शकारान्तप्रकरणम् ॥**

**॥ अथ षकारान्तप्रकरणम् ॥**

'ञिधृषा प्रागल्भ्ये'। अस्मात् 'ऋत्विग्' (सू. ३७३) आदिना क्विन् द्वित्वमन्तोदात्तत्वं न निपात्यते। कुत्वात्पूर्वं जशत्वेन डः गः कः। धृष्णोतीति दधृक्-दधृग्, दधृषौ, दधृषः। दधृग्भ्यामित्यादि। रत्नानि मुष्णातीति रत्नमुट्-रत्नमुड्, रत्नमुषौ, रत्नमुषः।'षड्भ्यो लुक्' (सू. २६१)। षट्-षड्। षड्भिः। षड्भ्यः। षड्भ्यः।'षट्चतुर्भ्यश्च' (सू. ३३८) ति नुट्।'अनाम्' इति पर्युदासान्न ष्टुत्वनिषेधः।'यरोऽनुनासिके...' (सू. ११६) इति विकल्पं बाधित्वा 'प्रत्यये भाषायां नित्यम्' (वा. ५०१७) इति वचनान्नित्यमनुनासिकः। षण्णाम्। षट्त्सु-षटसु। तदन्तविधिः परमषट्। परमषण्णाम्। गौणत्वे तु प्रियषषः। प्रियषषाम्। रूत्वं प्रति षत्वस्यासिद्धत्वात् 'ससजुषो रुः' (सू. १३२) इति रुत्वम्।

**साधनिका : – दधृक्-दधृग् (प्रगल्भता) धृष्णोति इति विग्रहे 'ञिधृषा प्रागल्भ्ये'** इति धातोरनुबन्धलोपे, 'आदिर्ञिटुडवः' इति 'ञि' इत्यस्य इत्संज्ञायां लोपे च, 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इति सूत्रेण क्विन्प्रत्ययेऽनुबन्धलोपे, द्वित्वे, अन्तोदात्तत्वे कृते निपतनात् 'दधृष्' शब्दः सिद्ध्यति 'पुगन्तलघूपधस्य च' इति सूत्रेण उपधागुणे प्राप्ते, कित्वात् 'क्ङिति च' इति निषेधे, 'कृदतिङ्' इत्यनेन क्विन्प्रत्ययस्य कृत्संज्ञायां, कृदन्तत्त्वात्, 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम् सुप्रत्यये, 'दधृष्+सु' इति स्थिते हुल्ङ्यादिना सुलोपे 'झलां जशोऽन्ते' इति षकारस्य जश्त्वेन डकारे, 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन डकारस्य गकारे, 'वाऽवसाने' इति गकारस्य विकल्पेन ककारे, 'दधृक्' इति रूपम्भवति। चर्त्वस्य विकल्पाभावे **'दधृग्' इति रूपम्भवति।**

**साधनिका : - रत्नमुट्-रत्नमुड्** (रत्न चुरानेवाला) **रत्नानि मुष्णाति इति विग्रहे 'मुष् स्तेये'** धातोरनुबन्धलोपे 'रत्नमुष्' इत्यत्र क्विप्प्रत्ययेऽनुबन्धलोपे 'रत्नमुष्' इत्यस्मात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, सुप्रत्ययेऽनुबन्धलोपे, 'हल्ङ्या...' सलोपे, 'झलां जशोऽन्ते' इति सूत्रेण षकारस्य स्थाने जश्त्वेन डकारे, 'वाऽवसाने' इति विकल्पेन डकारस्य स्थाने टकारे, **'रत्नमुट्' इति रूपम्भवति।** चर्त्वस्य विकल्पे **'रत्नमुड्' इति रूपम्भवति।**

**रत्नमुष् - इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | | | | |
|---|---|---|---|---|---|
| रत्नमुट्-रत्नमुड् | रत्नमुषौ | रत्नमुषः। | रत्नमुषः | रत्नमुड्भ्याम् | रत्नमुडभ्यः। |
| रत्नमुषम् | रत्नमुषौ | रत्नमुषः। | रत्नमुषः | रत्नमुषोः | रत्नमुषाम्। |
| रत्नमुषा | रत्नमुड्भ्याम् | रत्नमुड्भिः। | रत्नमुषि | रत्नमुषोः | रत्नमुट्सु-रत्नमुट्त्सु। |
| रत्नमुषे | रत्नमुड्भ्याम् | रत्नमुड्भ्यः। | हे रत्नमुट्! रत्नमुड् | हे रत्नमुषौ! | हे रत्नमुषः! |

**साधनिका : - षट्-षड्** (छह - संख्यावाचक) **'षष्'** इत्यस्मात् प्रातिपदिकसंज्ञायाम्, 'स्वौजसमौट्...' जस् प्रत्यये, 'षष्+जस्' इति स्थिते 'डति च' षट्संज्ञायाम् 'षड्भ्यो लुक्' इति सूत्रेण जस् इत्यस्य लोपे, 'षष्' इत्यत्र 'झलां जशोऽन्ते' इति सूत्रेण षकारस्य स्थाने जश्त्वेन डाकरे, 'वाऽवसाने' विकल्पेन डकारस्य टकारे, 'षट्' इति रूपम्भवति। चर्त्वस्य विकल्पाभावे 'षड्' इति भवति।

**साधनिका : - षण्णाम् - 'षष्'** इत्यस्मात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, 'स्वौजस...' आम् प्रत्यये, 'षष्+आम्' इत्यत्र 'षट्चतुर्भ्यश्च' इति सूत्रेण नुमागमे, अनुबन्धलोपे, 'षष्+न्+आम्' इति स्थिते 'झलां जशोऽन्ते' इति षकारस्य जश्त्वेन डकारे, 'षड्+नाम्' इत्यत्र 'ष्टुना ष्टुः' इति नकारस्य स्थाने णकारे ष्टुत्वे कृते सति 'षड्+णाम्' इति स्थिते 'यरोऽनुनासिकेऽनुनासिको वा' इति विकल्पेन डकारस्य स्थाने णकारे प्राप्ते 'प्रत्यये भाषायां नित्यम्' इति वार्तिकेन डकारस्य स्थाने णकारेऽनुस्वारे **'षण्णाम्' इति रूपं सिद्धम्।**

**विशेषार्थः** - कर्मधारयसमासे सत्यङ्गसम्बन्धी कार्यत्वात् मुख्येऽर्थे तदन्तविधिः भवति। यथा-परमाश्च ते षट् (मुख्य छह) इति परमषट् शब्दस्य रूपाणि षट् शब्दवदेव भवति। गौणत्वे सति तदन्तविधिर्न भवति। तद्यथा-

**साधनिका : - प्रियषषः** (छह के प्रिय) प्रियाः षट् येषां ते इति बहुव्रीहिसमासे 'प्रियषष्' शब्दात् प्रातिपदिकसंज्ञायाम्, जस् प्रत्ययेऽनुबन्धलोपे, सस्य रुत्वे विसर्गे, **'प्रियषषः' इति रूपम्भवति।**

**प्रियषष् - शब्दस्य रूपाणि भवन्ति। यथा-**

| | | |
|---|---|---|
| प्रियषट्-प्रियषड् | प्रियषषौ | प्रियषषः। |
| प्रियषषम् | प्रियषषौ | प्रियषषः। |
| प्रियषषा | प्रियषड्भ्याम् | प्रियषड्भिः। |
| प्रियषषे | प्रियषड्भ्याम् | प्रियषड्भ्यः। |
| प्रियषषः | प्रियषड्भ्याम् | प्रियषड्भ्यः। |
| प्रियषषः | प्रियषषोः | प्रियषषाम्। |
| प्रियषषि | प्रियषषोः | प्रियषट्सु-प्रियषट्त्सु। |
| हे प्रियषट्, प्रियषड्! | हे प्रियषषौ! | हे प्रियषषः! |

**( ४३३ ) वौरूपधाया दीर्घ इकः। ८। २। ७६॥**

**रेफवान्तस्य धातोरूपधायाः इको दीर्घः स्यात्पदान्ते। पिपठीः, पिपठिषौ, पिपठिषः। पिपठीर्भ्याम्। 'वा शरि' ( सू. १५१ ) इति वा विसर्जनीयः।**

---

४३३ - **पदच्छेदः** - र्वोः, उपधायाः, दीर्घः, इकः।

**अनुवृत्तिः** - पदस्य (अधिकारः), अन्ते, धातोः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - रेफान्तस्य वान्तस्य च धातोः उपधायाः इकः (इ, उ, ऋ, लृ) स्थाने दीर्घो भवति पदान्ते सति।

**साधनिका :** - **पिपठीः** (पठने की इच्छावाला) **पठितुमिच्छति इति विग्रहे 'पठ व्यक्तायां वाचि' इति धातोः** 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सूत्रेण सन्प्रत्यये, 'सन्यडोः' इति द्वित्वे, अभ्यासादिकार्ये, 'पपठ्+सु' इति स्थिते 'सन्यतः' इति सूत्रेण अभ्यासस्य अकारस्य स्थाने इकारे, 'पिपठ्+सु' आर्धधातुकसंज्ञायाम् 'आर्धधातुक-स्येड्वलादेः' इति सूत्रेण इडागमेऽनुबन्धलोपे, 'पिपठि+सु' इति स्थिते 'आदेशप्रत्ययोः' इति सनः सकारस्य स्थाने षकारे 'पिपठिष्' इति स्थिते 'सनाद्यन्ताः धातवः' इति सूत्रेण धातुसंज्ञायाम्, क्विप्प्रययेऽनुबन्धलोपे, 'आतो लोपः' इति अकारस्य लोपे, 'पिपठिष्' इति स्थिते कृदन्तत्वात् 'पिपठिष्' इत्यस्य 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां, सुप्रत्यये, हल्ङ्यादिना सुलोपे, 'पिपठिष्' इति स्थिते रुत्वशास्त्रदृष्ट्या सनः सकारस्य स्थाने जातस्य षकारस्य असिद्धत्वात् सकारस्य रुत्वेऽनुबन्धलोपे, 'पिपठिर्' इत्यत्र 'र्वोरुपधाया दीर्घ इकः' इति सूत्रेण रेफान्तस्य उपधायाः इकारस्य स्थाने दीर्घे ईकारे, रेफस्य विसर्गे, **'पिपठीः' इति रूपं सिद्धम्।**

**साधनिका :** - **पिपठीष्षु - पिपठीःषु** - 'पिपठिष्' इत्यस्य 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायाम्, सप्तमी बहुवचनविवक्षायां सुप्प्रत्यये पकारस्यानुबन्धलोपे, 'पिपठष्+सु' इति स्थिते रुत्वशास्त्रदृष्ट्या सनः सकारस्य स्थाने जातस्य षकारस्य असिद्धत्वात् सकारस्य स्थाने रुत्वेऽनुबन्धलोपे 'पिपठिर्+सु' इति स्थिते 'र्वोरुपधाया दीर्घ इकः' इति इकारस्य दीर्घे ईकारे, रेफस्य विसर्गे, 'पिपठीः+सु' इति स्थिते 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति सूत्रेण दन्त्यसकारस्य स्थाने षकारे, 'विसर्जनीयः सः' इत्यनेन विसर्गस्य स्थाने सकारे प्राप्ते, 'वा शरि' विकल्पेन विसर्गस्य स्थाने विसर्गे **'पिपठीःषु' इति रूपम्भवति।** 'वा शरि' इति विकल्पाभावात् 'विसर्जनीयः सः' विसर्गस्य स्थाने सकारे 'पिपठीस्+षु' इति स्थिते ष्टुत्वे **'पिपठीष्षु' इति रूपं सिद्धम्।**

**पिपठिष् - इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | |
|---|---|---|
| पिपठीः | पिपठिषौ | पिपठिषः। |
| पिपठिषम् | पिपठिषौ | पिपठिषः। |
| पिपठिषा | पिपठीर्भ्याम् | पिपठीर्भिः। |
| पिपठिषे | पिपठीर्भ्याम् | पिपठीर्भ्यः। |
| पिपठिषः | पिपठीर्भ्याम् | पिपठीर्भ्यः। |
| पिपठिषः | पिपठिषोः | पिपठिषाम्। |
| पिपठिषि | पिपठिषोः | पिपठिष्षु-पिपठीःषु। |
| हे पिपठीः! | हे पिपठिषौ! | हे पिपठिषः! |

(४३४) -नुम्विसर्जनीयशर्व्यवायेऽपि। ८।३।५८॥

**एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य तस्य मूर्धन्यादेशः स्यात्। ष्टुत्वेन पूर्वस्य षत्वम्। पिपठीष्षु-पिपठीःषु। 'प्रत्येकम्' इति व्याख्यानादनेकव्यवधाने षत्वं न। निंस्स्व। निंस्से। नुम्ग्रहणं नुम्स्थानिकानुस्वारोपलक्षणार्थं, व्याख्यानात्। तेनेह न - सुहिन्सु। पुंसु। अत एव न शर्ग्रहणेन गतार्थता। 'रात्सस्य' (सू. २८०) इति सलोपे विसर्गः चिकीः, चिकीर्षौ, चिकीर्षः। 'रोः सुपि' (सू. ३३९) इति नियमान्न विसर्गः। चिकीर्षु। 'दमेर्डोस्' (उ. २२७)। डित्त्वसामर्थ्याट्टिलोपः। षत्वस्यासिद्धत्वाद्रुत्वविसर्गौ। दोः, दोषौ, दोषः। 'पद्दन्नो...' (सू. २२८) इति वा दोषन्। दोष्णः। दोष्णा। दोषः। दोषा। 'विश प्रवेशने' सन्नन्तात् क्विप्। कुत्वस्यासिद्धत्वात्संयोगान्तलोपः। 'व्रश्च...' (सू. २९४) इति षः। जशत्वचर्त्वे। विविट्-विविड्, विविक्षौ, विविक्षः। 'स्कोः...' (सू. ३८०) इति क्लोपः। तट्-तड्, तक्षौ, तक्षः। गोरट्-गोरड्, गोरक्षौ, गोरक्षः। तक्षिरक्षिभ्यां ण्यन्ताभ्यां क्विपि तु 'स्कोः...' (सू. ३८०) इति न प्रवर्तते, णिलोपस्य स्थानिवद्भावात्। 'पूर्वत्रासिद्धे न स्थानिवत्' (वा. ४३३) इति त्विह नास्ति, 'तस्य दोषः संयोगादिलोपलत्वणत्वेषु' (वा. ४४०) इति निषेधात्। तस्मात्संयोगान्तलोप एव। तक्-तग्। गोरक्-गोरग्। 'स्कोः...' (सू. ३८०) इति कलोपं प्रति कुत्वस्यासिद्धत्वात्संयोगान्तलोपः। पिपक्-पिपग्। एवं विवक्, दिधक्। इति षान्ताः।**

---

४३४ - **पदच्छेदः** - नुम्विसर्जनीयशर्व्यवाये, अपि।

**सूत्रसमासः** - नुम् च विसर्जनीयश्च शर् चेति नुम्विसर्जनीयशरः, तेषां व्यवायो, नुम्विसर्जनीयशर्व्यवायः, तस्मिन् नुम्विसर्जनीयशर्व्यवाये (इतरेतरद्वन्द्वः)।

**अनुवृत्तिः** - मूर्धन्यः, सः, इण्कोः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - नुमागमः, विसर्गः, शर्प्रत्याहारः एतेषां कस्यामपि एकस्य अक्षरस्य एवं व्यवधाने सति इणप्रत्याहारात् कवर्गात्त्व परस्य सकारस्य स्थाने षकारो भवति।

**साधनिका : - निंस्सव** (चुम्बन करो) **'णिसि चुम्बन'** इति धातोरनुबन्धलोपे, 'णो नः' इति णस्य नकारे, इदित्वान्नुमागमेऽनुबन्धलोपे, नकारस्यानुस्वारे, 'निंस्' इति धातोः लोट्लकारे, अनुदात्ते त्वादात्मनेपदम्, 'तिप्तस्झि...' मध्यमपुरुषैकवचनविक्षायां थास्प्रत्यये, 'निंस्+थास्' इति स्थिते थासः सार्वधातुकसंज्ञायाम् 'कर्तरि शप्' शप्प्रत्यये, 'अदिप्रभृतिभ्यः शपः' इत्यनेन शप्लुकि, 'थासः से' इति थासः स्थाने से आदेशे, 'निंस्+से' इत्यत्र 'सवाभ्यां वामौ' इति एकारस्य स्थाने वकारे 'निंस्+स्व' इति स्थिते अत्र अनुस्वारसकारयोः द्वयोरक्षरयोः व्यवधानात् 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति सकारस्य स्थाने षकारो न भवति। **'निंस्स्व' इति रूपम्भवति।** एवं लट्लकारे मध्यमपुरूषैकवचनविवज्ञायां **'निंस्से' इत्यत्रापि षकारो न भवति।**

**विशेषार्थः** - अत्र सूत्रेऽस्मिन् 'नुम्' इति स्थानिकानुस्वाररूपेण गृहितोऽस्ति। नुमागमस्य स्थाने जातस्यानुस्वारस्य व्यवधाने एव सकारस्य स्थाने अनेन सूत्रेण षकारो भवति।

**साधनिका : - सहिन्सु - सु उपपदात्** 'हिसि हिंसायाम्' धातोरनुबन्धलोपे, 'इदित्वान्नुमागमे' क्विप्प्रत्ययेऽनुबन्धलोपे, 'सुहिन्स्' इत्यस्माद् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, सुप्प्रत्ययेऽनुबन्धलोपे, 'सुहिन्स्+सु' इति स्थिते 'स्कोः संयोगाद्योरन्ते च' इति सकारस्य लोपे, 'सुहन्+सु' इत्यत्र 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति सूत्रेण अनुस्वारस्य अभावात् सकारस्य स्थाने षकारो न भवत्यतः **'सहिन्सु' इति रूपं सिद्धम्।**

**साधनिका : – पुंसु** – पुम्स् इत्यस्मात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां 'स्वौजसमौट्...' सुप्प्रत्ययेऽनुबन्धलोपे, 'पुम्स्+सु' इति स्थिते 'स्कोः संयोगाद्योरन्ते च' इति सकारस्य लोपे, पदसंज्ञत्वात् 'मोऽनुस्वारः' इति मकारस्य अनुस्वारे, 'पुं+सु' इति स्थिते 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति अत्र मकारस्य अनुस्वारो विद्यते न तु नुमागमस्यातः नुमागमस्य नकारस्य। अनुस्वाराभावात् सकारस्य स्थाने षकारो न भवति, **'पुंसु' इति रूपं सिद्धम्।**

**साधनिका : – 'चिकीः'** (करने की इच्छावाला) **कर्तुमिच्छति इति विग्रहे 'डुकृञ् करणे'** इति धातोः 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सन्प्रत्ययेऽनुबन्ध–लोपे, 'क्+स्' इति स्थिते 'सार्वधातुकार्धधातुकयोः' इति ऋकारस्य गुणे प्राप्ते, 'इको झल्' इति सनः कित्वाभावात् गुणे निषेधे, 'अज्झनगमां सनि' ऋकारस्य स्थाने ॠकारे दीर्घे, 'कॄ+स' इति स्थिते, 'ॠत इद्धातोः' इति इकारे रपरत्वे, 'किर्+स' इति स्थिते 'हलि च' इति इकारस्य स्थाने ईकारे दीर्घे, 'सन्यङोः' इति द्वित्वे, अभ्यासादिकार्ये, 'चिकीर्+स' इति स्थिते 'नुम्विसर्जनीय...' इति सनः सकारस्य स्थाने षकारे, 'अतो लोपः' षकारोत्तरवर्त्यकारस्य लोपे, 'चिकीर्ष्' इत्यस्मात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां, सुप्रत्यये, हल्ङ्यादिना सुलोपे, सनः सकारस्य स्थाने जातस्य षकारस्य असिद्धत्वात्, 'रात्सस्य' इति नियमात् 'संयोगान्तस्य लोपः' इति सकारस्य लोपे, 'चिकीर्' इति स्थिते रेफस्य विसर्गे **'चिकीः' इति रूपम्भवति।**

**साधनिका : – चिकीर्षु** – 'चिकीर्ष्' शब्दात् सप्तमीबहुवचनविवक्षायां सुपप्रत्ययेऽनुबन्धलोपे, 'चिकीर्ष्+सु' इति स्थिते सनः सकारस्य स्थाने जातस्य षकारस्य असिद्धत्वात् 'रात्सस्य' इति नियमात् 'संयोगान्तस्य लोपः' इति सकारस्य लोपे, 'चिकीर्+सु' इति स्थिते रेफस्य विसर्गे प्राप्ते 'रोः सुपि' इति नियमाद् विसर्गस्य निषेधे, षकारे, **'चिकीर्षु' इति रूपम्भवति।**

**विशेषार्थः** – 'दमु उपशमे' इति धातोः 'दमेर्डोस्' इत्युणादिसूत्रेण डोस् प्रत्ययो भवति।

**साधनिका** : – दोः (भुजा) 'दमु उपशमे' इति धातोः 'दमेर्डोस्' इत्युणादिसूत्रेण डोस्–प्रत्ययेऽनुबन्धलोपे, 'दम्+ओस्' इति स्थिते डित्त्वात् टिलोपे, सकारस्य षकारे, 'दोष्' इत्यस्मात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, हल्ङ्यादिना सुलोपे, 'दोष्' इत्यत्र सकारस्य स्थाने जातस्य षकारस्य असिद्धत्वात् सकारस्य रुत्वविसर्गे, **'दोः' इति रूपम्भवति।**

**साधनिका : – दोष्णः** – 'दोष्' इत्यस्य 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, शस्प्रत्ययेऽनुबन्धलोपे, 'दोष्+अस्' इति स्थिते, 'पद्दन्नो...' इति 'दोष्' इत्यस्य स्थाने दोषन् आदेशे 'दोषन्+अस्' इत्यत्र 'अल्लोपोऽनः' इति षकारोत्तरवर्तिनः अकारस्य लोपे, नकारस्य स्थाने णकारे, सकारस्य रूत्वे विसर्गे **'दोष्णः' इति रूपं सिद्धम्।** 'पद्दन्नो...' इति विकल्पाभावात् **'दोषः' इति रूपम्भवति।**

**दोष् – इति शब्दस्य रूपाणि भवन्ति। यथा–**

| | | |
|---|---|---|
| दोः | दोषौ | दोषः। |
| दोषम् | दोषौ | दोष्णः, दोषः। |
| दोष्णा, दोषा | दोषभ्याम्, दोर्भ्याम् | दोषभिः, दोर्भिः। |
| दोष्णे, दोषे | दोषभ्याम्, दोर्भ्याम् | दोषभ्यः, दोर्भ्यः। |
| दोष्णः, दोषः | दोषभ्याम्, दोर्भ्याम् | दोषभ्यः, दोर्भ्यः। |
| दोष्णः, दोषः | दोष्णोः, दोषोः | दोष्णाम्, दोषाम्। |
| दोष्णि, दोषणि, दोषि | दोष्णोः, दोषोः | दोष्सु, दोःषु, दोष्षु। |
| हे दोः! | हे दोषौ! | हे दोषः! |

**साधनिका : – विविट्-विविड्** (प्रवेश करने का इच्छुक) **वेष्टुमिच्छति इति विग्रहे 'विश् प्रवेशने'** इति धातोः सन्प्रत्यये, उपधागुणे प्राप्ते, 'हलन्ताच्च' इति सनः किद्वद्भावात् गुणे निषेधे, 'सन्यङो' इति द्वित्वे, अभ्यासादिकार्ये कृते 'विविश्+स' इति स्थिते 'अत्र आदेश प्रत्ययोः ययोः' शकारस्य षत्वे, 'विविष्+स' इति स्थिते 'षढोः कः सि' इति षकारस्य स्थाने ककारे, 'विविक्+स' इति स्थिते सकारस्य स्थाने षकारे कृतेऽत्र ककारषकारयोः योगे क्षकारे, 'विविक्ष' इत्यत्र धातुसंज्ञायाम्, 'क्विप्प्रत्ययेऽनुबन्धलोपे, 'अतो लोपः' अकारस्य लोपे, 'विविक्ष्' इति स्थिते प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, हल्ङ्यादिना सुलोपे, 'संयोगान्तस्य लोपः' इति षलोपे, 'विविक्' इत्यत्र षकारस्य स्थाने जातस्य ककारस्य असिद्धत्वात् 'व्रश्चभ्रस्जसृजमृज...' इति सूत्रेण शकारस्य स्थाने षकारे, 'झलो जशोऽन्ते' इति जश्त्वेन डकारे, 'वाऽवसाने' हकारे, 'विविट्' इति रूपम्भवति। चर्त्वस्य विकल्पाभावात् **'विविड्' इति रूपम्भवति।**

**साधनिका : – तट्-तड्** (लोभी) 'तक्षू तनूकरणे' धातोरनुबन्धलोपे, क्विप्प्रत्यये, अनुबन्धलोपे, 'तक्ष्' इति स्थिते प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, हल्ङ्यादिना सुलोपे, 'तक्ष्' इति स्थिते 'स्कोः संयोगाद्योरन्ते च' इति ककारस्य लोपे, 'तष्' इति स्थिते 'झलां जशोऽन्ते' षकारस्य डकारे, 'वाऽवसाने' विकल्पेन डकारस्य **टकारे 'तट्' इति रूपम्भवति।** चर्त्वस्य विकल्पे **'तड्' इति रूपं भवति।**

**साधनिका : – गोरट्-गोरड्** (गायो का रक्षक) **गां रक्षति** इति विग्रहे गो उपपदाद् 'रक्ष पालने' धातोः 'कर्मण्यण्' इति अण्प्रत्यये प्राप्ते, क्विप्प्रत्ययेऽनुबन्धलोपे, 'गोरक्ष्' इति स्थिते प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, हल्ङ्यादिना लोपे, 'स्कोः संयोगद्योरन्ते च' इति ककारस्य लोपे, जश्त्वेन षकारस्य डकारे, विकल्पेन चर्त्वेन टकारे, **'गोरट्' इति रूपम्भवति।** चर्त्वस्य विकल्पाभावात् **'गोरड्' इति रूपम्भवति।**

**'गोरक्ष्' इति शब्दस्य रूपाणि भवन्ति। यथा–**

| | | | | | |
|---|---|---|---|---|---|
| गोरट्–गोरड् | गोरक्षौ | गोरक्षः। | गोरक्षः | गोरड्भ्याम् | गोरड्भ्यः। |
| गोरक्षम् | गोरक्षौ | गोरक्षः। | गोरक्षः | गोरक्षोः | गोरक्षाम्। |
| गोरक्षा | गोरड्भ्याम् | गोरड्भिः। | गोरक्षि | गोरक्षोः | गोरट्सु–गोरट्त्सु। |
| गोरक्षे | गोरड्भ्याम् | गोरड्भ्यः। | हे गोरट्, गोरड्! | हे गोरक्षौ! | हे गोरक्षः! |

**विशेषार्थः** – संयोगादिलोपः, लत्वकार्यं तथा णत्वकार्यम् एतेषु त्रिषु कार्येषु स्थानिवद्भावो निषेधो न भवति।

**साधनिका : – तक्-तग्** – 'तक्ष् त्वचने' इति धातोः 'हेतुमति च' इति णिच् प्रत्यये, अनुबन्धलोपे, 'तक्ष्+इ' इत्यत्र 'सनाद्यन्ता धातवः' इति धातुसंज्ञायाम्, क्विप्प्रत्यये, क्विपः आर्धधातुकत्वात् 'णेरनिटि' इत्यनेन इकारस्य लोपे, क्विपोऽनुबन्धलोपे, 'तक्ष्' इति स्थिते प्रातिपदकसंज्ञायाम्, 'स्वौजस...' सु प्रत्यये 'तक्ष्+सु' इत्यत्र 'हल्ङ्यादिना सुलोपे', 'स्कोः संयोगाद्योरन्ते च' इति ककारस्य लोपे प्राप्ते, 'अचः परस्मिन् पूर्वविधौ' इति णिलोपस्य स्थानिवद्भावे, 'तस्य दोषः संयोगादिलोपलत्वणत्वेषु' इति वार्तिकेन स्थानिवद्भावे निषेधो न भवति, अतः 'संयोगान्तस्य लोपः' इति षकारस्य लोपे, 'तक्' इत्यत्र जश्त्वेन ककास्य गकारे, 'वाऽवसाने' विकल्पेन चर्त्वेन गकारस्य स्थाने ककारे, **'तक्' इति रूपम्भवति।** चर्त्वस्य विकल्पाभावात् **'तग्' इति रूपम्भवति।** एवं गां रक्षतीति विग्रहे **'गोरक्-गोरड्' रूपम्भवति।**

**साधनिका : – पिपक्-पिपग्** (पकाने को इच्छुक) **पक्तुमिच्छति इति विग्रहे 'डुपचष् पाके'** इति धातोः 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सूत्रेण सन् प्रत्यये, नकारस्य अनुबन्ध लोपे, 'पच्+स' इति स्थिते 'सन्यङोः' इति द्वित्वे, अभ्यासादिकार्ये कृते, 'पपच्+स' इति स्थिते 'सन्यतः' इति अभ्यासस्य अकारस्य स्थाने

इकारे कृते, 'पिपच्+स' इत्यत्र 'चो: कु:' इत्यनेन धातो: चकारस्य ककारे, 'आदेशप्रत्यययो:' इति सकारस्य षकारे, ककारषकारयो: योगे क्षकारे 'विपक्ष' इति स्थिते 'सनाद्यन्ता: धातव:' इति धातुसंज्ञायाम्, 'अतो लोप:' अकारस्य लोपे, 'पिपक्ष्' इत्यत्र कृदन्तत्वादत्र 'कृत्तद्धितसमासाश्च' प्रातिपदकसंज्ञायाम्, 'स्वौजसमौट्...' सुप्रत्यये, 'पिपिक्ष्+सु' हल्ङ्याादिना सुलोपे, 'स्को: संयोगाद्योरन्ते च' इति ककारस्य लोपे प्राप्ते, 'अच: परस्मिन् पूर्वविधौ' इति णिलोपस्य स्थानिवद्भावे, 'पूर्वत्रासिद्धे न स्थानिवत्' इति वार्तिकेन स्थानिवद्भावनिषेधे प्राप्ते, 'तस्य दोष: संयोगादिलोपलत्वणत्वेषु' इति वार्तिकानुसारं स्थानिवद्भावस्य निषेधो न भवति, अत: संयोगसंज्ञायाम्, 'संयोगान्तस्य लोप:' इति षकारस्य लोपे, 'पिपक्' इति स्थिते 'झलां जशोऽन्ते' ककारस्य जश्त्वेन गकारे, अवसानसंज्ञायां, 'वाऽवसाने' इति गकारस्य विकल्पेन ककारे, **'पिपक्' इति रूपम्भवति।** चर्त्वस्य विकल्पाभावात् **'पिपग्' इति रूपं भवति।** पिपक् शब्दवदेव वच् तथा दह् धातो: **'विवक्' तथा 'दिधक्' इति रूपाणि भवन्ति।**

**॥ इति षकारान्तप्रकरणम् ॥**

*

**॥ अथ सकारान्तप्रकरणम् ॥**

**'पिस् गतौ' सुष्ठु पेसतीति - सुपी:, सुपिसौ, सुपिस:। सुपिसा, सुपीर्भ्याम्। सुपी:षु - सुपीष्षु। एवं सुतू:। 'तुस् खण्डते'। विद्वान्, विद्वासौ, विद्वांस:। हे विद्वन्। विद्वांसम्, विद्वांसौ।**

**साधनिका : - सुपी:** (सुगन्ता) **सुष्ठु पेसति इति विग्रहे** सु उपसर्गपूर्वात् 'पिस गतौ' इति धातो: क्विप्प्रत्ययेऽनुबन्धलोपे, 'सुपिस्' इति स्थिते, 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, 'स्वौजसमौट्...' सुप्रत्यये, 'सुपिस्+सु' हल्ङ्याादिना सुलोपे, सकारस्य रुत्वेऽनुबन्धलोपे, 'सुपिर्' इति स्थिते 'र्वोरुपधाया दीर्घ इक:' इति इकारस्य दीर्घे ईकारे, 'सुपीर्' इति स्थिते रेफस्य विसर्गे, '**सुपी:**' इति रूपम्भवति। एवं सुष्ठु तोसति इति (सु उपसर्गपूर्वात् तुस खण्डने) इति धातो: '**सुतू:**' रूपं भवति।

**सुतुस् - इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | | | | |
|---|---|---|---|---|---|
| सुतू: | सुतुसौ | सुतुस:। | सुतुस: | सुतूर्भ्याम् | सुतूर्भ्य:। |
| सुतुसम् | सुतुसौ | सुतुस:। | सुतुस: | सुतुसो: | सुतुसाम्। |
| सुतुसा | सुतूर्भ्याम् | सुतूर्भि:। | सुतुसि | सुतुसो: | सुतू:षु-सुतूष्षु। |
| सुतुसे | सुतूर्भ्याम् | सुतूर्भ्य:। | हे सुतू:! | हे सुतुसौ! | हे सुतुस:! |

**साधनिका : - विद्वान्** (ज्ञाता) **'विद ज्ञाने'** इति धातोर्लट् लकारे, 'लट: शतृशानचावप्रथमासमानाधिकरणे' इति लट: शतृ आदेश:, तस्य स्थाने 'विदे: शतुर्वसु:' इति वसु आदेशे, शित्त्वात् सार्वधातुकसंज्ञायाम्, शप् तल्लुकि, 'विद्+वस्' इति स्थिते 'पुगन्तलधुपधस्य च' इति इकारस्य गुणे प्राप्ते, 'सार्वधातुकमपित्' इति लघूपध-गुणनिषेधे, 'विद्वस्' इत्यस्मात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायाम्, सु-प्रत्ययेऽनुबन्धलोपे, 'विद्वस्+स्' इति स्थिते 'उगिदचां सर्वनामस्थानेऽधातो:' इति नुमागमेऽनुबन्धलोपे, 'विद्वन्स्+स्' इत्यत्र 'सान्महत: संयोगस्य' इति अकारस्य दीर्घे, 'विद्वान्स्+स्' इत्यत्र 'हल्ङ्याप्...' इत्यनेन सकारस्य लोपे, 'संयोगान्तस्य लोप:' इति संयोगसंज्ञकसकारस्य लोपे, 'नलोप: प्रातिपदिकान्तस्य' इति सूत्रेण नलोपे प्राप्ते, सकारलोपस्य असिद्धत्वान्नलोपो न भवति **'विद्वान्' इति रूपम्भवति।** तथा प्रथमाद्विवचनविवक्षायां **विद्वांसौ** प्रथमाबहुवचनविवक्षायां **विद्वांस:,** सम्बोधनैकवचने **हे विद्वन्।**

**(४३५) -वसोः सम्प्रसारणम्। ६।४।१३१॥**

**वस्वन्तस्य भस्य सम्प्रसारणं स्यात्। पूर्वरूपम्, षत्वम्। विदुषः। विदुषा। 'वसुस्रंसु...' (सू. ३३४) इति दत्वम्। विद्वद्भ्याम् इत्यादि। सेदिवान्, सेदिवांसौ, सेदिवांसः। सेदिवांसम्। अन्तरेङ्गोऽपीडागमः सम्प्रसारणविषये न प्रवर्तते 'अकृतव्यूहाः...' (प. ५७) इति परिभाषया। सेदुषः। सेदुषा, सेदिवद्भ्याम् इत्यादि। 'सान्तमहतः-' (सू. ३१७) इत्यत्र सान्तसंयोगोऽपि प्रातिपदिकस्यैव गृह्यते, न तु धातोः। महच्छब्दसाहचर्यात्। सुष्ठु हिनस्तीति-सुहिन्, सुहिंसौ, सुहिंसः। सुहिन्भ्याम् इत्यादि। सुहिन्त्सु-सुहिन्सु। ध्वत्-ध्वद्। ध्वसौ। ध्वसः। ध्वद्भ्याम्। एवं स्रत्।**

---

४३५ - **पदच्छेदः** - वसोः, सम्प्रसारणम्।

**अनुवृत्तिः** - अङ्गस्य, भस्य (अधिकारः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - वसुप्रत्ययान्तस्य भसंज्ञकस्य सम्प्रसारणं भवति।

**साधनिका : - विदुषः 'विद्वस्'** इत्यस्मात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायाम्, 'स्वौजस...' शस्प्रत्ययेऽनुबन्धलोपे, 'विद्वस्+अस्' इति स्थिते 'यचि भम्' इत्यनेन भसंज्ञायाम्, 'वसोः सम्प्रसारणम्' इति वकारस्य सम्प्रसारणे 'विद्उअस्+अस्' इति स्थिते 'सम्प्रसारणाच्च' इत्यनेन उकार-अकारयोः स्थाने उकारे सम्प्रसारणे कृते, 'विदुस्+अस्' इति स्थिते 'आदेशप्रत्ययोः' इति सकारस्य षकारे, 'विदुष्+अस्' सकारस्य रूत्त्वविसर्गे **'विदुषः' इति रूपम्भवति।**

**साधनिका : - विद्वद्भ्याम् - 'विद्वस्'** इत्यस्मात् प्रातिपदिकसंज्ञायाम्, भ्याम्प्रत्यये, 'वसुस्रंसुध्वस्वनडुहां दः' इति सकारस्य स्थाने दकारे, **'विद्वद्भ्याम्' इति रूपम्भवति।**

**साधनिका : - सेदिवान्** (गया हुआ) **'षदलृ विशरणगत्यवसादनेषु'** इति धातोः 'धात्वादेः षः सः' इति षकारस्य स्थाने सकारे, धातोरनुबन्धलोपे, लिट्लकारे, 'सद्+लिट्' इति 'भाषायां सदवसश्रुवः' इति क्वसु प्रत्ययेऽनुबन्धलोपे, 'सद्+वस्' इति स्थिते 'वस्वेकाजाद्घसाम्' इति इडागमेऽनुबन्धलोपे, 'सद्+इ+वस्' इत्यत्र 'लिटि धातोरनभ्यासस्य' इति धातोः द्वित्वे 'सद्+सद्+वस्' इत्यत्र अभ्याससंज्ञायाम्, 'हलादि शेषः' सकारस्य लोपे, 'अत एकहल्मध्येऽनादेशादेर्लिटि' इति सूत्रेण एत्वे अभ्यासलोपे च। 'सेद्+इ+वस्' इत्यत्र 'सेदिवस्' इत्यस्मात् 'कृत्तद्धितसमासाश्च' प्रातिपदिकसंज्ञायां सुप्रत्यये, 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमेऽनुबन्धलोपे, 'सेदिवन्स्+सु' इत्यत्र 'सान्महतः संयोगस्य' इति दीर्घे, हल्ङ्याादिना सुलोपे, 'संयोगान्तस्य लोपः' इति सकारस्य लोपे 'नलोपः प्रातिपदिकान्तस्य' न लोपे प्राप्ते, सकारलोपस्य-असिद्धत्वात् नलोपो न भवति अतः **'सेदिवान्' इति रूपम्भवति।**

**विशेषार्थः** - **''अकृतव्यूहाः पाणिनीयाः''** ऊह्यते तर्क्यते इति ऊहः, विशिष्टः ऊहः व्यूहः (शास्त्रप्रवृत्तिरूपतर्कः) न कृतो व्यूहो यैः पाणिनीयैः छात्रैः ते अकृतव्यूहाः पाणिनीयाः इति परिभाषानुसारं 'सेदिवस्+अस्' इति स्थिते 'वसोः सम्प्रसारणम्' इति वकारस्य उत्वे, पूर्वरूपे, इकारस्य यणि कृते 'सेद्युस्+अस्' इत्यत्र षत्वे तथा रुत्त्वविसर्गे कृते 'सेद्युषः' इति रूपं स्यात्, अतः भविष्यता सम्प्रसारणेन वलादित्वस्य तु विनाशोन्मुखत्वात् 'वस्वेकाजाद्घसाम्' इति इडागमो न भवतीत्यर्थः।

**सेदिवस् - इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | | | | |
|---|---|---|---|---|---|
| सेदिवान् | सेदिवांसौ | सेदिवांसः। | सेदुषः | सेदिवद्भ्याम् | सेदिवद्भ्यः। |
| सेदिवांसम् | सेदिवांसौ | सेदुषः। | सेदुषः | सेदुषोः | सेदुषाम्। |
| सेदुषा | सेदिवद्भ्याम् | सेदिवद्भिः। | सेदुषि | सेदुषोः | सेदिवत्सु। |
| सेदुषे | सेदिवद्भ्याम् | सेदिवद्भ्यः। | हे सेदिवन्! | हे सेदिवांसौ! | हे सेदिवांसः! |

**विशेषार्थः** - **'सान्महतः संयोगस्य'** सूत्रेऽस्मिन् महच्छब्दसाहचर्यात् सान्तसंयोगस्य शब्दस्य प्रातिपदिकस्यैव ग्रहणम्भवति। तेन धातोः दीर्घो न भवति।

**साधनिका : - सुहिन्** (अच्छा हिंसक) **'सुष्ठु हिनस्ति'** इति विग्रहे सु उपसर्गपूर्वकात् 'हिसि हिंसायाम्' धातोः इकारस्यानुबन्धलोपे, इदित्त्वात् 'इदितोऽनुम् धातोः' इति नुमागमे, क्विप्प्रत्ययेऽनुबन्धलोपे, 'सुहिन्स्' इति स्थिते प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, हल्ङ्यादिना सुलोपे, 'संयोगान्तस्य लोपः' इति सकारस्य लोपे कृते **'सुहिन्' इति रूपम्भवति।**

**साधनिका : - ध्वत्-ध्वद्** (नाशक) **'ध्वंसु अधः पतने'** इति धातोः क्विप्प्रत्यये, अनुबन्धलोपे, 'अनिदितां हल उपधायाः क्ङिति' इति नलोपे 'ध्वस्' इति स्थिते प्रातिपदिकसंज्ञायां, सुप्रत्यये, हल्ङ्यादिना सुलोपे, 'ध्वस्' इत्यत्र सकारस्य रूत्वे प्राप्ते 'वसुस्रंसुध्वंस्वनडुहां दः' इति सकारस्य स्थाने दकारे, अवसानसंज्ञायाम्, 'वाऽवसाने' इति दकारस्य विकल्पेन तकारे **'ध्वत्' इति रूपम्भवति। चर्त्वाभावे 'ध्वद्' इति रूपम्भवति।** एवं 'स्रंसु अवस्रंसने' धातोः **स्रत्-स्रद् इति रूपम्भवति।**

| | **ध्वस् - इति शब्दरूपाणि** | | | **स्रस् - इति शब्दरूपाणि** | |
|---|---|---|---|---|---|
| ध्वत्-ध्वद् | ध्वसौ | ध्वसः। | स्रत्-स्रद् | स्रसौ | स्रसः। |
| ध्वसम् | ध्वसौ | ध्वसः। | स्रसम् | स्रसौ | स्रसः। |
| ध्वसा | ध्वद्भ्याम् | ध्वद्भिः। | स्रसा | स्रद्भ्याम् | स्रद्भिः। |
| ध्वसे | ध्वद्भ्याम् | ध्वद्भ्यः। | स्रसे | स्रद्भ्याम् | स्रद्भ्यः। |
| ध्वसः | ध्वद्भ्याम् | ध्वद्भ्यः। | स्रसः | स्रद्भ्याम् | स्रद्भ्यः। |
| ध्वसः | ध्वसोः | ध्वसाम्। | स्रसः | स्रसोः | स्रसाम्। |
| ध्वसि | ध्वसोः | ध्वत्सु। | स्रसि | स्रसोः | स्रत्सु। |
| हे ध्वत्-ध्वद्! | हे ध्वसौ! | हे ध्वसः! | हे स्रत्, हे स्रद्! | हे स्रसौ! | हे स्रसः! |

**(४३६) -पुंसोऽसुङ्। ७।१।९॥**

**सर्वनामस्थाने विवक्षिते पुंसोऽसुङ् स्यात्। असुङ् उकार उच्चारणार्थः। 'बहुपुंसी' इत्यत्र 'उगितश्च' (सू. ४५५) इति ङीबर्थं कृतेन पूञो डुम्सुन इति प्रत्ययस्योपयोगित्त्वेनैव नुम्सिद्धेः। पुमान्। हे पुमन्। पुमांसौ। पुमासः। पुंसः। पुंसा, पुम्भ्याम्, पुम्भिः इत्यादि पुंसि। पुंसु। 'ऋदुशन...' (सू. २७६) इत्यनङ् - उशना, उशनसौ, उशनसः। 'अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः' (वा. ५०३७)। हे उशनन् - हे उशन। हे उशनः। उशनोभ्यामित्यादि। अनेहा, अनेहसौ, अनेहसः। हे अनेहः। अनेहोभ्यामित्यादि। वेधाः, वेधसौ, वेधसः। हे वेधः। वेधोभ्यामित्यादि। अधातोरित्युक्तेर्न दीर्घः। सुष्ठु वस्ते, सुवः, सुवसौ, सुवसः। पिण्डं ग्रसते - पिण्डग्रः। पिण्डग्लः। 'ग्रसु ग्लसु अदने'।**

---

४३६ - **पदच्छेदः** - पुंसः, असुङ्।

**अनुवृत्तिः** - सर्वनामस्थाने।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सर्वनामस्थानसंज्ञके प्रत्यये परे पुन्स् इति शब्दस्य असुङ् इत्यादेशो भवति। 'असुङ्' इत्यत्र उकार उच्चारणार्थो वर्तते।

**साधनिका : - बहुपुंसी** (बहुपुरुष युक्त नगरी) **'बहवः पुमांसः सन्ति यस्यां नगर्यां सा'** इति विग्रहे बहुव्रीहिसमासे, सुब्लुकि, 'निमित्तापाये नैमित्तिकस्याप्यायः' इति नियमाद् असुङ् निवृत्तौ 'बहुपुंस्' शब्दात् प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, 'बहुपुंस्+सु' इति स्थिते 'उगितश्च' इति ङीप्प्रत्येऽनुबन्धलोपे, हल्ङ्यादिना सुलोपे, **'बहुपुंसी' इति रूपं भवति।**

**साधनिका : - पुमान्** (पुरूष) **'पूञ् पवने'** इति धातोः 'पुञो डुम्सुन्' इत्युणादिसूत्रेण डुम्सुन्प्रत्ययेऽनुबन्धलोपे, 'डित्त्वसामर्थ्यादभस्यापि टेर्लोपः' इति टिलोपे, 'पुम्स्' शब्दात् प्रातिपदिकत्वात् सुप्रत्यये 'पुम्स्+सु' इति स्थिते 'पुंसोऽसुङ्' इति सकारस्य स्थाने असुङ् आदेशेऽनुबन्धलोपे, 'पुमस्+सु' इत्यत्र 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमेऽनुबन्धलोपे, 'सान्महतः संयोगस्य' इत्यकारस्य दीर्घे, हल्ङ्यादिना सुलोपे, 'पुमान्स्' इत्यत्र 'संयोगान्तस्य लोपः' इति सकारस्य लोपे, 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे प्राप्ते, सकारस्य असिद्धत्वात् नलोपो न भवति, अतः 'पुमान्' इति रूपम्भवति।

**वार्तिकार्थः** - उशनस् इति शब्दस्य अनङादेशः नलोपश्च विकल्पेन भवति, सम्बुद्धिसंज्ञके सुप्रत्यये परे स्यात्तदा।

**साधनिका : - हे उशनन्, हे उशन, हे उशनः** (हे शुक्राचार्य) **'उशनस्'** शब्दात् प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, सुम्बुद्धिसंज्ञायाम्, 'अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः' इति वार्तिकेन सकारस्य स्थाने अनङादेशेऽनुबन्धलोपे, पररूपे, 'उशनन्+सु' इत्यत्र 'हल्ङ्याप्...' सुलोपे **'हे उशनन्' इति रूपम्भवति। 'उशनन्+सु'** इति स्थिते अत्र 'हल्ङ्या...' इति सुलोपे, अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः इति वार्तिकेन विकल्पेन नकारस्य लोपे **'हे उशन' इति रूपम्भवति। 'उशनस्+सु'** इति हल्ङ्यादिना सुलोपे, सस्य रुत्त्वविसर्गे कृते **'हे उशनः' इति रूपम्भवति।**

**उशनस् - इति शब्दस्य रूपाणि भवन्ति। यथा-**

| | | |
|---|---|---|
| उशना | उशनसौ | उशनसः। |
| उशनसम् | उशनसौ | उशनसः। |
| उशनसा | उशनोभ्याम् | उशनोभिः। |
| उशनसे | उशनोभ्याम् | उशनोभ्यः। |
| उशनसः | उशनोभ्याम् | उशनोभ्यः। |
| उशनसः | उशनसोः | उशनसाम्। |
| उशनसि | उशनसोः | उशनस्सु। |
| हे उशनन्, उशन, उशनः! | हे उशनसौ! | हे उशनसः! |

**साधनिका : - अनेहा** (कालः) **नाहन्ति नागच्छति नाहन्यते इति विग्रहे नञि उपपदे 'हन हिंसागत्यो' इति धातोः** 'नञि हन एहु च' इत्युणादिसूत्रेण धातो स्थाने एहादेशे, 'न+एह्' इत्यत्र असुन्प्रत्ययेऽनुबन्धलोपे, 'तस्मान्नुडचि' इति नुडागमेऽनुबन्धलोपे, नलोपो नञः, इति नलोपे, 'अनेहस्' इति शब्दात् प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, 'अनेहस्+सु' इत्यत्र 'ऋदुशनस्पुरुदेशोऽनेहसां च' इति सूत्रेण सकारस्य स्थाने अनङादेशेऽनुबन्धलोपे, 'अनेह+अन्+सु' इति स्थिते पररूपे, 'सर्वनामस्थाने चासम्बुद्धौ' इति उपधादीर्घे, 'अनेहान्+सु' इत्यत्र हल्ङ्यादिना सुलोपे, 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे **'अनेहा' इति रूपम्भवति।**

**साधनिका : - वेधाः** (ब्रह्मा) **विदधाति इति विग्रहे 'डुधाञ्' धारणपोषणयोः।** इति धातोः 'विधानो वेध च' इत्युणादिसूत्रेण धातोः स्थाने वेधादेशे, अनुन्प्रत्ययेऽनुबन्धलोपे, 'वेधस्' इत्यस्मात् प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, 'अत्वसन्तस्य चाऽधातोः' इति दीर्घे, हल्ङ्यादिना सुलोपे, सकारस्य रूत्त्वविसर्गे **'वेधाः' इति रूपम्भवति।**

**विशेषार्थः** - 'अत्वसन्तस्य चाऽधातोः' इति सूत्रे 'अधातोः' इति ग्रहणात् असन्तस्य धातोः दीर्घो न भवति। यथा-

**साधनिका : - सुवः - 'सुष्ठु वसते' इति विग्रहे सु उपसर्गपूर्वकात् 'वस निवासे' धातोः** क्विप्प्रत्येऽनुबन्धलोपे, 'सुवस्' इत्यस्मात् प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, 'सुवस्+सु' इति स्थिते, 'अत्वसन्तस्य चाऽधातोः' इति सकारान्तधातुत्वात् दीर्घो न भवति, 'हल्ङ्याब्भ्यो...' सुलोपे, सकारस्य रूत्त्वे विसर्गे, **'सुवः' इति रूपम्भवति।** एवं हि 'पिण्डं ग्रसते' इति विग्रहे पिण्डोपपदात् 'ग्रसु अदने' धातोः 'पिण्डग्रः' तथा 'पिण्डं ग्लसते' इति विग्रहे पिण्डोपपादात् 'ग्लुसु अदने' इति धातोः **'पिण्डग्लः' इति रूपं भवति।**

**(४३७) -अदस औ सुलोपश्च। ७।२।१०७॥**

**अदस औकारोऽन्तादेशः स्यात्सौ परे सुलोपश्च। 'तदोः सः सौ...' (सू. ३८१) इति दस्य सः। असौ। 'औत्त्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्त्वं च' (वा. ४४८२) प्रतिषेधसंनियोगशिष्टमुत्त्वं तदभावे न प्रवर्तते। असकौ, असुकः। त्यदाद्यत्वं, वृद्धिः, 'अदसोऽसेः...' (सू. ४१९) इति मत्वोत्वे। अमू। 'जसः शी' (सू. २१४)। 'आद्गुणः' (सू. ६९)।**

---

४३७ - **पदच्छेदः** - अदसः, औ, सुलोपः, च।

**अनुवृत्तिः** - सौ (तदोः सः सावनन्त्ययोः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सु प्रत्यये परे सति 'अदस्' इति शब्दस्य औकारः अन्तादेशो भवति, तथा सुप्रत्ययस्य लोपोऽपि भवति।

**साधनिका : - असौ - 'अदस्'** इति शब्दात् प्रातिपदिकत्वात् सुप्रत्यये, 'अदस्+सु' इति स्थिते 'अदस औ सुलोपश्च' इति सकारस्य स्थाने औकारे तथा सुप्रत्ययस्य लोपे, 'अद+औ' इति स्थिते 'तदोः सः सावनन्त्ययोः' इति दकारस्य स्थाने सकारे, अकार-औकारयोः स्थाने औकारे वृद्धौ **'असौ' इति रूपम्भवति।**

**वार्तिकार्थः** - अकच्सहितस्य अदस्शब्दस्य औकारन्तादेशस्य विकल्पेन निषेधो भवति तथा सकारात्परस्य अकारस्य स्थाने उकारो भवति।

**साधनिका : - असकौ-असुकः 'अदस्'** इति शब्दात् 'अचोऽन्त्यादि टि' इति 'अस्' इत्यस्य टि-संज्ञायाम् 'अव्ययसर्वनाम्नामकच्प्राक् टेः इति टिभागस्य पूर्वे अकच् प्रत्ययेऽनुबन्धलोपे, 'अद्+अक्+अस्' इत्यत्र 'अदकस्' इत्यस्मात् प्रातिपदिकसंज्ञायाम्, सुप्रत्यये, 'औत्त्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च' इति वार्तिकस्य विकल्पाभावात् 'अदस औ' सुलोपश्च इति सूत्रेण सकारस्य स्थाने औकारे तथा सुलोपे, 'अदक+औ' इत्यत्र 'वृद्धिरेचि' इति अकार-औकारयोः स्थाने औकारे वृद्धौ **'असकौ' इति रूपम्भवति।** 'अदकस्+सु' इति स्थिते 'अदस औ सुलोपश्च' इति सूत्रेण सकारस्य स्थाने औकारे तथा सुलोपे प्राप्ते, 'औत्त्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च' इति वार्तिकेन औकारस्य विकल्पेन विकल्पेन निषेधः तथा दकारोत्तरवर्तिनः अकारस्य स्थाने उकारे, 'तदोः सः सावनन्त्ययोः' इति दकारस्य स्थाने सकारे, 'असुकस्+सु' इत्यत्र 'त्यदादीनामः' इति सकारस्य स्थाने अकारेऽन्तादेशे, पररूपे, सु इत्यस्यानुबन्धलोपे, 'असुक+सु' इति स्थिते सु इतिसकारोत्तखर्ति उकारलोपे सस्य रूत्त्वे विसर्गे **'असुकः' इति रूपम्भवति।**

**साधनिका : - अमू-अदस्** इति शब्दात् प्रातिपदिकत्त्वात् औ प्रत्यये, 'अ+औ' इति स्थिते 'त्यदादीनामः' इति सकास्य स्थाने ऊकारे, 'अतो गुणे' इति पररूपे, 'अद+औ' इत्यत्र 'वृद्धिरेचि' इति सूत्रेण अकार-औकारयोः स्थाने औकारे वृद्धौ, 'अदौ' इति स्थिते, 'अदसोऽसेर्दादु दो मः' इति सूत्रेण दकारस्य मकारे तथा औकारस्य स्थाने दीर्घे ऊकारे, **'अमू' इति रूपम्भवति।**

**(४३८) -एत ईद् बहुवचने। ८।२।८१॥**

**अदसो दात्परस्य एत ईत्स्याद्दस्य च मो बह्वर्थोक्तौ। अमी। 'पूर्वत्रासिद्धम्' ( सू. १२ ) इति विभक्तिकार्यं प्राक्, पश्चादुत्वमत्वे। अमुम्, अमू, अमून्। मुत्वे कृते घिसंज्ञायां नाभावः।**

---

४३८ - **पदच्छेदः** - एतः, ईत्, बहुवचने।

**अनुवृत्तिः** - अदसः, दात्, दः, मः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अदस् इति शब्दात् दकारात् परस्य एकारस्य स्थाने ईकारः तथा दकारस्य स्थाने मकारो भवति, यदि बहुवचने प्रत्यये परः स्यात्तदा।

**साधनिका : - अमी - 'अदस्'** इति सकारस्य स्थाने अकारे, 'अतो गुणे' पररूपे, 'अद+जस्' इति स्थिते 'जसः शी' इति जस् इत्यस्य स्थाने शी आदेशो, शकारस्य 'लशक्वत्तद्धिते' शकारस्य इत् संज्ञायाम्, लोपे, 'अद+ई' इति स्थिते 'आद्गुणः' इति अकार-ईकारयोः स्थाने एकारे गुणे, 'अदे' इति स्थिते 'एत ईद् बहुवचने' इत्यनेन एकारस्य स्थाने ईकारे तथा दकारस्य स्थाने मकारे **'अमी' इति रूपं सिद्धम्।**

**साधनिका : - अमुम् - 'अदस्'** इति शब्दात् प्रातिपदिकत्वात् अम् प्रत्यये, 'अदस्+अम्' इति स्थिते 'त्यदादीनामः' इति सकारस्य स्थाने अकारे, 'अतो गुणे' इति पररूपे, 'अद+अम्' इति स्थिते 'अमि पूर्वः' इति अकारे पूर्वरूपे, 'अदम्' इति स्थिते 'अदसोऽसेर्दादु दो मः' इति दकारस्य स्थाने मकारे तथा अकारस्य स्थाने उकारे, **'अमुम्' इति रूपम्भवति।**

**साधनिका : - अमून् - 'अदस्+शस्'** इति स्थिते शकारस्यानुबन्धलोपे, 'त्यदादीनामः इति सकारस्य अकारे, पररूपे, 'अद+अस्' इति स्थिते 'अकः सवर्णे दीर्घः' अकार-अकारयोः स्थाने आकारे सवर्णे दीर्घे, 'अदास्' इत्यत्र 'तस्माच्छसो नः पुंसि' इति सकारस्य स्थाने नकारे, 'अदसोऽसेर्दादु दो मः' इति दकारस्य स्थाने मकारे, तथा आकारस्य स्थाने अकारे, **'अमून्' इति रूपम्भवति।**

**(४३९) -न मु ने। ८।२।३॥**

**नाभावे कर्तव्ये कृते च मुभावो नासिद्धः स्यात्। अमुना। अमूभ्याम्, अमूभ्याम्, अमूभ्याम्। अमीभिः। अमुष्मै। अमीभ्यः अमीभ्यः। अमुष्मात्। अमुष्यः, अमुयोः, अमीषाम्। अमुष्मिन्, अमुयोः, अमीषु। इति सान्ताः।**

**इति हलन्तपुंल्लिङ्गप्रकरणम्-३**

---

४३९ - **पदच्छेदः** - न, मु, ने।

**अनुवृत्तिः** - असिद्धम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'आङो नाऽस्त्रियाम्' इति सूत्रेण विहिते नाभावे कर्तव्ये वा कृते 'अदसोऽसेर्दादु दो मः' इति कृतो मुभावः असिद्धो न भवति।

**साधनिका : – अमुना – 'अदस्'** इति शब्दात् प्रातिपदिकत्वात् टाप्रत्यये, 'अदस्+टा' 'त्यदादीनामः' सकारस्य स्थाने अकारे, पररूपे, 'अद+टा' इति स्थिते 'न मु ने' इति सूत्रेण मुत्वस्य असिद्धत्वस्य निषेधोऽतः **'अदसोऽसेर्दादु दो मः'** इति दकारस्य मकारे तथा अकारस्य उकारे, 'अमु+टा' इति स्थिते 'शेषो घ्यसखि' इत्यनेन घिसंज्ञायाम्, 'आङो नाऽस्त्रियाम्' इति टा इत्यस्य स्थाने ना आदेशे, **'अमुना' इति रूपम्भवति।**

**साधनिका : – अमूभ्याम्** 'अदस्+भ्याम्' इत्यत्र 'त्यदादीनामः' सकारस्य स्थानेऽकारे, पररूपे, 'अद+भ्याम्' इति स्थिते 'सुपि च' अकारस्य स्थाने आकारे, 'अदा+भ्याम्' इति स्थिते **'अदसोऽसेर्दादु दो मः'** इति दकारस्य स्थाने मकारे तथा आकारस्य स्थाने ऊकारे कृते **'अमूभ्याम्' इति रूपम्भवति।**

**साधनिका : – अमीभिः** 'अदस्' इति शब्दात् प्रातिपदिकत्वात् भिस्प्रत्यये, 'अदस्+भिस्' इति स्थिते 'त्यदादीनामः' सकारस्य स्थाने अकारे, पररूपे, 'अद+भिस्' इति स्थिते 'अतो भिस ऐस्' इति भिसः स्थाने ऐसादेशे प्राप्ते 'बहुवचने झल्येत्' अकारस्य एकारे, 'एत ईद् बहुवचने' दकारस्य स्थाने मकारे तथा एकारस्य स्थाने ईकारे, 'अमी+भिस्' इति स्थिते सस्य रुत्त्वविसर्गे कृते **'अमीभिः' इति रूपम्भवति।**

**साधनिका : – अमुष्मै** 'अदस्' शब्दात् प्रातिपदिकत्वात् ङे प्रत्यये 'अदस्+ङे' 'त्यदादीनामः' सकारस्य स्थाने अकारे, पररूपे, 'अद+ङे' इति 'सर्वनाम्नः स्मै' इति ङेइत्यस्य स्थाने स्मै आदेशे, 'अदसोऽसेर्दादु दो मः' दकारस्य मकारे तथा अकारस्य उकारे, 'आदेशप्रत्यययोः' सकारस्य षकारे 'अमुष्मै' इति रूपं सिद्धम्।

**साधनिका : – अमुष्मात्** 'अदस्+ङसि' इति स्थिते 'त्यदादीनामः' सकारस्य अकारे, पररूपे, 'ङसिङ्योः स्मात्स्मिनौ' इति ङसि स्थाने स्मात् आदेशे कृते, 'अद+स्मात्' इति स्थिते 'अदसोऽसेर्दादु दो मः' दकारस्य मकारे एवमकारस्य उकारे, षकारे, 'अमुष्मात्' इति रूपं सिद्धम्।

**साधनिका : – अमुयोः** 'अदस्+ओस्' इति स्थिते 'त्यदादीनामः' इति सकारस्य अकारे, पररूपे, 'अद+ओस्' इत्यत्र 'ओसि च' इति अकारस्य स्थाने एकारे, 'अदे+ओस्' इत्यत्र 'एचोऽयवायावः' इति एकारस्य स्थाने अयादेशे, 'अदसोऽसेर्दादु दो मः' दकारस्य मकारे तथा अकारस्य उकारे, सस्य रुत्वे विसर्गे कृते, **'अमुयोः' इति रूपम्भवति।**

**साधनिका : – अमीषाम्** – 'अदस्' इति शब्दात् प्रातिपदिकत्वात् आम्प्रत्यये, 'त्यदादीनामः' सकारस्य स्थाने अकारे, पररूपे, 'अद+आम्' इति स्थिते 'आमि सर्वनाम्नः सुट्' इति सुडागमेऽनुबन्धलोपे, 'अद+स्+आम्' इत्यत्र 'बहुवचने झल्येत्' इति अकारस्य स्थाने एकारे, 'एत ईद् बहुवचने' इति सूत्रेण एकारस्य स्थाने ईकारे तथा दकारस्य स्थाने मकारे, 'आदेशप्रत्यययोः' इति सकारस्य स्थाने षकारे, **'अमीषाम्' इति रूपम्भवति।**

**इति सकारान्तप्रकरणम्।**

**चकारान्तप्रकरणादारभ्य सकारान्तप्रकरणपर्यन्तस्य हलन्तपुँल्लिङ्गशब्दानां कानिचित् रूपाणि। तद्यथा–**

– **पयोमुच् – शब्दः। (मेघ)**

| | | |
|---|---|---|
| पयोमुक्–पयोमुग् | पयोमुचौ | पयोमुचः। |
| पयोमुचम् | पयोमुचौ | पयोमुचः। |
| पयोमुचा | पयोमुग्भ्याम् | पयोमुग्भिः। |
| पयोमुचे | पयोमुग्भ्याम् | पयोमुग्भ्यः। |
| पयोमुचः | पयोमुग्भ्याम् | पयोमुग्भ्यः। |
| पयोमुचः | पयोमुचोः | पयोमुचाम्। |
| पयोमुचि | पयोमुचोः | पयोमुक्षु। |
| हे पयोमुक्–हे पयोमुग्! | हे पयोमुचौ! | हे पयोमुचः! |

- **जाग्रत् - शब्दः। (जागता हुआ)**

| | | |
|---|---|---|
| जाग्रत्-जाग्रद् | जाग्रतौ | जाग्रतः। |
| जाग्रतम् | जाग्रतौ | जाग्रतः। |
| जाग्रता | जाग्रद्भ्याम् | जाग्रद्भिः। |
| जाग्रते | जाग्रद्भ्याम् | जाग्रद्भ्यः। |
| जाग्रतः | जाग्रद्भ्याम् | जाग्रद्भ्यः। |
| जाग्रतः | जाग्रतोः | जाग्रताम्। |
| जाग्रति | जाग्रतोः | जाग्रत्सु। |
| हे जाग्रत्-हे जाग्रद्! | हे जाग्रतौ! | हे जाग्रतः! |

- **ददत् - शब्दः। (देता हुआ)**

| | | |
|---|---|---|
| ददत्-ददत् | ददतौ | ददतः। |
| ददतम् | ददतौ | ददतः। |
| ददता | ददद्भ्याम् | दददि्भः। |
| ददते | ददद्भ्याम् | ददद्भ्यः। |
| ददतः | ददद्भ्याम् | ददद्भ्यः। |
| ददतः | ददतोः | ददताम्। |
| ददति | ददतोः | ददत्सु। |
| हे ददत्-हे ददद्! | हे ददतौ! | हे ददतः! |

- **विश् - शब्दः। (वैश्य)**

| | | |
|---|---|---|
| विट्-विड् | विशौ | विशः। |
| विशम् | विशौ | विशः। |
| विशा | विड्भ्याम् | विड्भिः। |
| विशे | विड्भ्याम् | विड्भ्यः। |
| विशः | विड्भ्याम् | विड्भ्यः। |
| विशः | विशोः | विशाम्। |
| विशि | विशोः | विक्षु। |
| हे विट्-हे विड्! | हे विशौ! | हे विशः! |

- **दधृष् - शब्दः। (प्रगल्भता)**

| | | |
|---|---|---|
| दधृक्-दधृग् | दधृषौ | दधृषः। |
| दधृषम् | दधृषौ | दधृषः। |
| दधृषा | दधृग्भ्याम् | दधृग्भिः। |
| दधृषे | दधृग्भ्याम् | दधृग्भ्यः। |
| दधृषः | दधृग्भ्याम् | दधृग्भ्यः। |
| दधृषः | दधृषोः | दधृषाम्। |
| दधृषि | दधृषोः | दधृक्षु। |
| हे दधृक्-हे दधृग्! | हे दधृषौ! | हे दधृषः! |

- **विद्वस् - शब्दः। ( पण्डित, ज्ञाता )**

| | | |
|---|---|---|
| विद्वान् | विद्वांसौ | विद्वांसः। |
| विद्वांसम् | विद्वांसौ | विदुषः। |
| विदुषा | विद्वद्भ्याम् | विद्वद्भिः। |
| विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः। |
| विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः। |
| विदुषः | विदुषोः | विदुषाम्। |
| विदुषि | विदुषोः | विद्वत्सु। |
| हे विद्वन्! | हे विद्वांसौ! | हे विद्वांसः |

- **वेधस् - शब्दः। ( ब्रह्मा )**

| | | |
|---|---|---|
| वेधाः | वेधसौ | वेधसः। |
| वेधसम् | वेधसौ | वेधसः। |
| वेधसा | वेधोभ्याम् | वेधोभिः। |
| वेधसे | वेधोभ्याम् | वेधोभ्यः। |
| वेधसः | वेधोभ्याम् | वेधोभ्यः। |
| वेधसः | वेधोभ्याम् | वेधसाम्। |
| वेधसि | वेधसोः | वेधःसु। |
| हे वेधः! | हे वेधसौ! | हे वेधसः! |

- **सुवस् - शब्दः।**

| | | |
|---|---|---|
| सुवः | सुवसौ | सुवसः। |
| सुवसम् | सुवसौ | सुवसः। |
| सुवसा | सुवोभ्याम् | सुवोभिः। |
| सुवसे | सुवोभ्याम् | सुवोभ्य। |
| सुवसः | सुवोभ्याम् | सुवोभ्यः। |
| सुवसः | सुवसोः | सुवसाम्। |
| सुवसि | सुवसोः | सुवःसु। |
| हे सुवः! | हे सुवसौ! | हे सुवसः! |

- **अदस् - शब्दः। ( वह )**

| | | |
|---|---|---|
| असौ | अमू | अमी। |
| अमुम् | अमू | अमून्। |
| अमुना | अमूभ्याम् | अमीभिः। |
| अमुष्मै | अमूभ्याम् | अमीभ्यः। |
| अमुष्मात् | अमूभ्याम् | अमीभ्यः। |
| अमुष्य | अमुयोः | अमीषाम्। |
| अमुष्मिन्! | अमुयोः! | अमीषु! |

## स्वाध्यायः

**१. प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) 'अनिदितां हल उपधायाः क्ङिति' इति सूत्रेण किं भवति?

(क) उपधादीर्घः (ख) अलोपः (ग) नलोपः (घ) दीर्घः

(२) 'प्रत्यङ्' इत्यत्र कोऽर्थः?

(क) उत्तरदिशा (ख) पूर्वदिशा (ग) दक्षिणदिशा (घ) पश्चिमदिशा

(३) 'तिरसस्तिर्यलोपे' इति सूत्रेण 'तिरस्' इत्यस्य स्थाने कः आदेशो भवति?

(क) तिरः (ख) तीरि (ग) तिरी (घ) तिरि

(४) 'क्रुङ्क्षु' इति कस्याः विभक्तेः रूपमस्ति?

(क) तृतीया (ख) पञ्चमी (ग) षष्ठी (घ) सप्तमी

(५) 'अत्वसन्तस्य चाधातोः' इत्यनेन सूत्रेण किं भवति?

(क) उपधादीर्घः (ख) उपधाह्रस्वः (ग) उपधालोपः (घ) एकमपि न

(६) 'धीमान्' इत्यत्र मूलशब्दः कः?

(क) धीमन् (ख) धीमत् (ग) धिमन् (घ) धिमत्

(७) शतृप्रत्ययान्तस्य 'भवत्' शब्दस्य प्रथमैकवचने किं रूपम्?

(क) भवत् (ख) भवात् (ग) भवन् (घ) भवान्

(८) 'जक्षत्' इति शब्दस्य कोऽर्थः?

(क) खाता हुआ (ख) जाता हुआ (ग) जागता हुआ (घ) सोता हुआ

(९) 'स्पृश् संस्पर्शने' धातोः 'स्पृशोऽनुदके...' इति सूत्रेण कः प्रत्ययो भवति?

(क) क्विप् (ख) क्विन् (ग) शतृ (घ) शानच्

(१०) वसु-प्रत्यायान्तस्य भसंज्ञकस्य सम्प्रसारणं केन सूत्रेण भवति?

(क) पुंसोऽसुङ् (ख) अदस औ सुलोपश्च।

(ग) र्वोरूपधाया दीर्घ इकः। (घ) वसोः सम्प्रसारणम्।

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) लुप्तनकारस्य भसंज्ञकस्य अञ्चतेः अकारस्य लोपः केन भवति?

(२) कयोः टिसंज्ञकस्य 'अद्रि' इत्यादेशो भवति?

(३) 'अदद्र्यच्' शब्दस्य षष्ठीविभक्तेः रूपाणि लिखन्तु।

(४) 'तिर्यङ्' इति शब्दस्य कोऽर्थः?

(५) 'नाभ्यस्ताच्छतुः' इति सूत्रस्यार्थः कः?

(६) डवतुप्रत्यायान्तस्य 'भवत्' शब्दस्य प्रथमाविभक्तेः रूपाणि लिखतु।

(७) 'पिपठीषु' इति रूपे सकारस्य स्थाने षकारः केन भवति?

(८) 'अनेहा' इत्यस्य कोऽर्थः?

(९) 'अमीषाम्' इति रूपे एकारस्य ईकारो केन सूत्रेण भवति?

**३. सविस्तरम् उत्तराणि लिखत।**

(१) 'अदसोऽद्रेः पृथङ्मुत्वं...' कारिकां पूर्णाङ्कृत्वा भावार्थं लिखतु।

(२) महत् - शब्दस्य सर्वाणि रूपाणि लिखन्तु।

(३) 'स्पृशोऽनुदके क्विन्' इति सूत्रं व्याख्यायताम्।

(४) 'औत्त्वप्रतिषेधः साकच्कस्य...' इति वार्तिकं सोदाहरणं चर्चयतु।

(५) अदस् - शब्दस्य सर्वाणि रूपाणि लिखन्तु।

**४. निम्नलिखितानि रूपाणि साधयत।**

(१) प्राचः।

(२) अमुमुईचः।

(३) तिर्यङ्।

(४) गोमान्।

(५) गुप्-गुब्।

(६) तादृक्-तादृग्

(७) पिपठीः।

(८) दोष्णः-दोषः।

(९) विद्वान्

(१०) अमीषाम्।

**५. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायत।**

(१) अत्वसन्तस्य चाधातोः।

(२) उभे अभ्यस्तम्।

(३) जक्षित्यादयः षट्।

(४) आ सर्वनाम्नः।

(५) वसोः सम्प्रसारणम्।

**६. रूपाणां मूलशब्दान् विज्ञाय समायोजनं करोतु।**

| **(प्रथमैकवचनरूपाणि)** | **(मूलशब्दाः)** |
|---|---|
| **(अ)** | **(ब)** |
| (१) धीमान् | पकारान्तशब्दः |
| (२) दोः | चकारान्तशब्दः |
| (३) सम्यङ् | तकारान्तशब्दः |
| (४) तादृक्-तादृग् | शकारान्तशब्दः |
| (५) गुप्-गुब् | षकारान्तशब्दः |

# ४

# हलन्तस्त्रीलिङ्गप्रकरणम्

**प्रस्तावना**

हलन्तपुँल्लिङ्गप्रकरणानन्तरम् इतः हलन्तस्त्रीलिङ्गानां शब्दानां प्रकरणं प्रारभ्यते। 'हयवरट्... लण्।' अनुसारं वर्णक्रमेण ये व्यञ्जनावर्णाः सन्ति, तेषां क्रमेण अर्थात् सूत्र क्रमाङ्कः ४४१ ''-नहो धः।'' ८/२/३४ इत्यतः आरभ्य सूत्रक्रमाङ्कः ४४३-अपो भि। ७/४/४८ इति पर्यन्तं रूपसिद्धिः, तथा च सूत्राणां सविस्तरं पठनं करिष्यामः।

**अथ हकारान्तप्रकरणम्**

**(४४०) नहो धः ८।२।३४॥**

**नहो हस्य धः स्याज्झलि पदान्ते च। उपानद्। उपानहौ। उपानहः। उपानद्भ्याम्। उपानत्सु। उत्पूर्वात् 'ष्णिह्-प्रीतौ' (धातुसंख्या १२०१) इत्यस्मात् 'ऋत्विग्...' (सू. ३७३) आदिना क्विन् निपातनाद्दलोपषत्वे। क्विन्नन्तत्वात्कुत्वेन हस्य घः, जश्त्वचर्त्वे, उष्णिक्-उष्णिग्। उष्णिहौ। उष्णिहः। उष्णिग्भ्याम्। उष्णिक्षु। इति हान्ताः।**

**अथ हकारान्तप्रकरणम्**

४४० - **पदच्छेदः** - नहः धः, 'नहः' षष्ठ्यन्तम्, 'धः प्रथमान्तम्, द्विपदमिदं सूत्रम्।'

**अनुवृत्तिः** - 'झलि' एवं 'अन्ते' इत्यस्य।

**सूत्रप्रकारः** - अतिदेशः।

**सरलार्थः** - 'झलि' परे पदान्ते च 'नह्' इत्यस्य हकारस्य स्थाने धकारादेशो भवति।

**साधनिका : - 'उपानत्-उपानद्' (पादत्राणम्, पादुकावाची स्त्री.)** पादम् उपनह्यते, पादम् उपनह्यति इति विग्रहे 'उप' उपसर्गपूर्वाद् 'णह' बन्धने इति धातोः 'णो नः' इति सूत्रेण णकारस्य स्थाने नकारे 'उप+नह्' इति स्थिते, 'क्विप् च' इति 'क्विप्' प्रत्यये उप+नह्+क्विप् इति स्थिते। 'लशक्वतिद्धते' इति सूत्रेण 'क्विप्' इत्यस्य ककारस्य 'इत्'-संज्ञायां, लोपे च। पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां, लोपे च, उप+नह् इति स्थिते। 'नहि-वृत्ति-वृषि...' इति सूत्रेण 'उप' इत्यस्य अकारस्य दीर्घे उपा+नह् इति स्थिते। प्रथमैकवचन विवक्षायां सुप्रत्यये उपा+नह्+सु इति स्थिते। 'हल्ङ्याप्...' इत्यनेन सकारस्य लोपे उपा+नह् इति स्थिते। 'हो ढः' इत्यनेन हकारस्य स्थाने ढकारे प्राप्ते, 'नहो धः' इत्यनेन हकारस्य धकारे उपा+नध् इति स्थिते, जश्त्वे, चर्त्वे च कृते 'उपानत्' चर्त्वाभावे 'उपानद्' इति रूपम्भवति।

**साधनिका : - 'उपानद्भ्याम्'** इत्यत्र 'उपानह्' उपानह प्रातिपदिकाभ्याम् एक शेषे कृते इत्यस्माद् शब्दात् 'कृत्तद्धित...' इति सूत्रेण प्रातिपदिकसंज्ञायाम्। प्रातिपदिकत्वात् 'भ्याम्' प्रत्यये उपानह्+भ्याम् इति स्थिते। 'नहो धः' इति नहःहकारस्य धकारे उपानध्+भ्याम् इति स्थिते। 'झलां जश् झशि' इत्यनेन धकारस्य जश्त्वेन दकारे 'उपानद्+भ्याम्' वर्णसम्मेलने 'उपानद्भ्याम्' इति रूपम्भवति। 'उपानह्' इति शब्दस्य रूपाणि भवन्ति यथा-

| | | |
|---|---|---|
| उपानत्-उपानद् | उपानहौ | उपानहः। |
| उपानहम् | उपानहौ | उपानहः। |
| उपानहा | उपानद्भ्याम् | उपानद्भिः। |

## अथ वकारान्तप्रकरणम्

द्यौः। दिवौ। दिवः। द्युभ्याम्। द्युषु इति वान्ताः।

## अथ रेफान्तप्रकरणम्

गीः। गिरौ। गिरः। एवं पूः। चतुरश्चतस्रादेशः। चतस्रः। चतसृणाम्। इति रेफान्ताः।

---

| | | |
|---|---|---|
| उपानहे | उपानद्भ्याम् | उपानद्भ्यः। |
| उपानहः | उपानद्भ्याम् | उपानद्भ्यः। |
| उपानहः | उपानहोः | उपानहाम्। |
| उपानहि | उपानहोः | उपानत्सु। |
| हे उपानत्-हे उपानद् | हे उपानहौ | हे उपानहः। |

**साधनिका :- उष्णिक्-उष्णिग् (एतन्नामकं** छन्दः **)** इत्यत्र 'उद्' उपसर्गपूर्वात् 'ष्णिह-प्रीतौ' इति धातोः 'धात्वादेः षः सः' इत्यनेन षकारस्य सकारे 'उद्+स्णिह्' इति स्थिते। 'ऋत्विग्...' इत्यनेन क्विन्, उपसर्गस्य दकारस्य निपातनाद् लोपे, धातोः सकारस्य षकारे उष्णिह् इति स्थिते। प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे च 'क्विन्प्रत्ययस्य कुः' इत्यनेन हकारस्य कुत्वेन घकारे, जश्त्वे, चर्त्वे च कृते 'उष्णिक्' चर्त्वाभावे 'उष्णिग्' इति सिद्धं भवति।

---

## अथ वकारान्तप्रकरणम्

**साधनिका :- द्यौः** (आकाशः) इत्यत्र 'दिव्' इत्यस्माद् 'अर्थवदधातु...' इत्यनेन प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे, 'दिव औत्' इति सूत्रेण वकारस्य स्थाने औकारे दिऔ+स् इति स्थिते। इकारस्य यणादेशे द्+य्+औ+स् इति स्थिते, सकारस्य रुत्वे विसर्गे च वर्णसम्मेलने 'द्यौः' इति रूपम्भवति।

**साधनिका : - द्युभ्याम्** इत्यत्र 'दिव्' इत्यस्माद् 'अर्थवदधातु...' इति प्रातिपदिकसंज्ञायां, 'भ्याम्' प्रत्ययेऽनुबन्धलोपे, 'दिव उत्' इति सूत्रेण वकारस्य उकारे 'दिउ+भ्याम्' इति स्थिते, इकारस्य यणादेशे द्+य्+उ+भ्याम्, वर्णसम्मेलने 'द्युभ्याम्' इति सिद्धं भवति। 'दिव्' इति शब्दस्य रूपाणि भवन्ति यथा-

| | | |
|---|---|---|
| द्यौः | दिवौ | दिवः। |
| दिवम् | दिवौ | दिवः। |
| दिवा | द्युभ्याम् | द्युभिः। |
| दिवे | द्युभ्याम् | द्युभ्यः। |
| दिवः | द्युभ्याम् | द्युभ्यः। |
| दिवः | दिवोः | दिवाम्। |
| दिवि | दिवोः | द्युषु। |
| हे द्यौः! | हे दिवौ! | हे दिवः! |

---

## अथ रेफान्तप्रकरणम्

**साधनिका :- गीः** (वाणी) 'गिर्' इत्यस्माद् 'अर्थवदधातु...' इत्यनेन प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे गिर्+स् इति स्थिते। 'वोर्रुपधाया दीर्घ इकः' इत्यनेन इकारस्य स्थाने दीर्घे ईकारे गीर्+स् इति स्थिते, सकारस्य रुत्वे, विसर्गे च कृते 'गीः' इति रूपम्भवति।

**साधनिका : – पूः** (नगरी) 'पुर्' इत्यस्माद् 'अर्थवदधातु...' इत्यनेन प्रातिपदिकसंज्ञायां, सुप्रत्ययेऽनुबन्धलोपे पुर्+स् इति स्थिते, 'र्वोरूपधाया दीर्घ इकः' इत्यनेन उकारस्य दीर्घे ऊकारे पूर्+स् इति स्थिते। सकारस्य रुत्वे, विसर्गे च कृते 'पूः' इति रूपं सिद्ध्यति। 'पुर्' शब्दस्य रूपाणि भवन्ति यथा–

| | | |
|---|---|---|
| पूः | पुरौ | पुरः। |
| पुरम् | पुरौ | पुरः। |
| पुरा | पूर्भ्याम् | पूर्भिः। |
| पुरे | पूर्भ्याम् | पूर्भ्यः। |
| पुरः | पूर्भ्याम् | पूर्भ्यः। |
| पुरः | पुरोः | पुराम्। |
| पुरि | पुरोः | पूर्षु। |
| हे पूः! | हे पुरौ! | हे पुरः! |

**साधनिका :– चतस्रः** (चतस्रः स्त्रियः) इत्यत्र 'चते–याचने' इति धातोः 'चतेरुरन्' इत्युणादिसूत्रेण 'उरन्' प्रत्ययेऽनुबन्धलोपे च। प्रातिपदिकत्वात् चतुर् इति शब्दात् प्रथमा–बहुवचन–विवक्षायां 'जस्' प्रत्ययेऽ नुबन्धलोपे चतुर्+अस् इति स्थिते। 'चतुरनडुहोरामुदात्तः' इत्यनेन अमागमे प्राप्ते 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इत्यनेन 'चतुर्' इत्यस्य स्थाने 'चतसृ' आदेशे चतसृ+अस् इति स्थिते। यणादेशे सकारस्य रुत्वे, विसर्गे च 'चतस्रः' इति रूपम्भवति।

---

## अथ मकारान्तप्रकरणम्

किमः कादेशे टाप्। का। के। काः। सर्वावत्

**( ४४१ ) यः सौ। ७। २। ११०॥**

**इदमो दस्य यः स्यात्सौ। 'इदमो मः' ( सू. ३४३ ) इयम्। त्यदाद्यत्वं, टाप् 'दश्च' ( सू. ३४५ ) इति मः, इमे। इमाः। इमाम्। इमे। इमाः। अनया। 'हलि लोपः' ( सू. ३४७ ) आभ्याम्। आभ्याम्। आभ्याम्। आभिः। अस्य। अस्याः। अनयोः। आसाम्। अस्याम्। अनयोः। आसु। अन्वादेशे तु – एनाम्। एने। एनाः। एनया। एनयोः एनयोः।**

**इति मान्ताः।**

---

४४१ – **पदच्छेदः** 'यः' प्रथमान्तम् 'सौ' सप्तम्यन्तम् द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** इदमः दः इत्यनयोः। **सूत्रप्रकारः** विधिसूत्रम्।

**सरलार्थः** यदा सुप्रत्यये परे भवति तदा 'इदम्' इति शब्दस्य दकारस्य स्थाने यकारो भवति।

**साधनिका : 'इयम्'** 'इदम्' शब्दात् प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे इदम् – सु इति स्थिते। 'त्यदादीनामः' इत्यनेन मकारस्य अकारे प्राप्ते 'इदमो मः' इत्यनेन मकारस्य मकारे 'यःसौ' इति सूत्रेण दकारस्य स्थाने यकारे, हल्ङ्यादिना सुलोपे 'इयम्' इति रूपम्भवति।

**साधनिका : 'इमे'** 'इदम्' शब्दात् प्रातिपदिकत्वात् 'औ' प्रत्ययेऽनुबन्धलोपे इदम् – औ इति स्थिते। 'त्यदादीनामः' इति मकारस्य अकारे पररूपे, 'इद + औ' इति स्थिते। अकारआकारयोः स्थाने सवर्णदीर्घे आकारे, 'दश्च' इति इकारस्य मकारे इमा – औ इति स्थिते। 'औङ आपः' इत्यनेन 'औ' इत्यस्य स्थाने 'शी' आदेशेऽनुबन्धलोपे इमा– ई इति स्थिते, 'प्रथमयोः पूर्वसवर्णः' इत्यनेन आकारईकारयोः स्थाने आकारे पूर्वसवर्णदीर्घे प्राप्ते, 'नादिचि' इति पूर्वसवर्णदीर्घस्य निषेधे अकारईकारयोः स्थाने एकारे गुणे 'इमे' इति रूपम्भवति।

**साधनिका :** **'इमाः'** 'इदम्' शब्दात् प्रातिपदिकत्वात् 'जस्' प्रत्ययेऽनुबन्धलोपे इदम्-जस् इति स्थिते 'त्यदादीनामः' इति मकारस्य अकारे, पररूपे इद - अस् इति स्थिते, 'टाप्' प्रत्ययेऽनुबन्धलोपे, इद-आ-अस् इति स्थिते, अकारआकारयोः स्थाने आकारे सवर्णदीर्घे आकारे, 'दश्च' इति दकारस्य मकारे इमा-अस् इति स्थिते, 'प्रथमयोः पूर्वसवर्णः' इति आकारअकारयोः स्थाने आकारे पूर्वसवर्ण दीर्धे सकारस्य रुत्वे विसर्गे च 'इमाः' इति रूपम्भवति। एवम् द्वितीया-एकवचन-विवक्षायाम् 'इमाम्' द्वितीयाद्विवचनविवक्षायाम् 'इमे' द्वितीया बहुवचनविवक्षायाम् 'इमाः' इति रूपम्भवति।

**अथ जकारान्तप्रकरणम्**

**ऋत्विज्- ( सू. ३७३ ) आदिना सृजेः क्विन् अमागमश्च निपातितः। स्त्रक् स्त्रग्। स्त्रजौ। स्त्रजः। स्त्रग्भ्याम्। स्त्रग्भ्याम्। स्त्रक्षु। इति जान्ताः।**

**अथ दकारान्तप्रकरणम्**

**त्यदाद्यत्वं टाप्। स्या। त्ये। त्याः। एवं तद्, यद् एतद्। इति दान्ताः।**

**अथ चकारान्तप्रकरणम्**

**वाक् - वाग्। वाचौ। वाचः वाग्भ्याम्। वाक्षु। इति चान्ताः।**

**साधनिका : - 'अनया'** इदम शब्दात् प्रतिपदिकत्वात् 'टा' प्रत्ययेऽनुबन्धलोपे 'त्यदादीनामः' इति मकाररस्य अकारे, पररूपे इद-आ इति स्थिते। 'अजाद्यतष्टाप्' इति 'टाप्' प्रत्ययेऽनुबन्धलोपे, अकार आकारयोः स्थाने सवर्ण दीर्घे 'आकारे' इदा -आ इति स्थिते। 'अनाप्यकः' इत्यनेन 'इद्' इत्यस्य 'अन्' आदेशे अना-आ इति स्थिते, 'आङि चापः' इत्यनेन आकारस्य स्थाने एकारे अने - आ इति स्थिते, अयादेशे अन्-अय-आ 'अनया' इति रूपम्भवति।

**साधनिका : - 'आभ्याम्'** 'इदम्' शब्दात् प्रातिपदिकत्वात् 'भ्याम्' प्रत्ययेऽनुबन्धलोपे इदम्-भ्याम् इति स्थिते। 'त्यदादीनामः' इति मकारस्य अकारे, पररूपे 'अजाद्यतष्टाप्' इति 'टाप्' प्रत्ययेऽनुबन्धलोपे 'इद-आ-भ्याम्' इति स्थिते, अकारआकारयो- स्थाने सवर्णदीर्घे आकारे इदा-भ्याम् इति स्थिते, 'हलि लोपः' इत्यनेन 'इद' इत्यस्य लोपे 'आभ्याम्' इति रूपम्भवति।

**साधनिका : - 'एनाम्'** 'इदम्' शब्दात् प्रातिपदिकत्वात् 'अम्' प्रत्यये, 'त्यदादीनामः' इति मकारस्य अकारे, पररूपे इद-अम इति स्थिते, 'अजाद्यतष्टाप्' इति 'टाप्' प्रत्ययेऽनुबन्धलोपे, अकारआकारयो, स्थाने सवर्णदीर्घे आकारे 'द्वितीयाटौस्स्वेनः' इत्यनेन एनादेशे एना-अम् इति स्थिते, 'प्रथमयोः पूर्वसवर्णः' इत्यतेन पूर्वसवर्णे प्राप्ते, 'अमि पूर्वः' इति आकारे पूर्वरूपे 'एनाम्' इति रूपम्भवति।

एवम् द्वितीया-द्विवचन-विवक्षायाम् 'एने' द्वितीयाबहुवचनविवक्षायाम् 'एनाः', तृतीया-एकवचनविवक्षायाम् 'एनया', षष्ठी, सप्तमी द्विवचनविवक्षायाम् 'एनयोः' इति रूपम्भवति।

**इति मकारान्तप्रकरणम्**

---

**अथ जकारान्तप्रकरणम्**

**साधनिका :** स्त्रक् - स्त्रग् (माला) इत्यत्र 'सृज-विसर्गे' इति धातोः 'ऋत्विग्' इति सूत्रेण 'क्विन' प्रत्यये, अमागमे च, सृ-अन्-क्विन् इति स्थिते। 'क्विन्' प्रत्ययस्य सर्वापहारे, यणादेशे च, 'स्त्रज्' शब्दात् प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे, हल्ङ्यादिना सुलोपे, 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन जकारस्य गकारे, विकल्पेन गकारस्य चर्त्वेन ककारे 'स्त्रक्' चर्त्वाभावे 'स्त्रग्' इति रूपम्भवति। 'स्त्रज्' इति शब्दस्य रूपाणि भवन्ति यथा -

| | | |
|---|---|---|
| स्रक् -स्रग् | स्रजौ | स्रजः। |
| स्रजम् | स्रजौ | स्रजः। |
| स्रजा | स्रग्भ्याम् | स्रग्भिः। |
| स्रजे | स्रग्भ्याम् | स्रग्भ्यः। |
| स्रजः | स्रग्भ्याम् | स्रग्भ्यः। |
| स्रजः | स्रजोः | स्रजाम्। |
| स्रजि | स्रजोः | स्रक्षु। |
| हे स्रक्-हे स्रग्! | हे स्रजौ! | हे स्रजः! |

### अथ दकारान्तप्रकरणम्

**साधनिका : - 'स्या'** 'त्यद्' शब्दात् प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे त्यद् + स् इति स्थिते, 'त्यदोः सः सावनन्त्ययोः' इति तकारस्य सकरे 'स्यद् + स्' इति स्थिते, 'त्यदादीनामः' इति दकारस्य अकारे, पररूपे च कृते, 'स्य + स्' इति स्थिते, 'अजाद्यतष्टाप्' इति 'टाप्' प्रत्ययेऽनुबन्धलोपे, अकार आकारयोः स्थाने सवर्णदीर्घे आकारे, हल्ङ्यादिना सुलोपे 'स्या' इति रूपम्भवति।

**साधनिका : - 'त्ये'** त्यद् शब्दात् प्रातिपदिकत्वात् 'औ' प्रत्ययेऽनुबन्धलोपे त्वद् + औ इति स्थिते, 'त्यदादीनामः' इति दकाररस्य अकारे, पररूपे त्य + औ इति स्थिते, 'अजाद्यतष्टाप्' इति 'टाप्' प्रत्ययेऽनुबन्धलोपे त्य + आ + औ इति स्थिते, अकारआकारयोः स्थाने सवर्णदीर्घे आकारे, 'औङ आपः' इति 'औ' इत्यस्य स्थाने 'शी' आदेशेऽनुबन्धलोपे, त्या + ई इति स्थिते, 'प्रथमयोः पूर्वसवर्णः' इति आकारईकारयोः स्थाने आकारे पूर्वसवर्णदीर्घे प्राप्ते, 'नादिचि' इति सूत्रेण पूर्वसवर्णदीर्घे, निषेधे, अकारईकारयोः स्थाने गुणे 'त्ये' इति रूपम्भवति।

**साधनिका : - 'त्याः'** 'त्यद्' शब्दात् प्रातिपदिकत्वात् 'जस्' प्रत्ययेऽनुबन्धलोपे 'त्यद + जस्' इति स्थिते, 'त्यदादीनामः' इति सकारस्य अकारे, पररूपे, त्य + अस् इति स्थिते, 'अजाद्यतष्टाप्' इति 'टाप्' प्रत्ययेऽनुबन्धलोपे त्य + आ + अस् इति स्थिते, अकारआकारयोः स्थाने सवर्णदीर्घे आकारे, 'प्रथमयोः पूर्वसवर्णः' इति आकारअकारयोः स्थाने आकारे पूर्वसवर्णदीर्घे, सकाररस्य रुत्वे विसर्गे च 'त्याः' इति रूपम्भवति। एवं 'तद्' इत्यस्य सा, ते, ताः 'यद्' इत्यस्य या, ये, याः, 'एतद्' इत्यस्य एषा, एते, एताः इति रूपाणि भवन्ति।

---

### अथ चकारान्तप्रकरणम्

**साधनिका : वाक् - वाग् ( वाणी )** वक्ति इति विग्रहे 'वच-परिभाषणे' इति धातोः 'क्विनब्वचिप्रच्छया.....' इति वार्तिकेन 'क्विप्' प्रत्यये, 'वचिस्वपियजादीनांकिति' इति धातोः वकारस्य प्राप्तसम्प्रसारणस्य निषेधे, दीर्घे च 'वाच्' शब्दात् प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे, हल्ङ्यादिना सुलोपे, 'चोः कुः' इति कुत्वेन गकारस्य ककारे, 'झलां जशोऽन्ते' इति जश्त्वेन गकारे, विकल्पेन गकारस्य चर्त्वेन ककारे 'वाक्' चर्त्वाभावे 'वाग्' इति रूपम्भवति। 'वाच्' इति शब्दस्य रूपाणि भवन्ति यथा -

| | | |
|---|---|---|
| वाक् -वाग् | वाचौ | वाचः। |
| वाचम् | वाचौ | वाचः। |
| वाचा | वाग्भ्याम् | वाग्भिः। |
| वाचे | वाग्भ्याम् | वाग्भ्यः। |
| वाचः | वाग्भ्याम् | वाग्भ्यः। |
| वाचः | वाचोः | वाचाम्। |
| वाचि | वाचोः | वाक्षु। |
| हे वाक् -हे वाग्! | हे वाचौ! | हे वाचः! |

### इति चकारान्तप्रकरणम्

---

### अथ पकारान्तप्रकरणम्

अप्शब्दो नित्यं बहुवचनान्तः। 'अप्तृप्तृच्...' (सू.२७७) इति दीर्घः। आपः। अपः।

**(४४२) -अपो भि ७।४।४८॥**

**अपस्तकारः स्याद्भादौ प्रत्यये परे। अद्भिः। अद्भ्यः। अद्भ्यः। अपाम्। अप्सु। इति पान्ताः।**

### अथ शकारान्तप्रकरणम्

**दिक् - दिग्। दिशौ। दिशः। दिग्भ्याम्। दिक्षु। 'त्यदादिषु...' (सू. ३४०) इति दृशेः क्विन्विधानाद् अन्यत्रापि कुत्वम् दृक् -दृग्। दृशौ। दृशः। इति शान्ताः।**

### अथ षकारान्तप्रकरणम्

**त्विट्-त्विड्। त्विषौ। त्विषः। त्विड्भ्याम्। त्विदत्सु-त्विदसु। सह जुषत इति सजूः। सजुषौ। सजुषः। सजूर्भ्याम्। सजूःषु-सजूष्षु। षत्वस्याद्धसिद्दत्वाद्रुत्वम् आशीः। आशिषौ। आशिषः। आशीर्भ्याम्। अशीर्भिः। इति षान्ताः।**

### अथ सकारान्तप्रकरणम्

**असौ। त्यदाद्यत्वं टाप् औडः, शी, उत्त्वमत्वे, अमू। अमूः। अमूम्। अमू। अमूः। अमुया। अमूभ्याम् अमूभिः। अमुष्यै। अमुभ्याम्। अमुभ्यः। अमुष्याः। अमुष्याः। अमुष्यै। अमुयोः। अमूषाम्। अमुष्याम्। अमुयोः अमूषु। इति सान्ताः।**

### इति हलन्तस्त्रीलिङ्गप्रकरणम्

४४२ - **पदच्छेदः** अपः भि। 'अपः' षष्ठयन्तम्, 'भि' सप्तम्यन्तम् द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** 'तः' अङ्गस्य च। **सूत्रप्रकारः** अतिदेशः।

**सरलार्थः** भकारादि-प्रत्यये पदे 'अप्' शब्दं तकारान्तादेशो भवति।

**विशेषार्थः** 'अप्' शब्दस्य नित्यं बहुवचनमेव भवति।

**साधनिका : - 'आपः' (जलवाचकः)** आप्नुवन्ति, आप्यन्ते वा, इति विग्रहे, 'आप्लृ-व्याप्तौ' इति धातोरनुबन्धलोपे 'आप्नोतेर्ह्रस्वश्च' इत्थुणादिसूत्रेण 'क्विप्' प्रत्यये, धातोः ह्रस्वे, 'अप्' शब्दात् प्रातिपदिकत्वात् 'जस्' प्रत्ययेऽनुबन्धलोपे, अप् + अस् इति स्थिते, 'अप्तृन्तृच्...' इत्यनेन अकाररस्य दीर्घे, सकारस्य रुत्वे, विसर्गे च 'आपः' इति रूपम्भवति।

**साधनिका :** 'अद्भिः' 'अप्' शब्दात् प्रातिपदिकत्वात् 'भिस्' प्रत्यये अप्+भिस् इति स्थिते, 'अपो भि' इत्येनेन पकारस्य तकारे, जश्तवेन तकारस्य दकारे, सकारस्य रुत्वे विसर्गे च कृते 'अद्भिः' इति रूपम्भवति।

### इति पकारान्तप्रकरणम्

---

### अथ शकारान्तप्रकरणम्

**साधनिका : - दिक् - दिग् (दिशा)** दिशात्यवकाशम् इति विग्रहे 'दिश - अतिसर्जने' इति धातोः 'ऋत्वत्विग्दधृ...'इत्यनेन 'क्विन्' प्रत्यये, सर्वापहारे च। 'दिश्' शब्दात् प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे, हल्ङ्यादिना सुलोपे 'व्रश्चभ्रस्ज...' इति शकारस्य षकारे, षकारस्य जश्त्वेन डकारे, 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन डकारस्य गकारे, चर्त्वेन विकल्पेन ककारे 'दिक्' चर्त्वाभावे 'दिग्' इति रूपम्भवति। 'दिश् इति शब्दस्य रूपाणि भवन्ति यथा -

| | | |
|---|---|---|
| दिक् – दिग् | दिशौ | दिशः। |
| दिशम् | दिशौ | दिशः। |
| दिशा | दिग्भ्याम् | दिग्भिः। |
| दिशे | दिग्भ्याम् | दिग्भ्यः। |
| दिशः | दिग्भ्याम् | दिग्भ्यः। |
| दिशः | दिशोः | दिशाम्। |
| दिशि | दिशोः | दिक्षु। |
| हे दिक्-दिग्! | हे दिशौ! | हे दिशः! |

**विशेषः दृक्-दृग्** इत्यत्र 'क्विप्' प्रत्ययान्ताद् 'दृश्' शब्दात् 'क्विन्प्रत्ययस्य कुः' इत्यनेन कुत्वं कथं भवितुमर्हति? इति शङ्कायां 'त्यदादिषु दृशोऽनालोचने कञ्च' इति सूत्रस्य ज्ञापनेन क्विप्प्रत्ययान्ताद् दृशशब्दापि 'क्विन्प्रत्ययस्य कुः' इत्यनेन कुत्वं भवति।

**साधनिका : – दृक् -दृग् ( नेत्रम् )** दृश्यन्ते अर्था अनया इति विग्रहे दृशिर्-प्रेक्षणे' इति धातोः 'इर इत्संज्ञा वाच्या' इति वार्तिकेन 'इर्' इत्यस्य इत्संज्ञायां लोपे, 'दृश्' शब्दात् प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे, हल्ङ्यादिना सुलोपे, 'व्रश्चभ्रस्ज' इति शकारस्य षकारे, षकारस्य डकारे, 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन डकारस्य गकारे, विकल्पेन गकारस्य चर्त्वेन ककारे 'दृक्' चर्त्वाभावे 'दृग्' इति रूपम्भवति। 'दृश्' इति शब्दस्य रूपाणि भवन्ति यथा –

| | | |
|---|---|---|
| दृक् – दृग् | दृशौ | दृशः |
| दृशम् | दृशौ | दृशः |
| दृशा | दृग्भ्याम् | दृग्भिः |
| दृशे | दृग्भ्याम् | दृग्भ्यः |
| दृशः | दृग्भ्याम् | दृग्भ्यः |
| दृशः | दृशोः | दृशाम् |
| दृशि | दृशोः | दृक्षु |
| हेदृक् –हेदृग्! | हे दृशौ! | हे दृशः! |

**साधनिका : – त्विट्-त्विड् ( दीप्तिः )** 'त्विष्-दीप्तौ' इति धातोः 'अन्येभ्योऽपि दृश्यते' इत्यनेन 'क्विप्' प्रत्ययेऽनुबन्धलोपे, 'त्विष्' शब्दात् प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे, हल्ङ्यादिना सुलोपे, षकारस्य जश्त्वेन डकारे, विकल्पेन डकारस्य चर्त्वेन टकारे 'त्विट्' चर्त्वाभावे 'त्विड्' इति रूपम्भवति।

**साधनिका : – 'सजूः' ( मित्रम् )** इत्यत्र सह जुषते इति विग्रहे सह उपपदाद् 'जुषी – प्रीतिसेवनयोः' इति धातोः 'सहस्य संज्ञायाम्' इति सहस्य स्थाने सादेशे अथवा 'ससजुषो रुः' इति निपातनात् सहस्य स्थाने सादेशे, सजुष् इत्यस्माद् 'अन्येभ्योऽपि दृश्यते' इति 'क्विप्' प्रत्ययेऽनुबन्धलोपे, 'सजुष्' शब्दात् प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे, हल्ङ्यादिना सुलोपे, 'झलां जशोऽन्ते' इति षकारस्य जश्त्वेन डकारे प्राप्ते, 'ससजुषो रुः' इति इति षकारस्य रुकारे, 'र्वोरुपधाया दीर्घ इकः' इति दीर्घे, रेफस्य विसर्गे 'सजूः' इति रूपम्भवति, 'सजूष्' इति शब्दस्य रूपाणि भवन्ति यथा –

| | | |
|---|---|---|
| सजूः | सजुषौ | सजुषः |
| सजुषम् | सजुषौ | सजुषः |
| सजुषा | सजूर्भ्याम् | सजूर्भिः |
| सजुषे | सजूर्भ्याम् | सजूर्भ्यः |
| सजुषः | सजूर्भ्याम् | सजूर्भ्यः |
| सजुषः | सजुषोः | सजुषाम् |
| सजुषि | सजुषोः ! | सजूषु-सजूःषु |
| हे सजूः ! | हे सजुषौ ! | हे सजुषः ! |

**साधनिका : – 'आशीः'( आशासनम् )** आङ् उपसर्गपूर्वात् 'शासु – इच्छायाम्' इति धातोः 'अन्येभ्योऽपि दृश्यते' इति 'क्विप्' प्रत्ययेऽनुबन्धलोपे, 'आशासः क्वावुपसंख्यानम्' इत्यनेन धातोः शकारस्य डकारे, 'शासिवसिघसीनां च' इत्यनेन धातोः षकारे, 'आशिष्' शब्दात् प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे, हल्ङ्यादिना सुलोपे, 'झलां जशोऽन्ते' इति षकारस्य जश्त्वेन डकारे प्राप्ते, षकारस्य असिद्धत्वात् ससजुषो रुः इति सकारस्य रुकारे, 'र्वोरूपधाया दीर्घ इकः' इति दीर्घे, रेफस्य विसर्गे च 'आशीः' इति रूपम्भवति। 'आशिष्' इति शब्दस्य रूपाणि भवन्ति यथा –

| | | |
|---|---|---|
| आशीः | आशिषौ | आशिषः। |
| आशिषम् | आशिषौ | आशिषः। |
| आशिषा | आशिषौ | आशीर्भिः। |
| आशिषे | आशीर्भ्याम् | आशीर्भ्यः। |
| आशिषः | आशीर्भ्याम् | आशीर्भ्यः। |
| आशिषः | आशिषोः | आशिषाम्। |
| आशिषि | आशिषोः | आशीष्षु-आशीःषु। |
| हे आशीः ! | हे आशिषौ ! | हे आशिषः ! |

## अथ सकारान्तप्रकरणम्

**साधनिका : – असौ** 'अदस्' इति शब्दात् प्रातिपदिकत्वात् सुप्रत्ये 'अदस सौ सलोश्च' इत्यनेन सकारस्य स्थाने औकारे सुप्रत्ययलोपे च अद + औ इति स्थिते, 'अजाद्यतष्टाप्' इति 'टाप्' प्रत्ययेऽनुबन्धलोपे अद + आ + औ इति स्थिते, अकार-आकारयोः स्थाने सवर्णदीर्घे आकारे, अदा + औ, आकारऔकारयोः स्थाने वृद्धौ, अदौ, तदोः सः सावनन्त्ययोः इत्यनेन दकारस्य सकारे 'असौ' इति रूपम्भवति।

**साधनिका : – 'अमू'** 'अदस्' इति शब्दात् प्रातिपदिकत्वात् औप्रत्यये 'त्यदादी' इत्येतेन सकारस्य स्थाने अकारे अद+आ+औ इति स्थिते, अकारआकारयोः स्थाने सवर्णदीर्घे आकारे, आकारअकारयोः स्थाने वृद्धौ 'अदौ' इति स्थिते, 'अदसोऽसेर्दादु दो मः' इति मत्वे, उत्वे, दीर्घे च कृते 'अमू' इति रूपम्भवति।

**साधनिका : – 'अमूषाम्'** 'इदस्' इति शब्दात् प्रातिपदिकत्वात् 'आम्' प्रत्यये, 'त्यदादीनामः' इति सकारस्य अकारे, पररूपे अद+आम्, 'अजाद्यतष्टाप्' इति 'टाप्' प्रत्ययेऽनुबन्धलोपे, अद+आ+आम् इति स्थिते, सवर्णदीर्घे अदा+आम् इति स्थिते, सर्वनामसंज्ञायाम् 'आमि सर्वनाम्नः सुट्' इति सुडागमेऽनुबन्धलोपे, अदा+साम् इति स्थिते, 'अदसोऽसेर्दादु दो मः' इति मत्वे, उत्वे, दीर्घे, मूर्धन्यादेशे च कृते 'अमूषाम्' इति रूपभवति।

**साधनिका : – 'अमूषु'** 'अदस्' शब्दात् प्रातिपदिकत्वात् 'सुप्' प्रत्यये, अत्वपररूपटाप्प्रत्यये च कृते अदा+सु इति स्थिते, 'अदसोऽसेर्दादु दो मः' इति मुत्वे, षत्वे च कृते अमूषु इति रूपम्भवति।

इत्थम् अस्मिन् स्त्रीलिङ्गप्रकरणे स्त्रीलिङ्गिनां शब्दानां रूपाणि भवन्ति। 'गिर्' शब्दस्य रूपाणि भवन्ति यथा –

| | | |
|---|---|---|
| गीः | गिरौ | गिरः। |
| गिरम् | गिरौ | गिरः। |
| गिरा | गीर्भ्याम् | गीर्भिः। |
| गिरे | गीर्भ्याम् | गीर्भ्यः। |
| गिरः | गीर्भ्याम् | गीर्भ्यः। |
| गिरः | गिरोः | गिराम्। |
| गिरि | गिरोः | गीर्षु। |
| हे गीः! | हे गिरौ! | हे गिरः! |

उष्णिक् शब्दस्य रूपाणि भवन्ति यथा –

| | | |
|---|---|---|
| उष्णिक् –उष्णिग् | उष्णिहौ | उष्णिहः |
| उष्णिहम् | उष्णिहौ | उष्णिहः। |
| उष्णिहा | उष्णिग्भ्याम् | उष्णिग्भ्यः |
| उष्णिहे | उष्णिग्भ्याम् | उष्णिग्भ्यः |
| उष्णिहः | उष्णिम्भ्याम् | उष्णिग्भ्यः |
| उष्णिहः | उष्णिहोः | उष्णिहाम् |
| उष्णिहि | उष्णिहोः | उष्णिक्षु |
| हेउष्णिक् – हेउष्णिग्! | हे उष्णिहौ! | हे उष्णिहः! |

त्विष् शब्दस्य रूपाणि भवन्ति यथा –

| | | |
|---|---|---|
| त्विट्–त्विड् | त्विषौ | त्विषः। |
| त्विषम् | त्विषौ | त्विषः। |
| त्विषा | त्विड्भ्याम् | त्विड्भिः। |
| त्विषे | त्विड्भ्याम् | त्विड्भ्यः। |
| त्विषः | त्विड्भ्याम् | त्विड्भ्यः। |
| त्विषः | त्विषोः | त्विषाम्। |
| त्विषि | त्विषोः | त्विट्त्सु, त्विट्सु। |
| हे त्विट्–हे त्विड् | हे त्विषौ | हे त्विषः। |

इदम् शब्दस्य रूपाणि भवन्ति यथा –

| | | |
|---|---|---|
| इयम् | इमे | इमाः |
| इमाम् | इमे | इमाः |
| अनया | आभ्याम् | आभिः |
| अस्यै | आभ्याम् | आभ्यः |
| अस्याः | अनयोः | आभ्यः |
| अस्याः | अनयोः | आसाम् |
| अस्याम् | अनयोः | आसु |

अदस् शब्दस्य रूपाणि भवन्ति यथा –

| | | |
|---|---|---|
| असौ | अमू | अमूः। |
| अमूम् | अमू | अमूः। |
| अमुया | अमूभ्याम् | अमूभिः। |
| अमुष्यै | अमूभ्याम् | अमूभ्यः। |
| अमुष्याः | अमूभ्याम् | अमूभ्यः। |
| अमुष्याः | अमुयोः | अमूषाम्। |
| अमुष्याम् | अमुयोः | अमूषु। |

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) नकारस्य स्थाने धकारः केन सूत्रेण भवति?

(क) होढः (ख) नहो धः (ग) अपो भि (घ) यः सौ

(२) 'इदम्' शब्दस्य दकारस्य स्थाने यकारो केन सूत्रेण भवति?

(क) यः सौ (ख) होढः (ग) नहो धः (घ) अपो भि

(३) 'उपानत्' शब्दस्य किमर्थो भवति?

(क) उपनेत्रम् (ख) उपसर्गः (ग) पादत्राणम् (घ) मित्रम्

(४) नित्यबहुवचनान्तः शब्दः कः?

(क) वाच् (ख) पुर् (ग) दिव् (घ) अप्

(५) षष्ठीबहुवचनस्य रूपं किमस्ति?

(क) आसाम् (ख) अस्याः (ग) अमुया (घ) अमुष्याम्

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) 'सजुष्' शब्दस्य अर्थः को भवति?

(२) 'नहो धः' सूत्रेऽस्मिन् कस्य पदस्य अनुवृत्तिः आगच्छति?

(३) 'यः सौ' सूत्रेऽस्मिन् कस्य पदस्य अनुवृत्तिः आगच्छति?

(४) 'यः सौ' सूत्रस्य सूत्रप्रकारः कोऽस्ति?

(५) 'अपो भि' सूत्रेऽस्मिन् कस्य पदस्य अनुवृत्तिः आगच्छति?

(६) 'पूः' शब्दस्य कोऽर्थः भवति?

(७) 'अपः' इति रूपस्य विभक्तिवचन-परिचयं ददातु।

(८) 'पुदि' इति रूपस्य विभक्ति-वचन-परिचयं ददातु।

**३. 'अ' विभागेन सह 'ब' विभागं योजयत।**

| (अ) | (ब) |
|---|---|
| (१) नहो धः | तकारान्तादेशः |
| (२) यः सौ | नकारस्य धकारः |
| (३) अपो भि | दकारस्य यकारादेशः |
| (४) णह | प्रीतौ |
| (५) ष्णिह | बन्धने |

**४ निम्नलिखितानि रूपाणि सविस्तरं साधयत।**

(१) उपानद्भ्याम्  (२) उष्णिक्षु  (३) धुक्षु  (४) पूः

(५) चतस्रः  (६) अनया  (७) सजूर्भ्याम्  (८) स्रक्

(९) स्या  (१०) वाक्

**५. सविस्तरम् उत्तराणि लिखत।**

(१) 'नहो धः' सूत्रमिदं सविस्तरं व्याख्यात।

(२) 'यः सौ' सूत्रमिदं सविस्तरं व्याख्यात।

(३) 'अपो भि' सूत्रमिदं सविस्तरं व्याख्यात।

(४) 'निपानाद्दलोपषत्वे' अस्याः पङ्क्त्या अर्थ-विस्तारं करोतु

(५) 'क्विन्विधानादन्यत्रापि कुत्वम्' अस्याः पङ्क्त्याः अर्थ-विस्तारं करोतु।

(६) 'षत्वस्यासिद्धत्वाद्रुत्वम्' अस्याः पङ्क्त्याः अर्थ-विस्तारं करोतु।

(७) 'क्विन्नन्तत्वात्कुत्वेन घः' अस्याः पङ्क्त्या अर्थ-विस्तारं करोतु।

●

# ५

# हलन्तनपुँसकलिङ्गप्रकरणम्

**प्रस्तावना**

हलन्तस्त्रील्लिङ्गप्रकरणानन्तरं इतः हलन्तनपुँसकलिङ्गानां शब्दानां प्रकरणं प्रारभ्यते। 'हयवरट्... तः लण्।' अनुसारं वर्णक्रमेण ये व्यञ्जनवर्णाः सन्ति तत्क्रमेण अर्थात् सूत्र क्रमाङ्कः ४४४-अहन्। ८/२/६८ तः आरभ्य सूत्रक्रमाङ्कः ४४७-शप्श्यनोर्नित्यम्। ७/१/८१ पर्यन्तं नपुंसकलिङ्गानां शब्दानां रूपसिद्धिं सूत्राणां सविस्तरं पठनं च करिष्यामः।

**हलन्तनपुंसकलिङ्गप्रकरणम्**

स्वमोर्लुक्। दत्वम्। स्वनडुत्-स्वनडुद्-स्वनडुही। 'चतुरनडुहो...' (सू.३३१) इत्याम् स्वनड्वांहि। पुनस्तद्वत्। शेषं पुम्वत्। 'दिवउत् (सू. ३३७) अहर्विमलद्यु। अन्तर्वर्तिनीं विभक्तिमाश्रित्य पूर्वपदस्येवोत्तरखण्डस्यापि पदसंज्ञायां प्राप्तायाम्' उत्तरपदत्वे चापदादिविधौ प्रतिषेधः (वा. ४८०) इति प्रत्ययलक्षणं न। विमलदिवि। विमलदिवि। अपदादिविधौ किम ? दधिसेचौ। इट षत्व निषेधे कर्तव्ये पदत्वमस्त्येव। चकारस्य कुत्वे तु न। इति वान्ताः।

वाः। वारी। अझलन्तत्वान्न नुम्। वारि। चत्वारि। इति रेफान्ताः। 'न लुमता' (सू. २६३) इति कादेशो न। किम्। के। कानि। इदम्। इमे। इमानि। 'अन्वादेशे नपुंसके एनद्वक्तव्यः' (वाः १५६८)। एनत्। एने। एनानि। एनेन। एनयोः। एनयोः। ब्रह्म। ब्रह्मणी। ब्रह्माणि। हे ब्रह्मन् - हे ब्रह्म। 'रोऽसुपि' (सू. १७२)। अहर्भाति। 'विभाषा ङिश्योः' (सू. २३७)। अह्नी-अहनी। अहानि।

**साधनिका : - स्वनडुत्** सु = शोभनाः अनड्वाहः यस्य कुलस्य तत् स्वनडुत् - स्वनडुद्। अत्र स्वनडुह् + सु इति स्थिते। स्वमोर्नपुंसकात् इति सुप्रत्ययस्य लुकि कृते 'वसुस्रंसुध्वंस्वनडुहां दः' इत्यनेन हकारस्य दकारे ततः 'वाऽवसाने' इत्यनेन विकल्पेन चर्त्वे कृते स्वनडुद्-स्वनडुत् इति रूपद्वयं सिद्ध्यति।

**साधनिका : - स्वनडुही** इत्यत्र 'जस्' प्रत्यये 'जश्शसोः शि' इति शिभावे, 'चतुरनडुहोरामुदात्तः' (सू. ७।१।२८) इति आमागमे स्वनडुआह्+इ यणादेशे 'स्वनड्+व्+आह्+इ' 'नपुंसकस्य झलचः' इति रूपम्भवति। द्वितीया-विभक्तौ अपि पुनः तद्वत् स्वनडुत् स्वनडुद्, स्वनडुही, स्वनड्वांहि इति रूपाणि भवन्ति। शेषाणि तृतीयातः सप्तमीपर्यन्तानि रूपाणि पुंलिङ्गवद् भवन्ति। स्वनडुहा। स्वनडुद्भ्याम्। स्वनडुद्भिः इत्यादीनि। **इति हकारान्ताः॥** **साधनिका : - विमलद्यु** विमला द्यौः (आकाशम्) यस्य अह्नः तत् विमलदिव्। सुप्रत्यये विमलदिव्+सु 'दिवउत्' इति वकारस्य 'उत्' आदेशे कृते 'विमलद्युं' इति रूपम्भवति। अत्रायं विशेषः - विमलदिव् इत्यत्र (बहुब्रीहि) समासत्वात् अन्तर्वर्तिनीं विभक्तिमाश्रित्य (विमला+सु इति) पूर्वपदस्य 'सुप्तिङन्तं पदम्' इति सूत्रेण पदसंज्ञा भवति तथैव (दिव्+सु इति) उत्तरपदस्यापि पदसंज्ञा भवति, ततः 'सुप्'-प्रत्ययस्य लुकि सति, यद्यपि सुपोऽभावात् पदसंज्ञाया अपि अभावः स्यात्तथापि 'प्रत्ययलोपे प्रत्ययलक्षणम्।' इति प्रत्ययलक्षणेन पदसंज्ञा भवति। परन्तु पदत्वाभावात् 'दिव उत्' इति 'उत्' आदेशे अनिष्टापत्तिः भवति। अस्याः अनिष्टापत्तेः निवारणार्थम् 'उत्तरपदत्वे...' इति वार्तिकेन प्रत्ययलक्षणस्य प्रतिषेधात् सुपोऽभावात् 'सुप्तिङन्तं पदम्' इति पदसंज्ञा न भवति। पदसंज्ञायाः अभावात् अत् आदेशाभावः तेन विमलदिव्+औ-शी-ई = विमलदिवी, विमलदिवि इत्यादीनि रूपाणि भवन्ति।

वार्तिके 'अपदादिविधौ' इति पदमस्ति तेन पदादिविधौ वार्तिकेन प्रत्ययलक्षणस्य प्रतिषेधो न भवति। अतः 'दधिसेचौ' इत्यत्र 'सेच्' इत्यस्य (समासानन्तरं सुपः लुकि सत्यपि प्रत्ययलक्षणेन पदसंज्ञा भवत्येन, तेन च), 'चोः कुः' इति कुत्वं न भवति। **इति वान्ताः॥**

**साधनिका : - वार् ( जलम्, नपुं. )** वार्+सु इत्यत्र सुप्रत्ययस्य लुकि, रेफस्य विसर्गे 'वा:' इति रूपम्भवति। 'औ' प्रत्यये कृते शीआदेशे 'वारी' इति रूपम्भवति। बहुवचनविवक्षयां

जस् प्रत्यये, शि आदेशे (नपुंसकस्य झलचः इति वार् शब्दस्य अझलन्तत्वात् नुमागमाभावे) वारि इति रूपम्भवति।

**साधनिका : - चतुर् ( चत्वारः इत्यस्य नपुं. नित्य-बहुवचनान्तो रेफान्तः )** 'जस्' प्रत्यये, 'शि' आदेशे चतुर्+इ इत्यवस्थायां शिप्रत्ययस्य सर्वनामस्थान-त्वात् 'चतुरनडुहोरामुदात्तः' इति आमागमे, यणादेशे च कृते 'चत्वारि' इति रूपम्भवति।

**साधनिका : -किम् ( मकारान्त नपुं. )** सुप्रत्यये 'किम् + सु' 'स्वमोर्नपुंसकात्' इति सुब्लुकि-कृते, 'किमः कः' इत्यनेन किमः स्थाने कादेशे प्राप्ते, ''न लुमताङ्गस्य'' इति प्रत्ययलक्षणाभावात् 'किम्' इत्यवशिष्टे रूपमिदं सिद्धं भवति। एवमेव के। कानि। काभ्याम्। कैः। इत्यादीनि रूपाणि भवन्ति। 'इदम्' शब्दस्यापि इदम्। इमे। इमानि। इत्यादीनि रूपाणि भवन्ति। अन्वादेश-प्रसंगे 'इदम्' शब्दस्य 'अन्वादेशे' नपुंसके एनद्वक्तव्यः। इति वार्तिकेन 'एनत्' आदेशो भवति तेन-एनत्। एने। एनानि। इत्येवं रूपाणि भवन्ति।

**(४४३) -अहन्। ८।२।६८**

**अहन् इत्यस्य रुः स्यात पदान्ते।**

**अहोभ्याम्। अहोभिः इह 'अहः' 'अहोभ्याम्' इत्यादौ रत्वरुत्वयोरसिद्धत्वान्नलोपे प्राप्ते 'अहन्' इत्यावर्त्य एकेन नलोपाभावं निपात्य द्वितीयेन रुर्विधेयः। तदन्तस्यापि रुत्वरत्वे, दीर्घाण्यहानि यस्मिन् स दीर्घहा निदाघः। इह हल्ङ्यादिलोपे प्रत्ययलक्षणेन 'असुपि' इति निषेधाद्रत्वाभावे रुः, तस्यासिद्धत्वान्नान्तलक्षण उपधादीर्घः। सम्बुद्धौ तु हे दीर्घाहो। निदाघ। दीर्घाहानौ। दीर्घाहानः। दीर्घाह्ना। दीर्घाहोभ्याम्। दण्डि। दण्डिनी। दण्डीनि। स्त्रग्वि। स्त्रग्विणी। स्त्रग्वीणि। वाग्मि। वाग्मिनी। वाग्मीनि। बहुवृत्रहाणि। बहुपूषाणि। बह्मर्यमाणि। इति नान्ताः।**

**साधनिका :** ब्रह्म। ब्रह्माणी। ब्रह्माणि। अत्र 'ब्रह्मणी' इत्यत्र ब्रहमन् + औ, 'शी' आदेशे 'न संयोगाद्वमन्तात्' इति 'अल्' लोपो न भवति। सम्बोधने 'सम्बुद्धौ नपुंसकानाम्।' इति वार्तिकात् नलोपो विकल्पेन भवति, तेन हे ब्रह्मन्, हे ब्रह्म! इति रूपद्वयं भवति।

साधनिका-अहः 'अहन् + सु' इत्यवस्थायां पूर्ववत् सुलुकि, 'अहन्' इत्यनेन नकारस्य रुत्वे, 'खरवसानयोर्विसर्जनीयः' इति विसर्गे 'अहः' इति रूपम्भवति। 'अहर्भाति' इत्यत्र 'अहन्' इत्यनेन रुत्वे प्राप्ते 'रोऽसुपि' इति रेफो भवति।

**साधनिका : 'अह्नी, अहनी'** इत्यत्र 'औ' प्रत्यये, 'शी' आदेशे 'विभाषा ङिश्योः' इति विकल्पेन अलोपे 'अह्नी' अलोपाभावपक्षे 'अहनी' एवमत्र द्वे रूपे भवतः। बहुवचनविवक्षायां 'जस्' प्रत्यये 'शि' आदेशे, सर्वनामसंज्ञायां, नान्तस्य उपधादीर्घे अहान् + इ = अहानि इति रूपम्भवति। तृतीया-एकवचन-विवक्षायां, टाप्, 'अल्लोपोऽनः' इति 'अन्' इत्यस्य अकारस्य लोपे अह्न् + आ = 'अह्ना' इति रूपम्भवति।

---

४४३ - **पदच्छेदः** 'अहन्' लुप्तषष्ठीकम्, एकपदमिदं सूत्रम्।

**अनुवृतिः** 'रु' एवं 'अन्ते' इत्यनयोः अनुवृत्तिः।

**सूत्रप्रकारः** विधिसूत्रम्।

**सरलार्थः** - पदान्ते विद्यमानस्य 'अह्नः' नकारस्य स्थाने रुकारः भवति।

**साधनिका : - अहोभ्याम्, अहोभिः** इत्यत्र 'भ्याम्' प्रत्यये अहन् + भ्याम् इति स्थिते, 'अहन्' इति सूत्रेण नकारस्य रुत्वे, 'हशि च' इति रेफस्य उत्वे 'आद्गुणः' इति गुणे च कृते 'अहोभ्याम्' इति रूपम्भवति। एवम्प्रकारेण 'अहोभिः'

**असृजः पदान्ते कुत्वम्, सृजेः क्विनो विधानात्। विश्वसृडादौ तु न। सृजिदृशो...( सू. २४०५ ) इति सूत्रे 'रज्जुसृड्भ्याम्' इति भाष्यप्रयोगात्। यद्वा 'व्रश्च... ( सू. २९४ ) आदिसूत्रे सृजियज्योः पदान्ते षत्वं कुत्वापवादः। स्त्रगृत्विक्छब्दयोस्तु निपातनादेव कुत्वम्। असृक्छब्दस्तु अस्यतेरौणादिके ऋज्प्रत्यये बोध्यः। असृक्, असृग्। असृजी। असृञ्जि।' पद्दन्...( सू.२२८ ) इति वा असन्-असानि। असृजा, अस्ना। असृग्भ्याम्, असृग्भ्यामित्यादि। ऊर्क्, ऊर्ग्। उर्जी, ऊर्ञ्जि। नरजानां संयोगः।**

बहूर्जि नुम्प्रतिषेधः (वी. ४३३१)। अन्त्यात्पूर्वो वा नुम् (वा. ४३३२)। बहूर्जि, बहूर्ञ्जि वा कुलानि। **इति जान्ताः।**

**साधनिका : –'असृज्'** रूपस्यास्य द्विधा सिद्धिर्भवति। तद्यथा –

(१) 'सृज' धातोः 'ऋत्विग्दधृक्...' इत्यनेन निपातनात् 'क्विन्' प्रत्ययः। 'क्विन्' सर्वलोपे 'सृज्' इति रूपम्भवति।

(२) न सृज, असृज् इति न नञ्तत्पुरुषसमासः। नञ् पूर्वात् 'सृज्' धातोः सम्पदादित्वात् क्विप्प्रत्ययः, 'क्विप्' प्रत्ययस्य सर्वलोपे 'असृज्' इति रूपम्। क्विन्प्रत्ययान्तस्य 'असृज्-' शब्दस्य प्रथमैकवचने 'चोःकुः', 'क्विन्प्रत्ययस्य कुः' इत्यनेनापि-कुत्वम्भवति परन्तु तस्यासिद्धत्वात् 'चोःकुः' इत्यस्यैव प्रवृत्तिः। 'विश्वसृड्' इत्यादौ कुत्वाभावः।

**साधनिका : - बेभित् - बेभिद्।** अत्र भिद् धातोः 'यङ्' प्रत्यये, द्वित्वे, अभ्यासकार्ये कृते 'बेभिद्य' इति रूपम्। कृदन्तत्वात् प्रातिपदिकत्वम्, प्रातिपदिकत्वात् सुबुत्पत्तिः। प्रथमायाः एकवचनविवक्षायां सुप्रत्यये, नपुंसकत्वात् सुलुकि 'बेभित्- बेभिद्' इति रूपद्वयं सिद्ध्यति। 'बेभिदी' इत्यत्र 'औ' प्रत्यये बेभिद् + शी ई इति स्थिते ततः बेभिद् + य + क्विप् > ० इत्यवस्थायां 'अतो लोप' इति अकारस्य, 'यस्य हलः' इति यकारस्य लोपो भवति तेन 'बेभिद्' इति रूपम्भवति। अत्र अलोपस्य 'अचः परस्मिन्पूर्वविधौ' इति स्थानिवद्भावात् अझलन्तत्वम्, तेन 'नपुंसकस्य झलचः' इति नुमागमो न। अथ च तेनैव सूत्रेण अजन्तलक्षणः नुमपि न, स्वविधौ स्थानिवद्भावस्य अभावात्। बेभिदि ब्राह्मणकुलानि। चेच्छिदि। छिद् धातोः पूर्ववत् यङ् प्रत्यये, अभ्यासकार्ये चेच्छिद्यः, तस्य धातुत्वात् क्विपि, सर्वापहारिलोपत्वात् 'चिच्छिद्' इति कृदन्तत्वात् प्रातिपदिकत्वम्, ततः नपुंसके बेभिद्-वत् रूपाणि भवन्ति।

त्यत्, त्यद्। त्ये। त्यानि। तत्, तद्। ते। तानि। यत्, यद्। ये। यानि। एतत्, एतद्। एते। एतानि। अन्वादेशे तु एनत्। बेभिद्यतेः क्विप्। बेभित्, बेभिद्। बेभिदी। शावल्लोपस्य स्थानिवत्त्वादझलन्तत्वान्न नुम्। अजन्तलक्षणस्तु नुम् न, स्वविधौ स्थानिवत्त्वाभावात्। बेभिदि ब्राह्मणकुलानि चेच्छिदि। **इति दान्ताः।**

**गवाक्छब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः।**
**असन्ध्यवङ्पूर्वरूपैर्नवाधकशतं मतम्॥ १॥**
**स्वम्सुप्सु नव षड् भादौ षट्के स्युस्त्रीणि जश्शसोः।**
**चत्वारि शेषे दशके रूपाणीति विभावय॥ २॥**

तथा हि गामञ्चतीति विग्रहे 'ऋत्विक् - (सू. ३७३) आदिना क्विन्। गतौ नलोपः। 'अवङ् स्फोटायनस्य।' (सू. ८८) इत्यवङ्। गवाक् गवाग्। सर्वत्र विभाषा - (सू. ८७) इति प्रकृतिभावे - गोअक् गोअग्। पूर्वरूपे - गोऽक्, गोऽग्। पूजायां नस्य कुत्वेन ङः - गवाङ् गोऽङ् गोअङ्। अम्यप्येतान्येव नव। औङः शी, भत्वाद् 'अचः' (सू.४१६) इत्यल्लोपः। गोची। पूजायां तु गवाञ्ची, गोअञ्ची, गोऽञ्ची। 'जश्शसोः शि' (सू. ३१२) शेस्सर्वनामस्थानत्वान्नुम्। गवाञ्चि, गोअञ्चि, गोऽञ्चि। गतिपूजनयोस्त्रीण्येव। गोचा, गवाञ्चा, गोअञ्चा, गोऽञ्चा। गवाग्भ्याम्, गोअग्भ्याम्, गोऽग्भ्याम्। गवाङ्भ्याम्, गोअङ्भ्याम्, गोऽङ्भ्याम् इत्यादि। सुपि तु ङान्तान्नां

पक्षे ङ्णोः कुक् ..(सू. १३०) इति कुक्। गवाङ्क्षु, गोअङ्क्षु, गोऽङ्क्षु। गवाक्षु, गोअक्षु, गोऽक्षु। न चेह 'चयो द्वितीया.- (वा. ५०२३) इति पक्षे ककारस्य खकारेण षण्णामाधिक्यं शङ्क्यम्, चर्त्वस्यासिद्धत्वात्।' कुक्पक्षे तु तस्यासिद्धत्वाज्जश्त्वाभावे पक्षे चयो द्वितीयादेशात् त्रीणि रूपाणि वर्धन्त एव।

**ऊह्यमेषां द्विवचनानुनासिकविकल्पनात्।**

**रूपाण्यश्वाक्षिभूतानि (५२७) भवन्तीति मनीषिभिः॥**

**तिर्यक्। तिरश्ची। तिर्यञ्चि। पूजायां तु तिर्यङ्। तिर्यञ्ची। तिर्यञ्चि। इति चान्ताः।**

**यकृत्, यकृती, यकृन्ति। 'पद्दन्..' (सू. २२८) इति वा यकन्। यकानि। यक्ना, यकृता। शकृत्, शकृती। शकृन्ति, शकानि। शक्ना, शकृता। ददत्, ददती।**

**साधनिका : - गवाक्** 'गाम् अञ्चति' इति विग्रहे 'ऋत्विग्..' इत्यनेन 'क्विन्' प्रत्ययः, तस्य सर्वापहारि-लोपे 'गवाञ्च्' इति रूपम्भवति।

विशेषः- अत्र 'अञ्च्' धातुः गत्यर्थकः, पूजार्थकश्च। तत्र गत्यर्थके नलोपः भवति। पूजार्थके नलोपः न भवति। अतः गर्त्थके नलोपत्वात् प्रथमैकवचने गवाक् - गवाग् इति रूपम्भवति। पूजार्थके नलोपभावात् प्रथमैकवचने 'गवाङ्' इति रूपम्भवति।

'गवाक्' शब्दस्य नवाधिकशतम् (१०९) रूपाणि भवन्ति। तेषां परिगणनम् उपर्युक्तायां कारिकायामस्ति। तद्यथा - सु, अस्, सुप् प्रत्ययेषु परेषु नव नव (९=३=२७) रूपाणि भवन्ति। भ्याम, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस् इत्यादिषु षड् षड् (६-६ =३६) रूपाणि भवन्ति। जस्-शस् प्रत्यययोः त्रीणि त्रीणि (३-२=६) रूपाणि भवन्ति। शेषेसु प्रत्ययेषु चत्वारि-चत्वारि (४-१०=४०) सम्मिल्य १०९ रूपाणि भवन्ति। अथ च द्विर्वचनस्य अनुनासिकस्य च विकल्पनात् ५२७ रूपाणि भवन्ति। एतेषाम्परिगणनमपि 'उह्यमेषाम्...' इति कारिकायामस्ति।

**साधनिका : - तिर्यक्** 'क्विन्' प्रत्ययान्तस्य 'तिर्यञ्च्' प्रातिपदिकात् प्रथमैकवचने सुप्रत्यये, नलोपे, विभक्तिलुकि 'चोःकुः' इति कुत्वे 'तिर्यक्' इति रूपम्भवति। तिर्यञ्ची। तिर्यञ्चि इत्यत्र तिर्यञ्चि + जस् - शि - इ इति स्थिते पूर्ववत् 'तिरि' आदेशे, यणादेशे, नुमि, अुनस्वारे, परसवर्णे च कृते 'तिर्यञ्चि' इति रूपम्भवति।

**साधनिका : - तिर्यङ्** पूजार्थे वर्तमानाद् धातोः तिर्यञ्च् शब्दस्य प्रथमैकवचने तिर्यङ् इति रूपम्भवति। तिर्यञ्ची। तिर्यञ्चि इत्यत्र तिर्यञ्च् + जस् - शि - इ इति स्थिते पूर्ववत् 'तिरि' आदेशे, यणादेशे, नुमि, अनुस्वारे, परसवर्णे च कृते 'तिर्यञ्चि' इति रूपम्भवति।

**साधनिका : - यकृत् । यकृती। यकृन्ति** अत्र नास्ति विशेषः परन्तु 'पद्दन' इति सूत्रेण यदा 'यकृत्' इत्यस्य स्थाने 'यकन्' आदेशो भवति तदा यकन्? तृतीयैकवचने अलोपे, यक्ना। पक्षे यकृत्य। शेषं पुंवत्।

**(४४४) -वा नपुंसकस्य। ७।१।७८**

**अभ्यस्तात्परो यः शता तदन्तस्य क्लीबस्य नुम्वा स्यात्सर्वनामस्थाने परे। ददन्ति ददति। तुदत्।**

---

४४४ - **पदच्छेदः** - 'वा' इति अव्ययपदम् 'नपुंसकस्य' इति षष्ठ्यन्तम्। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - 'शतुः', 'नुम्', 'सर्वनामस्थाने' इति।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अभ्यस्तसंज्ञकात्परं यः शतृप्रत्ययः, तदन्तं नपुंसकलिङ्गं सर्वनामस्थाने परे सति विकल्पेन नुमागमो भवति।

**साधनिका :** - तुदत्, तुदन्ती, तुदती। अत्र तुदत् + औ - शी - ई = तुदत् + ई इति स्थिते। 'आच्छीनद्योर्नुम्' इति 'तुद' इति अवर्णान्तात् अङ्गात् परो यः शतृप्रत्ययः, तदन्तस्य (तुदत्) अङ्गस्य 'शी' प्रत्यये परे विकल्पेन

'नुम्' प्रत्यये, यदा नुमागमो भवति तदा तुद+ नुम् - न् - त् + ई = तुदन्ती इति रूपम्भवति। यदा नुमागमो न भवति, तदा तुदत् + ई = तुदती इति रूपम्भवति।

**(४४५)- आच्छीनद्योर्नुम्। ७।१।८०**

**अवर्णान्तादङ्गात्परो यः शतुरवयवस्तदन्तस्याङ्गस्य नुम्वा स्याच्छीनद्योः परतः। तुदन्ती - तुदती। तुदन्ति, भाती। भान्ति। पचत्।**

**(४४६)- शप्श्यनोर्नित्यम्। ७।१।८१**

**शप्श्यनोरात्परो यः शतुरवपयवस्तदन्तस्य नित्यं नुम् स्याच्छीनद्योः परतः । पचन्ती। पचन्ति। दीव्यत्। दीव्यन्ती। दीव्यन्ति। इति तान्ताः। इति हलन्तनपुंसकलिङ्गप्रकरणम् ।**

---

४४५ - **पदच्छेदः** - 'आत्' पञ्चम्यन्तम्, 'शीनद्योः', 'सप्तम्यन्तम्', 'नुम्' प्रथमान्तं पदम्, त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** - 'शतुः', वा, इत्यनयोः पदयोः।

**सूत्रसमासः** - शी च नदी च शीनद्यौ तयोः शीनद्योः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अवर्णान्तादङ्गात् परे यः 'शत्' प्रत्ययस्यावयवः तदन्तस्य अङ्गस्य विकल्पात् नुमागमो भवति। शौ वा नदी-संज्ञके परे।

**साधनिका :** - पचत् 'पच्'+ शप् + अ + शत् + अत् = पचत्, पचत् + सु इति स्थिते, पूर्ववत् सुलुकि - 'पचत्' इति रूपम्भवति।

स्वप्, स्वब्। स्वपी। नित्यात्परादपि नुमः प्राक् 'अप्तृन्' (सू. २७७) इति दीर्घः। प्रतिपदोक्तत्वाद् नुम् - स्वाम्पि। 'निरवकाशत्वं प्रतिपदोक्तत्वम्' इति पक्षे तु प्रकृते तिद्वरहान्नुमेव। स्वम्पि। स्वपा। 'अपो भि' (सू. ४४२)। स्वद्भ्याम् । स्वद्भिः। इति पान्ताः।

अर्तिपृवपि - (उ.सू. २७४) इत्यादिना धनेरूप्। षत्वस्यासिद्धत्वाद् रुत्वम्। धनुः। धनुषी। 'सान्त' (सू. ३१७) इति दीर्घः। 'नुम्विसर्जनीय' - (सू. ४३४) इति षत्वम्। धनूंषि। धनुषा। धनुर्भ्याम्। एवं चक्षुर्हविरादयः। पिपठिषतेः क्विप्। 'र्वो-' (सू. ४३३) इति दीर्घः। पिपठीः। पिपठिषी। अल्लोपस्य स्थानिवत्वा-ज्झलन्तलक्षणो नुम् न। स्वविधौ स्थानिवत्वाभवादजन्तलक्षणोऽपि नुम् न। पिपठिंषि। पिपठीर्भ्यामित्यादि पुंवत्। इति षान्ताः। पयः, पयसी, पयांसि। पयसा, पयोभ्याम् इत्यादि। सुपुम्। सुपुंसी। सुपुमांसि। अदः। विभक्तिकार्यम्, उत्वमत्वे - अमू। अमूनि। शेष पुंवत्। इति सान्ताः।

**॥ इति हलन्तनपुंसकलिङ्गप्रकरणम्॥**

**साधिनकाः - पचन्ती** अत्र पचत् + औ > शी > ई = पचत् + ई इति स्थिते। 'शप्श्यनोर्नित्यम्' इति सूत्रेण नित्यं नुमागमः, तेन 'पचन्ती' इति रूपम्भवति। पचन्ति। दीव्यत्। दीव्यन्ती। दीव्यन्ति इत्यादिषु अविशेषः।

४४६ - **पदच्छेदः** - 'शप्श्यनोः' इति षष्ठ्यन्तम् 'नित्यं' इति क्रियाविशेषणम्, द्वितीयान्तं पदम्।

**सूत्रसमासः** - शप् च श्यन् च तयोरितरेतरद्वन्द्वः शप्श्यनौ-तयोः शप्श्यनोः।

**अनुवृत्तिः** - 'आत्', 'नुम्', 'शतुः'

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - शप्श्यनोः अवर्णात्परे यः शतृप्रत्ययः, तस्यावयवः यः तदन्ताङ्गस्य, नित्यं नुमागमो भवति। शी प्रत्यये वा नदीसंज्ञके परे।

**साधनिका :** - **स्वप् - स्वब्। स्वपी। स्वाम्पि, स्वम्पि** अत्र स्वप् + जस् > शि > इ = स्वप् + इ इति स्थिते 'अप्तृन्...' इति सूत्रेण उपधाया दीर्घे कृते, 'नपुंसकस्य झलचः' इति नुमि कृते स्वानुम् > न् प् + इ =

स्वान्प + इ इति स्थिते, ततः नकारस्य अनुनासिके, परसवर्णे च कृते 'स्वाम्पि' इति रूपं सिद्ध्यति।
यद्यत्र 'अप्तृन्...' इति दीर्घापेक्षया झलन्तलक्षणः, नुमागमः नित्यः परश्चास्ति तथापि 'अप्तृन्...' सूत्रे प्रतिपदोक्तत्वात्, दीर्घस्य अप्शब्दमुच्चार्य विहितत्वात् दीर्घा एव भवति तेन 'स्वाम्पि' इति रूपम्।
ये खलु प्रतिपदोक्तत्वं निरवकाशं वर्तते, इति मतमनुसरन्ति तेषाम् मते प्रथमं नुमादेशः भवति, नुमादेशत्वात् उपधाया अभावात् दीर्घाभावो भवति तेन 'स्वम्पि' इति रूपम्भवति। एवं 'स्वाम्पि' 'स्पम्पि' इति रूपद्वयम् भवति। स्वपा। स्वद्भ्याम्। स्वद्भिः। इत्यत्र स्वप् + भ्याम् इति स्थिते 'अपो भि' इति सूत्रेण अपः तकारादेशो भवति। ततः जश्त्वे स्वद्भ्याम्। स्वद्भिः। इत्यादीनि रूपाणि भवन्ति। धनुषा। धनुर्भ्याम्। इत्यादिषु अविशेषः एवमेव चक्षुष्, हविस् इत्यादीनां शब्दानां रूपाणि भवन्ति।

**साधनिका : - पिपठीः, पिपठिषी** पठ् धातोः सन्प्रत्यये, द्वित्वे, अभ्यासकार्ये पिपठिष इति रूपम्, ततः क्विपि, सर्वापहारिलोपे, पिपठिष् इति स्थितम्। ततः प्रथमैकवचने सुप्रत्यये, सुलुकि पिपठिस् + सु अत्र 'आदेश प्रत्येयोः।' इति सूत्रेण विहितः षः। 'ससजुषोरुः' इति रुत्वादेशे कर्तव्ये 'पूर्वत्रासिद्धम्।' इति असिद्धम्, तेन पूर्ववत् रुत्वे, विसर्गे च 'पिपठीः' इति रूपम्। पिपठिषी इत्यत्र पिपठिष् + औ > शी > ई = पिपठिषी। अत्र पिपठिष् + क्विप् इत्यत्र 'अतोलोपः' इति अल्लोपः तेन पिपठिष् इति सिद्धम्। ततः पिपठिष् + औ > शी > ई इति स्थिते अल्लोपस्य 'अचः परस्मिन्...।' इति स्थानिवद्भावात् झलन्तत्वाभावः, तेन झलन्तलक्षणः नुमागमो न भवति। अथ च स्वविधौ स्थानिवद्भावाभावाद् अजन्तलक्षणः नुमादेशोऽपि न भवति। पिपठिषि। पिपठीर्भ्याम्। इत्यादि पूर्ववत्।

**साधनिका : - धनुः** धन् धातोः 'अर्तिपूवपि...' इत्युणादिसूत्रेण 'उस्' प्रथमा एकवचने प्रत्यये कृते धन् + सु इति स्थिते पूर्ववत् सुलुकि, सकारस्य रुत्वे, रेफस्य विसर्जनीये धनुः इति रूपं सिदध्यति। धनुषी। धनूंषि। अत्र धनुस् + जस् >शि > इ = धनुम् + इ इति स्थिते, 'सान्त महतः...।' इति दीर्घः, धनुस् + इ ततः नुमि अनुस्वारे षत्वे कृते धनू + नुम् > न् > ष् + इ = धनूंषि + इति सिद्धम्। पयः। पयसी। पयांसि। पयसा। पयोभ्याम्। इत्यादिना नास्ति कश्चित् विशेषः।

**साधनिका : - सुपुम्** सु = शोभनः पुमान् यस्य गृहस्य तत् सुपुंस्, ततः समासत्वात् प्रातिपदिकत्वम्, प्रातिपदिकत्वात् प्रथमैकवचन-विवक्षायां सुप्रत्यये कृते सुपुंस् + सु इति स्थितिम्। अत्र पूर्ववत् सुलुकि 'संयगोगान्तस्य लोपः।' इति संयोगान्तस्य 'स्' इत्यस्य लोपो भवति।

**साधनिका : - सुपुमांसि** अत्र सुपुम्स् + इ इति स्थिते 'पुंसोऽसुङ्' इति असुङ् भवति। तेन सुपुम् असुङ् + अस् + इ = सुपुंम्स् इति स्थिते, 'नपुंसकस्य झलचः।' इति नुम्, 'अत्वसन्तस्य...।' इति दीर्घः , 'नश्चापदन्तस्य...' इति अनुस्वारे 'सुपुमांसि' इति रूपं सिद्ध्यति। अदः। अमू। अमूनि। अत्र नास्ति विशेषः। सर्वं पूर्ववत्॥

**॥ इति हलन्तनपुंसकलिङ्गप्रकरणम्॥**

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) 'अहन्' शब्दस्य 'रुः' केन सूत्रेण भवति?

(क) अहन् (ख) वानपुंसकस्य (ग) आच्छीनद्योर्नुम् (घ) शप्श्यनोर्नित्यम्

(२) अवर्णतादङ्गात्परे यः शतुरवयवस्तदन्तस्याङ्गस्य 'नुम्' केन सूत्रेण भवति?

(क) अहन् (ख) वानपुंसकस्य (ग) आच्छीनद्योर्नुम् (घ) शप्श्यनोर्नित्यम्

(३) नित्यं 'नुम्' केन सूत्रेण भवति?

(क) अहन् (ख) वानपुंसकस्य (ग) आच्छीनद्योर्नुम् (घ) शप्श्यनोर्नित्यम्

(४) 'वा नपुंसकस्य' सूत्रप्रकारः कः?

(क) संज्ञासूत्रम् (ख) परिभाषासूत्रम् (ग) विधिसूत्रम् (घ) नियमसूत्रम्

(५) 'वार्' शब्दस्य कोऽर्थः भवति?

(क) द्यौः (ख) पृथ्वी (ग) जलम् (घ) अग्निः

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) 'स्वनडुह्' शब्दस्य कोऽर्थः भवति?

(२) 'अहन्' सूत्रेऽस्मिन् कयोः पदयोः अनुवृत्तिः आगच्छति?

(३) 'शीनद्योः' इति पदस्य विभक्ति-वचनपरिचयं ददातु।

(४) 'शप्श्यनोः इति पदस्य विभक्ति-वचनपरिचयं ददातु।

(५) 'शप्श्यनोः' पदस्यास्य समासः कः भवति?

(६) 'आच्छीनद्योर्नुम्' सूत्रेऽस्मिन् कति पदानि सन्ति?

(७) 'वा नपुंसकस्य' सूत्रेऽस्मिन् कति पदानि सन्ति?

**३. (अ) विभागेन सह (ब) विभागं योजयत।**

| **(अ)** | **(ब)** |
|---|---|
| (१) आच्छीनद्योर्नुम् | नुम्वा स्यात्सर्वनामस्थाने। |
| (२) अहन् | नुम्वा स्याच्छीनद्योः परतः। |
| (३) वा नपुंसकस्य | क्लीबेऽर्चागतिभेदतः। |
| (४) गवाक्छब्दस्य रूपाणि | नित्यं नुम्स्यात् |
| (५) शप्श्यनोर्नित्यम् | रुः। |

**४ निम्नलिखितानि रूपाणि सविस्तरम् साधयत।**

(१) स्वनडुत् (२) विमलद्यु (३) किम् (४) अह्नी

(५) बेभिद् (६) तिर्यक् (७) तुदन्ती (८) पचन्ती

(९) स्वाम्पि (१०) पचत्

**५. सविस्तरम् उत्तराणि लिखत।**

(१) 'अहन्' सूत्रमिदं सविस्तरं व्याख्यात।

(२) 'वानपुंसकस्य' सूत्रमिदं सविस्तरं व्याख्यात।

(३) 'आच्छीनद्योर्नुम्' सूत्रमिदं सविस्तरं व्याख्यात।

(४) 'शप्श्यनोर्नित्यम्' सूत्रमिदं सविस्तरं व्याख्यात।

(५) 'गवाक्छब्दस्यरूपाणि...।' कारिकायाः अर्थविस्तारं करोतु।

(६) 'उद्यमेषां...।' कारिकायाः अर्थ-विस्तारं करोतु।

●

# ६

# अव्ययप्रकरणम्

**प्रस्तावना**

षड्लिङ्ग-प्रकरणानन्तरम् अव्ययप्रकरणस्य प्रारम्भो भवति। प्रकरणेऽस्मिन् सूत्रक्रमाङ्कः (४४८)-तद्धितश्चासर्वविभक्तिः। १।१।३८ तः सूत्रक्रमाङ्कं (४५३)-अव्ययादाप्सुपः-२/४/८२, पर्यन्तम् अव्ययानां पठनं भविष्यति।

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥**

कारिकानुसारम् 'अव्ययम्' नाम ये शब्दाः त्रिषु लिङ्गेषु सदृशा एव भवन्ति। सर्वासु विभक्तिषु तथा च सर्वेष्वपि वचनेषु च एकरूपाः भवन्ति, ते शब्दाः अव्ययशब्दाः कथ्यन्ते। अस्मिन् प्रकरणे विस्तारपूर्वकम् अव्ययानां पठनं करिष्यामः।

**॥ अव्ययप्रकरणम्॥**

**( ४४७ ) स्वरादिनिपातमव्ययम्। १।१।३७॥**

स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः। स्वर्। अन्तर्। प्रातर्। पुनर्। सनुतर्। ऊच्चैस्। नीचैस्। शनैस्। ऋधक्। ऋते। युगपत्। आरात्। पृथक्। ह्यस्। श्वस् दिवा। रात्रौ। सायम्। चिरम्। मनाक्। ईषत्। जोषम्। तूष्णीम्। बहिस्। अवस्। समया। निकषा। स्वयम्। वृथा। नक्तम्। नञ्। हेतौ। इद्धा। अद्धा। सामि। 'वत्' (ग.४) ब्राह्मणवत्। क्षत्रियवत्। सना। सनत्। सनात्। उपधा। तिरस्। अन्तरा। अन्तरेण। ज्योक्। कम्। शम्। सहसा। विना। नाना। स्वस्ति। स्वधा। अलम्। बषट्। श्रौषट्। वौषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो। मिथस्। प्रायस्। मुहुस्। प्रवाहुकम्। प्रवाहिका। आर्यहलम्। अभीक्ष्णम्। साकम्। सार्धम्। नमस्। हिरुक्। धिक्। अथ। अम्। आम्। प्रताम्। प्रशान्। प्रतान्। मा। माङ्। आकृतिगणोऽयम्। च। वा। ह। अह। एव। एवम्। नूनम्। शश्वत्। युगपत्। भूयस्। कूपत्। सूपत्। कुवित्। नेत्। चेत्। चण्। कच्चित् किञ्चित्। यत्र। नह। हन्त। माकिः। माकिम्। (आकिम्। नकिम्।) माङ्। नञ्। यावत्। तावत्। त्वै। द्वै। रै। श्रौषट्। वौषट्।

स्वाहा स्वधा, तुम तथाहिं खलु किल अथो अथ सुष्ठुस्म आदह (ग) उपसर्गविभक्तिस्वरप्रतिरूपकाश्च। अवदत्तम्। अहंयुः। अस्तिक्षीरा। अ, आ, इ, ई, उ, ऊ, लृ, ए, ऐ, ओ, औ। पशु। शुकम्। यथाकथाच। पाद्। प्याटु अङ्ग। है। हे। भोः। अये। द्य। विषु। एकपदे। युत्। आतः। चादिरप्याकृतिगणः।

४४७ - **पदच्छेदः** - 'स्वरादिनिपातम्' इति प्रथमान्तम्, 'अव्ययम्' इति प्रथमान्तम्, द्विपदमिदं सूत्रम्।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सूत्रसमासः** - 'स्वर्' आदिर्येषां ते स्वरादयः। स्वरादयश्च निपाताश्च तेषां समाहारः स्वरादिनिपातम्। समाहारद्वन्द्वसमासः।

**सरलार्थः** - स्वरादिशब्दाः एवं निपातसंज्ञकशब्दाः अव्ययसंज्ञकाः भवन्ति।

**विशेषः** - स्वरादिगणपठिताः शब्दाः, तेषामर्थः स्वर्-स्वर्गे, परलोके च। अन्तर्-मध्ये। प्रातर्-प्रत्यूषे। पुनर्-अप्रथमे, विशेषे च। सनुतर्-अन्तर्धाने। एते पञ्च-अव्ययाः रेफान्ताः तेन 'हशि च' इति उत्वम् न, उत्वम् तु रोः रेफस्य एव भवतीति विधानात् ततः स्वर्याति। इत्येवं प्रयोगः उच्चैस्-महति। नीचैस्-अल्पे। शनैस्-क्रियामान्द्ये। ऋधक्-सत्ये। स्वाहा। स्वधा। वौषट्। तुम्। तथाहि। खलु। किल। अथ सुष्ठु। स्म। आदह। उपसर्गविभक्तिस्वरप्रतिरूपकाश्च (ग.१६) अवदत्तम्। अहंयुः। अस्तिक्षीरा। अ। आ। इ। ई। उ। ऊ। ए। ऐ।

**(४४८) -तद्धितश्चासर्वविभक्तिः। १।११।३८॥**

**यस्मात् सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात्। परिगणनं कर्तव्यम्। तसिलादयः प्राक् प्राशपः। शस्प्रभृतयः। प्राक्समासान्तेभ्यः। अम्। आम्। 'कृत्वोर्थाः।' तसिवती। नानाञाविति। तेनेह न। पचतिकल्पम्। पचतिरूपम्।**

अथ च वियोग-शैद्य-सामीप्य-लाघवेषु च। ऋते-वर्जने। युगपत्-एककाले। आराद्-दूर समीपयोः। पृथक्-भिन्ने। ह्यस्-अतीतेऽह्नि। श्वस्-अनागतेऽहिन। दिवा-दिवसे, रात्रौ-निशि, सायम्-सन्ध्याकाले। चिरम्-बहुकाले। मनाक्-ईषद् (अल्पम्)। ईषद्-अल्पम्। जोषम्-सुखे, मौने। तूष्णीम्-मौनम्। बहिस्, अवस्, इदं द्वयं बाह्ये। समया-समीपे मध्ये च। निकषा-अन्तिके। स्वयम्-आत्मनेत्यर्थे। वृषा-व्यर्थे। नक्तम्-रात्रौ। नञ्-निषेधे। हेतौ-निमित्ते। इद्धा-प्राकाश्ये। अद्धा-स्फुटावधारणयोः। सामि-अर्धे जुगुप्सिते च। वत्-तुल्याम्। नित्यम्। सनात्-नित्यम्। सनत्-नित्यम्। उपधा-भेदे। तिरस्-अन्तर्धौ-अन्तरा-मध्ये। डयोक्-प्रश्ने, शीघ्रार्थे, सम्प्रति इत्यर्थे। कम् वारिमूर्धनिन्दासुखेषु। शम्-सुखे। सहसा आकस्मिकविमर्शयोः विना-वर्जने नाना-अनेकविनार्थयोः। स्वस्ति-मङ्गले। स्वधा-पितृहविर्दाने। अलम्-भूषणपर्याप्तशक्ति-वारण-निषेधेषु। वषट्-श्रौषट्, वौषट् एतत्त्रयं देवहविरिति अन्यद् अन्यार्थे। अस्ति-सत्तायाम्। अमा-क्षान्तौ। विहायसा-आकाशे। दोषा-रात्रौ। मृषा मिथ्या - इदं द्वयं वितथे। मुधा-व्यर्थे। पुरा-अविरते, चिरातीते। मिथो, मिथस् इदं द्वयं रहसि सहार्थे च। प्रायस्-बाहुल्ये। मुहुस्-पुनरर्थे। प्रवाहकम्-समानकाले बह्वर्थे च। प्रवाहिका इति पाठान्तरम्। आर्यहलम्-बलात्कारे। अभीक्ष्णम्-पौनःपुन्ये। साकम्-सार्धम् इदं द्वयं सहार्थे। नमस्-नतौ। हिरुक्-वर्जने। धिक्-निन्दाभर्त्सनयोः। अम्-शैध्यै, अल्पे च। आम्-अङ्भीकारे। प्रताम्-ग्लानौ। प्रशाम्-समानार्थे। प्रतान्-विस्तारे।

---

४४८ - **पदच्छेदः** - 'तद्धितः' इति प्रथमान्तं, तथा 'च' अव्ययपदम् 'असर्वविभक्तिः' प्रथमान्तम्। - त्रिपदमिदं सूत्रम्।

**सूत्रसमासः** - न भवन्ति सर्वा विभक्तयो यस्मात्, स असर्वविभक्तिः, बहुव्रीहिः।

**अनुवृत्तिः** - 'अव्ययम्' इति शब्दस्य।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - यस्मात् सर्वाः विभक्तयः न उत्पद्यन्ते, तादृशाः तद्धितान्तशब्दाः अव्ययसंज्ञकाः भवन्ति।

**विशेषार्थः** - यद्यपि तद्धितप्रकरणे बह्वः असर्वविभक्तयः प्रत्ययाः सन्ति परन्तु तेषां परिगणनमत्र अपेक्षितम्। परिगणनं चेदमस्ति (१) 'पञ्चम्यास्तसिल्' (सू. ५/३/७) इत्यतः 'याप्ये पाशप्' (सू. ५/३/८३) पर्यन्तम्। (२) 'बह्वल्यार्थाच्छमुस्' (सू. ५/४/४२) इत्यनेन विधीयमानः अम्प्रत्ययः, किमेत्तिङ् (सू. ५/४/११) इत्यनेन विधीयमानः 'आम्' प्रत्ययः 'संख्यायाः क्रियाभ्यावृत्तिगणने विभक्ति' (सू. ५/४/१७) इत्यनेन विधीयमानः कृत्वसुच्, तदर्थश्च सुच् प्रत्ययः। 'तेन तुभ्यम्' इत्यनेन विहितः वतिप्रत्ययः। 'विनञ्भ्याम्' इत्यनेन विहितौ ना-नाञ् इत्येतौ प्रत्ययौ। एते परिगणिता एव प्रत्ययाः येषामन्ते भवन्ति तादृशाः तद्धितान्ताः अव्ययसंज्ञकाः भवन्ति। इतोऽन्ये कल्पप् रूपप्, इत्यादयः प्रत्ययाः सन्ति; तेषाम् अव्ययसंज्ञा नास्ति।

**(४४९) -कृन्मेजन्तः। १।१।३९॥**

**कृद्यो मान्त एजन्तश्च तदन्तमव्ययं स्यात्। स्मारं-स्मारम्। जीवसे। पिबध्यै।**

---

४४९ - **पदच्छेदः** - 'कृत्' प्रथमान्तम्, 'मेजन्तः प्रथमान्तं द्विपदमिदं सूत्रम्।'

**सूत्रसमासः** - म् च एच् च मेचौ, मेचौ अन्तौ यस्य सः मेजन्तः।

**अनुवृत्तिः** - 'अव्ययम्' इति पदस्य।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** – ये मान्ता एवं एजन्ताः कृत्संज्ञकाः, प्रत्ययाः तदन्तशब्दाः अव्ययसंज्ञकाः भवन्ति।

**साधनिका स्मारं स्मारम्** – अत्र 'स्मृ' धातोः 'आभीक्ष्ण्ये णमुल्।' इति णमुल् प्रत्ययो भवति तेन 'स्मृ+णमुल् >' अम् इति स्थिते। णित्त्वात् वृद्धौ, द्वित्वे च कृते स्मारम् + स्मारम् > स्मारं स्मारम् इति स्थिते अत्र कृदन्तत्वात् प्रातिपदिकत्वम्, प्रातिपदिकत्वात् सुपः प्राप्तिः भवति, तेन स्मारं + स्मारम् + सु इत्यत्र 'कृन्मेजन्तः' इत्यनेन अव्ययसंज्ञा तत्–फलम् च 'अव्ययादाप्सुपः' इति सुपः लुक् 'स्मारं स्मारम्' इति रूपं सिद्ध्यति।

**साधनिका-जीवसे** – 'जीव्' धातोः असेन् > असे प्रत्यये कृते जीवसे, ततः पूर्ववत् प्रातिपदिकत्वात् सुप्रत्ययः, अव्ययंसंज्ञा, अव्ययत्वाच्च सुप्रत्ययस्य लुकि कृते 'जीवसे' इति रूपम्भवति।

**साधनिका पिबध्यै** – 'पा' धातोः पिबादेशः, ततो शध्यै > अध्यै प्रत्यये-पिबध्यै, ततः पूर्ववत् अव्ययत्वम्, सुप्रत्यस्य लुक् तेन 'पिबध्यै' इति सिद्धम्।

**(४५०) -क्त्वातोसुन्कसुनः। १।१।४०॥**

**एतदन्तमव्ययं स्यात्। कृत्वा। उदेतोः। विसृपः।**

---

४५० - **पदच्छेदः** – 'क्त्वातोसुन्कसुनः' इति प्रथमान्तं पदम्, एकपदमिदं सूत्रम्।

**सूत्रसमासः** – क्त्वा च तोसुन् च कसुन् च तेषामितरेतरद्वन्द्वः-क्त्वातोसुन्कसुनः।

**अनुवृत्तिः** – 'अव्ययम्' इति पदस्य।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – क्त्वा, तोसुन् एवञ्च कसुन् इति प्रत्ययान्ताः शब्दाः अव्ययसंज्ञकाः भवन्ति।

**साधनिका : कृत्वा** – 'कृ' धातोः 'समानकर्तृकयोः पूर्वकाले' इति 'क्त्वा' प्रत्यये कृ + क्त्वा > त्वा, ततः 'कृत्वा' इति रूपम्भवति। अत्रापि पूर्ववत् प्रातिपदिकत्त्वम्, ततः सुप्रत्ययः, 'क्त्त्वातोसुन्कसुनः' इत्यनेन अव्ययसंज्ञा, सुप्रत्ययस्य लुकि 'कृत्वा' रूपम्भवति। एवमेव उदेतोः (उत् + इ + तोसुन्; उदितोस् > उदेतोः), विसृपः (वि + सृप् + कसुन् > अस्; विसृपस् > विसृपः) इति प्रयोगद्वयं सिद्ध्यंति।

**(४५१) -अव्ययीभावश्च। १।१।४१॥**

**अधिहरि।**

---

४५१ - **पदच्छेदः** – 'अव्ययीभावः' इति प्रथमान्तं, 'च' इति अव्ययपदम्। द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** – 'अव्ययम्' इति पदस्य।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – अव्ययीभावसमासशब्दाः अव्ययसंज्ञकाः भवन्ति।

**साधनिका : अधिहरि** – 'हरौ' इति विग्रहे, 'हरि+ङि+अधि+सु' इति स्थिते 'अव्ययं विभक्ति...' इत्यनेन अव्ययीभावसमासः, ततः सुप्-लुक्, उपसर्जनत्वात् न पूर्वप्रयोगो 'अधिहरि' इति स्थितम्। समासत्त्वात् प्रातिपदिकत्वं ततः सुप्रत्यये 'अव्ययीभावश्च' इत्यनेन अव्ययसंज्ञा, ततः सुप्रत्ययस्य लुक् 'अधिहरि' इति प्रयोगः सिद्ध्यति।

**(४५२) -अव्ययादाप्सुपः। २।४।५२॥**

**अव्ययाद्विहितस्यापः सुपश्च लुक् स्यात्। तत्र शालायाम्। अथ विहितविशेषणान्नेह। अत्युच्चैसौ। अव्ययसंज्ञायां यद्यपि तदन्तविधिरस्ति, तथापि न गौणे। आब्ग्रहणं व्यर्थमलिङ्गत्वात् (वा १६३३)।**

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥**

इति [ भाष्योक्ता ] श्रुतिर्लिङ्गकारकसंख्याऽभावपरा॥

वष्टि भागुरिल्लोपमवाप्योरूपसर्गयोः।

आपं चैव हलन्तानां यथा वाचा निशा दिशा॥

वगाहः। अवगाहः। पिधानम्। अपिधानम्।

॥ इति अव्ययप्रकरणम्॥

---

कामम् - हवाटद्ये। प्रकामम् - इतिशये। भूयस्-पुनरर्थे। साम्प्रतम्-न्याप्ये। परम्-कित्वर्थे। साक्षात्प्रत्यक्षे साचितिर्यगर्थे। सत्यम् एतत्पञ्चिपकं सातत्ये। उषा-रात्रौ। शेदसी, द्यावापृथ्वि। ओमू-अङ्गाकारे। भूः-पृथिव्याम्। भुवर्-अन्तरिक्षे। झटिति-प्राक्-तटसा, त्रयमिदं शैघ्ये। सुष्ठु-प्रशंसायाम्। दुष्ठु-निकृष्टे। सु-पाजायाम्। आः-आश्चर्ये। कु-कुत्सिते। अञ्जला-तत्वे, शीघ्रार्थे च। भिक्षु-इत्वियर्थे। अस्तम्-विनाशे। स्थाने-भुक्तार्थे। ताजक-शैघ्ये। चिराय, चिरराकाय, चिरस्य, चिरम्, चिरेण, चिरात् इति षट्कं विकारार्थकम्। वरम्-ईषद्रुत्कर्षे। आनुष्कः-आनूपूर्व्ये। अनुषक-अनुमाने। अमेनः शीघ्रसीम्परितकयोः। सुदि-शुक्लपक्षे। वदि-कृष्णपक्षे। ह-प्रसिद्धौ। अह-अद्भुते, खेदे च। एवम्-डलपरामर्शे। नूनम्-विश्चेतर्के। शश्वत्-पौनः, पुन्ये, नित्ये सहाये च। युगवत्-एककाले। भूयस्-पुनर्थे आधिस्ये। कूपतः-प्रश्ने प्रशंतियां च। कुवित्-भूर्यर्थे, प्रशंसायां च। चण्-अयं चेदर्थे। किञ्चित्-इष्टप्रश्ने। हत-हर्षे; अनुकम्पायां, वाक्यारम्भे च। माकिः, माकिम्, नकिः इदं त्रयं वर्जने। माडत्रौ-स्वराडिषूक्तौ। यावत्-तावत्-इदं द्वयं साप। वधिमानावधारयेषु है वितर्के। है तने, अषादेह च। शौट-बौषट, स्वाहा इदं त्रयं देवहविर्धाने। स्वधा-पितृदाने। तुम्-तुम्हारे। तथाहि निडेदर्शने खालुनिषेध-वाक्यालङ्कारानिश्चयेषु। किल-इवर्थे। स्म-अर्वाते। आदह-उपकुमहिंसाकुत्सनेषु। अहंयुः-अहङ्कारे। अङ्ग है, हे भोः (ए ए - सम्बोधने। द्य-हिंसा प्रतिलोक्यपादपूरपनेषु। विषु-नानार्थे प्रति।

४५२ - **पदच्छेदः** - 'अव्ययात्' पञ्चम्यन्तम्, 'आप्सुपः' षष्ठ्यन्तं द्विपदमिदं सूत्रम्।

**सूत्रसमासः** - आप् च सुप् च तयोः समाहारद्वन्द्वः, आप्सुप्, तस्मात् आप्सुपः।

**अनुवृत्तिः** - 'लुक्' इत्यस्य।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अव्ययसंज्ञकात् शब्दात् परयोः आप्सुपोः लोपो भवति।

**साधनिका तत्र शालायाम्** - 'शालायाम्' इत्यस्य तत्र इति विशेषणम्। विशेषणत्त्वात् विशेष्यानुरूपं स्त्रीत्त्वम्, तेन 'तत्र' शब्दात् 'अजाद्यतष्टाप्' इति 'टाप्' प्रत्यये तत्र + टाप् + आ इति स्थिते, 'तद्धितश्चासर्वाविभक्ति' इत्यनेन अव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इति सूत्रेण 'टाप्' इत्यस्य अवशिष्टस्य 'आप्' प्रत्ययस्य लुकि कृते 'तत्र' इति रूपं सिद्ध्यति।

॥ इति अव्ययप्रकरणम् ॥

## स्वाध्यायः

**१. प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) 'स्वरादिशब्दाः एवं निपातसंज्ञकशब्दाः अव्ययसंज्ञकाः भवन्ति' इति किं सूत्रं कथयति?

(क) स्वरादिनिपातमव्ययम् (ख) कृन्मेजन्तः

(ग) अव्ययोभावश्च (घ) तद्धितश्चासर्वविभक्तिः

(२) 'यस्मात् सर्वाः विभक्तयः न उत्पद्यन्ते, तादृशाः तद्धितान्तशब्दाः अव्ययसंज्ञकाः भवन्ति' इति किं सूत्रं कथयति?

(क) अव्ययादाप्सुपः (ख) कृन्मेजन्तः

(ग) अव्ययीभावश्च (घ) तद्धितश्चासर्वविभक्तिः

(३) 'ये मान्ता एवं एजन्ताः कृत्संज्ञकाः, तदन्तशब्दाः अव्ययसंज्ञकाः भवन्ति' इति किं सूत्रं कथयति?

(क) अव्ययादाप्सुपः (ख) कृन्मेजन्तः

(ग) अव्ययोभावश्च (घ) तद्धितश्चासर्वविभक्तिः

(४) 'अव्ययीभावसमासशब्दाः अव्ययसंज्ञकाः भवन्ति' इति किं सूत्रं कथयति?

(क) अव्ययादाप्सुपः (ख) कृन्मेजन्तः

(ग) अव्ययीभावश्च (घ) तद्धितश्चासर्वविभक्तिः

(५) 'अव्ययसंज्ञकयोः आप्सुपोः लोपो भवति' इति किं सूत्रं कथयति?

(क) अव्ययादाप्सुपः (ख) कृन्मेजन्तः

(ग) अव्ययीभावश्च (घ) तद्धितश्चासर्वविभक्तिः

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) 'स्वरादिनिपातमव्ययम्।' सूत्र-प्रकारं लिखतु।

(२) 'स्वरादिनिपातमव्ययम्' अस्य-सूत्रस्य समासं लिखतु।

(३) 'कृन्मेजन्तः।' सूत्रेऽस्मिन् कस्य पदस्य अनुवृत्तिः आगच्छति?

(४) 'कृन्मेजन्तः।' अस्य सूत्रस्य समासं लिखतु।

(५) 'तद्धितश्चासर्वविभक्तिः।' सूत्रेऽस्मिन् कति पदानि सन्ति?

(६) 'अव्ययादाप्सुपः।' सूत्रेऽस्मिन् कस्य पदस्य अनुवृत्तिर्गच्छति?

(७) 'क्वातोसुन्कसुनः।' सूत्रेऽस्मिन् कति पदानि सन्ति?

**३. 'अ' विभागेन सह 'ब' विभागं योजयत।**

| (अ) | (ब) |
|---|---|
| (१) 'स्वरादिशब्दाः एवं निपातसंज्ञकशब्दाः अव्ययसंज्ञकाः भवन्ति' | कृन्मेजन्तः। |
| (२) 'यस्मात् सर्वाः विभक्तयः न उत्पद्यन्ते, तादृशाः तद्धितान्तशब्दा...' | स्वरादिनिपातमव्ययम्। |
| (३) 'ये मान्ता एवं एजन्ताः कृत्संज्ञकाः, तदन्तशब्दाः...' | अव्ययादाप्सुपः। |
| (४) 'अव्ययीभावसमासशब्दा...' | तद्धितश्चासर्वविभक्तिः। |
| (५) 'अव्ययसंज्ञकयोः आप्सुपोः लोपो भवति' | अव्ययीभावश्च। |

**४. निम्नलिखितानि रूपाणि साधयत।**

(१) स्मारं स्मारम् (२) जीवसे (३) पिबध्यै

(४) कृत्वा (५) अधिहरि

**५. सविस्तरम् उत्तरं लिखत।**

(१) 'स्वरादिनिपातमव्ययम्।' सूत्रमिदं सविस्तरं व्याख्यात।

(२) 'कृन्मेजन्तः।' सूत्रमिदं सविस्तरं व्याख्यात।

(३) 'तद्धितश्चासर्वविभक्तिः।' सूत्रमिदं सविस्तरं व्याख्यात।

(४) 'अव्ययादाप्सुपः।' सूत्रमिदं सविस्तरं व्याख्यात।

(५) 'क्त्वातोसुन्कसुनः।' सूत्रमिदं सविस्तरं व्याख्यात।

●

# ७

# स्त्रीप्रत्ययप्रकरणम्

**प्रस्तावना**

स्त्रीप्रत्ययाः मौख्यत्वेनात्र प्रस्तूयन्ते-

| | | | | |
|---|---|---|---|---|
| टाप् | डाप् | चाप् | → | आप् (आ) |
| ङीप् | ङीष् | ङीन् | → | ई |
| अङ् | ति | | | |

'टाप्' इत्यत्र ट् इत्यस्य 'चुटू' इत्यनेन इत् संज्ञा भवति। 'ट्' इत्यस्य 'हलन्त्यम्' इत्यनेन इत्-संज्ञा भवति - उभयत्र 'तस्य लोपः' इत्यनेन लोपः भवति। तथैव 'डाप्' चाप् इत्यत्रापि इत् संज्ञा-लोपे सति - आ-अवशिष्यते।

ङीप्-ङीष्-ङीन् इत्यत्र-आदिङकारस्य 'लशक्वतद्धिते' इत्यनेन इत् संज्ञा भवति लोपश्च भवति। सर्वत्र 'ई' अवशिष्यते 'स्त्रियाम्' सूत्रस्यारम्भे महाभाष्यकारेण लिखितम्।

**स्तनकेशवती स्त्रीस्यात् लोमशः पुरुषः स्मृतः।**
**उभयोरन्तरं यच्च तदभावे नपुंसकम्॥**

---

**(४५३) -स्त्रियाम्। ४।१।३॥**

**अधिकारोऽयम्। समर्थानामिति यावत्।**

---

४५३ - **पदच्छेदः** - एक पदमिदं सूत्रम्।

**सूत्रप्रकारः** - अधिकार सूत्रम्।

**सरलार्थः** - 'स्त्रियाम्' इति सूत्रस्य 'समर्थानां प्रथमाद् वा'

इति सूत्रं यावत्-अधिकारः अस्ति।

स्त्रीप्रत्यये 'स्त्रियाम्' (४-१-३) अस्य सूत्रस्य सम्पूर्णाधिकारः तथा च 'ङ्याप्प्रातिपदिकात्' (४-१-१) अस्य सूत्रस्य आंशिकः (प्रातिपदिकात्) इत्यस्य अधिकारो भविष्यति।

**(४५४) -अजाद्यतष्टाप्। ४।१।४॥**

**अजादीनामकारान्तस्यच वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्।**

**अजाद्युक्तिर्ङीषोङीबो ङीपश्च बाधनाय। अजा।**

---

४५४ - **पदच्छेदः** - अजाद्यतः टाप्

**सूत्रसमासः** - अच् आदिर्येषां ते अजादयः अजादयश्च अत् च अजाद्यत् तस्मात् अजाद्यतः - बहुव्रीहिगर्भित द्वन्द्वसमासः।

**अनुवृत्तिः** - प्रातिपदिकात्, स्त्रियाम्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अजादिभ्यः प्रातिपदिकेभ्योऽकारान्तेभ्यश्च स्त्रियां टाप् प्रत्ययो भवति।

**विशेषार्थः** - अजादि-उक्तिः अर्थात् अजादि गणपठित-शब्दानां कथनं ङीप् ङीष् इति द्वयोः बाधनार्थम्।

**साधनिका : - अजा** - अजत्वजातिविशिष्टा स्त्री इति विग्रहे अजशब्दात् 'जातेरस्त्रीविषयादयोपधात्' (सू. ५१८) इति सूत्रेण ङीष् प्रत्ययः प्राप्तः तं प्रबाध्य 'अजाद्यतष्टाप्' इत्यनेन टाप् प्रत्ययः भवति (अज + टाप्) टकार-पकारयोः इत्संज्ञायां लोपे च (अज + आ) 'अकः सवर्णे'ति दीर्घे 'अजा' इति। अजा शब्दात् 'ङ्याप्प्रातिपदिकात्' इति सूत्रनियमात् सौ 'हलङ्यादि'-लोपे **अजा** इति रूपं भवति।

**अतः** - खट्वा। **अजा**दिभिः स्त्रीत्वस्य विशेषणान्नेह - पञ्चाजी। द्विगोः (सू. ४७९) इति ङीप्।

**अत्र** हि समासार्थ समाहारनिष्ठे स्त्रीत्वम्। अजा। एडका। अश्वा। चटका। मूषिका।

**एषु** जातिलक्षणो ङीष् प्राप्तः। बाला। वत्सा। होडा। मन्दा। विलाता।

**एषु** 'वयसि प्रथमे' (सू. ४७८) ङीप्-प्राप्तः।

**सरलार्थः**

१ - **अतः** - उदाहरणं लक्ष्यते, खट्वा-इति। खट्वा - 'खट् काङ्क्षायाम्' इति धातुना 'अशुप्रषिलटिकणिखटिविशिभ्यः क्वन्' इत्यनेन क्वनि-अनुबन्धलोपे खट्व+टापि-अनुबन्धलोपे दीर्घे सु लोपे।

२ - **अजादिभिः** - अजाद्यतः इति षष्ठीमाश्रित्य अजादीनाम् अजाद्यदन्तस्य च वाच्ये स्त्रीत्वे टाप्-इत्येवम् अजादिभिः स्त्रीत्वस्य विशेषणात्। अतः पञ्चाजी-इत्यत्र टाप् न भवति। पञ्चानाम् अजानां समाहारः समाहारद्विगुसमासे 'द्विगोः' ङीपि।

३ - **अत्र हि** - अत्र पञ्चाज-शब्दे समासार्थ-भूतो यः समाहारः तन्निष्ठं स्त्रीत्वं पञ्चाज इति समुदायस्य वाच्यं, न तु अज शब्दस्य, अतः अत्र न टाप्। एडका = एडक + टाप् (आ)। अश्वा = अश्व + टाप् (आ)। चटका = चटक-जाति : पक्षि-विशेषः। मूषिका = चुचुन्दरी गन्ध-मूषी गन्ददेही तु मूषिका - इत्यमरः।

४ - **एषु** - अजादिपञ्चसु 'जातेरस्त्री' इति ङीष् प्राप्तः स अजादिटापा बाध्यते।

५ - **एषु** - बालादिपञ्चसु 'लघुबालिका।' वत्सा = बालिका। होडा = कुमारी। मन्दा = कुमारी। विलात = (विलाता) = कुमारी।

---

**'सम्भस्त्राजिनशणपिण्डेभ्यः फलात्' (वा. २४९९) सम्फला। भस्त्रफला। 'ङ्यापोः' (सू. १००१) इति ह्रस्वः**

**'सदच्काण्डप्रान्त' शतकेभ्यः पुष्पात् (वा. १४९६) सत्पुष्पा। प्राक् पुष्पा। प्रत्यक्पुष्पा।**

---

**सरलार्थः**

१ - **सम्भस्त्राः** - सम्, भस्त्र, अजिन, शण, पिण्ड, एतेभ्यः परो यः फल-शब्दः तस्मात् परे टाप् प्रत्ययः भवति। ('पाककर्ण' इति ङीपं प्रबाध्य)।

**साधनिका** : - सम्फला = समृद्धानि फलानि यस्याः सा सम् उपपदे फलात् परे ङीपं प्रबाध्य टाप् प्रत्ययेऽनुबन्धलोपे (सम्फल + आ) दीर्घे सु-लोपे।

**भस्त्रफला** - भस्त्रा इव फलानि यस्या सा। (भस्त्रा चर्मप्रसेविफा 'इत्यमरः। अत्र शंका भवति, भस्त्रा शब्दस्तु नित्य स्त्रीलिङ्गे कथं ह्रस्वत्वं तदर्थमुपरि लिखितं 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्' इति सूत्रेण संज्ञां मत्वा ह्रस्वः भवति।

२ - **सदच्काण्डः** - सत्, अच्, काण्ड, प्रान्त, शत, एक एतेभ्यः परो यः पुष्पशब्दः तस्मात् परे टाप् भवति। किन्तु (पाककर्णपर्ण) इत्यादि सूत्रेण ङीप् न भवति।

**साधनिका** : - सत्पुष्पा = सन्ति पुष्पाणि यस्याः सा इति विग्रहे सत्पुष्पशब्दात् स्त्रीत्व-विवक्षायां 'सदच्काण्ड' इति वार्तिकेन 'टाप्' प्रत्ययेऽनुबन्धलोपे (सत्पुष्प + आ) दीर्घे, सौ आगते 'हलङ्यादि-लोपे' सत्पुष्पा इति।

प्राक्पुष्पा = प्राञ्चि पुष्पाणि यस्याः सा (लुप्तनकारः अञ्चुधातुः)

प्रत्यक्पुष्पा = प्रत्यञ्चि पुष्पाणि यस्याः सा।

काण्डपुष्पा = काण्डात् पुष्पाणि यस्याः सा। (दौना)

प्रान्तपुष्पा = प्रान्ते पुष्पाणि यस्याः सा।

शतपुष्पा = शतानि पुष्पाणि यस्याः सा। (सौंफ)

एकपुष्पा = एकं पुष्पं यस्याः सा।

---

'**शूद्रा**चामहत्पूर्वाजातिः' (वा. २४००-२४०२) पुंयोगे तु शूद्री।

'**अमहत्पूर्वा** किम्? महाशूद्री। क्रुञ्चा। उष्णिहा। देवविशा। ज्येष्ठा। कनिष्ठा। मध्यमेति पुंयोगेऽपि। कोकिला जातावपि। मूलान्नञः (वा. २५००) अमूला। 'ऋन्नेभ्यो ङीप्' (सू. ३०६) कर्त्री। दण्डिनी।

---

**सरलार्थः**

१ - **शूद्राचामहत्** - शूद्रा - अमहत्पूर्वा जातिः।

शूद्रा-स्त्रीबोधक शूद्र शब्दात् टाप् प्रत्ययः भवतिः, किन्तु महत् शब्द-पूर्वकात् स्त्रीशब्दात् टाप् न भवति। समष्टिगतः अर्थः भवति - 'महत्' शब्दः पूर्वं न स्यात् किन्तु जाति-वाचकात् शूद्र-शब्दात् स्त्रीत्वे-द्योत्ये टाप् प्रत्ययो भवति।

२ - **अमहत्पूर्वा किम्?** - महती च सा शूद्रा चेति विग्रहे (कर्मधारयः)

अत्र महत्पूर्वत्वान्न टाप्, किन्तु जाति-लक्षणः ङीष्-एव।

'आभीरी तु महाशूद्री जातिपुंयोगयोः समा' इत्यमरः।

३ - **मूलान्नञः** - 'पाककर्ण' इति सूत्रे इदं वार्तिकं पठितम्।

**सरलार्थः** - नञः परो यः मूलशब्दः तस्मात् 'पाककर्ण' इति ङीष् न भवति। किन्तु टाप् भवति।

**अमूला** - न विद्यमानं मूलं यस्याः सा (अग्निशिखा-लता)

---

**(४५५) -उगितश्च। ४।१।६॥**

**उगिदन्तात्प्रातिपदिकात् स्त्रियां ङीप् स्यात्। भवती। पचन्ती। 'शपश्यनोः' (सू. ४४६) इति नुम् 'उगिदचाम्' (सू. ३६१) इति सूत्रेऽज्ग्रहणेन 'धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेव' इति नियम्यते। तेनेह न। उखास्रत्। क्विप्। 'अनिदिताम्-' (सू. ४१५) इति न लोपः। पर्णध्वत्। अञ्चतेस्तु स्यादेव प्राची। प्रतीची।**

---

४५५ - **पदच्छेदः** - उगितः, च।

**सूत्रसमासः** - उक् इत् यस्य सः उगित्। उगित इति पञ्चम्यन्तम्।

**अनुवृत्तिः** - ङीप्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उक् (उ, ऋ, ल्) इत् संज्ञकात् प्रातिपदिकात् परे स्त्रीत्वे द्योत्ये ङीप् प्रत्ययो भवति।

**साधनिका : - भवती** - भवतु (भवत्) उगित्वात् 'उगितश्च' इत्यनेन ङीप् प्रत्ययेऽनुबन्धलोपे भवती इति। अत्र भवतु इति सर्वादिगणश्च अव्युत्पन्नप्रातिपदिकत्वम्, शतृ प्रत्ययाभावात् न नुमागमः। परन्तु पचन्तीत्यत्र पच् धातोः शतृ-प्रत्ययेऽनुबन्धलोपे शपि कृते पच् + अ + अत् 'अतोगुणे पररूपे पचत् इत्यत्र ङीप् प्रत्यये नुमागमे पचन्ती इति रूपम्।

**विशेषार्थः** - **धातोश्चेद्** - उखायाः स्रंसते इति उखास्रत्, पर्णात् ध्वंसते इति पर्णध्वत्। (उखा स्रंस क्विप्, पर्ण + ध्वंस + क्विप्)

उपपद-समासे, नकार-लोपे रूपसिद्धिः। (वसुस्रंसुध्वंसुः) दः। अत्र उभयोः प्रयोगयोः उकारस्येत् संज्ञाजाता- अस्ति, अतः उगित्वात् ङीप् प्रत्ययस्य-प्राप्तिःभवति। अत्र समाधत्ते - 'उगिदचां' सूत्रस्थ-अच्-ग्रहणेन इदं ज्ञायते यत् धातूनां यदि उगित्संज्ञानिमित्तकं कार्यं करणीयं स्यात् तदा अञ्चुधातुना एव। अन्यत्र तु न भवति। एतदर्थमेव उभयत्र ङीप् प्रत्ययो न भवति।

**(४५६) -वनो र च। ४।१।७॥**

**वन्नत्तात्तदन्ताच्च प्रातिपदिकात्स्त्रियां ङीप् स्यात्, रश्चान्तादेशः।**

**वन्निति - ङ्वनिप्क्वनिप्वनिपां सामान्यग्रहणम्। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्। (प.२४) तेन प्रातिपदिकविशेषणात्तदन्तान्तमपि लभ्यते। सुत्वानमतिक्रान्ता - अतिसुत्वरी। अति धीवरी। शर्वरी। 'वनो न हश इति वक्तव्यम्' (वा. २४०५) हशन्ताद्धा तो विहितो यो वन् तदन्तात्तदन्तान्ताच्च प्रातिपदिकान्ङीप् रश्च नेत्यर्थः। ओणृ अपनयने वनिप्, 'विड्वनोः-' (सू. २९८२) इत्यात्वम्। अवावा ब्राह्मणी। राजयुध्वा। 'बहुव्रीहौ वा' (वा. २४०७) बहुधीवरी-बहुधीवा। पक्षे डाब्वक्ष्यते।**

---

४५६ - **पदच्छेदः** - वनः र च।

**अनुवृत्तिः** - ङीप्, स्त्रियाम्, प्रातिपदिकात्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - वन्-प्रत्ययान्तात् तथा वन्नन्तान्तात् प्रातिपदिकात् स्त्रीलिङ्गे ङीप् प्रत्ययः तथाच वन्-प्रत्यय-सम्बन्धि नकारस्य रेफादेशश्च भवति।

१ - **वन्** इत्यनेन ङ्वनिप्, क्वनिप्, वनिप् - इत्येतेषां त्रयाणां प्रत्ययानां ग्रहणं भवति। 'प्रत्ययग्रहणे यस्मात् स विहितः तदादेःस्तदन्तस्य ग्रहणम् (प. २४) अनया परिभाषया प्रातिपदिकग्रहणविशेषणात् तदादि तदन्तस्य च उपस्थितिर्भवति। तेन सुत्वानमतिक्रान्ता-अतिसुत्वरी। अतिधीवरी-इत्यादीनि रूपाणि सिद्ध्यन्ति।'

२ - **वनोन (वा.)** हशन्तधातुना विहितः वन्नन्तः तथा वन्नन्तान्तशब्दः भवति चेत् ततः ङीप् तथा च रेफादेशो न भवति।

**अवावा** = ओणृ + वनिप् (अन्येभ्योऽपि दृश्यते) (ओ + आ + वन्) 'विड्वनोरनुनासिकस्यात्' इति आत्वे (अवादेशे = अवावन्) विभक्ति कार्ये (सुलोपे, दीर्घे, नलोपे) ओणृ धातोः अवयवः ण्कारः हश् प्रत्याहारे अस्ति अतः तदुत्तरवन् प्रत्ययान्त-त्वात् उक्तवार्तिकेन ङीप् तथा रस्य निषेधो भवति।

**(४५७) -पादोऽन्यतरस्याम्। ४।१।८॥**

**पाच्छब्दः कृतसमासान्तः तदन्तात् प्रातिपदिकात् ङीब्वा स्यात्। द्विपदी-द्विपाद्।**

---

४५७ - **पदच्छेदः** - पादः, अन्यतरस्याम्।

**अनुवृत्तिः** - स्त्रियाम्, ङीप्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कृतसमासान्तात् पाद-शब्दात् स्त्रीत्वे द्योत्ये विकल्पेन ङीप् प्रत्ययः भवति। यथा - द्विपदी-द्विपदा।

**साधनिका : - द्विपदी-द्विपदा** - द्वौ पादौ यस्याः सा (बहुव्रीहिः समासः) द्वि+औ, पाद+औ, विभक्तिलोपे दकारोत्तरवर्तिनः अकारस्य 'संख्यासुपूर्वस्य' इत्यनेन लोपे 'पादोऽन्यतरस्याम्' इत्यनेन विकल्पेन ङीप् प्रत्यये, भत्वात् पाद् इत्यस्य पदादेशे द्विपदी ङीबाबभावे द्विपाद्।

**(४५८) -टाबृचि। ४।१।९॥**

ऋचि वाच्यायां पदान्ताट्टाप् स्यात्। द्विपदा ऋक्। एकपदा। 'न षट्स्वस्रादिभ्यः (सू. ३०८) पञ्च। चतस्रः।' पञ्च इत्यत्र न लोपे कृतेऽपि 'ष्णान्ता षट्' (सू. ३६१) इति षट्संज्ञां प्रति 'न लोपः सुप्स्वर-' (सू. ३५३) इति नलोपस्यासिद्धत्वात् 'न षट्-स्वस्रादिभ्यः' (सू. ३०८) इति न टाप्।

---

**४५८ - पदच्छेदः** - टाप्, ऋचि।

**अनुवृत्तिः** - पादः, प्रातिपदिकात्, स्त्रियाम्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ऋचावाच्ये पादशब्दान्तात् टाप् प्रत्ययः भवति।

**विशेषार्थः** - पञ्च-चतस्र इत्यत्र 'न षट् स्वस्रादिभ्य' इत्यनेन ङीप्-टापोः निषेधः विधीयते।

**पञ्च** - पञ्चन् - अत्र न लोपे सति 'ष्णान्ताषट्' इति सूत्रेण विहित षट् संज्ञांप्रति 'न लोपः सुप्स्वर' इति सूत्र नियमात् नलोपस्यासिद्धत्वात् 'न षट्स्वस्रादिभ्यः' द्वारा निषेधेन टाप् न भवति।

**(४५९) -मनः। ४।१।११॥**

**मन्नतान्न ङीप्। सीमा। सीमानौ।**

---

**४५९ - पदच्छेदः** - मनः।

**अनुवृत्तिः** - न, ङीप्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधि-निषेधसूत्रम्।

**सरलार्थः** - मन्नन्तात् प्रातिपदिकात् स्त्रीलिङ्गे ङीप् प्रत्ययो न भवति। सीमा-सीमानौ (सीमन्)

**(४६०) -अनो बहुव्रीहेः। ४।१।१२॥**

**अन्नन्ताद् बहुव्रीहेर्न ङीप्। बहुयज्वा। बहुयज्वानौ।**

---

**४६० - पदच्छेदः** - अनः, बहुव्रीहेः।

**अनुवृत्तिः** - न, ङीप्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधि-निषेधसूत्रम्।

**सरलार्थः** - 'अन्' अन्तात् बहुव्रीहेः ङीप् प्रत्ययो न भवति।

**(४६१) -डाबुभाभ्यामन्यतरस्याम्। ४।१।२८॥**

**सूत्रद्वयोपात्ताभ्यां डाब्वा स्यात्। सीमा, सीमे-सीमानौ। दामा, दामे-दामानौ। न पुंसिदाम इत्यमरः। बहुयज्वा, बहुयज्वे-बहुयज्वानौ।**

---

**४६१ - पदच्छेदः** - डाप्, उभाभ्याम्, अन्यतरस्याम्।

**अनुवृत्तिः** - स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'मनः' तथा 'अनो बहुव्रीहेः' इति सूत्राभ्यां विहितः प्रत्ययः अनेन सूत्रेण डाप् प्रत्ययविकल्पेन क्रियते।

मन्-अन्तः - सीमा-सीमे-सीमाः।

प्रक्रिया - सीमन्+डा (आ) टि लोपे (सीम्+आ) = सीमा।

दामा - दा धातोः औणादिकमनिन्प्रत्ययः (हिरण्मयं दाम दक्षिणा) दामन् शब्दः नपुंसके, न तु पुंसि (निषिद्धं लिङ्गं शेषार्थं) इति वचनात्

**बहुयज्वा** - बहवो यज्वानो यस्याः सा = डापि, टि लोपे, सोर्हल्ङ्यादिलोपे

**(४६२) -अन उपधालोपिनोऽन्यतस्याम्। ४।१।२८॥**

**अन्नन्ताद् बहुव्रीहेरुपधालोपिनो वा ङीप् स्यात्। पक्षे डाब्ङीप्निषेधौ। बहुराज्ञी। बहुराजा। बहुराज्ञ्यौ, बहुराजे-बहुराजानौ।**

---

४६२ - **पदच्छेदः** - अनः, उपधालोपिनः, अन्यतस्याम्।

**अनुवृत्तिः** - बहुव्रीहेः, ङीप्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उपधालोपिनः अन्नन्तात् बहुव्रीहेः विकल्पेन ङीप् प्रत्ययः भवति। पक्षे डाप्-ङीप्निषेधौ।

**प्रयोगसिद्धि - बहुराज्ञी** - बहु-राजन्+ङीप् (ई) 'अल्लोपोऽनः' इति अकारलोपे (बहुराज्न् + ई) श्चुत्वे। बहुराज्ञ्+ई-सु 'हल्ङ्या दि लोपे बहुराज्ञी। बहुराज्ञ्यौ। बहुराज्ञ्यः। पक्षे डाप् - बहुराजा - बहुराजे - बहुराजाः। 'रमावत्'। डाप्-ङीप् निषेधे - बहुराजा-बहुराजानौ-बहुराजानः।

**(४६३) -प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः। ६।३।४४॥**

**प्रत्ययस्थात्ककारात्पूर्वस्याकारस्येकारः स्यादापि परे स आप् सुपःपरो न चेत्। सर्विका। कारिका। अतः किम्? नौका। प्रत्ययस्थात् किम्? बहुपरिव्राजका नगरी। कात् किम्? नन्दना। पूर्वस्य किम्? परस्य मा भूत्। कटुका। अत इति तपरः किम्? राका। अपि किम्? कारकः। 'मामकनरकयोरुपसंख्यानम्' (वा. ८५२४) मामिका। नरान्कायतीति नरिका। त्यक्त्यपोश्च॥ (८५२५) दाक्षिणात्यिका। इहत्यिका।**

---

४६३ - **पदच्छेदः** - प्रत्ययस्थात्, कात्, पूर्वस्य, अतः, इत्, आपि, असुपः

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - प्रत्ययस्थात् ककारात् पूर्वम् अकारस्य इकारः भवति आप् (टाप्, डाप्, चाप्) प्रत्यये परे, किन्तु 'आप्' सुपः परवर्ती न स्यात्।

**प्रयोगसिद्धिः** - सर्विका - सर्व+टाप् (आ) सवर्ण दीर्घे, सर्वा+आक् (अकच्) 'अव्ययसर्वनाम्नामकच् प्राक्टेः' (सर्व् + अक् + आ) ककारात् पूर्वं अकारस्य 'प्रत्ययस्थात्' इत्यादिना इकारे। (सर्व् इक् + आ) = सर्विका। (सभी) कारिका = (करनेवाली)

(वा.) मामकनरकयोः-

**सरलार्थः** - मामक, नरक इत्यनयोः ककाराद् पूर्वं अकारस्य इकारः भवति। ककारात् परम् आप् भवति चेत्।

**मामिका** = (मेरी) मम + अ (अण्) 'युष्मदस्मदोरन्यतरस्यां खञ्' 'तवकममकावेकवचने' ममक आदेशे (मामक + अ) आदिवृद्धिः। 'यस्येतिच' अ लोपे, टापि (आ) कात् पूर्वं अकारस्य इकारः (माम् + इक् + आ) = मामिका। इत्थं = नरिका। नरान् कायति (मनुष्यो का आवाज देनेवाली)।

(वा.) त्यक्त्यपोश्च = त्यक्, त्यप् प्रत्ययान्त प्रत्ययस्थकात् पूर्व 'अ' इत्यस्य 'इ' भवति।

**(४६४) -न यासयोः। ७।३।८५॥**

**यत्तदोरस्येन्न स्यात्। यका। सका। यकाम्। 'त्यक्नश्च निषेधः (वा. ८५२६) उपत्यका। अधित्यका।' आशिषि वुनश्च न (वा. ८५२८) जीवका। भवका।**

---

४६४ - **पदच्छेदः** - न, यासयोः।

**अनुवृत्तिः** - प्रत्ययस्थात्, कात्, पूर्वस्य, अतः इत्, आपि, असुपः।

**सरलार्थः** - यद्, तदोः शब्दयोः अकारस्य इकारः न भवति। यका। सका।

**उत्तरपदलोपेन (वा. ४५२९) देवदत्तिका। देवका। क्षिपकादीनां च (वा. ४५३०) क्षिपका। ध्रुवका। कन्यका। चटका। तारकाज्योतिषि (वा. ४५३१) अन्यत्र तारिका। वर्णका तान्तवे (वा. ४५३२) अन्यत्र**

**वर्णिका। वर्तका शकुनौ प्राचाम्। (वा. ४५३३) उदीचां तु वर्तिका। 'अष्टका पितृदैवत्ये' (वा. ४५३४) अष्टिकान्या। 'सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम् (वा. ४५३५) इह वा अ इति छेदः। कात्पूर्वस्याकारादेशो वेत्यर्थः। तेन पुत्रकाशब्दे ङीनः ईवर्णस्य पक्षेऽकारः। अन्यत्रेत्वबाधनार्थमकारस्यैव पक्षेऽकारः। सूतिका-सूतका इत्यादि।**

---

(वा. उत्तरपद.) उत्तरपदस्य लोपे सति 'अ' इत्यस्य स्थाने 'इ' न भवति। **देवका** - देवदत्त, शब्दात् स्वार्थे क प्रत्ययः। 'अनजादौ च विभाषा लोपो वक्तव्यः' इति दत्त शब्दस्य लोपः। दत्त लोपाभावे देवदत्तिका।

(वा.) क्षिपकादीनां च = क्षिपकादि गण पठित शब्दानामपि अकारस्य इकारो न भवति। क्षिपका - क्षिप्-प्रेरणे। 'इगुप-धज्ञा.' इत्यनेन 'क' प्रत्यये कित्वात् गुणाभावे क्षिपा शब्दात् स्वार्थे क प्रत्ययः 'केऽणः' इति ह्रस्वे पुनः टापि।

(वा.) तारकाज्योतिषि = ज्योतिषि वाच्ये (नक्षत्र) तारका इति। इत्वं न भवति। 'तृ प्लवन सन्तरयोः' ण्वुल्, अकादेशे, वृद्धिः, रपरत्वं टाप्।

(वा.) वर्णका तान्तवे = तान्तवे (सूत) अर्थे गम्ये 'वर्णका' भवति, इत्वं न भवति। तन्तूनां विकारस्तान्तवम्। 'ओरञ्' (वर्णका - प्रावरण विशेषः)

(वा.) वर्तका शकुनौ प्राचाम् = शकुतिः पक्षी, तत्र गम्ये प्राचां मते वर्तका इति भवति। इत्वं न भवति।

(वा.) अष्टकापितृदेवत्ये = पितृकार्ये (श्राद्धादि कार्ये) द्योत्ये अष्टका शब्दः एव भवति इत्वं न भवति। अश्नन्ति पित्रर्थे ब्राह्मणाः यस्याम् - 'अश् भोजने' 'इष्यशिभ्यां तकन्' इति तकन् प्रत्ययः 'व्रश्चे' ति षः, ष्टुत्वेन टः, अष्टक शब्दात् टाप्।

**अष्टिका** - अष्टौ अध्यायाः परिमाणमस्याः अष्टिका पाणिनीयाष्टाध्यायी। 'संख्याया अति' कन् इत्वादि कार्यम्।

(वा.) सूतिका. - सूतका, पुत्रिका, वृन्दारका इत्येतेषां शब्दानां विकल्पेन इत्वं भवति। (पुत्र + ङीन्) ई) = पुत्री, पुत्री + क = पुत्रीक, पुत्रीक + टाप् = पुत्रिका। पक्षेऽकारः पुत्रका।

**(४६५) -उदीचामातः स्थाने यकपूर्वायाः। ७।३।४६॥**

**यकपूर्वकस्य स्त्रीप्रत्ययाकारस्यस्थाने योऽकारस्तस्य कात्पूर्वस्येद्वा स्यादापि परे। 'केऽणः' (सू. ८३४) इति ह्रस्वः। आर्यका। आर्यिका। चटका। चटकिका। आतः किम्? साङ्काश्ये भवा साङ्काश्यिका। यक इति किम्? अश्विका। स्त्रीप्रत्यय इति किम्? शुभं यातीति शुभंयाः। अज्ञाता शुभंयाः शुभंयिका। धात्वन्तयकोस्तु नित्यम् (वा. ४५३५) सुनयिका। सुपाकिका।**

---

४६५ - **पदच्छेदः** - उदीचाम्, आतः, स्थाने, यकपूर्वायाः।

**अनुवृत्तिः** - न, प्रत्ययस्थात्, कात्, पूर्वस्य, अतः, इत्, अपि, असुपः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यकारककारपूर्वकस्त्रीसम्बन्धिनः अकारस्य स्थाने विहिताकारस्य आप् प्रत्यये परे इकारः भवति, विकल्पेन।

**विशेषार्थः** - यश्च कश्च यकौ तों पूर्वौ यस्याः तस्याः यक-पूर्वायाः। यकार ककारपूर्वकस्य आकारस्य स्थाने यः अकारः तस्य उदीच्य-आचार्याणां मतानुसारेण आप् प्रत्यये इकारः न भवति।

(वा.) धात्वन्तयकोस्तु नित्यम् = धात्वन्त यकारककार पूर्वक-स्त्रीसम्बन्धितः आकारस्थानिकस्य अकारस्य नित्यमिकारः भवति। सुनयिका = णीञ् प्रापणे धातोः पचाद्यच्। सार्वधातुके गुणेऽयादेशे नयशब्दः। सुशोभनं नयः यस्याः सा सुनया। स्वार्थे कः। 'केऽणः' इति ह्रस्व, पुनष्टाप्। सुनयका इति।

अत्र यकारस्य धात्वन्तत्वात् ततः परस्याकारस्य इत्व विकल्पः न। किन्तु 'प्रत्यस्थात्.' इत्यादिना नित्यमित्वम् भवति।

**(४६६) -भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि। ७।३।४७॥**

**स्वेत्यन्तं लुप्तष्ष्ठीकं पदम्, एषामत इद्वा स्यात्। तदन्तविधिनैव सिद्धे नञ्पूर्वाणामपीति स्पष्टार्थम्। भस्त्राग्रहण मुपसर्जनार्थम्। अन्यस्य तूत्तरसूत्रेण सिद्धम्। एषा द्वा एतयोस्तु सपूर्वयोनेत्त्वम्। अन्तर्वर्तिनीं विभक्तिमाश्रित्य 'असुपः' इति प्रतिषेधात्। अनेषका। परमैषका। अद्वके। परमद्वके। स्वशब्दग्रहणं संज्ञोपसर्जनार्थम्। इह हि 'आतः स्थाने' इत्यनुवृत्तं स्वशब्दस्यातो विशेषणम्। न तु द्वैषयोरसम्भवात्। नाप्यन्येषाम् अव्यभिचारात्। स्वशब्दस्त्वनुपर्सनमात्मीयवाची अकजर्हः। अर्थान्तरे तु न स्त्री। संज्ञोपसर्जनीभूतस्तु कप्रत्ययान्त त्वाद्भवत्युदाहरणम्। एवं चात्मीयायां स्विका। परमस्विकेति। नित्यमेवेत्त्वम्। निर्भस्त्रका निर्भस्त्रिका। एषका-एषिका। कृतषत्वनिर्देशान्नेह विकल्पः। एतिके-एतिका। अजका-अजिका। ज्ञका-ज्ञिका। द्वके-द्विके। निःस्वका-निःस्विका।**

---

४६६ - **पदच्छेदः** - भ्रस्त्रैषाजाज्ञाद्वास्वाः, नञ्पूर्वाणाम् अपि।

**अनुवृत्तिः** - न, उदीचाम्, आतः स्थाने, प्रत्ययस्थात्, कात्, पूर्वस्य, अतः, इत्, आपि, असुपः।

**सूत्रप्रकारः** - विधिसूत्रम्। (भ्रस्त्रा, एषा, अजा, ज्ञा, द्वा, स्वा एषां षण्णां द्वन्द्व समासः)

**सरलार्थः** - एतेषां नञ् पूर्वाणां वा आकारस्थानिक अकारस्य स्थाने इकारादेशः न भवति। यथा **निर्भस्त्रिका।** त्रिषु लिङ्गेषु समानम्।

भस्त्रायाः निष्क्रान्ता (भांथी से निकली हुई) भस्त्रा + ङसि + निर 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति समासे निर् इत्यस्य पूर्वनिपाते स्वार्थे कप्रत्यये (निर्भस्त्रा + क) 'केऽणः' इति ह्रस्वत्वे टापि (निर्भस्त्र क + आ) ककारात् पूर्वम् अकारस्य इकारे दीर्घे निर्भस्त्रिका। विकल्पेन इत्वे, इत्वा भावे निर्भस्त्रका इति।

**(४६७) -अभाषितपुंस्काच्च। ७।३।४८॥**

**एतस्माद्विहितस्य आतः स्थाने इद्वा स्यात्। गङ्गका-गङ्गिका। बहुव्रीहेर्भाषितपुंस्कत्वात्ततो विहितस्य नित्यम्। अज्ञाताखट्वा अखट्विका। शैषिके कपि तु विकल्प एव।**

---

४६७ - **पदच्छेदः** - अभाषितपुंस्कात् च।

**अनुवृत्तिः** - न, नञ्पूर्वाणाम्, अपि, उदीचाम्, आतः स्थाने, प्रत्ययस्थात्कात् पूर्वस्य अतः इत्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अभाषितपुंस्कात् विहितस्य प्रत्ययस्थितककारात्पूर्ववर्तिनः आकारस्य स्थाने इकारः विकल्पेन भवति।

**विशेषार्थः** - आकारस्थानिकस्य आकारस्थाने नञ्पूर्वकस्य अनञ्पूर्वस्य वा उदीच्या-चार्याणां मतानुसारेण इकारादेशः न भवति।

**(४६८) -आदाचार्याणम्। ७।३।४९॥**

**पूर्वसूत्रविषये आद्वा। गङ्गाका। उक्तपुंसकात्तु-शुभ्रिका।**

---

४६८ - **पदच्छेदः** - आत्, आचार्याणाम्।

**अनुवृत्तिः** - अभाषितपुंस्कात्, नञ्पूर्वाणामपि, आतः स्थाने, प्रत्ययस्थात् कात् पूर्वस्य, अतः आपि।

**सूत्रप्रकारः** - विधिसूत्रम्। (विकल्प)

**सरलार्थः** - अभाषितपुंसकात् विहित-आकारस्थाने विकल्पेन अकारादेशः भवति।

**(४६९) -अनुपसर्जनात्। ४।१।१४॥**

**अधिकारोऽयम् 'यूनस्तिः' (सू. ५३१) इत्यभिव्याप्य। अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति।**

---

४६९ - **पदच्छेदः** - अनुपसर्जनात्।

**अनुवृत्तिः** - स्त्रियाम्, प्रत्ययः।

**सूत्रप्रकारः** - अधिकारसूत्रम्।

**सरलार्थः** - 'यूनस्ति' सूत्रं यावत् अस्याधिकारः। स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति।

**(४७०) -टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः। ४।१।१५॥**

**अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप् स्यात्। कुरुचरी। नदट् नदी। उपसर्जनत्वान्नेह - बहुकुरुचरा। वक्ष्यमाणेत्यत्र टित्त्वादुगित्वाच्च ङीप्प्राप्तः। यासुटो ङित्वेन 'लाश्रयमनुबन्धकार्यं नादेशानाम्' (प. ७०) इति ज्ञापनान्न भवति। 'श्नः शानचः' शित्त्वेन क्वचिदनुबन्धकार्येऽप्यनल्विधाविति निषेधज्ञापनाद्वा। सौपर्णेयी। द्वन्द्वी। औत्सी। उरुद्वयसी। उरुदघ्नी। उरुमात्री। पञ्चतयी। आक्षिकी। लावणिकी। यादृशी। इत्वरी 'ताच्छीलिके णेऽपि' (५.६८) चौरी। नञ्स्नञीकक्ख्युंतरुणतलुनानामुपसंख्यानम् (वा. २४२५) स्त्रैणी। पौंस्नी। शाक्तीकी। आढ्यङ्करणी। तरुणी। तलुनी।**

---

४७० - **पदच्छेदः** - टित्, ढ, अण्, अञ्, द्वयसच्, दघ्नच्, मात्रच्, तयप्, ठक्, ठञ्, कञ्, क्वरप्-एषां द्वादशानां समाहार द्वन्द्वात् पञ्चम्येकवचनम्।

**अनुवृत्तिः** - अतः, ङीप्, स्त्रियाम्, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अनुपसर्जनं यद् टिदाद्यन्तं पदं तस्मात् तथा च अदन्तात्प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययः भवति।

**विशेषार्थः** - टिदन्तं, ढप्रत्ययान्तं, अण्प्रत्ययान्तं, अञ्प्रत्ययान्तं, द्वयसच्प्रत्ययान्तं, दघ्नच्प्रत्ययान्तं, मात्रच्प्रत्ययान्तं, तयप्प्रत्ययान्तं, ढक्प्रत्ययान्तं, ढञ्-प्रत्ययान्तं, कञ्-प्रत्ययान्तं तथा च क्वरप्प्रत्ययान्तं यः शब्दः तदन्तात् तथाच अकारान्त-अनुपसर्जनप्रातिपदिकात् परे स्त्रियां ङीप् प्रत्ययो भवति।

(वा.) - **नञ्स्नञ.**- वार्तिकार्थः - नञ्, स्नञ्, ईकक् तथा ख्युन् इत्येतत् प्रत्ययान्त शब्देभ्यः तथा च तरुण, तलुन प्रातिपदिकाभ्यां स्त्रीत्वे द्योत्ये ङीप् प्रत्ययो भवति।

**(४७१) -यञश्च। ४।१।९६॥**

**यञन्तात्स्त्रियां ङीप्स्यात्। अकारलोपे कृते।**

---

४७१ - **पदच्छेदः** - यञः, च

**अनुवृत्तिः** - अतः, ङीप्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यञ् अन्तो यञन्तः, तस्मात् यञन्तात् प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययः भवति।

**(४७२) -हलस्तद्धितस्य। ६।४।१५॥**

**हलः परस्य तद्धितयकारस्योपधाभूतस्य लोपः स्यादीति परे। गार्गी। 'अनपत्याधिकारस्थान्न ङीप्' (वा. २४२६)। द्वीपे भवा द्वैप्या। अधिकारग्रहणात् देवस्यापत्यं दैव्या 'देवाद्यञञौ' इति हि यञ् प्राग् दीव्यतीयो न त्वपत्याधिकारपठितः।**

---

४७२ - **पदच्छेदः** - हलः तद्धितस्य।

**अनुवृत्तिः** - उपधायाः, ईत्, भस्य, अङ्गस्य, लोपः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ईकारे परे भसङ्गकाङ्गस्य हलः परस्य तद्धितोपधाभूतस्य यकारस्य लोपः भवति।

**(४७३) -प्राचां ष्फ तद्धितः। ४।१।१७॥**

**यञन्तात् ष्फो वा स्यात् स च तद्धितः।**

---

४७३ - **पदच्छेदः** - प्राचां, ष्फ, तद्धितः।

**अनुवृत्तिः** - अतः, यञः, अनुपर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अनुपसर्जनात् यञन्तात् प्रातिपदिकात् स्त्रीत्वे विकल्पेन ष्फ प्रत्ययः भवति। स च तद्धितः स्यात्।

**(४७४) -षः प्रत्ययस्य। १।३।६॥**

**प्रत्ययस्यादिः ष इत् स्यात्।**

---

४७४ - **पदच्छेदः** - षः, प्रत्ययस्य।

**अनुवृत्तिः** - उपदेशे, आदिः, इत्।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - प्रत्यस्य आदौ विद्यमानस्य षकारस्य इत् संज्ञा भवति।

**(४७५) -आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्। ७।१।२॥**

**प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः तद्धितान्तत्वात्प्रातिपदिकत्वम्। षित्त्वसामर्थ्यात्ष्फेणोक्तेऽपि स्त्रीत्वे। 'षिद्गौरा-' (सू. ४६८) इति वक्ष्यमाणो ङीष्। गार्ग्यायणी।**

---

४७५ - **पदच्छेदः** - आयनेयीनीयियः, फढरवछघां, प्रत्ययादीनाम् त्रिपदात्मकं सूत्रम्।

**अनुवृत्तिः** - अङ्गस्य।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - प्रत्ययादौ फढखछघ एते वर्णाः भवन्ति चेत् तत्स्थाने क्रमेण फ-आयन्, ढ-एय्, ख-ईन्, छ-ईय्, घ-इय् ङते आदेशाः भवन्ति।

प्रयोगसिद्धिः - गर्गशब्दात् 'गर्गादिभ्यो यञ्' इत्यनेन यञि अनुबन्ध-लोपे, आदिवृद्धिः अकारलोपे च गार्ग्य शब्दात् 'प्राचांष्फ' इति ष्फ प्रत्ययेऽनुबन्धलोपे फस्य-आयने 'यस्येतिच' अकार लोपे षृत्वात् 'षिद्गौरादिभ्यश्च' इत्यनेन ङीष् प्रत्यये णत्वे **गार्ग्यायणी।**

**(४७६) -सर्वत्र लोहितादिकतन्तेभ्यः। ४।१।१८॥**

**लोहित्यादिभ्यः कतशब्दान्तेभ्यो यञन्तेभ्यो नित्यं ष्फः स्यात्। लौहित्यायनी। कात्यायनी।**

---

४७६ - **पदच्छेदः** - सर्वत्र, लोहितादिकतन्तेभ्यः।

**अनुवृत्तिः** - ष्फ, तद्धितः, अतः, यञः, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - लोहितदिगण पठितात् शब्दात् - कत शब्द पर्यन्तं यञ् प्रत्ययान्त प्रातिपदिकात् स्त्रियां सर्वेषामाचार्याणां मतानुसारेण ष्फ प्रत्ययः भवति।

**(४७७) -कौरव्यमाण्डूकाभ्यां च। ८।१।१९॥**

**आभ्यां ष्फः स्यात्। क्रमेण टाब्ङीषोरपवादः। कुर्वादिभ्यो ण्यः। कौरव्यायणी। ढक्च मण्डूकात् (सू. ११२२) इत्यण्। माण्डूकायनी 'आसुरेरुपसंख्यानम्' (वा. २४३३) आसुरायणी।**

---

४७७ - **पदच्छेदः** - कौरव्यमाण्डूकाभ्यां, च।

**अनुवृत्तिः** - ष्फः, तद्धितः, अतः, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कौरव्यश्च माण्डूकश्च कौरव्यमाण्डूकौ ताभ्याम्। कौरव्य शब्दात् तथा च माण्डूक शब्दात् स्त्रियां ष्फ प्रत्ययः भवति।

**(४७८) -वयसि प्रथमे। ८।१।२०॥**

**प्रथमवयोवाचिनोऽदन्तात्स्त्रियां ङीप् स्यात्। कुमारी। 'वयस्यचरम इति वाच्यम्' (वा. २४३५) वधूटी। चिरण्टी वधूटचिरण्टशब्दौ यौवनवाचिनौ। 'अतः' किम्? शिशुः। कन्याया न, कन्यायाः कनीन च (सू. ११११) इति निर्देशात्।**

---

४७८ - **पदच्छेदः** - वयसि, प्रथमे।

**अनुवृत्तिः** - ङीप्, अतः, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - प्रथमवयसः बोधकात् ह्रस्वाकारान्तात् शब्दात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययो भवति। (वा. २४३५) अन्तिम वयोः भिन्नवयसः वाचितः शब्दात् ङीप् प्रत्ययो भवति।

वयः त्रिविधं भवति-

पिता रक्षति कौमारे भर्ता रक्षति यौवने।

पुत्रस्तु स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हति॥

चतुर्विधं वयः - अन्ये -

आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम्।

तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति॥

वधूटी - (युवतिः) वधूटशब्दात् स्त्रीत्वविवक्षायां (वयस्यचरम इति वाच्यम्) इति वार्तिकेन ङीप् प्रत्ययेऽनुबन्धलोपे (वधूट + ई) अकारलोपे वर्णसम्मेलने वधूटी इति।

**(४७९) -द्विगोः। ८।१।२०॥**

**अदन्तात् द्विगोर्ङीप् स्यात्। त्रिलोकी। अजादित्वात् त्रिफला। त्र्यनीका सेना।**

---

४७९ - **पदच्छेदः** - द्विगोः।

**अनुवृत्तिः** - अतः, ङीप्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ह्रस्व अकारान्तात्, प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययः भवति।

**प्रयोगसिद्धिः** - **त्रिलोकी** = त्रयणां लोकानां समाहारः इति विग्रहे 'तद्धितार्थोत्तरः' इति द्विगुसमासः त्रिलोक शब्दात् टाबपवादो ङीप् भवति।

**(४८०) -अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि। ८।१।२२॥**

**अपरिमाणान्ताद् बिस्ताद्यन्ताच्च द्विगोर्ङीब्न स्यात्तद्धितलुकि सति। पञ्चभिरश्वैः क्रीता पञ्चाश्वा। आर्हीयष्ठक्। तस्य 'अध्यर्ध' (सू. १६९३) इति लुक्। द्वौ बिस्तौ पचति। द्विबिस्ता। द्विकम्बल्या। परिमाणान्तात्तु द्वयाढकी। 'तद्धितलुकि' किम्? समाहारे पञ्चाश्वी।**

---

४८० - **पदच्छेदः** - अपरिमाणविस्ताचितकम्बल्येभ्यः, न, तद्धितलुकि।

**अनुवृत्तिः** - द्विगोः, ङीप्, अतः, अनुपसर्जनात्, स्त्रियाम्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिनिषेधसूत्रम्।

**सरलार्थः** - अपरिमाणान्तात् विस्तान्तात् आचितान्त-कम्बल्यशब्दान्तात् द्विगुसमासात् विहितस्य तद्धितप्रत्ययस्य लुक्सत्वे ङीप् प्रत्ययः न भवति। (विस्तादिशब्दः परिमाणवाची - यथा **पञ्चाश्वा = पञ्चभिः - अश्वैः क्रीता**)।

**(४८१) -काण्डान्तात् क्षेत्रे। ४।१।२३॥**

**क्षेत्रे यः काण्डान्तो द्विगुस्ततो न ङीप् तद्धितलुकि। द्वे काण्डे प्रमाणमस्या द्विकाण्डा क्षेत्रभक्तिः। 'प्रमाणे द्वयसच्' (सू. १८३८) इति विहितस्य मात्रचः 'प्रमाणे लः' 'द्विगोर्नित्यम्' (वा. ३१२९-३०) इति लुक्। 'क्षेत्रे किम्? द्विकाण्डी रज्जुः।'**

---

४८१ - **पदच्छेदः** - काण्डान्तात्, क्षेत्रे।

**अनुवृत्तिः** - त, तद्धितलुकि, द्विगोः, ङीप्, अतः, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधि निषेध सूत्रम्।

**सरलार्थः** - काण्डशब्दान्तात् अनुपसर्जनद्विगुसंज्ञकप्रातिपदिकात् तद्धितलुकि स्त्रियां ङीप् प्रत्ययो न भवति।

**प्रयोगसिद्धिः** - **द्विकाण्डा** = द्वे काण्डे प्रमाणमस्या इति विग्रहे (षोडशहस्तपरिमिता भूमिः) अत्र 'द्विगोः' सूत्रात् प्राप्तः ङीप् प्रत्ययः भवति किन्तु तद्धितप्रत्ययस्य 'मात्रच्' इत्यस्य लुक् भवति अतः 'काण्डान्तात् क्षेत्रे' इति निषिध्य टाप् भवति।

**(४८२) -पुरुषात्प्रमाणेऽन्यतरस्याम्। ४।१।२४॥**

**प्रमाणे यः पुरुषस्तदन्ताद् द्विगोर्ङीब्वा स्यात्तद्धितलुकि द्वौ पुरुषौ प्रमाणमस्याः सा द्विपुरुषी - द्विपुरुषा वा परिखा।**

---

४८२ - **पदच्छेदः** - पुरुषात्, प्रमाणे, अन्यतरस्याम्।

**अनुवृत्तिः** - न, तद्धितलुकि, द्विगोः, ङीप्, अतः, स्त्रियाम्, अनुपसर्जनात्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्। (विकल्प)

**सरलार्थः** - प्रमाणवाचकात् पुरुषशब्दान्तात् द्विगुसंज्ञकप्रातिपदिकात् स्त्रियां तद्धितप्रत्ययस्य लुकि सति विकल्पेन ङीप् प्रत्ययः भवति। द्विपुरुषो-द्विपुरुषा = द्वौ पुरुषौ प्रमाणमस्याः सा।

**(४८३) -ऊधसोऽनङ्। ८।१।२४॥**

**ऊधोऽन्तस्य बहुव्रीहेरनङादेशः स्यात् स्त्रियाम्। इत्यनङि कृते ङीप्ङीष् निषेधेषु प्राप्तेषु।**

---

४८३ - **पदच्छेदः** - ऊधसः, अनङ्।

**अनुवृत्तिः** - बहुव्रीहौ, समासान्ताः, तद्धिताः, ङ्याप्प्रातिपदिकात् प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - स्त्रीलिङ्गे ऊधस् शब्दान्तबहुव्रीहिसमासस्य अन्तावयवस्य अनङ् आदेशः भवति।

**(४८४) -बहुव्रीहेरूधसो ङीष्। ८।१।२१॥**

**ऊधोऽन्ताद् बहुव्रीहेर्ङीष् स्यात् स्त्रियाम्। कुण्डोध्नी। 'स्त्रियाम्' किम्? कुण्डोधो धैनुकम्। इहानङपि न तद्विधौ 'स्त्रियाम्' (वा. ३३६७) इत्युपसंख्यानात्।**

---

४८४ - **पदच्छेदः** - बहुव्रीहेः, ऊधसः, ङीष्।

**अनुवृत्तिः** - स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - स्त्रीलिङ्गे उधस्शब्दान्तात् बहुव्रीहेः ङीष् प्रत्ययो भवति।

**प्रयोगसिद्धिः** - **कुण्डोध्नी** = कुण्डम् इव ऊधः यस्याः सा इति विग्रहे, बहुव्रीहि-समासे, गुणेऽनङादेशे, ङीष् प्रत्यये कुण्डोध्नी इति रूपम्।

**(४८५) -सङ्ख्याव्ययादेर्ङीप्। ८।१।२६॥**

**ङीषोऽपवादः। द्वयूध्नी। अत्यूध्नी बहुव्रीहेरित्येव। ऊधोऽतिक्रान्ता अत्यूधाः।**

---

४८५ - **पदच्छेदः** - संख्याव्ययादेः, ङीप्।

**अनुवृत्तिः** - बहुव्रीहेः, ऊधसः, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - संख्याअव्ययपूर्वक-शब्द-पूर्वक-ऊधस्-शब्दान्त-बहुव्रीहि-समासयुक्तात्-प्रातिपदिकात् स्त्रियां ङीप्-प्रत्ययः भवति। (द्वे ऊधसी यस्याः सा)

**(४८६) -दामहायनान्ताच्च। ४।१।२७॥**

**संख्यादेबहुर्व्रीहेर्दामान्ताद् हायनान्ताच्च ङीप् स्यात्। दामान्ते डाप्प्रतिषेधयोः प्राप्तयोर्हायनान्ते टापि प्राप्ते वचनम्। द्विदाम्नी अव्ययग्रहणाननुवृत्तेरुद्दामा वडवेत्यत्र डाप्निषेधावपि पक्षे स्तः। द्विहायनी बाला। 'त्रिचर्तुभ्यां हायनस्य णत्वं वाच्यम्।' (वा. ५०३८) 'वयोवाचकस्यैव हायनस्य ङीब्णत्वं चेष्यते (वा. २४४१) त्रिहायणी। चतुर्हायणी। वयसोऽन्यत्र द्विहायना, त्रिहायना, चतुर्हायना, शाला।**

---

४८६ - **पदच्छेदः** - दामहायनान्तात् च।

**अनुवृत्तिः** - सङ्ख्यादेः, ङीप्, बहुव्रीहेः, स्त्रियाम्, प्रातिपदिकात् प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - संख्यादि-दामान्तात् तथाच सङ्ख्यादि हायनान्तात् बहुव्रीहेः स्त्रियां ङीप्-प्रत्ययो भवति।

(द्विदामनी - द्वे दामनी यस्याः सा, द्वि दामन् + ङीप् (ई) 'अल्लोपोऽनः' अल्लोपे द्विदाम्नी - दो रस्सीवाली गाय)

(वार्तिक - त्रिचतुर्भ्याम्)

**सरलार्थः** - त्रि तथा चतुरशब्दात् परे हायन-शब्दस्य नकारस्य णत्वं भवति।

(वार्तिक - वयोवाचकस्यै.)

**सरलार्थः** - वयोवाचकात् हायनशब्दात् परे ङीप्-प्रत्ययो भवति नकारस्य च णकारो भवति।

(द्विहायना शाला) - दो कक्षोवाली शाला।

**(४८७) -नित्यं संज्ञाछन्दसोः। ८।१।२५॥**

**अन्नन्ताद् बहुव्रीहेरूपधालोपिनो ङीप्स्यात् संज्ञाछन्दसोः। सुराज्ञी नाम नगरी। अन्यत्र पूर्वेण विकल्प एव। वेदे तु शतमूर्ध्नी।**

---

४८७ - **पदच्छेदः** - नित्यं, संज्ञाछन्दसोः।

**अनुवृत्तिः** - अनः, उपधालोपिनः, बहुव्रीहेः, ङीप्, स्त्रियां प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उपधालोपितः अन्नन्त बहुव्रीहेः स्त्रीत्वे द्योत्ये संज्ञा-विषये छन्दोविषये च ङीप्-प्रत्ययो भवति।

**साधनिका** -

**सुराज्ञी** = शोभनः राजा यस्याः सा इति विग्रहे सुराजन् शब्दात् ङीप् प्रत्यये-उपधालोपे श्चुत्वे 'सुराज्ञी' इति रूपम्।

**(४८८) -केवलमामकभागधेयपापापरसमानार्यकृत सुमङ्गलभेषजाच्च।। ८।१।३०॥**

**एभ्यो नवभ्यो नित्यं ङीप्स्यात्, संज्ञाछन्दसोः। 'अथो त इन्द्रः केवलीर्विशः' 'मामकी तनू'। भागधेयी। पापी। अपरी। समानी आर्यकृती। सुमङ्गली। भेषजी। अन्यत्र केवला इत्यादि। मामकग्रहणं नियमार्थम् अण्णन्तत्वादेव सिद्धे। तेन लोकेऽसंज्ञायां मामिका।**

---

४८८ - **पदच्छेदः** - केवल, मामक, भागधेय, पाप, अपर, समान, आर्यकृत, सुमङ्गल, भेषजात् च।

**अनुवृत्तिः** - संज्ञाछन्दसोः, ङीप्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - केवल, मामकादिभ्यः नव शब्देभ्यः परे स्त्रियां ङीप् प्रत्ययः भवति।

**प्रयोगः** - **केवली** - वेदे - 'अथो त इन्द्रः केवलीर्विशः'

**केवला** - लोके टाप् भवति।

**(४८९) -अन्तर्वत्पतिवतोर्नुक्। ८।१।३२॥**

**एतयोः स्त्रियां नुक्स्यात्। 'ऋन्नेभ्यो ङीप्'। गर्भिण्यां जीवद्भर्तृकायां च प्रकृतिभागौ निपात्येते। तत्रान्तरस्त्यस्यां गर्भ इति विग्रहे अन्तःशब्दस्याधिकरणशक्तिप्रधानतयाऽस्ति समानाधिकरण्याभावाद् अप्राप्तो मतुप् निपात्यते। 'पतिवत्नी' इत्यत्र तु वत्वं निपात्यते। अन्तर्वत्नी। पतिवत्नी। प्रत्युदाहरणं तु अन्तरस्त्यस्यां शालायां घटः। पतिमती पृथिवी।**

---

४८९ - **पदच्छेदः** - अन्तर्ववत्पतिवतोः, नुक्।

**अनुवृत्तिः** - ङीप्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अन्तर्वत्, पतिवत्, इत्युभयोः शब्दयोः स्त्रियां नुमागमः भवति।

**प्रयोगसिद्धिः** - **अन्तर्वत्नी** = (गर्भिणी) अन्तः अस्ति अस्यां गर्भः अन्तर्शब्दात् मतुप्रत्ययेऽनुबन्धलोपे, मस्य वत्वे (अन्तरवत्) शब्दात् स्त्रीत्वात् 'अन्तर्वत्पतिवतोर्नुक्' इत्यनेन नुमागमे 'ऋन्नेभ्यो ङीप्' इत्यनेन ङीपि (अन्तर्वत्न् + ई = अन्तर्वत्नी) (मतुप् वत्वं च निपात्यते)

**(४९०) -पत्युर्नो यज्ञसंयोगे। ८।१।३३॥**

**पतिशब्दस्य नकारादेशः स्याद्यज्ञेन सम्बन्धे। वसिष्ठस्य पत्नी तत्कर्तृकस्य यज्ञस्य फलभोक्त्रीत्यर्थः, दम्पत्योः सहाधिकारात्।**

---

४९० - **पदच्छेदः** - पत्युः, नः, यज्ञसंयोगे।

**अनुवृत्तिः** - ङीप्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यज्ञसम्बन्धिपतिशब्दस्य नकारान्तादेशः भवति स्त्रीत्वे द्योत्ये।

**(वशिष्ठस्य) पत्नी** = पति + ङीप् (ई) पत्न् + ई = पत्नी।

(यज्ञस्य फल-भोक्ता केवलं वशिष्ठः न अपितु साहचर्यत्वात् पत्नी-अपि फलभोक्त्री अस्ति।)

**(४९१) -विभाषा सपूर्वस्य। ८।१।३४॥**

**पतिशब्दान्तस्य सपूर्वस्य प्रातिपदिकस्य नो वा स्यात्। गृहस्य पतिः गृहपतिः गृहपत्नी 'अनुपसर्जनस्य' इतीहोत्तरार्थमनुवृत्तमपि न पत्युर्विशेषणम्, किन्तु तदन्तस्य। तेन बहुव्रीहौ अपि दृढपत्नी दृढपतिः। वृषलपत्नी वृषलपतिः। अथ 'वृषलस्य पत्नी' इति व्यस्ते कथमिति चेत्? पत्नीव पत्नीत्युपचारात्। यद्वा अचारक्वि-बन्तात्कर्तरि क्विप्। अस्मिंश्च पक्षे पत्नियौ, पत्नियः इति इयङविषये विशेषः। 'सपूर्वस्य किम्? गवां पतिः स्त्री।'**

---

४९१ - **पदच्छेदः** - विभाषा, सपूर्वस्य।

**अनुवृत्तिः** - पत्युः, नः, ङीप्। स्त्रियाम्, प्रातिपदिकात्, अनुपसर्जनात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्। (विकल्पः)

**सरलार्थः** - समास युक्त पति शब्दान्त प्रातिपदिकस्य स्त्रियाँ विकल्पेन नकारादेशः भवति।

**विशेषार्थः** - सह - विद्यमानः पूर्वः अव्ययं यस्य तस्य अपूर्वस्य। पतिशब्दस्य पूर्वं यदि यः कोऽपि शब्दः भवति, तदा पति शब्दान्तानुपर्जनात् प्रातिपदिकात् स्त्रियां विकल्पेन ङीप् भवति। अन्तिम-वर्णस्य स्थाने नकारादेशः अपि भवति। यथा - गृहपतिः-गृहपत्नी

**(४९२) -नित्यं सपत्न्यादिषु। ८।१।३५॥**

**पूर्वविकल्पापवादः। समानस्य सभावोऽपि निपात्यते समानः पतिः यस्याः सा सपत्नी। एकपत्नी। वीरपत्नी।**

---

४९२ - **पदच्छेदः** - नित्यं, सपत्न्यादिषु।

**अनुवृत्तिः** - पत्युः, नः, ङीप्, स्त्रियाम्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पूर्वसूत्रेण प्राप्तस्य विकल्पस्येदमपवादसूत्रम्। समानस्य स्थाने 'स' इत्यस्य निपातनं भवति नकारादेशश्च भवति।

**साधनिका :** -

**सपत्नी** - समानः पतिः यस्या सा इति विग्रहे 'नित्यं सपत्न्या-दिषु' इत्यनेन समानस्य स भावे तकास्य नकारे ङीप् प्रत्ययेऽनुबन्धलोपे (स पत् + ई) वर्णसम्मेलने सपत्नी इति।

**(४९३) -पूतक्रतोरै च। ८।१।३६॥**

**अस्य स्त्रियामै आदेशो ङीप्च। 'इयं त्रिसूत्री पुंयोग एवेष्यते' (वा. १४४९) पूतक्रतोः स्त्री पूतक्रतायी। 'यया तु क्रतवः पूता स्यात्पूतक्रतुरेव सा'**

---

४९३ - **पदच्छेदः** - पूतक्रतोः, ऐ, च।

**अनुवृत्तिः** - ङीप्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पूतक्रतुशब्दस्य-अकारस्य ऐकारादेशः भवति चकारेण ङीप् प्रत्ययोऽपि भवति।

**प्रयोगसिद्धिः - पूतक्रमायी** = पूतक्रतुनामपुरुषस्य स्त्री इत्यर्थे पूतक्रतु शब्दात् ङीप्-प्रत्यये उकारस्य 'ऐकारादेशे (पूतक्रत् + ऐ + ई) आयादेशे (पूतक्रत् + आय् + ई) = **पूतक्रतायी** इति।'

**(४९४) -वृषाकप्यग्निकुसितकुसिदानामुदात्तः।**

**एषामुदात्त ऐकारः स्यात् ङीप् च। वृषाकपेः स्त्री 'वृषाकपायी।' 'हरिविष्णू वृषाकपी' इत्यमरः। 'वृषाकपायी श्रीगौर्योः' इति च। अग्नायी। कुसितायी। कुसिदायी। कुसिदशब्दो ह्रस्वमध्यो न दीर्घमध्यः।**

---

४९४ - **पदच्छेदः** - वृषाकप्यग्निकुसितकुसिदानाम्, उदात्तः।

**अनुवृत्तिः** - ऐ, ङीप्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - वृषाकपि, अग्नि, कुसित, कुसिद एतेभ्यः अनुपसर्जन-प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययः भवति, अन्तिमवर्णस्यैकारादेशश्च भवति।

**(४९५) -मनोरौ वा। ८।१।३८॥**

**मनुशब्दस्यौकारादेशः स्यादुदात्तैकारश्च वा, ताभ्यां सन्नियोगशिष्ये ङीप्च। मनोः स्त्री मनायी मनावी मनुः।**

---

४९५ - **पदच्छेदः** - मनोः, औ, वा।

**अनुवृत्तिः** - उदात्तः, ऐ, ङीप्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात् प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - मनु-शब्दस्य स्त्रियां विकल्पेन औकारादेशः भवति, पक्षे ऐ तथा ङीप् प्रत्ययोऽपि भवति।

यथा - मनावी, मनायी, मनुः।

**(४९६) -वर्णानुदात्तात्तोपधात्तो नः। ८।१।३९॥**

**वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात् प्रातिपदिकाद् वा ङीप्स्यात् तकारस्य नकारादेशश्च। एनी, एता, रोहिणी, रोहिता। वर्णानां तणतनितान्तानामिति फिट्सूत्रेणाद्युदात्तः। 'त्रेण्या च शलाल्या' इति गृह्यसूत्रम्। त्रीण्येतानि अस्या इति बहुव्रीहिः। 'अनुदात्तात् किम्? श्वेता। घृतादीनां च (कि. २१) इत्यन्तोदात्तोऽयम्। अत इत्येव, शितिः स्त्री।' 'पिशङ्गादुपसङ्ख्यानम्' (व. २४५४)। पिशङ्गा। पिशङ्ग। असितपलितयोर्न (वा. २४५३) असिता। पलिता। 'छन्दसि क्नमेके' असिक्नी। पलिक्नी। अवदातशब्दस्तु न वर्णवाची, किन्तु विशुद्धवाची। तेन अवदाता इत्येव।**

---

४९६ - **पदच्छेदः** - वर्णात्, अनुदात्तात्, तोपधात्, तः, नः।

**अनुवृत्तिः** - वा, ङीप्, अतः, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात् प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम् (विकल्प)

**सरलार्थः** - वर्णवाची यः अनुदात्तान्तः शब्दः, तथा च तकारोपधो वर्णवाची शब्दः एतस्मात् प्रातिपदिकात् ङीप् प्रत्ययः भवति, तथाच तकास्य नकारादेशः भवति। (विकल्पेन ङीप् नकारो भवतः)

**विशेषार्थः** - अनुदात्तात् इदं पदं वर्णात् इत्यस्य विशेषणम्। अतः तदन्तस्य बोधकः। तकारः उपधा यस्य इति तोपधः। तोपधात् इति वर्णात् - अर्थात् वर्ण वाचकात् शब्दात् इत्यर्थः। नकारस्य अकारः उच्चारणार्थः। वर्ण विशेषबोधकः अनुदात्तस्वरान्तः एवं तकारोपधप्रातिपदिकात् स्त्रियां विकल्पेन ङीप् प्रत्ययः, तथा च तकारस्य नकारादेशः भवति।

**साधनिका - एनी** - एतशब्दात् ङीपूप्रत्ययेऽनुबन्धलोपे तकारस्य नकारादेशे भत्वात् अकारलोपे 'एनी' - इति, ङीप्-नकाराभावे च टापि कृते एता इति।

(वार्तिक-पिशङ्गात्) पिशङ्गशब्दात् विकल्पेन ङीप् प्रत्ययः भवति। यथा - पिशङ्गी-पिशङ्गा।

(वार्तिक-असितपलितयोर्न) स्त्रीलिङ्गवाचकयोः असितपलित-शब्दयोः परतः ङीप् प्रत्ययो न भवति।

यथा - असिता। पलिता। (अत्र टाप् प्रत्ययः भवति)

**(४९७) -अन्यतो ङीष्। ४।१।४०॥**

**तोपधभिन्नाद् वर्णवाचिनोऽनुदात्तान्तात् प्रातिपदिकात्स्त्रियां ङीष् स्यात्। कल्माषी। सारङ्गी। लघावन्तो द्वयोश्च बह्वचो गुरुः (फि. ४२) इति मध्योदात्तावेतौ। 'अनुदात्तान्तात्' किम्? कृष्णा। कपिला।**

---

४९७ - **पदच्छेदः** - अन्यतः, ङीष्।

**अनुवृत्तिः** - वर्णादनुदात्तात्, तोपधात्, अतः, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - तकारोपधभिन्न-शब्दात् परे परंतु वर्णवाचकात् - अनुदात्तान्तात् प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययः भवति। (कल्माष = कल्माषी = नानारङ्गवाली)

**(४९८) -षिद्गौरादिभ्यश्च। ४।१।४१॥**

**षिद्भ्यो गौरादिभ्यश्च ङीष्स्यात्। नर्तकी। गौरी। 'आमनहुहः स्त्रियां वा' (वा. ४३७८) अनडुही अनड्वाही। पिप्पल्यादयश्च आकृतिगणोऽयम्।**

---

४९८ - **पदच्छेदः** - षिद्गौरादिभ्यः, च।

**अनुवृत्तिः** - ङीष्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - षित् ये शब्दाः तेभ्यः गौरादिगण पठित शब्देभ्यः परे ङीष् प्रत्ययः भवति।

**प्रयोगसिद्धिः - गौरी** = गौर शब्दात् स्त्रीत्वात् 'षिद्गौरादिभ्यश्च' इत्यनेन ङीष् प्रत्ययेऽनुबन्धलोपे (गौर + ई) अकारलोपे गौरी इति।

(वार्तिक = आमनडुहः स्त्रियां वा)

**सरलार्थः** - स्त्रियास् अनडुह शब्दस्य विकल्पेन आम् - आगमः भवति।

(अनड्वाही = अनडु-आम्ह् + ई (ङीष्) = अनडु + आ - म् + ई- यणिकृते, वर्ण सम्मेलने अनड्वाही, आमागमाभावे - अनडुही (गाय)

(गणसूत्र - पिप्पलयादश्च) पिप्पली इत्यादि शब्देभ्यः परे स्त्रीलिङ्गे, ङीष् प्रत्ययः भवति। पिप्पली = (छोटी पीपल)

**(४९९) -सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः। ६।१।४९॥**

**अङ्गस्योपधाया यस्य लोपः स्यात्स चेद् यः सूर्याद्यवयवः 'मत्स्यस्य ङ्याम्' (वा. ४९१८) 'सूर्यागस्त्ययोच्छे च ङ्यां च' (वा. २७१०)। 'तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम्' (वा. ४२००)। मत्सी। 'मातरि षिच्च' (वा. २७१०) इति षित्वादेव सिद्धे गौरादिषु मातामहीशब्दपाठादनित्यः षितां ङीष् दंष्ट्रा।**

---

४९९ - **पदच्छेदः** - सूर्यतिष्यागस्त्यमत्स्यानां, यः, उपधायाः।

**अनुवृत्तिः** - ईति, तद्धिते, भस्य, अङ्गस्य।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सूर्य, तिष्य, अगस्त्यमत्स्य-शब्दानाम्-अंग सम्बन्धिनः उपधाभूतस्य 'य' कारस्य लोपः भवति। स सूर्याद्यवयवः भवितव्यः।

(वार्तिक-मत्स्यङ्याम्)

**सरलार्थः** - मत्स्य शब्दस्य यकारलोपः केवलं ङौ प्रत्यये परे भवति।)

(वार्तिक-सूर्यामस्त्य.-)

**सरलार्थः** - नक्षत्र-सम्बन्धिनि अण् प्रत्यये परे तिष्यपुष्य शब्दयोः यकारस्य लोपः भवति।

(सूर्य + अण् -(अ) = सौर्य + ङीप् अलोपे (सौर्य + ई) 'सूर्यतिष्यागस्त्य.' इत्यादिना यकारलोपे वर्ण सम्मेलने = सौरी, तिष्य = तैषी। पुष्य = पौषी।

(वार्तिक-मातरिषिच्च)

**सरलार्थः** - मत्स्य शब्दात् ङीष् प्रत्ययः भवति।

मत्स्य + ङीष् (ई) अलोपस्य-असिद्धत्वात् उपधायां विद्यमानस्य 'यू' इत्यस्य लोपः भवति।

**प्रयोगसिद्धिः- दंष्ट्रा** = दंश + ष्ट्रन् अत्र षकारस्येत् संज्ञात्वेनापि-ङीष् प्रत्ययः न भवति किन्तु टाप् भवति। (ङीष् इत्यस्य-अनित्यत्वात्)

**(५००) -जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद् वृत्यमत्रावपनाकृत्रिमाश्राणास्थौल्य-वर्णानाच्छादनायोविकारमैथुनेच्छा केशवेशेषु। ४।१।४२॥**

**एभ्य एकादशभ्यः प्रातिपदिकेभ्यः क्रमाद् वृत्त्यादिष्वर्थेषु ङीष् स्यात्। जानपदी वृत्तिश्चेत् अन्या तु जानपदी। उत्साहित्वादञन्तत्वेन टिड्ढाण - (सू. ४७०) इति ङीष्याद्युदात्तः। कुण्डी अमत्रं चेत् कुण्डान्या।**

**'कुडिदाहे' 'गुरोश्चहलः' (सू. ३२८०) इति अप्रत्ययः। यस्तु 'अमृते जारजः कुण्डः' इति मनुष्यजातिवचनस्ततो जाति-लक्षणो ङीष् भवत्येव। अमत्रे हि स्त्रीविषयत्वाद् अप्राप्तो ङीष् विधीयते न तु नियम्यते। गोणी आवपनं चेत्, गोणान्या। स्थली अकृत्रिमाचेत् स्थलाऽन्या। भाजी श्राणा चेत्, भाजाऽन्या। नागी स्थूला चेत्, नागाऽन्या। गजवाची नागशब्दः स्थौल्यगुणयोगाद् अन्यत्र प्रयुक्त उदाहरणम्। सर्पवाची तु दैर्घ्यगुणयोगादन्यत्र प्रयुक्तः प्रत्युदाहरणम्। काली वर्णश्चेत्; कालाऽन्या। प्रयुक्तः प्रत्युदाहरणम्। काली वर्णश्चेत्; कालाऽन्या। नीली अनाच्छादनं चेत्, नीलाऽन्या। नील्यारक्ता शाटीत्यर्थः, नील्या अन् वक्तव्यः (वा. २६८०) इत्यन्। अनाच्छादनेऽपि न सर्वत्र, किन्तु 'नीलादोषधौ' वा. (२४५६)। नीली। 'प्राणिनी च' (वा. २४५८)। नीली गौः। संज्ञायां वा. (वा. २४५७), नीली-नीला। कुशी अयोविकारश्चेत्, कुशाऽन्या। कामुकी मैथुनेच्छा चेत्; कामुकाऽन्या। कबरी केशानां सन्निवेशश्चेत्, कबराऽन्या। चित्रेत्यर्थः।**

---

५०० - **पदच्छेदः** - जानपद.... कबरात्, वृत्यमत्र.... केशवेशेषु।

**अनुवृत्तिः** - ङीष्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - जानपद इत्यारभ्य-कबरात् इति पर्यन्तं एकं पदम्, तथाच वृत्यमत्र इत्यारभ्य केशवेशेषु यावत् द्वितीयं पदम्। जानपद, कुण्ड, गोण, भाज, नाग, काल, नील, कुश तथाच कामुक एतेभ्यः एकादश प्राप्तिपदिकेभ्यः क्रमशः वृत्ति इत्यादि अर्थेषु ङीष् प्रत्ययः भवति।

**विशेषार्थः** - आजाविका अर्थे जानपदी = जानपदे भवा (आजीविका) भवार्थे अण् प्रत्यये: - जानपद + ङीष् (ई) अलोपे = जानपदी। आजीविका भिन्नेऽर्थेऽपि जानपदी = जनपद शब्दात् 'उत्सादिभ्योञ्' प्रत्यये 'टिड्ढाणञ्' इति ङीप् = जानपदी किन्तु स्वरे भेदः। ङीष् प्रत्ययः अन्तोदात्तः भवति। ङीप् प्रत्ययः अन्तानुदात्तः भवति।

१ - (वार्तिक-नीला अन् वक्तव्य) (नील गाय) नीली।

(वा. नीलादोषधौ) नील शब्दात् ओषधि-अर्थे ङीष्-प्रत्ययः भवति।

नीली = नील + ङीष् (ई) = नीली।

३ - (वार्तिक) प्राणिनीच = प्राणिवाचकात्-शब्दात् ङीष् प्रत्ययः भवति। नीली-गौः।

४ - (वार्तिक-संज्ञायां वा) संज्ञा-वाच्ये नील-शब्दात् विकल्पेन ङीष् प्रत्ययः भवति। पक्षे टाप्।

**(५०१) -शोणात्प्राचाम्। ४।१।४३॥**

**शोणी, शोणा।**

---

५०१ - **पदच्छेदः** - शोणात्, प्राचाम्।

**अनुवृत्तिः** - ङीष्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सरलार्थः** - उपसर्जनरहित-शोण-शब्दात् स्त्रीत्व-द्योत्ये प्राचीनाचार्याणां मतानुसारं ङीष् प्रत्ययो भवति। पाणिनि-मते तु टाप् भवति। यथा शोणी। शोणा।

**(५०२) -वोतो गुणवचनात्। ४।१।४४॥**

**उदन्तात् गुणवाचिनो वा ङीष् स्यात्। मृद्वी-मृदुः। 'उतः' किम्? शुचिः। 'गुणः' इति किम्? आखुः। 'खरूपंयोगोपधान्न' (वा. २४६०)। 'खरुः, पतिंवरा कन्या।' पाण्डुः।**

---

५०२ - **पदच्छेदः** - वा, उतः, गुणवचनात्?

**अनुवृत्तिः** - ङीष्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सरलार्थः** - गुणवाचि ह्रस्व-उकारान्त-शब्दात् स्त्रीलिङ्गे ङीष् - प्रत्ययः भवति। (विकल्पेन ङीष् भवति)

(वार्तिक - खरूपंयोगोपधान्न)

खरु शब्दात् तथाच संयुक्तवर्णोपध-शब्दात् ङीष् प्रत्ययः न भवति। खरुः = अत्र ङीष् प्रत्ययस्य वार्तिक द्वारा निषेधः भवति। (पती को वरण करनेवाली कन्या - पतिंवरा कन्या)

**(५०३) -बह्वादिभ्यश्च। ४।१।४५॥**

**एभ्यो वा ङीष् स्यात्। बह्वी - बहुः। 'कृदिकारादक्तिनः' ( ग. ५० ) रात्रिः, रात्री। 'सर्वतोऽक्तिन्नर्थादित्येके' ( ग. ५१ ) शकटिः शकटी। अक्तिन्नर्थात् किम्? अजननिः। क्तिन्नन्तत्वादप्राप्ते विध्यर्थं पद्धति-शब्दो गणे पठ्यते। 'हिमकाषिहतिषु च' इति पद्भावः। पद्धतिः, पद्धती।**

---

५०३ - **पदच्छेदः** - बह्वादिभ्यः च।

**अनुवृत्तिः** - वा, ङीष्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सरलार्थः** - बहु-आदि-शब्देभ्यः ङीष् प्रत्ययः विकल्पेन भवति। (कृदिकारादक्तिन-ग.सू.)

**अर्थः** - कृत्प्रत्यय सम्बन्धिनः इकारान्त-शब्दात् विकल्पेन ङीष्-प्रत्ययो भवति। क्तिन्-प्रत्ययान् विहाय। (ग.सू. सर्वतोऽक्तिन्.) के चित् स्वीकुर्वन्ति यत् क्तिन् प्रत्ययस्याथ भिन्नात् कृत् इकारान्तात् वा अकृत् इकारान्तशब्दात् अपि ङीष् प्रत्ययो भवति।

**(५०४) -पुंयोगादाख्यायाम्। ४।१।४८॥**

**या पुमाख्या पुंयोगात् स्त्रियां वर्तते ततो ङीष् स्यात्। गोपस्य स्त्री गोपी 'पालकान्तान्न' ( वा. २४६१ ) गोपालिका। अश्वपालिका। 'सूर्याद् देवतायां चाव्वाच्यः' ( वा. २४७१ ) सूर्यस्य स्त्री देवता सूर्या। देवतायां किम्? सूरी कुन्ती मानुषीयम्?**

---

५०४ - **पदच्छेदः** - पुंयोगात्, आख्यायाम्।

**अनुवृत्तिः** - ङीष्, अतः, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात् प्रत्ययः, परश्च।

**सरलार्थः** - पुंयोगमाश्रित्य स्त्रियां वर्तमानात् अकारान्तात् शब्दात् ङीप् प्रत्ययः भवति। गोपस्य स्त्री गोपी।

(वार्तिक - पालकान्तान्न)

**अर्थः** - पालकान्तात् शब्दात् परे ङीष् प्रत्ययो न भवति। गोपालिका।

(वार्तिक - सूर्यात् देवतायां चाब्वाच्यः)

**अर्थः** - सूर्य शब्दात् देवता वाच्ये चाप् प्रत्ययः भवति।

**प्रयोगसिद्धिः - सूर्या** - सूर्यस्य स्त्री इति विग्रहे सूर्य शब्दात् चाप् प्रत्यये सूर्य + चाप् (आ) दीर्घे सोर्लोपे सूर्या इति।

**(५०५) -इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्। ४।१।४९॥**

**एषाम् आनुगागमः स्यान्ङीष् च। इन्द्रादीनां षण्णां मातुलाचार्ययोश्च पुंयोग एवेष्यते। तत्र ङीषि सिद्धे, आनुगागममात्रं विधीयते। इतरेषां चतुर्णामुभयम्। इन्द्राणी। 'हिमारण्ययोर्महत्त्वे' ( वा. २४७२ ) महद्धिमं हिमानी। महदरण्यम् अरण्यानी।**

'यवाद् दोषे' (वा. २४७६) दुष्टो यवो यवानी, 'यवनाल्लिप्याम्' (वा. २४७४) यवनानां लिपिर्यवनानी। मातुलोपाध्याययोरानुग् (वा.) मातुलानी, मातुली। उपाध्यायानी, उपाध्यायी। या तु स्वयमेवाध्यापिका तत्र वा ङीष्। उपाध्यायी, उपाध्याया 'आचार्यादणत्वञ्च' (वा. २४७७) आचार्यस्य स्त्री आचार्यानी। पुंयोग इत्येव। आचार्या, स्वयं व्याख्यात्री 'अर्यक्षत्रियाभ्यां वा स्वार्थे। (वा. २४७८) अर्याणी अर्या। स्वामिनी वैश्या वेत्यर्थः क्षत्रियाणी, क्षत्रिया। पुंयोगे तु - अर्यी, क्षत्रियी। कथं ब्रह्माणीति ब्रह्माणम् आनयति जीवयति इति 'कर्मण्यण्' (सू. २९१३)

५०५ - **पदच्छेदः** - इन्द्र, मातुलाचार्याणाम्, आनुक्।

**अनुवृत्तिः** - पुंयोगात्, ङीप्, अनुपसर्जनात्, स्त्रियां, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सरलार्थः** - इन्द्र, वरुण, भव, शर्व, रुद्र, मृड, हिम, अरण्य, यव, यवन, मातुल, तथच, आचार्य एतेषां द्वादश शब्दानां आनुक् आगमो भवति एतेभ्यः शब्देभ्यः परे ङीष् प्रत्ययो भवति। (इन्द्राणी = इन्द्रस्य पत्नी) इन्द्र + ङीष् - इन्द्र + आन + ई)

(वार्तिक - हिमारण्ययोर्महत्वे)

**अर्थः** - हिम तथा च अरण्य शब्दात् परे ङीष् प्रत्ययः भवति। हिमारण्ययोः आनुगामश्चः भवति।

(वार्तिक - यवाद्दोषेद्)

दोष अर्थवाक्ये यव शब्दात् ङीष् प्रत्ययः तथाच आनुग आगमः भवति। 'यवन आन् न ङीष्' (ई) यवानी।

(वार्तिक - यवनाल्लिप्याम्)

लिपौ अर्थे यवन-शब्दात् ङीष्-प्रत्ययः, आनुक् आगमश्च भवति

(वार्तिक - मातुलोपाध्याययोरानुग्वा)

मातुलउपाध्याय-शब्दाभ्यां परे ङीष् प्रत्ययः भवति - आनुगागमश्च भवति, विकल्पेन।

(मातुलस्य स्त्री)

(या तु स्वयमेवाध्यापिका तत्र विकल्पेन ङीष् भवति)

पूर्वं यथा - आसीत्-

पुरा युगेषु नारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनं च वेदानां सावित्रीवचनं तथा॥

(वार्तिक - 'आचार्यादणत्वं च')

अर्य, क्षत्रिय शब्दाभ्यां परे स्वार्थे ङीष् प्रत्ययः भवति, आनुक् आगमः विकल्पेन भवति।

**कथं ब्रह्माणीति (अर्याणी - अर्या)** = ब्रह्माणमानयतीति विग्रहे आति इति ण्यन्तात् 'कर्मण्यण्' इत्यनि 'णेरनिटि' इति णि-लोपे आन शब्देन ब्रह्माणमित्यस्य उपपद-समासे विभक्तिलोपे न-लोपे सवर्णदीर्घे-ब्रह्मान्शब्दात् 'टिड्ढाणञ्.' इति ङीषि 'यस्येति अकारलोपे' 'पूर्वपदात्-संज्ञायाम्' इति णत्वे ब्रह्माणीति रूपम्।

**(५०६) -क्रीतात्करणपूर्वात्। ४।१।५०॥**

**क्रीतान्ताददन्तात्करणादौ स्त्रियां ङीष् स्यात्। वस्त्रक्रीती। क्वचिन्न-धनक्रीता।**

---

५०६ - **पदच्छेदः** - क्रीतात्, करणपूर्वात्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः** - ङीष्, अतः, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सरलार्थः** - करणकारक-पूर्वकात् क्रीतान्त - अकारान्त-प्रातिपदिकात् विकल्पेन ङीष् प्रत्ययो भवति।

**प्रयोगसिद्धिः - वस्त्रक्रीती** - वस्त्रेण क्रीता इति विग्रहे 'कर्तृकरणे कृता बहुलम्' इत्यनेन समासे वस्त्रक्रीत शब्दात् ङीष् प्रत्यये **वस्त्रक्रीती** इति।

**क्वचिन्न-धनक्रीता** = धनक्रीता-इत्येव शब्दः सर्वत्र दृश्यते, तथा च 'अजादि-गणस्य' आकृति गणत्वात् धनक्रीत शब्दः तस्मिन गणे स्वीकृतः भवति तदर्थं लिखितं यत्, क्वचिन्न अर्थात् ङीष् प्रत्ययः न भवति, टाप् भवति।

**(५०७) -क्तादल्पाख्याम्। ४।१।५१॥**

**करणादेः क्तान्ताददन्तात्स्त्रियां ङीष् स्याद् अल्पत्वे द्योत्ये। अभ्रलिप्ती द्यौः। 'अल्पाख्यायाम्' किम्? चन्दनलिप्ता अङ्गना।**

---

५०७ - **पदच्छेदः** - क्तात्, अल्पाख्यायाम्।

**अनुवृत्तिः** - करणपूर्वात, अतः, अनुपसर्जनात्, ङीष्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - करणपूर्वकात् क्तप्रत्ययान्तात् प्रातिपदिकात् परे-अल्पार्थ गम्यमाने ङीष् प्रत्ययो भवति।

**अभ्रलिप्ती द्यौः** - अभ्रेण लिप्ता इति विग्रहे अल्पार्थे गम्यमाने ङीष् भवति, किन्तु चन्दनेन लिप्ता = चन्दनलिप्ता अत्र अल्पार्थं नास्ति अतः टाप्।

**(५०८) -बहुव्रीहेश्चान्तोदात्तात्। ४।१।५२॥**

**बहुव्रीहेः क्तान्तादन्तोदात्ताददन्तात् स्त्रियां ङीष् स्यात्। जातिपूर्वादिति वक्तव्यम् (वा. २४८४) तेन 'बहुनञ्सुकालसुखादिपूर्वान्न'। उरुभिन्नी। नेह बहुक्रीता। 'जातान्तान्न' (वा. २४७९) दन्तजाता। 'पाणिगृहीती' भार्यायाम् पाणिगृहीता अन्या। (वा. २४६१) पालकान्तात् शब्दात् ङीष् प्रत्ययः न स्यात्। गोपालिका (वा. २४७१) देवतारूपस्त्रीत्व द्योत्ये सूर्यशब्दात् पुंयोगे चाप्प्रत्ययः सूर्या।**

---

५०८ - **पदच्छेदः** - बहुव्रीहेः, च, अन्तदात्तात्।

**अनुवृत्तिः** - क्तान्तात्, अतः अनुपसर्जनात्, ङीष्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - क्तान्त-अन्तोदात्त-अदन्त शब्दात् परे स्त्रियां ङीष्-प्रत्ययो भवति, बहुव्रीहि-समासे।

(वार्तिक - जातिपूर्वादितिवक्तव्यम्)

**सरलार्थः** - बहुव्रीहि-समासे क्तान्त प्रत्ययान्तात् जातिवाचक-शब्दात् ङीष्-प्रत्ययो भवति। (बहु नञ् सुख इत्यादयः शब्दाः पूर्वं न स्युःचेत्।)

**उरूभिन्नी** = अत्र (भिन्नौ ऊरू यस्याः सा) जातिवाचकत्वात् क्तान्तत्वात् ङीष् भवति।

किन्तु-बहुक्रीता, अत्र बहु-शब्दः पूर्वं वर्तते अतः ङीष् न भवति, टाप् भवति।

(वार्तिक-जातान्तान्न)

**सरलार्थः** - जात-शब्दः अन्ते भवति चेत् ङीष् प्रत्ययः न भवति। यथा - दन्तजाता।

(वार्तिक - पाणिगृहीतीभार्यायाम्)

**सरलार्थः** - शास्त्रपूर्वकपाणिग्रहणे पाणिगृहीत शब्दात् ङीष् प्रत्ययः भवति। पाणिगृहीती

**(५०९) -अस्वाङ्गपूर्वपदाद्वा। ४।१।५३॥**

**पूर्वेण-नित्ये प्राप्ते विकल्पोऽयम्। सुरापीती, सुरापीता। 'अन्तोदात्तात् किम? वस्त्रच्छन्ना। अनाच्छादनात्' इत्युदात्तनिषेधः। अत एव पूर्वेणापि न ङीष्।**

---

५०९ - **पदच्छेदः** - अस्वाङ्ग, पूर्वपदात्, वा।

**अनुवृत्तिः** - बहुव्रीहेः, च, अन्तोदात्तात्, क्तात्ः, ङीष्, स्त्रियाम्

**सूत्रप्रकारः** - विधिसूत्रम्। (विकल्प)

**सरलार्थः** - अस्वाङ्ग पूर्वपदं यस्य सः, तस्मात्। अस्वाङ्गं यत्पूर्वपदं यत्क्तान्तं तदन्तात् बहुव्रीहेः ङीष् प्रत्ययः विकल्पेन भवति।

**प्रयोगसिद्धिः** - **सुरापीती** - सुरा पीता यया सा इति विग्रहे विकल्पेन ङीष् प्रत्यये, अकारलोपे सुरापीती। ङीष्ः, अभावे टाप् - सुरापीता।

**(५१०) -स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्। ४।१।५४॥**

**असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्तादन्तात्प्रातिपदिकाद्वा ङीष्। केशान् अतिक्रान्ता अतिकेशी। अतिकेशा। चन्द्रमुखी, चन्द्रमुखा। संयोगोपधात्तु सुगुल्फा। उपसर्जनात् किम्? शिखा।**

स्वाङ्गं त्रिधा। १ - अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम्। सुस्वेदा, द्रवत्वात्। सुज्ञाना अमूर्तत्वात्। सुमुखा शाला, अप्राणिस्थत्वात्। सुशोफा, विकारजत्वात्। २ - अतस्थं तत्र दृश्टं च। सुकेशी, सुकेशा वा रथ्या, अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात्। ३ - तेन चेत् तथायुतम्। सुस्तनी सुस्तना वा प्रतिमा। प्राणिवत्प्राणि-सदृशे स्थितत्वात्।

---

५१० - **पदच्छेदः** - स्वाङ्गात्, च, उपसर्जनात्, असंयोगोपधात्

**अनुवृत्तिः** - वा, अतः, ङीष्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - असंयोगोपध उपसर्जनीभूतः यः स्वाङ्गवाचक-अकारान्तः शब्दः तदन्तात् ङीष् प्रत्ययः भवति। विकल्पेन। (केशान् अतिक्रान्ता अतिकेशी)

**(५११) -नासिकोदरौष्ठजङ्घादन्तकर्णश्रृङ्गाच्च। ४।१।५५॥**

**एभ्यो वा ङीष् स्यात्। आद्ययोर्बह्वज्लक्षणो निषेधो बाध्यते। - वृत्ति अवशेषः।**

**पुरस्तादपवादन्यायात्॥**

**ओष्ठादीनां पञ्चानान्तु। असंयोगोपधात् इति पर्युदासे प्राप्ते वचनम्, मध्येऽपवादन्यायात्। सहनञ्लक्षणस्तु प्रतिषेधः परत्वादस्य बाधकः तुङ्गनासिकी। तुङ्गनासिका इत्यादि नेह-सहनासिका। अनासिका। अत्रवृत्तिः 'अङ्गगात्रकण्ठेभ्यो वक्तव्यम्' स्वङ्गी स्वङ्गा इत्यादि। एतच्चानुक्तसमुच्चयार्थेन चकारेण संग्रहायमिति केचित्। भाष्याद्यनुक्तत्वादप्रमाणमिति प्रामाणिकाः। अत्र वार्तिकानि 'पुच्छाच्च' (वा. २४८९) सुपुच्छी, सुपुच्छा। 'कबरमणिविषशरेभ्यो नित्यम्' कबरं चित्रं पृच्छं यस्याः सा कबरपुच्छी मयुरी इत्यादि 'उपमानात्पक्षाच्च पुच्छाच्च' (वा. २४९१) नित्यमित्येव। उलूकपक्षी शाला। उलूकपुच्छी सेना।**

---

१ - **अद्रवंमूर्तिमत्स्वाङ्गम्.।**

**विशेषार्थः** - स्वांगं त्रिविधं भवति।

(१) अद्रवं, (२) मूर्तिमत्, प्राणिस्थितमविकारजम्। यत्र स्वाङ्गं न भवति तत्र ङीष् न भवति। यथा द्रवः सत्वेन सुस्वेदा। मूर्तिरहितेन सुज्ञाना। अप्राणिस्थत्वेन - सुमुखा (शाला)। विकारजेन सुशोका। अत्र सर्वत्र ङीष् न भवति टाप् भवति।

२ - **अतत्स्थम्** = अप्राणिस्थं, प्राणी न भवति तथापि प्राणिषु दृश्यते - तथा - सुकेशी-सुकेशा।

३ - **तेन चेत्ततथा** = प्राणिस्थेन स्तनाद्यङ्गाकृतिकावयवविशेषेण तत् अप्राणिद्रव्यं प्रतिमादि, तथा प्राणि द्रव्यवत् युतं सम्बद्धो भवति तदा, तत् स्तनाद्याकृतिकम् अप्राणिनोऽपि स्वाङ्गम्। यथा - सुस्तनी-सुस्तना।

५११ - **पदच्छेदः** - नासिकोदरौष्ठजङ्घादन्तकर्णश्रृङ्गात्, च।

**अनुवृत्तिः** - स्वाङ्गात्, च, उपसर्जनात्, वा, ङीष्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - नासिका, उदर, ओष्ठ, जङ्घ, दन्त-कर्ण, श्रृंग-एतेभ्यः शब्देभ्यः परे ङीष् प्रत्ययः विकल्पेन क्रियते। पुरस्तादपवादन्यायात्।

**विशेषः**

१ – 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति न्यायात् प्रथमयोः द्वयोः शब्दयोः 'न क्रोडादिबह्वचः' इत्यनेन निषेधः प्राप्तः किन्तु अनेन विधानेन बाधः भवति। ओष्ठादि पञ्च-शब्देषु 'मध्ये अपवादन्यायेन' असंयोगोपधत्वात् निषेधः प्राप्तः किन्तु-अनेन सूत्रेण विकल्पेनविधानं क्रियते।

(वार्तिक - पुच्छाच्च.)

**सरलार्थः** - उपधायां संयुक्तवर्णसत्वेऽपि पुच्छशब्दान्त बहुव्रीहि शब्दात् विकल्पेन ङीष् प्रत्ययः भवति।

(वार्तिक - कबरमणिविष.)

**सरलार्थः** - कबर, मणि, विष, शर-शब्देभ्यः परे पुच्छशब्दान्त प्रातिपदिकात् नित्यं ङीष् प्रत्ययः भवति।

(वार्तिक - उपमानात्पक्षाच्च.)

**सरलार्थः** - उपमानवाचकात् पक्षपुच्छ शब्दान्त-प्रातिपदिकात् परे ङीष् प्रत्ययः भवति। (विकल्प कार्यस्यापवादोऽयम्)

**(५१२) -न क्रोडादिबह्वचः। ४।१।५६॥**

**क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष्। कल्याणक्रोडा। अश्वानामुरः क्रोडा। आकृतिगणोऽयम्। सुजघना।**

---

५१२ - **पदच्छेदः** - न, क्रोडादिबह्वचः।

**अनुवृत्तिः** - स्वाङ्गाच्चोपसर्जनात्, ङीष्, अतः, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधि (निषेध) सूत्रम्।

**सरलार्थः** - कोडा आदिः यस्य, बह्वः अचः यस्य। क्रोडादिश्च बह्वच् च इति समाहारद्वन्द्वः। क्रोडादिर्गणः, बह्वच् यत् स्वाङ्गं तदन्तात् प्रातिपदिकात् परे ङीष् प्रत्ययः न भवति।

**प्रयोग** - **कल्याणक्रोडा** = कल्याणी क्रोडा यस्याः सा (प्रशस्तवक्षस्थलयुक्ता)

**सुजघना** = शोभनं जघनं यस्या सा (सुंदर जांघवाली) अनेकाच युक्तः शब्दः।

**(५१३) -सहनञ्विद्यमानपूर्वाच्च। ४।१।५७॥**

**सहेत्यादित्रिकपूर्वात् न ङीष्। सकेशा। अकेशा। विद्यमाननासिका।**

---

५१३ - **पदच्छेदः** - सह, नञ्, विद्यमानपूर्वात्, च।

**अनुवृत्तिः** - न, स्वाङ्गाच्चोपसर्जनात्, ङीष्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधि (निषेध) सूत्रम्।

**सरलार्थः** - सह, नञ्, तथा विद्यमानपूर्वक स्वाङ्गवाचिनः शब्दात् ङीष् प्रत्ययो न भवति।

**सकेशा** = केशेन सह वर्तते। सह इत्यस्य स भावः।

**अकेशा** = न केशा यस्या सा = नञ् समास पूर्वकम्।

**विद्यमाननासिका** = विद्यमानं नासिका यस्या सा (विद्यमानपूर्वकं)

**(५१४) -नखमुखात्संज्ञायाम्। ४।१।५८॥**

**ङीष् न स्यात्। शूर्पणखा। गौरमुखा। 'संज्ञायाम् किम्?' ताम्रमुखी कन्या।**

---

५१४ - **पदच्छेदः** - नखमुखात्, संज्ञायाम्।

**अनुवृत्तिः** - न, स्वाङ्गाच्चोपसर्जनात्, ङीष्, स्त्रियाम, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधि (निषेध) सूत्रम्।

**सरलार्थः** - स्वाङ्गवाचि-नख-मुख शब्दान्तात् प्रातिपदिकात् सञ्ज्ञार्थक स्त्रीलिङ्गे ङीष्-प्रत्ययो न भवति।

**(५१५) -दिक्पूर्वपदान्ङीप्। ४।१।६०॥**

**दिक्पूर्वपदात् स्वाङ्गान्तात् प्रातिपदिकात् परस्य ङीषो ङीबादेशः स्यात्। प्राङ्मुखी। आद्युदात पदम्।**

५१५ - **पदच्छेदः** - दिकपूर्वपदात्, ङीप्।

**अनुवृत्तिः** - स्वाङ्गात्, ङीष्, स्त्रियाम्, प्रातिपदिकात, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - दिशावाचिशब्दः यदि पूर्वं भवति एतादृश स्वाङ्गन्त प्रातिपदिक शब्दात् परे ङीष् स्थाने ङीप् आदेशः भवति।

**प्रयोगः - प्राङ्मुखी** = प्राङ् मुखं यस्याः सा। ङीष् स्थाने ङीप् विधानस्य फलं प्राङ्मुखीत्यत्र-आद्युदात्तम्।

**(५१६) -वाहः। ४।१।६१॥**

**वाहन्तात् प्रातिपदिकात् ङीष् स्यात्। ङीषेवानुवर्तते न ङीप् 'दित्यवाट् च मे दित्यौही च मे।'**

५१६ - **पदच्छेदः** - वाहः।

**अनुवृत्तिः** - छन्दसि, ङीष्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - वाह-शब्दान्तात् प्रातिपदिकात् परे ङीष् प्रत्ययः भवति।

**प्रयोगः - दित्यौही** - दित्यं वहति इत्यर्थे उपपद समासे (दित्यवह + ण्वि) सर्वापहारिलोपे, उपधावृद्धौ, ङीष्, प्रत्यये (दित्यवाह + ई) 'वाह ऊठ' उठि, पूर्वरूपे, वृद्धौ कृतायां प्रातिपदिकत्वेन सौ लोपे-दित्यौही।

**(५१७) -सख्यशिश्वीति भाषायाम्। ४।१।६२॥**

**इति शब्दः प्रकारे भाषायाम् इत्यस्यानन्तरम् द्रष्टव्यः। तेन छन्दस्यपि क्वचित्। सखी। अशिश्वी। आधेनवो धुनयन्ताम् अशिश्वीः।**

५१७ - **पदच्छेदः** - सखी, अशिश्वी, इति, भाषायाम्।

**अनुवृत्तिः** - ङीष्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सखिशब्दात् तथा च अशिशुशब्दात् परे स्त्रियां ङीष् प्रत्ययः भवति।

**प्रकारः - सजातीयता** - एतेन भाषायां वेदेचेति फलितम्।

**(५१८) -जातेरस्त्रीविषयादयोपधात्। ४।१।६३॥**

**जातिवाचि-यन्न स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात् 'आकृतिग्रहणा जातिः' अनुगतावयवसंस्थान-व्यङ्ग्येत्यर्थः। तटी। 'लिङ्गानाञ्च न सर्वभाक्'। 'सकृदाख्यातनिर्ग्राह्या।' 'असर्वलिङ्गत्वे सति एकस्यां व्यक्तौ कथनाद् व्यक्त्यन्तरे कथनं विनाऽपि सुग्रहा जातिः'। इति लक्षणान्तरम्। वृषली। 'सत्यन्तम्' किम्? शुक्ला। 'सकृत्' इत्यादि किम्? देवदत्ता। 'गोत्रञ्च चरणैः सह' अपत्यप्रत्य यान्तः शाखा ध्येतृवाची च शब्दो जातिकार्यं लभत इत्यर्थः। औपगवी। कठी। कलापी। बह्वृची। ब्राह्मणीत्यत्र तु शार्ङरवादियोगत् ङीना ङीष् बाध्यते, जातेः किम्? मुण्डा। अस्त्रिविषयात् किम् बलाका? 'अयोपधात्' किम्? क्षत्रिया।**

**'योपधप्रतिषेधे हयगवयमुक्यमनुष्यमत्स्यानामप्रतिषेधः'**

**(वा. २४९५) हयी। गवयी। मुकयी। 'हलस्तद्धितस्य'**

**(सू. ४७२) इति यलोपः। मनुषी। 'मत्स्यस्य ङ्याम्'**

**(वा. ४१९८) मत्सी।**

५१८ - **पदच्छेदः** - जातेः, अस्त्रीविषयात्, अयोपधात्।

**अनुवृत्तिः** - ङीप्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - नित्य स्त्रीलिङ्गभिन्नात् तथाच ळकारोपधभिन्नात्-जातिवाचक शब्दात् स्त्रीत्वे द्योत्ये ङीष् प्रत्ययो भवति।

**विशेष - 'आकृतिग्रहणाजातिः'** - आकृत्या यस्यज्ञानं भवति सा जातिः। यथा - 'तटी' इत्यत्र जातिवाचित्वात्, अनियतलिङ्गत्वात्, अयोपधत्वाच्च ङीष् भवति।

**'लिङ्गनाञ्च नसर्वभाक्' 'सकृद्-आख्यातनिर्ग्राह्या'** - येन सर्वलिङ्गः न स्यात्, एकत्र एकवारं ग्रहणे-अन्यत्र अनाख्यातेऽपि (विना कथनेऽपि तस्य ज्ञानं भवति - सापि जातिः। अर्थात् एकस्याः व्यक्तेः परिचयानन्तरं तत् सदृश अन्यस्याः व्यक्तेः स्वयं ज्ञानं भवेत् (असर्वलिङ्गत्वे-सति) सर्वलिङ्गेषु भवेत् वाऽ्नवा। यथा - एकस्यां व्यक्तौ 'वृषल' इत्युपदेशात् व्यक्त्यन्तरे पुनः उपदेशस्यावश्यकता न भवति।

**गोत्रं च चरणैः सहः** - चरणवाचिशब्दैः सह गोत्रप्रत्ययान्त शब्दाः अपि जातित्वं लभन्ते। यथा - औपगवी, कठी, कलापी, वह्वृची। अत्र सर्वत्र क्रमशः उपगोः अपत्यं स्त्री 'तस्थापत्यं' इत्यणि, ङीपं बाधित्वा अनेन ङीष् विधीयते।

**कठी** - कठेन प्रोक्तम् अधीयाना। कलापिना प्रोक्तमधीयाना - अत्रणिनितस्य लुक् (कठचरकात्) 'तदधीते' अणि 'प्रोक्तात्लुक्' लुकि ततो ङीषि।

(वार्तिक - योपधप्रतिषेधे.)

**सरलार्थः** - यकारोधस्यप्रतिषेधे - हय, गवय, मुकय, मनुष्य तथा च मत्स्य इत्यादीन् शब्दान् परित्यज्य - अन्यत्र ङीष् प्रत्ययस्य प्रतिषेधो वाच्यः।

हय + ङीष् (ई) = हयी (अश्वा)

गवय + ङीष् (ई) = गवयी (खच्चरी)

मनुष्य + ङीष् (ई) = मनुषी (मानवी) अत्र 'हस्तद्धितस्य' इति यकार लोपे 'यस्येति च' इति अकार लोपे **मनुषी** इति।

(वार्तिक - मत्स्यस्यङ्याम्)

**सरलार्थः** - ङी-प्रत्यये परे मत्स्य शब्दस्य यकारस्य लोपः भवति।

मत्स्य + ई = मत्स् + ई = मत्सी।

**(५१९) -पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च। ४।१।६४॥**

**पाकाद्युत्तरपदाज्जातिवाचिनः स्त्री विषयादपि ङीष् स्यात्। ओदनपाकी। शङ्कुकर्णी। शालपर्णी। शङ्खपुष्पी। दासीफली। दर्भमूली। गोवाली। ओषधि विशेष रूढा एते।**

---

५१९ - **पदच्छेदः** - पाककर्णपर्णपुष्पफलमूलवालोत्तरपदात्, च।

**अनुवृत्तिः** - जातेः, ङीष्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पाक, कर्ण, पर्ण, पुष्प, फल, मूल, वाल, इत्येते यदि उत्तरपदे भवन्ति तर्हि जातिवाचि नित्य-स्त्रीलिङ्ग शब्दात् ङीष्-प्रत्ययो भवति।

**यथा - ओदनपाकी** = (नीलझिण्टी-जड़ी) उपरितनस्था सर्वेऽपिशब्दाः जातिवाचकाः, ओषधिविशेषाश्च।

**(५२०) -इतो मनुष्यजातेः। ४।१।६५॥**

**ङीष् स्यात्। दाक्षी। योपधादपि। उदमेयस्यापत्यं स्त्री औदमेयी। 'मनुष्य' इति किम्? तित्तिरिः।**

---

५२० - **पदच्छेदः** - इतः, मनुष्यजातेः।

**अनुवृत्तिः** - ङीष्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इदन्तात् मनुष्यजाति-वाचिनः शब्दात् स्त्रियां ङीष् प्रत्ययः भवति।

**प्रयोगसिद्धिः - दाक्षी** = यद्यपि जातिवाचकशब्दात् 'जातेरस्त्री.' सूत्रेण जातिपदस्य अनुवृत्तित्वात् तत्कार्यं सम्भवति तथापि अस्मिन् सूत्रे यकारोपध-जातिवाचक-शब्दादपि ङीष् प्रत्ययः भवति।

**(५२१) -ऊङुतः। ४।१।६६॥**

**ऊकारान्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ्स्यात्। कुरुः। 'कुरुनादिभ्योण्यः' (सू. ११९०) तस्य 'स्त्रियां भवन्ति' (सू. ११९५) इत्यादिना लुक्। अयोपधात् किम्? अध्वर्युः। अप्राणिजातेश्चारज्ज्वादीनामुपसङ्ख्यानम् (वा. २५०२) रज्ज्वादि पर्युदासादुवर्णान्तेभ्य एव। अलाब्वा। कर्कन्धवा। १ - अनयोर्दीर्घान्त-त्वेऽपि 'नोङ्धात्वोः' (सू. ३७२१) इति विभक्त्युदात्तत्व-प्रतिषेध ऊङःफलम्। प्राणिजातेस्तु कुकवाकुः। रज्ज्वादेस्तु रज्जुः हनुः।**

---

५२१ - **पदच्छेदः** - ऊङ्, उतः।

**अनुवृत्तिः** - मनुष्यजातेः, अयोपधात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययो, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यकारोपधभिन्नोकारान्तमनुष्यजातिवाचकशब्दात् ऊङ् प्रत्ययो भवति।

**(५२२) -बाह्वन्तात्संज्ञायाम्। ४।१।६७॥**

**स्त्रियामूङ् स्यात्। भद्रबाहूः। संज्ञायाम् किम्? वृत्तबाहुः।**

---

५२२ - **पदच्छेदः** - बाह्वान्तात्, संज्ञायाम्।

**अनुवृत्तिः** - ऊङ्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - स्त्रीलिङ्गवाचकात् शब्दात् ऊङ् प्रत्ययः भवति।

**भद्रबाहू** = भद्रबाहू यस्या सा (इतिनाम्ना काचित् स्त्री)

**वृत्तबाहुः** = (वृत्तौ बाहू यस्या सा) (गोल भुजाओंवाली) संज्ञा-अभावात् ऊङ् न भवति।

**(५२३) -पङ्गोश्च। ४।१।६८॥**

**पङ्गूः। 'श्वसुरस्योकाराकार लोपश्च' (वा. ५०३९) चादूङ् पुंयोगलक्षणस्य ङीषोऽपवादः। लिङ्गविशिष्टपरिभाषया - स्वादयः। श्वश्रूः।**

---

५२३ - **पदच्छेदः** - पङ्गोः, च।

**अनुवृत्तिः** - ऊङ्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पङ्गु शब्दात् ऊङ् प्रत्ययः भवति। यथा पङ्गूः।

(वार्तिक - श्वशुरस्य.) श्वशुर-शब्दस्य उकार - अकारयोः लोपः भवति। तथा च ऊङ् प्रत्ययः भवति।

**प्रयोगः - श्वश्रूः** = श्वशुर + ऊङ् (उकार-अकार) लोपे = श्वशूर + ऊ = श्वश्रूः सौ रुत्वे विसर्गे।

**(५२४) -ऊरुत्तरपदादौपम्ये। ७।१।६९॥**

**उपमानवाचिपूर्वपदमूरुत्तरपदं यत्प्रातिपदिकं तस्मादूङ्स्यात्। करभोरूः।**

---

५२४ - **पदच्छेदः** - उरूत्तरपदात्, औपम्ये।

**अनुवृत्तिः** - ऊङ्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ऊरुः उत्तरपदं यस्य तस्मात् प्रातिपदिक शब्दात् औपम्य गम्यमाने स्त्रियाम् ऊङ् प्रत्ययो भवति।

**प्रयोगसिद्धिः** = **करभोरूः** = करभौ इव ऊरू यस्य सा इति विग्रहे बहुव्रीहि-समासे करभोरू शब्दात् करभ इति उपमान-वाचकात् ऊरू इति उत्तरपदात् ऊङ् प्रत्यये कृते (करभोरू + ऊ) = करभोरू, सौ, रुत्वे, विसर्गे, 'करभोरूः' इति।

(५२५) -**संहितशफलक्षणवामादेश्च। ४।१।७०॥**

**अनौपम्यार्थं सूत्रम्। संहितोरूः। शफोरूः। शफौ खुरौ ताविव संश्लिष्टत्वादुपचारात्। लक्षण शब्दादर्शआद्यच्। लक्षणोरूः। वामोरूः। 'संहितसहाभ्यां चेति वक्तव्यम्' (वा. २५०३) हितेन सह सहितौ ऊरू यस्याः सा सहितोरूः। सहेते इति सहौ उरू यस्याः सा सहोरूः। यद्वा विद्यमानवचनस्य सहशब्दस्य उर्वतिशयप्रतिपादनाय प्रयोग।**

---

५२५ - **पदच्छेदः** - संहितशफलक्षणवामादेः, च।

**अनुवृत्तिः** - ऊरूत्तरपदात्, ऊङ्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उपमानवाचक शब्दस्य यत्र - अभिव्यक्तिर्न भवति तत्र यथा - संहित, शफ, लक्षण, वाम इत्यादीनां शब्दानां पूर्वपदे विद्यमाने, ऊरू शब्द - उत्तरपदे विद्यमाने सति स्त्रीलिङ्गे ऊङ् प्रत्ययः भवति। यथा - संहितोरूः। संहितौ ऊरू यस्याः।

(वार्तिक - सहितसहाभ्यां चेति वक्तम्)

**सरलार्थः** - सहित सह-शब्दाभ्यां परे उरू शब्दः भवति चेत् एतस्मात् प्रातिपदिकात् स्त्रीलिङ्गे ऊङ् प्रत्ययो भवति।

**प्रयोगसिद्धिः** = **सहितोरूः** = सहितौ ऊरू यस्या सा (हितेन सह - स भावे) 'वोप-सर्जनस्य' इत्यनेन सह स्थाने स-भावे, ऊङ् प्रत्यये दीर्घे, सौ, रूत्वे, विसर्गे। 'सहितोरूः' इति रूपम्।

**सहोरूः** सहेते इति वा सहौ उरू यस्या सा। रतिकालिकमर्दनम्-इत्यर्थः।

(५२६) -**संज्ञायाम्। ४।१।७२॥**

**कद्रुकमण्डल्वोः संज्ञायां स्त्रियामूङ् स्यात्। कद्रूः। कमण्डलूः। संज्ञायां किम्? कद्रुः। कमण्डलुः। अच्छन्दोऽर्थंवचनम्।**

---

५२६ - **पदच्छेदः** - संज्ञायाम्।

**अनुवृत्तिः** - कद्रुकमण्डल्वोः, ऊङ्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कद्रु तथा च कमण्डलु-शब्दः यदा संज्ञावाची भवति तदा स्त्रीत्वद्योत्ये ऊङ्-प्रत्ययः भवति।

**कद्रूः** = नागानां मातुः संज्ञा। **कमण्डलूः** = मृगस्य संज्ञा।

(५२७) -**शार्ङ्गरवाद्यञो ङीन्। ४।१।७३॥**

**शार्ङ्गरवादेरञो योऽकारस्तदन्ताच जातिवाचिनो ङीन् स्यात्। शार्ङ्गरवी। वैदी। 'जातेः' इत्यनुवृत्तेः पुंयोगे ङीषेव। 'नृनरयोर्वृद्धिश्च' (ग. ५४) इति गण-सूत्रम्। नारी।**

---

५२७ - **पदच्छेदः** - शार्ङ्गरवाद्यञः, ङीन्।

**अनुवृत्तिः** - अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - शार्ङ्गरवादिगणपठितेभ्यः तथा च अञ्-प्रत्ययान्त-प्रातिपदिकेभ्यः स्त्रीप्रत्यये ङीन् प्रत्यये भवति।

**प्रयोगः** - **शाङ्गरवी** = (शृङ्गरु मुनेः अपत्यम् (स्त्री) अण् प्रत्यये आदिपदवृद्धौ, ङीन् प्रत्यये 'ओर्गुणे' अलोपे = शाङ्गरवी।

(गणसूत्र - नृनरयोर्वृद्धिश्च)

**सरलार्थः** - नृ नर शब्दयोः वृद्धिर्भवति ङीन् प्रत्ययश्च भवति। यथा - नारी।

**(५२८) -यङश्चाप्। ४।१।७४॥**

**यङन्तात्स्त्रियां चाप् स्यात्। यङिति यङ्ष्यङोः सामान्यग्रहणम्। आम्बष्ठ्या कारीषगन्ध्या। 'षाद्यञश्चाब्वाच्यः' (वा. २५०५) शार्कराक्ष्या। पौतिमाष्या।**

---

५२८ - **पदच्छेदः** - यङः, चाप्।

**अनुवृत्तिः** - स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यङ् प्रत्ययान्तात् प्रातिपदिकात् स्त्रीलिङ्गे चाप् प्रत्ययः भवति।

(वार्तिक - षाद्यञश्चाप्.) षकारात् परो यञन्तात् अपि चाप् प्रत्ययः भवति शार्कराक्ष्या = शर्कराक्षस्यापत्यं स्त्री। पौतिमाष्या = पूतिमाषस्यापत्यं स्त्री।

**(५२९) -आवट्याच्च। ४।१।७५॥**

**अस्माच्चाप् स्यात्। 'यञश्च' (सू. ४७१) इति ङीपोऽपवादः। अवटशब्दो गर्गादिः। आवट्या।**

---

५२९ - **पदच्छेदः** - आवट्यात्, च।

**अनुवृत्तिः** - चाप्, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्चः

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - आवट्य शब्दादपि चाप् प्रत्ययः भवति। 'यञश्च' इति सूत्रात् ङीप् प्रत्ययस्यापवादरूपम्।

**(५३०) -तद्धिताः। ४।१।७६॥**

**आपञ्चमसमाप्तेरधिकारोऽयम्।**

---

५३० - **पदच्छेदः** - तद्धिताः।

**अनुवृत्तिः** - प्रत्यय।

**सूत्रप्रकारः** - अधिकारसूत्रम्।

**सरलार्थः** - पञ्चमध्याय-पर्यन्तं (पञ्चमअध्याय समाप्तिंयावत्) अस्य सूत्रस्य - अधिकारः अस्ति। (तद्धित संज्ञायां प्रत्यया भविष्यन्ति।)

**(५३१) -यूनस्तिः। ४।४।७७॥**

**युवन्शब्दात् ति-प्रत्ययः स्यात्, स च तद्धितः। लिङ्गविशिष्ट-परिभाषया सिद्धे तद्धिताधिकार उत्तरार्थः। युवतिः। अनुपसर्जनादित्येव। बहवो युवानो यस्यां सा बहुयुवा। युवतीति तु यौतेः शत्रन्तात् ङीपि बोध्यम्।**

---

५३१ - **पदच्छेदः** - यूनः, तिः।

**अनुवृत्तिः** - तद्धिताः, अनुपसर्जनात्, स्त्रियाम्, प्रातिपदिकात्, प्रत्ययः, परश्च।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - युवन् शब्दात् ति प्रत्ययः भवति, स च तद्धित संज्ञकः भवति।

**प्रयोगसिद्धिः - युवतिः** = युवन् + ति = युव + ति (स्वादिष्व.) इत्यनेन पद संज्ञायां न लोपे, सौ रुत्वे विसर्गे युवतिः इति।

**युवती** = यु + लट् - शतृ = अत् (यु + अत्) उवङ् 'उगितश्च' ङीप् (प् + उव् + अत् + ई = युवती)॥

**॥ इतिस्त्रीप्रत्ययप्रकरणम्॥**

## स्वाध्यायः

**१. प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) टाप् विधायकं सूत्रं किम्?

(क) काण्डान्तात् क्षेत्रे (ख) प्राचां ष्फ-तद्धिते

(ग) अजाद्यतष्टाप् (घ) अभाषिपुंस्काच्च

(२) ङीप्-विधायकं सूत्रं किम्?

(क) टा बृचि (ख) यञश्च (ग) ऊधसोऽनङ् (घ) शोणात् प्राचाम्

(३) डाप् केन सूत्रेण भवति।

(क) डाबुभाभ्यामन्यतरस्याम् (ख) अनो बहुव्रीहेः

(ग) वोतो गुणवचनात् (घ) षिद्गौरादिभ्यश्च

(४) ति प्रत्ययविधायकं सूत्रं किम्?

(क) संज्ञायाम् (ख) यूनस्तिः (ग) तद्धिताः (घ) इतो मनुष्य जातेः

(५) चाप्-प्रत्ययः केन सूत्रेण भवति?

(क) यङश्चाप् (ख) यञश्च (ग) काण्डान्तात् क्षेत्रे (घ) दामहायनान्ताच्च

(६) ङीष्-प्रत्ययः केन सूत्रेण भवति?

(क) नित्यं संज्ञा-छन्दसोः (ख) वयसि प्रथमे

(ग) सर्वत्रलोहितादिकतन्तेभ्यः (घ) बहुव्रीहेरूधसो ङीष्

(७) ङीन्-विधायकं सूत्रं किम्?

(क) शार्ङ्गरवाद्यो ङीन् (ख) पत्युर्नो यज्ञसंयोगे

(ग) अन्यतो ङीष् (घ) विभाषा सपूर्वस्य

(८) गोपी - इत्यत्र ङीष् केन भवति?

(क) बह्वादिभ्यश्च (ख) शोणात्प्राचाम् (ग) वोतो गुणवचनात् (घ) पुंयोगादारव्यायाम्

(९) नर्तकी इत्यत्र ङीप् प्रत्ययः केन भवति?

(क) षिद्गौरादिभ्यश्च (ख) क्रीतात्करणपूर्वात्

(ग) क्तान्तादल्पाख्यायाम् (घ) अस्वाङ्गपूर्वपदाद्वा

(१०) कल्याणक्रोडा इत्यत्र ङीष् निषेधः केन भवति?

(क) न क्रोडादि-बह्वचः (ख) यङश्चाप्।

(ग) अवट्याच्च (घ) बह्वादिभ्यश्च।

२. **एकैकवाक्येन उत्तराणि लिखत।**

(१) 'युवति' इत्यत्र ति प्रत्ययः केन भवति।

(२) 'शार्ङ्गरवी' इत्यत्र ङीन् प्रत्ययः केन भवति।

(३) 'शूर्पणखा' इत्यत्र ङीष् निषेधः केन भवति।

(४) 'सूर्या' इत्यत्र कः प्रत्ययः केन भवति।

(५) 'मत्सी' इत्यत्र कः प्रत्ययः केन भवति।

(६) 'गृहपत्नी' इत्यत्र नकारादेश विकल्पेन केन भवति।

(७) 'त्रिलोकी' इत्यत्र ङीप् प्रत्ययः केन भवति।

(८) 'वयसि प्रथमे' इदं सूत्रं किं करोति।

(९) 'हलस्तद्धितस्य' सूत्रस्य कार्यं किम्।

(१०) 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्।' अस्य सूत्रस्य कार्यं किम्?

३. **सविस्तरम् उत्तराणि लिखत।**

(१) अजादिभिः स्त्रीत्वस्य विशेषणान्नेह पञ्चाजी।

(२) प्रत्यय ग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्।

(३) अद्रवं मूर्तिमत्स्वाङ्गम्। श्लोकस्यपूर्तिकुरूत।

(४) गोत्रग्रहणाज्जातिः।

(५) गोत्रं च चरणैः सह।

४. **निम्नलिखितानि रूपाणि साधयत।**

| **(अ)** | **(ब)** |
|---|---|
| (१) अजा | (६) सुनयिका |
| (२) द्विपदी | (७) गार्ग्याणी |
| (३) बहुयज्वा | (८) त्रिलोकी |
| (४) मामिका | (९) द्विकाण्डा |
| (५) अष्टिका | (१०) अन्तर्वत्नी |

५. **अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायत।**

(१) अजाद्यतष्टाप्

(२) दिक्पूर्वपदान्ङीप्

(३) जातेरस्त्रीविषयादयोपधात्।

(४) इतो मनुष्य जातेः।

(५) बाह्वन्तात्संज्ञायाम्।

●

# ८

# कर्तृकारकम्

**प्रस्तावना**

क्रियाजनकं कारकम्। करोति-क्रियां निर्वर्तयति इति भाष्ये व्युत्पत्ति दर्शनात्। कारकाणि षट् सन्ति यथा-

**कर्ता कर्म च करणं सम्प्रदानं तथैव च।**

**अपादानाधिकरणे इत्याहुः कारकाणि षट्।**

कर्तृकारकम्, कर्मकारकम्, करणकारकम्, सम्प्रदानकारकम्, अपादानकारकम्, अधिकरणकारकम् एषुकारकेषु प्रथमम् कर्तृकारकम् इति। 'प्रातिपदिकार्थलिङ्ग परिमाण वचनमात्रे प्रथमा' अस्य अर्थो भवति यत् - प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये परिमाणमात्रे वचनमात्रे प्रथमा भवति। प्रथमाविभक्तेः कर्तृकारकम् नाम - अस्ति-इति।

**(५३२) -प्रातिपदिकार्थलिङ्ग परिमाणवचन मात्रे प्रथमा। २।३।४६॥**

**नियतोपस्थितिकः प्रातिपदिकार्थः। मात्र शब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रेलिङ्गमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात्। उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानम्। अलिङ्गा नियत लिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणम्। अनियतलिङ्गास्तु लिङ्गमात्राधिक्यस्य। तटः तटी त्तटम्। परिमाणमात्रे द्रोणो व्रीहिः द्रोणरूपं यत्परिणामाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः। प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्, प्रत्ययार्थस्तु परिच्छेद्य परिच्छेदक भावेन व्रीहौ विशेषणमिति विवेकः। वचनं संख्या। एकः। द्वौ। बहवः। इहोक्तार्थत्वाद्विभक्तेर प्राप्तौ वचनम्।**

५३२ - **पदच्छेदः** - प्रातिपदिकार्थ-लिङ्ग-परिमाणवचनमात्रे, प्रथमा।

**समास** - प्रातिपदिकस्य अर्थः प्रातिपदिकार्थः (ष.त.) 'प्रातिपदिकार्थश्च, लिङ्गश्च परिमाणञ्च, वचनञ्च प्रातिपदिकार्थलिङ्ग परिमाण वचनम्' समाहार द्वन्द्वः। प्रातिपदिकार्थ लिङ्ग परिमाण वचनानि एव प्रातिपदिकार्थ लिङ्ग परिमाण वचनमात्रम्, तस्मिन् प्रातिपदिकार्थलिङ्ग-परिमाणवचनमात्रे इति।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - प्रातिपदिकार्थमात्रे, लिङ्गमात्रे, परिमाणमात्रे वचनमात्रे च प्रथमा विभवितः भवति।

**विशेषार्थः** -

(१) स्वार्थ - द्रव्य-लिङ्ग संख्या - कारकेति पञ्चविधः प्रातिपदिकार्थः। अतः लिङ्गस्यापि प्रातिपदिकार्थेन एव गतार्थत्वात् प्रातिपदिकार्थ-मात्रे इत्यनेन एव प्रथमासिद्धे लिङ्ग-ग्रहण सार्थक्याय नियतोपस्थितिकः प्रातिपदिकार्थः इति स्वीक्रियते।

(२) अलिङ्गा नियत लिङ्गाश्च प्रातिपदाकार्थमात्रस्य उदाहरणानि। उच्चैः नीचैः इत्यादयः अलिङ्गाः। कृष्णादयः नियतलिङ्गाः।

(३) अनियतलिङ्गाः तु लिङ्गमात्राद्याधिकस्य उदाहरणानि यथा तट इत्यादि।

(४) सूत्रे यदि 'परिमाण इत्यस्य' इत्यस्य ग्रहणं न स्यात् तर्हि द्रोण-रूपं परिमाणस्य च व्रीहेः च द्वयोः प्रातिपदिकार्थ-त्वेन नामार्थत्वेन द्रोणाभिन्नो व्रीहिः इति अनिष्टार्थस्य प्राप्तिः स्यात् द्रोणरूपपरिमाणस्य च परिच्छेद्य - परिच्छेदकभाव विधया तु प्रत्ययार्थे परिमाण सामान्ये प्रकृत्यर्थे द्रोणशब्दार्थः अभेद संसर्गेण विशेष-परिमाणं विशेषणं भवति। द्रोण भिन्नं यत्परिमाणम् इत्यर्थः। तस्य च परिच्छेद्य परिच्छेदकभावेन वीहौ विशेषणतया इत्यनेन द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नः व्रीहिः इति।

(५) एकः द्वौ-बहवः इत्यत्र एकत्व-द्वित्व-बहुत्वानाम् - अर्थानां नियमेन उपस्थितिः भवति। अतः प्रातिपदिकार्थम् इत्येव सिद्धेः सूत्रे वचनग्रहणं व्यर्थम् - इति शङ्का जायते किन्तु प्रकृतिभिः एव एकत्वादीनाम्-अर्थानाम् उक्तत्वाद, 'उक्तार्थानाम् अप्रयोगः' इति न्यायेन प्रथमा विभवतेः अप्राप्तौ तदर्थं सूत्रे वचन ग्रहणे न्याट्यम् एव। तथा च 'न केवला प्रकृतिः प्रयोक्तत्या नापि केवलः प्रत्ययः' इति न्यायाद अत्र विभक्तिः आनुवादिक शब्द साधुत्वार्थे प्रयोज्या।

**साधनिका :** -

**( १ ) कृष्णः** - वसुदेव के पुत्र - द्रोणो व्रीहिः द्रोण-भर-चावल कृष्ण शब्दात् प्रातिपदिकात् कृष्ण-कृष्णत्व-पुंस्त्वार्थस्य च नियमेन उपस्थित्या 'प्रातिपदिकार्थलिङ्गपरिमाणवचन-मात्रे प्रथमा' इत्यनेन प्रथमा 'द्वयेकयोर्द्विवचनैकवचने-' इति एकत्व विवक्षायां प्रथमैकवचने अनुबन्धलोपे रुत्वे विसर्गे च कृष्णः इति।

**( २ ) द्राणोव्रीहिः** - द्रोण शब्दात् प्रातिपदिकात् परिमाणमात्रे - 'प्रातिपदिकार्थ-लिङ्ग-परिमाणवचनमात्रे प्रथमा' इत्यनेन प्रथमा एकत्व विवक्षायां सु प्रत्यये सस्य रुत्व विसर्गे द्रोणो व्रीहिः इति सिद्धम्।

**(५३३) -सम्बोधने च। २।३।४७॥**

**इह प्रथमा स्यात्। हे राम।**

---

५३३ - **पदच्छेदः** - सम्बोधने, च

**अनुवृत्तिः** - प्रथमा

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सम्बोधने प्रथमा विभक्तिः भवति।

**विशेषार्थः** - सम्मुखीकरणं नाम सम्बोधनम्। प्रातिपदिकार्थेन सह सम्बोधने गम्यमानेऽपि प्रथमा विभक्तिर्जायते।

**साधनिका :** - **हे राम!** - हे राम

राम शब्दात् - सम्बोधनत्व विवक्षायां तु 'प्रातिपदिकार्थ...' इत्यनेन प्रथमा विभक्तेः अप्राप्त्या 'सम्बोधने च' इति प्रथमा एकवचन विवक्षायां सु प्रत्यये अनुबन्धलोपे 'एङ्ह्रस्वात्सम्बुद्धेः' इति सस्य लोपे हे राम! इति रूपं जातम्।

**इति प्रथमा**

**स्वाध्यायः**

**१. प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) किं नाम कारकम्?

(२) प्रातिपदिकार्थ-मात्रे का विभक्तिः भवति?

(३) किन्नाम प्रातिपदिकार्थः?

(४) मात्र-शब्दस्य केन सह योगः?

(५) परिमाणवचनमात्रे का विभक्तिः?

(६) प्रातिपदिकार्थस्य एकम् उदाहरणम्?

(७) द्रोणो व्रीहिः कस्य उदाहरणम्?

(८) नियतलिङ्गस्य उदाहरणम् किम्?

(९) वचननाम किम्?

(१०) सम्बोधने का विभक्तिः?

**२. सविस्तरम् उत्तराणि लिखत।**

(१) प्रातिपदिकार्थ.... इति सूत्रस्य पूर्तिं कृत्वा सरलार्थं लिखत?

(२) पञ्चविधः प्रातिपदिकार्थः इति सविस्तारेण प्रतिपादयत?

**३. अधो-लिखितानि रूपाणि साधयत।**

(१) कृष्णः (२) श्रीः

(३) तटी (४) द्रोणो व्रीहिः

(५) द्वौ

**४. (अ) विभागेन सह (ब) विभागं योजयत?**

| (अ) | (ब) |
|---|---|
| (१) प्रातिपदिकार्थः | (१) एकः |
| (२) लिङ्गः | (२) द्रोणो व्रीहिः |
| (३) परिमाणम् | (३) तटम् |
| (४) वचनम् | (४) ज्ञानम् |

# १

# कर्मकारकम्

**प्रस्तावना**

अस्मिन्-कर्मकारक-प्रकरणे कर्म-संज्ञा भवति। यस्य कर्म-संज्ञा भवति तस्य 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्ति-र्भवति। अत्र 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण कर्ता क्रियां साधयितुं यं पदार्थम् अतिशयेन आप्तुम् इच्छति तस्य पदार्थस्य कर्म संज्ञा भवति तदनन्तरं द्वितीया-विभक्ति-र्जायते। ईप्सिततमवत् अनीप्सितस्याऽपि कर्म संज्ञाऽत्र क्रियते।

अस्मिन्प्रकरणे 'कर्मप्रवचनीयाः' इति सूत्रेण अधिकारोऽपि विद्यते-एव। कर्मप्रवचनीय संज्ञकस्याऽपि 'कर्मप्रवचनीययुक्ते द्वितीया' इति सूत्रेण द्वितीया विभक्तिर्भवति। अत्र विविधोपसर्गाणां धातूनाञ्च योगे कदा कर्मसंज्ञा वा कर्मप्रवचनीय-संज्ञा भवतीति विषये अस्मिन् कर्मकारके सविस्तरेण उक्तमस्ति।

**(५३४) -कारके। १।४।२३॥**

५३४ - **अनुवृत्तिः** - इत्यधिकृत्य।

**सूत्रप्रकारः** - अधिकारसूत्रम्।

**समास** - कारके - स.एकवचनम्।

**सरलार्थः** - अधिकारसूत्रमिदम्

**विशेषार्थः** - पाणिनिना षड्विधानि सूत्राणि रचितानि।

संज्ञा च परिभाषा च विधिर्नियम एव च।

अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते॥ तेषु-

अधिकार सूत्रमिदम् अस्ति।

**(५३५) -कर्तुरीप्सिततमं कर्म। १।४।४९॥**

**कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्। कर्तुः किम्? माषेष्वश्वं बध्नाति। कर्मणः ईप्सिता माषाः नतु कर्तुः। तमब्ग्रहणं किम्? पयसा आदेनं भुङ्क्ते। 'कर्म' इत्यनुवृत्तौ पुनः कर्मग्रहणमाधार-निवृत्यर्थम्। अन्यथा गेहं प्रविशतीत्यत्रैव स्यात्।**

५३५ - **पदच्छेदः** - कर्तुः ईप्सिततमं, कर्म

**अनुवृत्तिः** - कारके

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**समासः** - कर्तुः ष, एक, ईप्सिततमं - द्वि, एक कर्म - प्र.एकवचनम्।

**सरलार्थः** - कर्ता क्रियां साधयितुं यं पदार्थमतिशयेन आप्तुम् इच्छति तस्य पदार्थस्य कर्म-संज्ञा भवति। यथा - पाचकः तण्डुलान् पचति इत्यत्र पाचकः कर्ता पाचकः पक्तुम् इच्छति। पाचकः इमां पचन क्रियां निवर्तयितुं तण्डुलानतिशयेन इच्छति। अतः अत्र तण्डुलशब्दस्य कर्मसंज्ञा भवति।

**विशेषार्थः** - (१) कर्तुः किम्? माषेष्वश्वं बध्नाति। पाणिनिना सूत्रे गृहीतस्य कर्तुशब्दस्य आवश्यकतां भट्टोजिः अनेन वाक्येन दर्शयति। देवदत्तः माषेषु अश्वं बध्नाति। इत्यत्र देवदत्तः कर्ता अश्वश्च कर्म। अत्र माषा अश्वस्य

कृते ईप्सिततमाः स्यात्। तस्य कर्म संज्ञा न स्यात्। केवलं कर्तुः ईप्सिततमस्य पदार्थस्य कर्मसंज्ञा भवति। अतः अस्मिन् वाक्ये माष-शब्दस्यापि कर्मसंज्ञा न-भवेद् एतदर्थं पाणिनिना सूत्रे कर्तुः इति पदं दत्तम्।

**विशेषार्थः** - तमब्ग्रहणं किम्? पयसा ओदनं भुडक्ते।

भट्टोजिः अनेन वाक्येन सूत्रस्थित-तमब्ग्रहणस्य आवश्यकतां दर्शयति। कर्तुः कृते यः पदार्थः ईप्सिततमः स्यात् तस्यैव कर्म-संज्ञा भवति। यः पदार्थः केवलः ईप्सितः स्यात् तस्यकर्म संज्ञा न भवति। देवदत्तः पयसा ओदनं भुडक्ते। इत्यत्र देवदत्तः भोजन क्रियां कर्तुम् इच्छति। अतः ओदनः ईप्सिततमः पदार्थः अस्ति। पयः अत्र केवलः ईप्सितः-पदार्थः अस्ति। अतः पयस् शब्दस्य कर्म संज्ञा न भवति। यः पदार्थः केवलः ईप्सितः भवेत् ईप्सिततमः न भवेत् तस्य कर्म संज्ञा न स्यात् एतदर्थं सूत्रेभगवता पाणिनिना तमब्ग्रहणं कृतम्।

**विशेषार्थः** - कर्म इति अनुवृतौ पुनः कर्मग्रहणम्। अन्यथा 'गेहं प्रविशति' इत्यत्र एव स्यात्

**अधिशीडस्थासां कर्म** इति सूत्राद् इह कर्मानुवृत्तेः सम्भवः।

तथापि सूत्रे भगवता कर्म ग्रहणं किमर्थं कृतम् इति प्रश्नः उद्भवति।

अस्य प्रश्नस्य निराकरणम् अत्र भट्टोजिः करोति।

सूत्राष्टाध्यायी सूत्राणाम् अयं क्रमः वर्तते।

**आधारोऽधिकरणम्। १।४।४५॥**

**अधिशीडस्थासां (आधारः) कर्म। १।४।४६॥**

**अभिनिविशश्च (आधारः)(कर्म)। १।४।४७॥**

**उपान्वध्याडवस्ः(आधारः)(कर्म)। १।४।४८॥**

**कर्तुरीप्सिततमं कर्म। १।४।४९॥**

आधारोऽधिकरणम् १।४।४५ इति सूत्रतः आधारपदस्य अनुवृत्तिः अधिशीडस्थासां कर्म। १।४।४६ इति सूत्रतः कर्मपदस्यापि अनुवृत्तिः अभिनिविशश्च १।४।४७ इति सूत्रे आधारः - कर्म इति पदद्वयम् अनुवर्तते। उपान्वध्याङ्वसः १।४।४८ इति सूत्रेऽपि पदद्वयम् अनुवर्तते। कर्तुरीप्सिततमं कर्म। १।४।४९ - इति सूत्रे अनुवृत्तेः आश्रयणं करणीयं स्यात् तर्हि द्वयोः पदयोः सहैव अनुवृत्तिः भविष्यति। यतोहि 'एकयोग निर्दष्टानां सहैव' इति परिभाषा बलेन कर्मपदेन सह आधारपदस्यापि अनुवृत्तिः भविष्यति। अस्मिन् सूत्रे आधारपदस्य अनुवृत्ति स्वीकारे जायते। गेहं प्रविशति। इत्यत्र गेहमिति प्रवेश प्रक्रियायाः आधारः अस्ति। अतः अत्र तु गेहशब्दस्य कर्मसंज्ञा भविष्यति। किन्तु हरिं भजति इत्यत्र भजन क्रियाया आधारः नास्ति।

अतः आधारपदस्य अनुवृत्ति - स्वीकारे 'हरिं भजति' इत्यत्र हरि शब्दस्य कर्म संज्ञा न भविष्यति। अतः आधार पदस्य निवृत्तिः आवश्यकी। पाणिनिना आधार पदस्य निवृति हेतोः सूत्रे आश्रयणं न कृतम्। अनुवृत्तिं च अवरोद्धं सूत्रे कर्मपदम् गृहीतम्।

**साधनिकाः** - हरिं भजति।

**अर्थः** - हरि को भजता है।

हरि शब्दस्य 'कर्तुरीप्सिततमं कर्म' इतिसूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण हरिशब्दस्य द्वितीया विभक्तिः अम् प्रत्यये - अनुस्वारे हरिं भजति इति रूपं जातम्।

**(५३६) -अनभिहिते। २।३।१॥**

**इत्यधिकृत्य**

---

५३६ - **पदच्छेदः** - अनभिहिते

**समासः** - न अभिहितः, अनभिहितः तस्मिन् - अनभिहिते।

**सूत्रप्रकारः** - अधिकारसूत्रम्।

**सरलार्थः** - अधिकारसूत्रमिदम्

**विशेषार्थः** - अनभिहितशब्दस्यार्थः अकथितम्। अस्य तात्पर्यं भवति - अनिर्दिष्टकर्मकारके पूर्वोक्ताः विभक्तयः भवन्तीति।

**(५३७) -कर्मणि द्वितीया। २।।/२॥**

**अनुक्ते कर्मणि द्वितीया स्यात्। 'हरिं भजति। अभिहिते तु कर्मणि' प्रातिपदिकार्थमात्रे इति प्रथमैव। अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः। तिङ् - हरिः सेव्यते। कृत् - लक्ष्म्या सेवितः। तद्धितः - शतेन क्रीतः शत्यः। समासः - प्राप्तः आनन्दो यं स प्राप्तानन्दः। क्वचिन्निपातेनाभिधानम्। यथा 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्।' साम्प्रतमित्यस्य हि युज्यत इत्यर्थः।**

---

५३७ - **पदच्छेदः** - कर्मणि, द्वितीया।

**अनुवृत्तिः** - अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - तिङित्यादिभिः यत् कर्म अनुक्तं स्यात्। तत्र द्वितीया प्रवर्तते। यत् कर्म उक्तं भवति ततः प्रथमा भवति।

**विशेषार्थः** - कर्मादिकारकार्थानाम् अभिधानं तिङ्प्रत्ययेन, कृत् प्रत्ययेन, तद्धितेन, समासेन च भवति। तिङप्रत्ययेन अभिधाने सति द्वितीया न भवति इत्यस्य उदाहरणम् - लक्ष्म्या हरिः सेव्यते। कृत्प्रत्ययेन कर्मणः अभिधाने तु द्वितीया न भवति इत्यस्य लक्ष्म्या सेवितः, हरिः इति उदाहरणं ज्ञेयम्। एवं तद्धितसमास निपात वा कारकार्थानाम् अभिधानं भवति।

**साधनिका:** - **'हरिं भजति'**

**अर्थः** - हरि को भजता है।

हरि शब्दस्य 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण कर्म-संज्ञायाम् 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्ति स्वादिकार्ये हरिं भजति। इति रूपं जातम्।

**हरिः सेव्यते। (अर्थः हरि की सेवा की जाती हैं।)**

हरि शब्दस्य 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण कर्मत्वेऽपि 'अनभिहिते' इत्यधिकार-विहित्वेन द्वितीया अप्राप्त्या हरित्व हरिपुंस्त्वरूपाणां नियमेन उपस्थित्या च 'प्रातिपदिकार्थ.... मात्रे प्रथमा' इति सूत्रेण प्रातिपदिकार्थमात्रे प्रथमाविभक्तिः 'हरिः सेव्यते' इति सिद्धम्।

**(५३८) -तथायुक्तं चानीप्सितम्। १।४।५०॥**

**इप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्म संज्ञं स्यात्। ग्रामं गच्छंस्तृणं स्पृशति। ओदनं भुञ्जानो विषं भुङ्क्ते।**

---

५३८ - **पदच्छेदः** - तथायुक्तं च अनीप्सितम्।

**समासः** - न-ईप्सितमं इति अनीप्सितम्। नन् - त.पु.।

**अनुवृत्तिः** - कर्तुरीप्सिततमं, कर्म, कारके

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - ईप्सिततमवत् अनीप्सितस्यापि कर्म संज्ञा भवति।

**विशेषार्थः** - भर्तृहरिः वाक्यपदीये ईप्सितकर्म त्रिषु भागेषु विभजति। यथा निर्वर्त्य, विकार्य एवं प्राप्य इति।

**साधनिका:** - ग्रामं गच्छन् तृणं स्पृशति।

**अर्थः** - गाँव को जाते हुए तिनके को भी छूता हैं।

ग्राम इत्यस्य ईप्सितमत्वात् 'कर्तुरीप्सिततम कर्म' इति सूत्रेण कर्म संज्ञा 'कर्मणि द्वितीया' इति सूत्रेण ग्राम-शब्दस्य द्वितीया। तृणस्य ईप्सिततमत्वात् भावे तु 'तथायुक्तं चानीप्सि तम्' इति सूत्रेण कर्मत्वं 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तिः पूर्वरूपे 'तृणम् इति रूपं जातम्।'

**यथाः - ओदनं भुञ्जानो विषं भुङ्क्ते।**

**अर्थः** - भात खाते हुए विष खा लेता हैं।

**(५३९) -अकथितं च। १।४।५१॥**

**अपादानादि विशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्**

**दुह्याच्पच्दण्ड रुधिप्रच्छिचि ब्रूशासु जिमथमुषाम्।**

**कर्मयुक्स्याद कथितं तथा स्यान्नीहृकृष्वहाम्॥**

**दुह्यादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णाम्। कर्मणा यद्युज्यते तदेवाकथितं कर्म इति परिगणनं कर्तव्यमित्यर्थः। गामं दोग्धि पयः। नलिं याचते वसुधाम्। अविनीतं विनयं याचते। तण्डुनालोदनं पचति। गर्गाञ्छतं दण्डयति व्रजमवरुणद्धि गाम्। माणवकं पन्थानं पृच्छति। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते, शास्ति वा। शतं जयति देवदत्तम्। क्षुधां क्षीरनिधिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति, हरति, कर्षति, वहति वा। 'अर्थनिबन्धनेयं संज्ञा। बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते, अभिधत्ते, वक्तीत्यादि। कारकं किम? माणवकस्य पितरं पन्थानं पृच्छति' अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्। (वा. ११०३-११०४) कुरून् स्वपिति। मासमास्ते। गोदोहमास्ते। कोशमास्ते।**

---

५३९ - **पदच्छेदः** - अकथितम्, च।

**समासः** - न कथितम् इति - अकथितम् (न.त.)

**अनुवृत्तिः** - कर्तुरीप्सिततमं कर्म कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - यदा वक्ता अपादानादिकारकान् तेषु स्वेषु अर्थेषु प्रयोक्तुं न इच्छति तदा तेषां कारकाणां कर्म संज्ञा भवति। दुह् याच्, पच्, दण्ड, रुध्, प्रच्छ, चि, ब्रू-शास् जि, मथ्, मुष्, नी, हृ, कृष् एवं वह धातूनां कर्मणा सह यस्य सम्बन्धो विद्यते तम् अकथितं कथ्यते। यथा गोपालः गां पयः दोग्धि अत्र गो इत्यस्मात् पयसः विश्लेषः भवति। गो इति पयसः विभागाश्रयः। अतः गो अपादानमस्ति। किन्तु यदा वक्ता गोशब्दं अपादान स्वरूपेण प्रयोक्तुं न इच्छति तदा तस्य अनेन सूत्रेण कर्मसंज्ञा भवति।

**विशेषार्थः** - (१) द्विकर्मक-स्थले अस्य सूत्रस्य प्रवृत्ति-र्भवति। यत्र अस्य सूत्रस्य प्रवृत्ति र्भवति, तत्र 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण सिद्धं कर्म अपि वाक्यं भवत्येव। 'कर्तुरीप्सिततमं कर्म' इत्यनेन सिद्धं प्रधानं कर्म भवति। 'अकथितं च' इति सूत्रेण सिद्धं गौणं कर्म भवति।

(२) एते द्विकर्मकाः धातवः। याचते। दोग्धि। पचति। दण्डयति। रुणद्धि। पृच्छति चिनोति। ब्रूते। शास्ति। जयति। मथ्नाति। मुष्णाति। नयति। हरति। कर्षति। वहति एतदर्थकाः धातवः अपि द्विकर्मकाः। यथा-भिक्षते, भाषते, वक्ति इत्यादयः।

(३) अकर्मक धातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम् अकर्मकधातुभिः योगे देशवाचकः कालवाचकः क्रियावाचकः मार्गवाचकः कर्मसंज्ञा भवति। यथा अतिथिः मासं वसति। अत्र मास शब्दः कालवाचकः वसधातुः अकर्मकः। अकर्मकवसधातोः योगे अत्र कालवाचकः मास शब्दः वर्तते। अतः मासशब्दस्य कर्मसंज्ञा। ततः कर्मणि द्वितीया इति सूत्रेण मास शब्दस्य द्वितीया भवति।

**साधनिकाः** - वामनः बलिं वसुधां गायते।

**अर्थः** - वामनजी बलि से पृथ्वी माँगते है।

याच्धातोः अर्थः परस्वत्वनिवृत्ति पूर्वकं स्वस्वत्वोत्पत्ति रूपं फलं तदनुकुल व्यापारश्च वापाश्च। अत्र वसुधा फलाश्रया विद्यते - अतः वसुधा-शब्दस्य 'कर्तुरीप्सिततमं कर्म' इत्यनेन कर्मसंज्ञा। वसुधा अत्र मुख्य कर्म विद्यते। बलेः तु अवधित्वाद् अपादानत्वं किन्तु अपादानम् इत्यस्य अविवक्षायां 'अकथितं च' इत्यनेन कर्मसंज्ञा। ततः उभयत्रापि 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया। अपादानत्वम् एव यदि विवक्ष्यते तदा वामनः बलेः वसुधां याचते।

**'तण्डुलान् ओदनं पचति'** (चावलो से भात पकता है।)

**(५४०) -गतिबुद्धि प्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ। १।४।५२॥**

''गत्याद्यर्थानां शब्दकर्मणामकर्मकाणां चाणौ यः कर्ता स णौ कर्मस्यात्

शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्

आशयच्चामृतं देवान् वेदमध्यापयद्विधिम्।

आसयत्सलिले पृथ्वीं यः स मे श्री हरिर्गतिः॥''

(२) 'गति' इत्यादि किम्? पाचयत्योदनं देवदत्तेन।

(३) अण्यन्तानां किम्? गमयति देवदत्तो यज्ञदत्तं, तमपरः प्रयुङ्क्ते, गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः

(४) **'नीवह्योर्न'** (वा. ११०९)। नाययति वाहयति वा भारं भृत्येन।

(५) **'नियन्तृकर्तृकस्य वहेरनिषेधः'** (वा. १११०)। वाहयति रथं वाहान् सूतः।

(६) **'आदिरवाद्योर्न'** (वा. ११०९) आदयति खाद्यति वा अन्नं बटुना।

(७) **'भक्षेरहिंसार्थस्य न.वा.'** भक्षयत्यन्नं बटुना। अहिंसार्थस्य किम्? भक्षयति बलीवर्दान्सस्यम्।

(८) **'जल्पतिप्रभृतीनामुपसंख्यानम्'** (वा. ११०७) जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः।

(९) **'दृशेश्च'** (वा. ११०८) दर्शयति हरिं भक्तान्। सूत्रे ज्ञान सामान्यार्थानामेव ग्रहणं न-तु तद् विशेषार्थानामित्यनेन ज्ञाप्यते। तेन स्मरति जिघ्रति इत्यादीनां न। स्मारयति घ्रापयति वा देवदत्तेन।

(१०) शब्दायतेर्न (वा. ११०५) शब्दायति देवदत्तेन। धात्वर्थ सङ्गृहीत-कर्मत्वेनाकर्मकत्वात्प्राप्तिः। येषां देशकालादिभिन्नं कर्म न सम्भवति तेऽत्राऽकर्मकाः न त्वविव पक्षितकर्मणोऽपि। तेन मासमासयति देवदत्तम् 'इत्यादौ कर्मत्वं भवति, देवदत्तेन पाचयति इत्यादौ तु न।'

---

५४० - **पदच्छेदः** - गति.... कर्मकाणाम्, अणि, कर्ता, सः णौ।

**समासः** - गतिश्च बुद्धिश्च प्रत्यवसान च तानीति द्वन्द्वः। प्रत्यवसानं भक्षणम्। गतिबुद्धिप्रत्यवसानानि अर्थो येषामिति विग्रहः। शब्दः कर्म येषां ते शब्द कर्माणः तेषामिति बहुव्रीहिः। अविद्यमानं कर्म येषां ते अकर्मकाः गतिबुद्धि प्रत्यवसानार्थाश्च शब्दकर्माणश्च अकर्मकाश्च तेषामिति-द्वन्द्वः।

**अनुवृत्तिः** - कर्म-कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - गत्यर्थकानां बुद्ध्यर्थकानां भक्षणार्थकानाम्, शब्दकर्मकाणाम् अकर्मकाणां च धातूनाम् अणौ यः कर्ता सः णौ कर्म-संज्ञकः भवति।

धातुपाठे निरुपिताः शुद्ध धातवः णिच् प्रत्ययरहिताः विद्यन्ते। यथा गच्छति, नमति, वदति, इत्यादौ गम् इति, नम्-इति-वद्-इति च णिच्प्रत्यय रहितः शुद्धः धातुः। शुद्धधातुः एव अण्यन्तः इत्यपि व्यवह्रियते। यदा शुद्धेभ्यः धातुभ्यः प्रेरणार्थकः णिच्-प्रत्ययः विधीयते तदा ते धातवः ण्यन्ताः भवन्ति।

**विशेषार्थः** - णिच् प्रत्ययरहितानां धातूनां कर्ता 'प्रयोज्यकर्ता' इति व्यवह्रियते। णिच् प्रत्ययसहितानां (ण्यन्तानां) धातूनां कर्ता 'प्रयोजककर्ता-इति उच्यते। यथा छात्रः वेदं पठति। अत्र छात्रः प्रयोज्यकर्ता। आचार्यः छात्रं वेदं पाठयति-इत्यत्र आचार्यः प्रयोजककर्ता। गत्यादीनां धातूनां प्रयोज्यकर्ता प्रेरक वाक्ये (ण्यन्तधातूनां प्रयोगे) कर्मसंज्ञकः भवति।

**( १ ) गत्यर्थोदाहरणम्** (१) शत्रवः स्वर्गम्-अगच्छन् (२) श्री हरिः शत्रून् स्वर्गम् अगमयत्। प्रथमवाक्ये अण्यन्त धातोः कर्तारः शत्रवः। द्वितीयवाक्ये ण्यन्तधातोः कर्ता श्री हरिः। अण्यन्तावस्थायां ये कर्तारः शत्रवः विद्यन्ते ते ण्यन्तावस्थायां कर्मसंज्ञकाः।

**( ५ ) नियन्तृकर्तृकस्य वहेरनिषेधः ( वा. १११० )**

नियन्तृकर्तृकस्य च वहेः कर्मत्वम् इत्यस्य निषेधो न भवति।

उदाहरणम् - वाहयति रथं वाहान् सूतः।

**( ६ ) आदिखाद्योर्न। ( वा. ११०९ )**

प्रत्यवसानार्थत्वात् कर्मत्वं प्राप्तम् अनेनवार्तिकेन निषेधः।

उदाहरणम् : अत्ति खादति वा अन्नं बटुः। तं प्रेरयति इति आदयति खादयति वा अन्नं बटुना।

**( ७ ) भक्षेरहिंसार्थस्य न ( वा. ११११ )**

अहिंसार्थस्य 'भक्ष्' धातोः प्रयोज्यकर्तुः कर्मत्वं न भवति।

उदाहरणम् : भक्षयति अन्नं बटुना।

**( ८ ) जल्पतिप्रभृतीनामुपसंख्यानम् ( वा. ११०७ )**

एतेषाम् अणौ कर्ता स-णौ कर्म स्यात्। यथा-जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः।

**( ९ ) दृशेश्च ( वा. ११०८ )**

दृश्धातोः अपि अणौ यः कर्ता स-णौ कर्म स्यात्। यथा-गुरुः भक्तान् हरिं दर्शयति।

**( १० ) शब्दायतेर्न ( वा. ११०५ )**

धातोः अकर्मकत्वाद् - 'गतिबुद्धि...इत्यादिना कर्मत्वं प्राप्तम् अनेन वार्तिकेन कर्मत्वम् इत्यस्य निषेधो भवति।'

उदाहरणम् : शब्दाययति देवदत्तेन।

**साधनिकाः - वेदमध्यापयद् विधिम्।**

'गतिबुद्धि' इति सूत्रस्थ - शब्दकर्मणः उदाहरणम् इदम्। विधिः वेदम् अधीते। तम् विधिं हरिः प्रेरणाम् अयच्छत् हरिः विधिं वेदं अध्यापयत्। अधिपूर्वक इङ् धातोः अण्यन्तावस्थायां विधिः कर्ता। स-एव ण्यन्तावस्थायां शब्दकर्मत्वाद् - गतिबुद्धि... इत्यादिना सूत्रेण कर्म संज्ञायां 'कर्मणि द्वितीया' इत्यनेन विधि शब्दस्य द्वितीया। वेद शब्द्य 'कर्तुरीप्सिततम् कर्म' इत्यनेन कर्म संज्ञायां द्वितीया-विभक्तौ च वेदमध्यापयद् विधिम् इति जातम्।

**( २ ) बुद्ध्यर्थोदाहरणम्** - (१) स्वे वेदार्थम् अविदुः (२) श्री हरिः स्वान् वेदार्थम् अवेदयत् प्रथम-वाक्ये स्वे इति प्रयोज्यकर्तारः। द्वितीय वाक्ये श्री हरिः प्रयोजक-कर्ता। बुद्ध्यर्थकधातोः प्रयोगात् - ण्यन्तावस्थायां प्रयोजकस्य कर्तारः स्वे कर्म संज्ञकाः कर्मणि द्वितीया इति सूत्रेण द्वितीया विभक्तौ प्रयुक्ताः।

**( ३ ) प्रत्यवसानार्थोदाहरणम्** - (१) देवाः अमृतम् आश्नन्। (२) श्री हरिः देवान् अमृतम् आशयत्। अत्र अण्यन्तावस्थायां कर्तारः देवाः ण्यन्तावस्थायां कर्मी-भूताः सन्ति इति द्वितीया-विभक्तिः।

**( ४ ) शब्दकर्मोदाहरणम्** - (१) विधिः वेदम् अध्यैत (२) श्री हरिः विधि वेदम् अध्यापयत्। अत्र प्रथमवाक्यस्य प्रयोज्यकर्ता विधिः द्वितीये प्रेरक वाक्ये कर्मसंज्ञकः, द्वितीयायां च प्रयुक्ते दृश्यते।

**( १ ) अकर्मकोदाहरणम्** - (१) पृथ्वी सलिले आस्ते (२) श्री हरिः सलिले पृथ्वीम् आसयत्। अत्र प्रथम वाक्ये प्रयोज्य-कर्ता पृथ्वी तथा द्वितीय प्रेरक वाक्ये कर्मणि प्रयुक्तः।

**( २ ) गति इत्यादि किम्?**

गतीत्यादीनाम् एव धातूनां प्रयोज्यकर्ता प्रेरकवाक्ये कर्म-संज्ञकः स्यात्। अन्येषां धातूनां प्रयोज्यकर्ता ण्यन्त प्रेरकवाक्ये तृतीयायां भवति। देवदत्तः आदेनं पचति। (२) विष्णुमित्रः देवदत्तेन ओदनं पाचयति - देवदत्त शब्दस्य तृतीया जाता।

**( ३ ) अण्यन्ताना किम्?**

अण्यन्तानाम् एव धातूनां कर्ता कर्मसंज्ञक: न-तु ण्यन्तानाम्। (१) राम: वनं गच्छति (२) दशरथ: रामं वनं गमयति (३) कैकेयी दशरथेन रामं वनं गमयति। प्रथम वाक्ये राम: अण्यन्त धातो: कर्ता। द्वितीये प्रेरक वाक्ये ण्यन्तधातो: प्रयोजक कर्ता दशरथ: दशरथम् अपि कैकेयी प्रेरयति। तृतीये वाक्ये कैकेयी कर्ता। तत्र दशरथ: ण्यन्तधातो: कर्ता अस्ति। अत: तस्य कर्मसंज्ञा न भवति।

**( ४ ) नीवहयोर्न। ( वा. ११०९ )**

नी वह् धातुद्वयं गत्यन्तर्गतम् अत: 'गतिबुद्धि... इत्यनेन कर्मसंज्ञा प्राप्ता - अनेन वार्तिकेन निषेध:। ण्यन्तयो: अनयो: प्रयोज्यकर्तु: न कर्मत्वम्। कर्मत्वाभावे प्रयोज्यकर्तु: अनुक्तत्वात् तृतीया विभक्तौ।'

**उदाहरणम्** - नाययति वाहयति वा भारं भृत्येन।

**(५४१) -हृक्रोरन्यतरस्याम्। १।४।५३॥**

हृक्रो: अणौ य: कर्ता स-णौ वा कर्मसंज्ञ: स्यात्। हारयति कारयति वा भृत्यं भृत्येन वा कटम्।

**( १ ) अभिवादिदृशोरात्मनेपदेवेति वाच्यम् ( वा. ११११४ )** अभिवादयते दर्शयते देवं भक्तं भक्तेन वा।

---

५४१ - **पदच्छेद:** - हृक्रो: अन्यतरस्याम्।

**अनुवृत्ति:** - अणि कर्ता स-णौ, कर्म, कारके।

**सूत्रप्रकार:** - संज्ञासूत्रम्।

**सरलार्थ:** - हृक्रो: धात्वो: प्रयोज्यकर्ता ण्यन्तावस्थायां विकल्पेन कर्मत्वं प्राप्नोति (१) भृत्य: कटं हरति करोति। (२) स्वामी भृत्यं भृत्येन कटं हारयति कारयति।

भृत्य: अत्र प्रयोज्य-कर्ता। तस्य द्वितीयवाक्ये ण्यन्तावस्थायां विकल्पेन कर्म संज्ञा भवति। यदा कर्म संज्ञाया: अभावो तदा 'कर्तृकरणयोस्तृतीया' इति तृतीया भवति।

**विशेषार्थ:** - आत्मनेपदे अभिवद्धातो: दृशधातो: च प्रयोज्य-कर्ता ण्यन्तावस्थां विकल्पेन कर्मत्वं प्राप्नोति (१) भक्त: देवं अभिवदति। (२) गुरु: देवं भक्तं-(भक्तेन) अभिवादयत दर्शयते।

**साधनिका:** - गुरु: देवं भक्तं-भक्तेन अभिवादयते। दर्शयते।

**अर्थ:** - गुरु भक्त से देवता को प्रणाम करवाता है।

**(५४२) -अधिशीङस्थाऽऽसाम कर्म। १।४।४६॥**

अधिपूर्वाणामेषामाधार: कर्म स्यात्। अधिशेते, अधितिष्ठति, अध्यास्ते वा वैकुण्ठं हरि:।

---

५४२ - **पदच्छेद:** - अधिशीङस्थासां, कर्म।

**अनुवृत्ति:** - आधार: कारके।

**सूत्रप्रकार:** - संज्ञासूत्रम्।

**सरलार्थ:** - अधि इत्युपसर्ग-पूर्वकस्य शीङ्धातो:, स्थाधातो:, आस्धातो: आधार: कर्मसंज्ञां प्राप्नोति। उदा. हरि: वैकुण्ठम् अधिशेते। अत्र अधि इत्युपसर्गपूर्वक: शीङ्धातु: प्रयुक्त:। हरि: अत्र कर्ता। शयनानुकूलव्यापारस्य आधार: वैकुण्ठ:। अत: वैकुण्ठशब्दस्य अधिकरण संज्ञा प्राप्ता। तां निषिध्य अनेन सूत्रेण कर्मसंज्ञा विधीयते। 'कर्मणि द्वितीया' इति वैकुण्ठो द्वितीया।

**साधनिका:** - हरि: वैकुण्ठम् अधितिष्ठति, अधिशेते अध्यास्ते।

**अर्थ:** - हरि वैकुण्ठ में रहते हैं।

अधि - उपसर्गपूर्वक स्था धातु: प्रयुक्त:। कर्तृ व्यापारस्य आधार: अधिकरण संज्ञां निषिद्ध्य अनेन सूत्रेण कर्म संज्ञा विधीयते। 'कर्मणि द्वितीया' इति सूत्रेण कर्म वैकुण्ठ शब्दात् द्वितीया। वैकुण्ठं इति जातम्।

**(५४३) -अभिनिविशश्च। १।४।४७॥**

अभिनीत्येतत्सङ्घात पूर्वस्य विशतेराधारः कर्म स्यात्। अभिनिविशते सन्मार्गम्। 'परिक्रयणे सम्प्रदानम् - इति सूत्रादिह मण्डुक प्लुत्या अन्यतरस्याम् ग्रहणमनुवर्त्य व्यवस्थित विभाषाश्रयणात् क्वचिन्न।' पापेऽभिनिवेशः।

---

५४३ - **पदच्छेदः** - अभिनिविशः च।

**अनुवृत्तिः** - कर्म, आधारः, कारके

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - अभिनि इति उपसर्ग द्वयपूर्वक विश् धातोः आधारः कर्म संज्ञां प्राप्नोति। यथा छात्रः अत्र कर्ता। कर्तृव्यापारस्य आधारः सन्मार्गः। अतः सन्मार्ग शब्दस्य अधिकरण संज्ञा प्राप्ता। अधिकरण संज्ञां निषिध्य अनेन कर्म संज्ञा विधीयते।

**विशेषार्थः** - 'परिक्रयणे... पापेऽभिनिवेशः। कुत्रचित् पापे अभिनिवेशः इत्यादि प्रयोगः अपि जायते. दृश्यते वा। अत्र अभिनिपूर्वक विश् धातुः प्रयुक्तः तथापि कर्मत्वं न दृश्यते। अत्र पापशब्दः अधिकरणे प्रवृत्तं दृश्यते। साधुत्व-प्रयोग सम्पादनार्थं भट्टोजिः अत्र व्यवस्थां 'परिक्रयणे... इति पूर्वसूत्राद प्रकृत-सूत्रे अन्यतरस्यां पदस्य अनुवृत्तिः करणीया। तस्मात् अस्य सूत्रस्य प्रवृत्तिः विकल्पेन भवति। व्यवस्थित-विभाषायाः आश्रयणात्' पापेऽभिनिवेशः। इति प्रयोगः साधुत्वम् आप्नोति।

**साधनिका:** - अभिनिविशते सन्मार्गम्।

**अर्थः** - सन्मार्ग पर मन लगता हैं। अभिनिपूर्वक विश्धातोः कर्तृव्यापारस्य आधारः सन्मार्गः। अतः सन्मार्ग शब्दस्य अधिकरण संज्ञा प्राप्ता। तां निषिद्धय 'अभिनिविशश्च' इति सूत्रेण कर्म संज्ञा 'कर्मणि द्वितीया' इति सूत्रेण सन्मार्ग शब्दस्य द्वितीया विभक्तिः सन्मार्गम् सिद्धम्।

**(५४४) -उपान्वध्याङ्वसः। ४।४।४८॥**

**उपादि पूर्वस्य वसतेराधारः कर्म स्यात्। उपवसति, अनुवसति, अधिवसति आवसति वा वैकुण्ठं हरिः। 'अभुक्त्यर्थस्य न (वा. १०८७)'। वने उपवसति।**

**वार्तिकम्:** -

**उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।**
**द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥ (वा. १४४४)**

उभयतः कृष्णं गोपाः। सर्वतः कृष्णम्। धिक् कृष्णाभक्तम्। उपर्युपरि लोकं हरिः। अध्यधि लोकम्। अधोऽधो लोकम्। 'अभितः परितः समया निकषाहाप्रतियोगेऽपि' (वा. १४४२-१४४३) अभितः कृष्णम्। परितः कृष्णम् ग्रामं समया। निकषा लङ्काम्। हा कृष्णाभक्तम्। तस्य शोच्यते इत्यर्थः। बुभुक्षितं न प्रतिभाति किञ्चित्।

---

५४४ - **पदच्छेदः** - उपान्वध्याङ्वसः।

**अनुवृत्तिः** - कर्म, कारके, आधारः

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - उप-अनु-अधि-आङ उपसर्ग पूर्वकस्य वस् धातोः आधारः कर्म स्यात्। यथा 'हरिः वैकुण्ठं अभिवसति' इत्यत्र वैकुण्ठः आधारः अस्ति।

**विशेषार्थः** - उपवसति इत्यस्य वासं करोति उपवासं करोति इत्यर्थ द्वयं भवति। वस् धातोः योगे कर्म संज्ञा भवति। उपवासं करोति इत्यर्थक धातोः प्रयोगे तु कर्मसंज्ञा न भवति। **'अभुक्तर्थस्य न' इति** वार्तिकेन कर्मसंज्ञायाः निषेधः भवति।' 'आधारोऽधिकरणम्' इति सूत्रेण आधार इत्यस्य अधिकरण संज्ञा वने उपवसति इति प्रयोगः सिद्धः भवति।

**साधनिका:** - हरिः वैकुण्ठं अनुवसति।

**अर्थः** – हरि वैकुण्ठ में निवास करते हैं। अनु – उपसर्गकः वस् धातुः। वासानुकुलः व्यापारः अनुवसति। हरिः कर्ता अस्ति। कर्तृद्वारा वासानुकुल व्यापारस्य आधारः वैकुण्ठः। वैकुण्ठशब्दस्य अधिकरण संज्ञा प्राप्ता। तां संज्ञां निषिद्ध्य, अनेन सूत्रेण कर्म संज्ञा भवति। 'कर्मणि द्वितीया' इत्यनेन वैकुण्ठशब्दस्य द्वितीया विभक्तिः भवति।

**वार्तिकम्:** – उभसर्वतसो... ततोऽन्यत्रापि दृश्यते।

**सरलार्थः** (१) उभ, तसन्तस्य प्रयोगे सर्वशब्दस्य तसन्तस्य प्रयोगे द्वितीया भवति। यथाः– उभयतः कृष्णं गोपाः। अत्र उभयतः इत्यनेन कृष्णशब्दस्य योगः। अतः कृष्णशब्दाद द्वितीया जाता।

(२) धिक् शब्दस्य योगे द्वितीया भवति। यथा – धिक् कृष्णाभक्तम्।

(३) आम्रेडितान्तेषु उपर्यादिषु त्रिषु द्वितीया भवति। द्विरुक्तस्य परं रूपमाम्रेडितं तदन्तेषु कृत द्विर्वचनेषु उपर्यादिषु त्रिषु द्वितीया भवति। यथा – उपर्युपरिलोकं हरिः। अत्र उपर्युपरि – अनेन लोकस्य योगः। अतः लोकशब्दाद् द्वितीया जाता।

**वार्तिकम्:** अभितः परितः..... योगेऽपि।

**सरलार्थः** – अभितः परितः समया, निकषा, हा, प्रति एतैः शब्दैः योगे यः शब्दः तत्र द्वितीया भवति। यथा – अभितः कृष्णं गोपाः। अत्र अभितः योगे कृष्णः। अतः कृष्ण शब्दस्य द्वितीया जाता।

**साधनिकाः** – परितः कृष्णम्।

अत्र परितः इत्यस्य कृष्णशब्देन सह योगः। अतः 'अभितः परितः....' इति वार्तिकेन कृष्णशब्दस्य द्वितीया जाता – 'परितः कृष्णम्' इति रूपं जातम्।

**(५४५) -अन्तराऽन्तरेण युक्ते। २।३।४॥**

**आभ्यां योगे द्वितीया। अन्तरा त्वां मां हरिः। अन्तरेण हरिं न सुखम्।**

---

**५४५ - पदच्छेदः** – अन्तराऽन्तरेण, युक्ते

**सूत्रसमासः** – अन्तरा च अन्तरेण च, अन्तरान्तरेणौ (द्वन्द्व समासः। ताभ्यां युक्तः अन्तराऽन्तरेणयुक्तः तस्मिन् इति (द्वन्द्वगर्भित समास)

**अनुवृत्तिः** – द्वितीया

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – अन्तरा अन्तरेण इत्यनयोः योगे द्वितीयाविभक्तिः भवति। अन्तरा–मध्ये तथा अन्तरेण–विना

**विशेषार्थः** – अन्तरा इति आकारन्तम् अव्ययम् न–तु टावन्तम्। अन्तरामध्ये इत्यमरः। अन्तरेण इत्यपि अव्ययं नतु तृतीयान्तम्। यथा – अन्तरा त्वां–मां हरिः। तव च मम च मध्ये हरिः इत्यर्थः।

**साधनिकाः** – अन्तरेण हरिं न सुखम्। **अर्थः** हरि के बिना सुख नहीं मिलता।

अत्र अन्तरेण इत्यव्ययं तृतीयान्तं पदं न। अन्तरेण इत्यस्य योगे हरिः। अतः प्रकृत सूत्रेण हरि शब्दे द्वितीया जाता। अन्तरेण हरिं न सुखम् – इति रूपं जातम्।

**(५४६) -कर्मप्रवचनीयाः। १/४/८३॥**

इत्यधिकृत्य।

---

**५४६ - पदच्छेदः** – कर्मप्रवचनीयाः – कर्म प्र + वच् (धातुः + अनीयर्) इति।

**सूत्रप्रकारः** – अधिकारसूत्रम्।

**सरलार्थः** – अधिकारमिदं सूत्रम्। कर्मप्रवचनीयेति–अन्वर्थसंज्ञा। कर्म – क्रियां कथितवन्तः इति।

**विशेषार्थः** – पाणिनिना एकादश कर्मप्रवचनीयाः उक्ताः। यथा – अनु उप, अप, परि, आङ् प्रति, अभि, सु, अति तथा अपि एते उपसर्गाः कर्मप्रवचनीयाः सन्ति।

**(५४७) -अनुर्लक्षणे। १।४।८४॥**

लक्षणे द्योत्ये अनु: कर्म प्रवचनीय संज्ञ: स्यात्। गत्युपसर्गसंज्ञापवाद:।

---

**५४७ - पदच्छेद:** - अनु: लक्षणे

**अनुवृत्ति:** - कर्मप्रवचनीया:।

**सूत्रप्रकार:** - संज्ञासूत्रम्।

**सरलार्थ:** - लक्ष्य-लक्षणभाव-सम्बन्धे द्योत्ये अनु इत्यस्य कर्मप्रवचनीय संज्ञा भवति। गति उपसर्ग संज्ञाया: अपवादो भवति।

**(५४८) -कर्मप्रवचनीययुक्ते द्वितीया। २।३।८१॥**

**एतेन योगे द्वितीया स्यात्। पर्जन्यो जपमनुप्रावर्षत्। हेतुभूतजपोपलक्षितं वर्षणम् इत्यर्थ:। परापि हेतौ तृतीया अनेन वाध्यते। लक्षणेत्थम् - इत्यादिना सिद्धे पुन: संज्ञा-विधान-सामर्थ्यात्?**

---

**५४८ - पदच्छेद:** - कर्मप्रवचनीययुक्ते, द्वितीया।

**सूत्रप्रकार:** - विधिसूत्रम्।

**सरलार्थ:** - कर्मप्रवचनीय संज्ञायां द्वितीया-विभक्ति: भवति।

पर्जन्य: जपमनु प्रावर्षत्। जप करणात् पर्जन्य: प्रावर्षत् इत्यर्थ:। हेतुभूतजप: अत्र लक्षणम्। अनु: अत्र लक्ष्यलक्षण सम्बन्धं द्योतयति।

अत: अनु इत्यस्य 'अनुर्लक्षणे' इत्यनेन कर्मप्रवचनीय संज्ञा भवति। तस्य योगे जपशब्दाद् द्वितीया भवति।

**विशेषार्थ:** - परापि हेतौ... सामर्थ्यात्। जपम् अनु प्रावर्षत्। इत्यत्र जप: वर्षणस्य हेतु:। अत: अत्र 'हेतौ' इति सूत्रेण जपशब्दात् तृतीया प्राप्ता। 'कर्मप्रवचनीययुक्ते द्वितीया (२/३/८)' हेतौ (२-३१२३) इत्यनयो: सूत्रयो: मध्ये 'हेतौ' परसूत्रम् अस्ति। अत: 'विप्रतिषेधे परं कार्यम्' इत्यनेन अत्र जपशब्दाद् हेतौ इत्यनेन तृतीया प्राप्ता। किन्तु 'लक्षणेत्थं भूताख्यान भागवीप्सासु प्रतिपर्यनवं' इतिसूत्रेण लक्षणार्थे अनो: कर्मप्रवचनीय संज्ञा विहिता 'अनुर्लक्षणे' इत्यनेन अस्मिन्नेवार्थे अनो: कर्मप्रवचनीय संज्ञा उक्ता। भगवता पाणिनिना कृत: अयं विशेषयत्न: सूचयति यत् अत्र 'हेतौ' इति तृतीया न करणीया। अत्र तु द्वितीया एव करणीया।

**साधनिका: - जपम् अनु प्रावर्षत्**

जपशब्दात् - 'हेतौ' इति सूत्रेण तृतीया प्राप्ता। 'अनुर्लक्षणे' इति सूत्रेण कर्मप्रवचनीय संज्ञायां 'कर्मप्रवचनीययुक्ते द्वितीया' इत्यनेन जप शब्दाद् द्वितीया-विभक्तिर्जाता।

**(५४९) -तृतीयार्थे। १।४।८५॥**

अस्मिन् द्योत्येऽनुरूक्त संज्ञ: स्यात्। नदीमन्ववसिता सेना। नद्या सह सम्बन्ध: इत्यर्थ:। षिञ् बन्धने क्त:।

---

**५४९ - पदच्छेद:** - तृतीया, अर्थे

**अनुवृत्ति:** - अनु: कर्मप्रवचनीया:।

**सूत्रप्रकार:** - संज्ञासूत्रम्।

**सरलार्थ:** - अनुरित्यस्य अनुवृत्ति:। कर्मप्रवचनीया: इत्यस्य अधिकार:। अत: तृतीयार्थे अनुरित्यस्य कर्मप्रवचनीय-संज्ञा भवति। नद्या सह सम्बद्धा सेना इत्यर्थ:।

**विशेषार्थ:** - 'अवसित'-शब्दस्य व्युत्पत्तिलभ्योऽर्थ: सम्बद्ध: इति।

**साधनिका:** - नदीम् अन्ववसिता सेना।

**अर्थ:** नदी के साथ-साथ सेना पडी हुई है।

अत्र सेना नद्या सह सम्बंध:। वर्तते साहित्यार्थ: द्योत्यते। अत: 'तृतीयार्थे' इत्यनेन सूत्रेण अनुरित्यस्य कर्मप्रवचनीय संज्ञा भवति तथा कर्मप्रवचनीय संज्ञाया: योगे 'कर्मप्रवचनीय युक्ते द्वितीया' इति सूत्रेण नदीशब्दस्य द्वितीया विभक्ति:।

**(५५०) -हीने। १।४।८६॥**

**हीने द्योत्ये अनुः प्राग्वत्। अनु हरिं सुराः। हरेर्हीना इत्यर्थः।**

---

५५० - **पदच्छेदः** - हीने

**अनुवृत्तिः** - अनुः कर्मप्रवचनीयाः।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - अनु यदा हीनं निकृष्टं भावं द्योतयति तदा तस्य कर्मप्रवचनीय संज्ञा भवति।

**साधनिकाः - अनु हरिं सुराः।**

**अर्थः** - देवगण हरि से हीन है।

अत्र सुराः हरेः हीनाः निकृष्टाः अतः अनुः अत्र हीनभावं द्योतयत्यतः 'हीने' इत्यनेन कर्मप्रवचनीय संज्ञा भवति। 'कर्मप्रवचनीययुक्ते द्वितीया' इति सूत्रेण हरि शब्दस्य द्वितीया विभक्तिर्जाता।

**(५५१) -उपोऽधिके च। १।४।८७॥**

**अधिके हीने च द्योत्ये उपेत्यव्ययंप्राक्संज्ञं स्यात्। अधिके सप्तमी वक्ष्यते। हीने - उप हरिं सुराः।**

---

५५१ - **पदच्छेदः** - उपः, अधिके, च।

**अनुवृत्तिः** - कर्मप्रवचनीयाः हीने।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - अधिके हीने च अर्थे उपेत्यस्य कर्मप्रवचनीय संज्ञा भवति।

**विशेषार्थः** - चकरात् हीने सति समुच्चीयते। अधिके हीने चार्थे उपेति कर्मप्रवचनीय संज्ञकः भवति। अधिके संज्ञा विधानं द्वितीयार्थम्। यस्मादधिकम् इत्यनेन कर्मप्रवचनीय संज्ञकार्थं सप्तमी वक्ष्यते।

**साधनिकाः** - उप हरिं सुराः।

**अर्थः** - देवगण हरि से हीन हैं।

अत्र हीन इत्यर्थे उप इत्यस्य 'उपोऽधिके च' इत्यनेन कर्मप्रवचनीय संज्ञा। 'कर्मप्रवचनीययुक्ते द्वितीया' इति सूत्रेण उप इत्यस्य योगे हरिशब्दस्य द्वितीया भवति।

**(५५२) -लक्षणेत्थम्भूताख्यान् भाग वीप्सासु प्रतिपर्यनवः। १।४।९०॥ एष्वर्थेषु विषयभूतेषु प्रत्यादयः उक्त संज्ञाः स्युः। लक्षणे-वृक्षं प्रति, परि-अनु वा विद्योतते विद्युत्। इत्थम्भूताख्याने भवतो विष्णुं-प्रति-परि-अनु वा। भागे लक्ष्मी हरिं प्रति परि अनु वा। हरिभाग इत्यर्थः वीप्सायाम् - वृक्षं वृक्षं प्रति, परि अनु वा सिञ्चति। अत्रोपसर्गत्वाभावान्न षत्वम्। एषु किम्? परिषिञ्चति।**

---

५५२ - **पदच्छेदः** - लक्षणेथम्भूताख्यानभागवीप्सासु, प्रतिपर्यनवः।

**सूत्रसमासः** - लक्षणं च इत्थम्भूताख्यानं च भागश, वीप्सा च - लक्षणेत्थम्भूताख्यानभागवीप्साः तासु लक्षणेत्थम्भूताख्यान-भागवीप्सासु (इतरेतरद्वन्द्वः) प्रतिश्च, परिश्च, अनुश्च-प्रतिपर्यनवः (इ.द्व.)

**अनुवृत्तिः** - कर्मप्रवचनीयाः।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - लक्षणं - ज्ञापकम्। इत्थम्भूताख्यानं। - परिस्थितेः कथनम्। भागः स्वीकार्यः अंशः प्रकृते च तत्स्वामी विवक्षितः। वीप्सा - व्याप्तुं कार्त्स्न्येन सम्बन्धुमिच्छा वीप्सा।

**साधनिकाः** - वृक्षं प्रति, परि अनु वा विद्योतते विद्युत्।

**अर्थः** - (वृक्ष की ओर बिजली चमक रही हैं।)

अत्र लक्षणार्थे - प्रति, परि, अनु इत्यस्य 'लक्षणेत्थम्...' इति सूत्रेण कर्मप्रवचनीय संज्ञायाम् 'कर्मप्रवचनीययुक्ते द्वितीया' इति सूत्रेण द्वितीया विभक्तिः कृते उक्तम् रूपं जातम्।

**इत्थम्भूताख्यानम् इत्यर्थे** - भवतः विष्णुं प्रति, परि अनु वा भवत। (विष्णु की भक्ति से युक्त हैं।)

**भागः इत्यर्थेः** - लक्ष्मीः हरिं प्रति परि अनु वा। (लक्ष्मी हरि का हिस्सा है।)

**वीप्सायाम्ः** - वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति। (प्रत्येक वृक्ष को सींचता है।)

**(५५३) -अभिरभागे। १।४।९१॥**

**भागवर्जे लक्षणादावभिः उक्त संज्ञः स्यात्। हरिमभिवर्तते। भक्तो हरिमभि। देवं देवमभि-सिञ्चति। अभागे किम्? यदत्र ममाभिष्यात्तद्दीयताम्।**

---

५५३ - **पदच्छेदः** - अभिः, अभागे - अभागे इति सप्तम्यन्तम्

**अनुवृत्तिः** - लक्षणेत्थम्भूताख्यान भाग वीप्सासु, कर्मप्रवचनीयाः।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - लक्षणेत्थं... इति सूत्रे निर्दिष्टेभ्यः चतुर्भ्यः अर्थेभ्यः भागम् इत्यर्थं विहाय अन्य र्थेषु अभि - इत्यस्य तु कर्मप्रवचनीय-संज्ञा भवति।

**विशेषार्थः** - अभागे किम्? अस्मिन् सूत्रे भगवता अभागे किमर्थम् उक्तम्? इति प्रश्ने जाते भट्टोजिः अनेन उत्तरयति। यदत्र मम अभिष्यात्तद्दीयताम्। अत्र मम भागः इत्यर्थः। अतः अभागे इति कर्मप्रवचनीय पर्युदासात् - अभीत्यस्य भागेत्यर्थे उपसर्ग-संज्ञा भवति। तेन 'उपसर्गप्रादुर्भ्याम्...' इति सूत्रेण अभिष्याद् इत्यत्र षत्वम्'

**साधनिकाः** - हरिम् अभिवर्तते।

**अर्थः** हरि की ओर हैं।

जयः क्व इति प्रश्ने इदम् उत्तरम्। यत्र हरिः वर्तते तत्र जयः। अभिः अत्र लक्ष्यार्थं द्योतयति। अतः अभि-इत्यस्य 'अभिरभागे' इत्यनेन कर्मप्रवचनीय संज्ञायाम् 'कर्मप्रवचनीययुक्ते द्वितीया' इति सूत्रेण अभि इत्यस्य योगे हरिशब्दात् द्वितीया कृते उक्तं रूपं जातम्।

**(५५४) -अधिपरी अनर्थकौ। १।४।९३॥**

**उक्त-संज्ञौ स्तः। कुतोऽध्यागच्छति। कुतः पर्यागच्छति। गति संज्ञाबाधात् गतिर्गतौ इति निघातो न।**

---

५५४ - **पदच्छेदः** - अधिपरी, अनर्थकौ

**अनुवृत्तिः** - कर्मप्रवचनीयाः।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - अधि परि च यदा अनर्थकौ तदा कर्मप्रवचनीय संज्ञकौ भवतः।

**विशेषार्थः** - गतिसंज्ञाबाधात्... निघातो न भवति। अत्र अधिपर्योः अनर्थतया अन्यपदेन सह सम्बन्धस्य अभावः। अतः कर्मप्रवचनीय युक्ते द्वितीयायाः अपि अभावः।

अनेन भट्टोजिः कर्मप्रवचनीयत्वे प्रयोजनं द्रढयति-अधिपर्योः कर्मप्रवचनीय संज्ञायां जातायां गतिसंज्ञायाः बाधः भवति, तस्मात् कारणाद् अध्यागच्छति, पर्यागच्छति इत्यत्र 'गतिर्गतौ' इत्यनेन निघातः सर्वानुदात्तः स्वरः न भवति 'गतिर्गतौ' इत्यनेन गतिसंज्ञके परे गतिसंज्ञकः सर्वानुदात्तत्वं प्राप्नोति। यथा अभ्युद्धरति (अभि + उद् + हरति) अत्र गति संज्ञकस्य अभि - इत्यस्य परे गतिसंज्ञकः विद्यते अतः अभि। सर्वानुदात्तत्वं प्राप्नोति। अधि + आ + गच्छति इत्यत्र अधेः कर्मप्रवचनीय संज्ञा भवति, अतः गति संज्ञा न भवति।

**साधनिकाः** - कुतः पर्यागच्छति।

**अर्थः** - कुतः पर्यागच्छति - अपादान पञ्चम्याः तसिल्। कस्मात् प्रदेशात् आगच्छति इत्यर्थः। अत्र अधिपरी अनर्थकौ। इति सूत्रेण कर्म-प्रवचनीय संज्ञा तस्मात् कारणात् गति संज्ञायाः बाधः। अतः 'गतिर्गतौ' इति सूत्रेण परि सर्वानुदात्तत्वं न प्राप्नोति।

**(५५५) -सुः पूजायाम्। १।४।९४॥**

**सुसिक्तम्। सुस्तुतम्। अनुपसर्गत्वात् न षः। 'पूजायाम्' इति किम्? सुषिक्तम् किम् तव अत्र। क्षेपोऽयम्**

---

५५५ - **पदच्छेदः** - सुः पूजायाम्।

**अनुवृत्तिः** - कर्मप्रवचनीयाः।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - पूजार्थे 'सू' इत्यस्य कर्मप्रवचनीयसंज्ञा भवति।

**विशेषार्थः** - कर्मप्रवचनीय संज्ञायाः फलेनाऽत्र उपसर्ग संज्ञायाः बाधः इति।

**साधनिकाः - सुसिक्तम्**

**अर्थः** - (अच्छी तरह खींचा है।)

अत्र सुः पूजार्थकः। अतः 'सुः पूजायाम्' इति सूत्रेण सोः कर्मप्रवचनीय संज्ञा तथा उपसर्गसंज्ञायाः बाधः। तेन 'उपसर्गात् सुनोति' इति सूत्रेण षत्वं न भवति। अतः सुसुक्तम् इति सिद्धम्।

**(५५६) -अतिरतिक्रमणेच। १।४।९५॥**

**अतिक्रमणे पूजायां च अतिः कर्मप्रवचनीय संज्ञः स्यात्। अति देवान्कृष्णः।**

---

५५६ - **पदच्छेदः** - अतिः अतिक्रमणे, च

**अनुवृत्तिः** - कर्मप्रवचनीयाः।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - अतिक्रमणार्थे, पूजार्थे अतिः कर्मप्रवचनीय संज्ञः भवति।

**साधनिकाः** - अतिदेवान्कृष्णः। कृष्णः प्रपञ्चसंरक्षणे देवेभ्य अधिकः।

**अर्थः** - कृष्ण दोनों से बढ़कर है।

अत्र अतिक्रमणार्थे, पूजार्थे वा अति - इत्यस्य तु 'अतिरतिक्रमणे' इत्यनेन कर्मप्रवचनीय संज्ञा। आद्येऽर्थे 'कुगति प्रादयः' इति समासो न भवति। 'स्वती पूजायाम्' इति नियमात्।

**(५५७) -अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु। १।४।९६॥**

**एषु द्योत्येष्वपिरुक्त-संज्ञः स्यात्। सर्पिषोऽपि स्यात्। अनुपसर्गत्वान्न षः। सम्भावनायां लिङ्। तस्या एव विषयभूते भवने कर्तृदौर्लभ्यप्रयुक्तं दौर्लभ्यं द्योतयन्नपि शब्दः स्यादित्यनेन सम्बध्यते। सर्पिषः इति षष्ठी त्वपिशब्दबलेन गम्यमानस्य बिन्दोरवयवावयविभाव सम्बन्धे। इयमेव ह्यपि शब्दस्य पदार्थद्योतकता नाम। द्वितीया तु नेह प्रवर्तते। सर्पिषो बिन्दुना योगो न त्वपिनेत्युक्तत्वात्। अपि स्तुयाद्विष्णुम् - सम्भावनं शक्त्युत्वात्कर्षविष्कर्तुमत्युक्तिः। अपि स्तुहि - अन्ववसर्गः कामचारानुज्ञा। धिग्धेवदत्तम्। अपि स्तुयाद् वृषलम् - गर्हा। अपि सिञ्च अपि स्तुहि - समुच्चये।**

---

५५७ - **पदच्छेदः** - अपिः पदार्थ... समुच्चयेषु।

**सूत्रसमासः** - पदार्थश्च, सम्भावनं च, अन्वसर्गश्च, गर्हा च, समुच्चयश्च पदार्थसम्भावनान्वसर्ग गर्हा समुच्चयः तेषु - पदार्थ...समुच्चयेषु।

**अनुवृत्तिः** - कर्मप्रवचनीयाः।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - पदार्थः सम्भावनं, अन्वसर्गं, गर्हा, एवं समुच्चयः इत्यर्थेषु अपि - इत्यस्य कर्मप्रवचनीय संज्ञा भवति।

**विशेषार्थः** - पदार्थः पदस्य अर्थः। सम्भावन - शक्त्युत्कर्षाय विशेष वक्तव्यम्। अन्ववसर्ग - इच्छापूर्वकं कार्यस्यानुमतिः। गर्हा - निन्दा। सम्मुच्चय पदार्थानामेकत्रीकरणम् 'सर्पिषः अपि स्यात्। इत्यत्र अपिरूपसर्गः नास्ति। अतः स्यादित्यत्र न षत्वम्। स्यादित्यत्र सम्भावनायां लिङ्प्रयुक्तः। अतः प्रश्नः भवति। यत् कस्य सम्भावना? सम्भावनायाः विषयः कः? भट्टोजिः अस्य प्रश्नस्य उत्तरं ददाति। अत्र सम्भावनायाः विषयस्य

आकाङ्क्षायां भवन-क्रियायाः कर्ता दुर्लभः। अपिशब्दः दौर्लभ्यं द्योतयति। एवम् अपि शब्दः स्यादित्यनेन सम्बध्यते। सम्बन्धार्थस्य वाचिका षष्ठी सर्पिषः इत्यत्र प्रयुक्ता। अतः सर्पिषः सम्बन्धिपदार्थः कः? इति जिज्ञासा जायते। सर्पिषः इति षष्ठी तु अपिशब्देन गम्यमानस्य बिन्दोः अवयवावयविभाव सम्बन्धं द्योतयति। एवं अपिः (सर्पिषः) बिन्दु इति पदार्थ द्योतयति।'

**साधनिकाः** - सर्पिषः अपि स्यात्।

**अर्थः** - (थोडा सा घी भी चाहिए।)

अत्र पदार्थ-इत्यर्थे - अपि इत्यस्य 'अपिः पदार्थ सम्भावनान्व सर्ग... इति सूत्रेण अपि-इत्यस्य कर्मप्रवचनीय संज्ञा अतः उपसर्गत्वाभावात् 'उपसर्गात्... इति सूत्रेण स्यात् इत्यत्र सकारस्य षत्वं न भवति।

**(५५८) -कालाध्वनोरत्यन्तसंयोगे। २।३।५॥**

**इह द्वितीया स्यात्। मासं कल्याणी। मासमधीते। मासं गुडधानाः। क्रोशं कुटिला नदी। क्रोशमधीते। क्रोशं गिरिः। अन्यन्त संयोगे किम्? मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः।**

---

५५८ - **पदच्छेदः** - कालाध्वनोः, अत्यन्त संयोगे।

**अनुवृत्तिः** - द्वितीया।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - निरन्तर संयोगः नाम अत्यन्तसंयोगः। अन्तः विच्छेदः तम् अतिक्रान्तः अत्यन्तः सः चासौ संयोगश्च इति विग्रहः। गुणक्रियाद्रव्यैः कालाध्वनोः अविच्छिन्न-संयोगे द्वितीया भवति।

**विशेषार्थः** - अत्यन्तसंयोगे किम्? मासस्य द्विरधीते। यदा कालाध्वनोः गुणक्रियाद्रव्यैः सह अत्यन्त-संयोगः भवेत्। तदा एव कालाध्वभ्यां द्वितीया भवति। अत्यन्तसंयोगः न स्यात् तत्र कालाध्वभ्यां द्वितीया न भवति। यथा 'मासस्य द्विरधीते। मासः अत्र कालवाचकः शब्दः। मासशब्दस्य अध्ययन-क्रियया सह अत्यन्त संयोगः नास्ति। अध्येता मासे त्रिंशत् दिनात्मके द्वयोः दिनयोः प्रतिदिनम् एकवारं इत्येवं द्विरधीते। मासस्य अध्ययनक्रियया सह अत्यन्त सम्बन्धस्य अभावात् - मास शब्दात् अत्र न द्वितीया। अत्र द्वित्रिचतुर्भ्यः सुच्' इति द्विशब्दात् कृत्वोऽर्थे सुच् 'कृत्वोऽर्थप्रयोगे कालेऽधिकरणे' इति षष्ठी। शेषषष्ठीति केचित्।

**साधनिकाः** - मासमधीते।

**अर्थः** - 'कालाध्वनोरत्यन्तसंयोगे' इति सूत्रेण मासशब्दाद द्वितीया भवति। कालवाचकस्य मासस्य अत्र अध्ययनेन सह अत्यन्त सम्बन्धः। अतः काल वाचकात् मास शब्दाद द्वितीया जाता।

## स्वाध्यायः

**१. प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) 'देवदत्तः पयसा ओदनं भुङ्क्ते' वाक्ये किं कर्म विद्यते?

(क) ओदनम् (ख) भुङ्क्ते (ग) पयसा (घ) देवदत्तः

(२) ईप्सिततमवत् अनीप्सितस्य अपि का संज्ञा भवति?

(क) कर्तु संज्ञा (ख) कर्म संज्ञा (ग) करणसंज्ञा (घ) किमपि न

(३) ओदनं भुञ्जानः विषं भुङ्क्ते इत्यत्र अनीप्सितं कर्म किम्?

(क) विषम् (ख) भुञ्जानः (ग) करण संज्ञा (घ) ओदनम्

(४) 'गुरुः भक्तान् हरिं दर्शयति' रूपमिदं कस्मिन् वार्तिके?

(क) शब्दायतेर्न (ख) भदृशेश्च (ग) नीवहयोर्न (घ) आदिखाद्यो र्न

(५) 'अधि' इत्युपसर्गपूर्वक 'आस्' धातोः आधारस्य का संज्ञा भवति?

(क) हेतुसंज्ञा (ख) कर्म संज्ञा (ग) करण संज्ञा (घ) कर्तृ संज्ञा

(६) आवसति वैकुण्ठं हरिः कः आधारः?

(क) हरिः (ख) आवसति (ग) वैकुण्ठम् (घ) आधारः नास्ति

(७) अभितः-परितः-समया इत्यादि योगे का विभक्तिः?

(क) प्रथमा (ख) तृतीया (ग) द्वितीया (घ) चतुर्थी

(८) 'अनुर्लक्षणे' इत्यनेन का संज्ञा भवति?

(क) कर्मप्रवचनीय-संज्ञा (ख) कर्म-संज्ञा (ग) हेतु-संज्ञा (घ) अपादान-संज्ञा

(९) अधिके हीने चार्थे - उपेत्यस्य कर्मप्रवचनीय संज्ञा केन सूत्रेण भवति?

(क) हीने (ख) तृतीयार्थे (ग) उपोऽधिके च (घ) अनुर्लक्षणे

(१०) 'सुसिक्तम्' इत्यस्य कोऽर्थः?

(क) अच्छी तरह रखा है। (ख) अच्छी तरह पाला है।

(ग) अच्छी तरह स्तुति की है। (घ) अच्छी तरह सींचा है।

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) अनभिहितः इत्यस्य कोऽर्थः?

(२) तथायुक्तं चानीप्सितम् इति सूत्रेण किं भवति?

(३) 'गतिबुद्धि....' इति सूत्रस्यपूर्तिङ्करोतु?

(४) विंशतेराधारस्य कर्मसंज्ञा केन सूत्रेण भवति?

(५) 'निकषा लङ्काम्' अत्र केन द्वितीया विभक्तिर्जायते?

(६) किन्नाम लक्षणम्?

(७) 'नदीमन्ववसिता सेना' इत्यस्मिन् रूपे का संज्ञा जायते?

(८) अन्ववसर्गः इत्यस्य कोऽर्थः?

(९) हरिमभिवर्तते इत्यस्य कोऽर्थ?

(१०) मासमधीते अत्र मासशब्दस्य द्वितीया केन सूत्रेण भवति?

**२. सविस्तरम् उत्तराणि लिखत।**

(१) 'दुह्याच्पच्दण्ड....' इत्यस्य पूर्तिकृंत्वा अर्थंविस्तारं करोतु?

(२) ईप्सिततमं तथा अनीप्सितम् इत्यनयोः विषये सोदाहरणं चर्चां करोतु?

(३) 'गतिबुद्धि....' इति सूत्रस्यपूर्तिङ्करोतु?

(४) विशतेराधारस्य कर्मसंज्ञा केन सूत्रेण भवति?

(५) 'निकषा लङ्काम्' अत्र केन द्वितीया विभवितः जायते?

(६) किन्नाम लक्षणम्?

(७) 'नदीमन्ववसिता सेना' इत्यस्मिन् रूपे का संज्ञा जायते?

(८) अन्ववसर्गः इत्यस्य कोऽर्थः?

(९) 'हरिमभिवर्तते' इत्यस्य कोऽर्थः?

(१०) 'मासमधीते' अत्र मास-शब्दस्य द्वितीया केन सूत्रेण भवति?

**३. सविस्तरमुत्तरं लिखतः**

(१) दुह्याच्पच्दण्ड... इत्यस्य पूर्तिकृंत्वा अर्थविस्तारं करोतु?

(२) ईप्सिततमं तथा अनीप्सितम् इत्यनयोः विषये सोदाहरणं चर्चां करोतु?

(३) 'कर्तुरीप्सिततमं कर्म' सूत्रे तमब्ग्रहणं किमर्थं कृतम् इति सविस्तारेण व्याख्यायत?

(४) 'लक्षणेत्थम्भूताख्यान....' इति सूत्रस्य पूर्तिं कृत्वा सोदाहरणं व्याख्यायत?

(५) 'अपिः पदार्थ'... सूत्रस्य व्याख्यानं कुरु?

**४. निम्नलिखितानि रूपाणि साधयत?**

(१) ग्रामं गच्छंस्तृणं स्पृशति।

(२) बलिं याचते वसुधाम्।

(३) शत्रून् स्वर्गम् अगमयत्।

(४) हारयति भृत्यं भृत्येन वा कटम्।

(५) अभिनिविशते सन्मार्गम्।

(६) नदीमन्ववसिता सेना।

(७) कुतोऽध्यागच्छति।

(८) अति देवान्कृष्णः।

(९) अपि स्तुयाद् विष्णुम्।

(१०) मासं गुडधानाः।

**५. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायत।**

(१) कर्मणि द्वितीया।

(२) अभिनिविशश्च।

(३) कर्मप्रवचनीय-युक्ते द्वितीया।

(४) कालाध्वनोरत्यन्त-संयोगे।

**६. (अ) विभागेन सह (ब) विभागं योजयत्।**

| **(अ)** | **(ब)** |
|---|---|
| (१) शत्रवः स्वर्गम् अगच्छन्। | (१) श्री हरिः स्वान् अवेदयत् |
| (२) स्वे वेदार्थम् अविदुः। | (२) श्री हरिः देवान् अमृतम् आशयत् |
| (३) पृथ्वी सलिले आस्ते। | (३) श्री हरिः शत्रून् स्वर्गं अगमयत् |
| (४) देवाः अमृतम् आश्नन्। | (४) श्री हरिः विधिं वेदम् अध्यापयत् |
| (५) विधिः वेदम् अध्यैत। | (५) श्री हरिः सलिले पृथ्वीम् आसयत् |

●

# १०

# करणकारकम्

**प्रस्तावना**

अस्मिन् प्रकरणे 'स्वतंत्रः कर्ता' इति सूत्रेण कारकसमूहे वक्ता यस्य कारकस्य स्वातन्त्र्यं वक्तुमिच्छति तस्य तदा कर्तृ-संज्ञा भवति तथा 'साधकतमं करणम्' इति सूत्रेण क्रिया-सिद्धौ प्रकृष्टोपकारकं करण-संज्ञं स्यादेवञ्च 'कर्तृकरणयो स्तृतीया' इति सूत्रेण अनभिहिते कर्तरि करणे च तृतीया, इति तृतीयाविभक्तिर्भवति। एवम् च अपवर्गे, 'सहयुक्तेऽप्रधानार्थे' अङ्गविकारे इत्थम्भूत लक्षणे, हेत्वादिषु अर्थेषु तृतीया-विभक्ति-र्जायते इति।

**(५५९) -स्वतन्त्रः कर्ता। १।४।५४॥**

क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्।

५५९ - **पदच्छेद :** - स्वातन्त्रः, कर्ता।

**अनुवृत्तिः** - कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - कारकसमूहेषु वक्ता यस्य कारकस्य स्वातन्त्र्यं वक्तुम् इच्छति, तस्य कर्तेति संज्ञा भवति।

**विशेषार्थः** - क्रियाऽत्र सूत्रे कारकशब्देनोच्यते। सा हि कर्त्रादीनि विशिष्टव्यपदिष्यानि करोति इति।

यत् कारकं स्वान्त्र्येण क्रियां साधयति तत् कर्तृकारकम्। कर्म, करण् सम्प्रदानम्, अपादानम्, अधिकरणम् चेति कारकाणां व्यापारः कर्तृव्यापाराधीनः, किन्तु कर्तुः व्यापारे कस्यचिदपि कारकस्य आधीनता न दृश्यते। कर्ता तु स्वतन्त्रः। यथा देवदत्तः तण्डुलान् काष्ठैः स्थाल्यां पचति। अत्र देवदत्तः पचनक्रियायाः आश्रयः। सः पचन-क्रियायाः जनकः। तण्डुलाः काष्ठानि स्थाली इत्यादीनि कारकाणि कर्तारं देवदत्तं विना क्रियां साधयितुं न शक्नुवन्ति। एतेषां कारकाणां व्यापारः देवदत्तस्य व्यापारे आधीनः। देवदत्तस्य तु व्यापारः कस्यापि कारकस्य आधीने नास्ति। देवदत्तः स्वतन्त्रः। अत्र एका शङ्का उद्भवति। (१) स्थाली पचति (२) काष्ठानि पचन्ति। इत्यादिषु प्रयोगेषु स्थाली काष्ठानि इत्यादीनि वस्तुरूपाणि कारकाणि क्रिया स्वातन्त्र्येण कथं साधयिष्यन्ति? अतः एतानि कथं कर्तृसंज्ञां प्राप्स्यन्ति? यदा वक्ता स्थाल्याः स्वातन्त्र्यं वक्तुम् इच्छति तदा स्थाली कर्ता भवति। यदा वक्ता काष्ठानां स्वातन्त्र्यं वक्तुम् इच्छति तदा काष्ठानि कर्तारः भवन्ति।

**(५६०) -साधकतमं करणम् १।४।४२॥**

**क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करण-संज्ञं स्यात्॥ तमब्-ग्रहणं किम्? गङ्गायां घोषः।**

५६० - **पदच्छेदः** - साधकतमम्, करणम्।

**अनुवृत्तिः** - कारके

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - कर्ता क्रिया करणे यत् सहायकं तत् साधकतम् (उपकारकं) इत्युच्यते। यच्च प्रकृष्टोपकारकं भवति। तस्य करणसंज्ञा भवति।

**विशेषार्थः** - (१) भट्टोजिना 'साधकतमम्' इति शब्दस्य 'प्रकृष्टोपकारकम्' इति व्याख्यानम् कृतम्। अत्र 'प्रकृष्टोप-कारकस्य अर्थः कः?' इति प्रश्ने जाते भट्टोजिः उत्तरयति। यद् व्यापारादनन्तरं फलसिद्धिः, तदपकृष्टत्वम्। यथा 'रामः धनुषः निःसृतेन बाणेन रावणं हन्ति।' इत्यत्र हननक्रियायां धनुः सहायकः बाणोऽपि सहायकः। द्वौ अपि क्रियानिवर्तकौ। किन्तु द्वयोः मध्ये बाणस्य व्यापारन्तरमेव हननक्रियारूपं फलं प्राप्तये। धनुषः व्यापारान्तरं अव्यवहितं हननक्रियारूपं फलं न प्राप्यते। अतः बाणः प्रकृष्टोपकारकः। बाणः साधकतमः। अतः बाणस्य करणसंज्ञा।

**(५६१) -कर्तृकरणयोस्तृतीया। २।३।१८॥**

अनभिहिते कर्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो बाली। (१) 'प्रकृत्यादिभ्य उपसङ्ख्यानम्' (वा. १४६६) प्रकृत्या चारुः। प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः। संमेनैति। विषमेणैति। द्विद्रोणेन धान्यं क्रीणाति। सुखेन दुःखेन वा यातीत्यादि।

---

**५६१ - पदच्छेदः** - कर्तृकरणयोः तृतीया।

**अनुवृत्तिः** - अनभिहिते

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अनुक्तः कर्ता अनुक्तं करणं च तृतीयां-प्रयुज्यते।

**साधनिका:** - 'रामेण बाणेन हतो वाली' (राम के द्वारा वाली बाण से मारा गया)

अत्र हतः (हन् + क्त) इति कृत्यप्रत्ययेन कर्मणः अभिधानम्। अतः उक्तं कर्म प्रथमाविभक्तौ प्रयुक्तः। कर्ता रामः अनभिहितः। अतः अनभिहिते कर्तरि तृतीया प्रयुक्ता तथा बाणस्य व्यापारादनन्तरमेव हननफलस्य सिद्धिरतः बाणस्य 'साधकतमं करणम्' इत्यनेन करणबाणस्य अनुक्तत्वात् करणसंज्ञा 'कर्तृकरणयोस्तृतीया' इत्यनेन तृतीया।

**वार्तिकार्थः** - प्रकृत्यादिभ्य उपसङ्ख्यानम्।

प्रकृत्यादिगणे ये शब्दाः उक्ताः तेभ्यः शब्देभ्यः तृतीयाविभक्तिर्भवति।

**साधनिका:** - प्रकृत्या चारुः (स्वभाव से अच्छा)

अत्र क्रियायाः अश्रवणात् कर्तृकरणयोः अभावात् शेषत्वविवक्षायां प्राप्तां षष्ठीं प्रबाध्य 'प्रकृत्यादिभ्यः...' इति वार्तिकेन तृतीया 'प्रकृत्या चारुः' इति सिद्धम्।

**(५६२) -दिवः कर्म च। १।४।४३॥**

**दिवः साधकतमं कारकं कर्मसंज्ञं स्यात्। चात्करणसंज्ञम्। अक्षैरक्षान्वा दीव्यति।**

---

**५६२ - पदच्छेदः** - दिवः, कर्म, च।

**अनुवृत्तिः** - साधकतमम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - दिव् धातोः साधकतमं कारकं कर्मसंज्ञं भवति। सूत्रे चकारग्रहणात् करणसंज्ञकम् इति लक्ष्यते।

**साधनिका:** - अक्षैः अक्षान् वा दीव्यति (पासों से खेलता है।)

अत्र 'दिवः कर्म च' अनेन सूत्रेण अक्षाणां कर्मसंज्ञायाम् अतः 'कर्मणि द्वितीया' इत्यनेन द्वितीया 'अक्षाम्' इति सिद्धम्। चकारबलेन 'दिवः कर्म च' इत्यनेन सूत्रेण अक्षाणां करणसंज्ञायामतः 'कर्तृकरणयोस्तृतीया' इत्यनेन **तृतीया विभक्तिः** 'अक्षैः' इति सिद्धम्।

**(५६३) -अपवर्गे तृतीया। २।३।६॥**

**अपवर्गः फलप्राप्तिः, तस्यां द्योत्यायां कालाध्वनोरत्यन्त-संयोगे तृतीया स्यात्। अक्ष क्रोशेन वा अनुवाकोऽधीतः। अपवर्गे किम्? मासमधीतो नायातः।**

---

**५६३ - पदच्छेदः** - अपवर्गे, तृतीया

**अनुवृत्तिः** - कालाध्वनोरत्यन्त संयोगे।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यदा क्रियायाः कालेन अध्वना च सह फलप्राप्तिपर्यन्तं योगः स्यात्तदा कालवाचकात् मार्गवाचकात् च शब्दात् तृतीया भवति।

**विशेषार्थः** - उपसर्गे किम्? मासमधीतो नायातः। अपवर्गः फलप्राप्तिः। यदा कर्ता क्रियायाः फलं प्राप्नोति तदा एव कालावाचकात् मार्गवाचकाच्च तृतीया भवति। यदा फलप्राप्तिःन भवति तदा 'कालाध्वनोरत्यन्तसंयोगे'

इति सूत्रेण द्वितीया भवति। 'मासम् अधीतः नायातः'। इत्यत्र न आयातः सूचयति यत् अध्ययनक्रियायाः फलं न लब्धम्। अतः मासशब्दात् 'अपवर्गे तृतीया' इति तृतीया न प्रवृत्ता। अत्र तु कालाध्वनोः इत्यादिना सूत्रेण मासशब्दात् द्वितीया। प्रयुक्ता।

**साधनिका:** - अह्ना क्रोशेन वा अनुवाकः अधीतः

(एक दिन में अनुवाक पद लिया)

(एक कोसभर में अनुवाक पढ़ लिया)

अत्र 'अनुवाकः अधीतः' इत्युक्ते फलप्राप्तिः द्योतिता भवत्यतः 'अपवर्गे तृतीया' सूत्रेण कालवाचकात् अहन् शब्दात् तथा मार्गवाचकात् क्रोशशब्दात् तृतीया विभक्तिरिति।

**(५६४) -सहयुक्तेऽप्रधाने। २।३।१९॥**

**सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्। पुत्रेण सहागतः पिता। एवं साकं सार्धंसमंसंयोगेऽपि। विनापि तद्योगं तृतीया 'वृद्धोयूना' इत्यादि निर्देशात्।**

---

**५६४ - पदच्छेदः** - सहयुक्ते, अप्रधाने।

न प्रधाने इति अप्रधाने। (न.न.)

**अनुवृत्तिः** - तृतीया

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सह इत्यर्थकानां शब्दानां यदा गौणकर्त्रा सह योगः भवति तदा अप्रधाने गौणे कर्तरि तृतीया भवति। साकं, सार्धं, समम् इत्यादयः सहार्थकाः अतः एतेषां योगे ऽपि तृतीया भवति।

**विशेषार्थः** - पाणिनिना 'वृद्धो यूना तल्लक्षणश्चेदविशेषः' इति सूत्रे सहशब्दस्य सहपर्यायश्च अन्यशब्दस्य वा प्रयोगः न कृतः। तथापि 'यूना' इति तृतीया प्रयुक्ता। एतेन निर्देशः प्राप्यते यत् सहादिशब्दाभावेऽपि तदर्थापवर्गमपि तृतीया भवति।

**साधनिका:** - पुत्रेण सहागतः पिता (पिता के साथ पुत्र आया है।)

अत्र आगमनक्रियायां पितुः साक्षादन्वयः अतः पिता प्रधानः कर्ता। पुत्रोऽपि आगमनक्रियां करोत्यतः तम् अपि कर्ता किन्तु अप्रधानः कर्ता। अतः पुत्रस्य अप्रधानत्वात् 'सहयुक्तेऽप्रधाने' सूत्रेण तृतीया प्रवृत्ता इति।

**(५६५) -येनाङ्गविकारः। २।३।२०॥**

**येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततः तृतीया स्यात्। अक्ष्णा काणः। अक्षिसम्बन्धिकाणत्वविशिष्ट इत्यर्थः। 'अङ्गविकारः' किम्? अक्षिकाणमस्य।**

---

**५६५ - पदच्छेदः** - येन, अङ्गविकारः।

**अनुवृत्तिः** - तृतीया।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यस्य अङ्गस्य विकारेण सः व्यक्तिः विकृतं जनयति। तदा तस्मात् विकृतात् अङ्गात् तृतीया विभक्तिः भवति।

**विशेषार्थः** - अङ्गविकारः किम्? अक्षिकाणमस्य। यत्र अङ्गेन अङ्गिनः विकारः लक्ष्यते तत्र एव अङ्गात् तृतीया भवति। किन्तु यत्र विकृताङ्गेन तस्यैव अङ्गस्य विकारः लक्ष्यते तत्र अङ्गतः तृतीया न भवति। तत्र तु विकृताङ्गतः प्रथमा भवति।

**साधनिका:** - अक्ष्णा काणः (आँख से काना)

अत्र विकृतमङ्गम् अक्षि, अक्ष्णाऽत्र अङ्गिनः काणत्वं लक्ष्यते। अतः विकृतात् अक्ष्णः 'येनाङ्गविकारः' इत्यनेन तृतीया विभक्तिः 'अक्ष्णा काणः' सिद्धम्।

**(५६६) -इत्थंभूतलक्षणे। २।३।२१॥**

**किञ्चित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात्। जटा-भिस्तापसः। जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः।**

---

५६६ - **पदच्छेदः** - इत्थम्भूतलक्षणे।

**अनुवृत्तिः** - तृतीया।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अयं प्रकारः इत्थं, तं भूतः प्राप्तः इत्थंभूतः लक्षणं ज्ञापकम्। प्रकारविशेषं प्राप्तस्य ज्ञापके तृतीया भवति।

**साधनिकाः** - जटाभिस्तापसः (जटाओं से तपस्वी है।)

अत्र जटाः लक्षणं तथा तापसः लक्ष्यमस्ति। लक्ष्यलक्षणभावात् प्रकारविशेषादत्र 'इत्थम्भूतलक्षणे' सूत्रेण जटाशब्दात् तृतीया विभक्तिरिति।

**(५६७) -संज्ञोऽन्यतरस्यां कर्मणि। २।३।२२॥**

सम्पूर्वस्य जानातेः कर्मणि तृतीया वा स्यात्। पित्रा पितरं वा संजानीते।

---

५६७ - **पदच्छेदः** - संज्ञः, अन्यतरस्यां, कर्मणि।

**अनुवृत्तिः** - तृतीया।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'सम्' इत्युपसर्गपूर्वकस्य 'ज्ञा' धातोः अनभिहिते कर्मकारके विकल्पेन तृतीया विभक्तिर्भवति। पक्षे द्वितीया स्यात्।

**साधनिकाः** - पित्रा पितरं वा संजानीते।

(पिता को अच्छी तरह पहचानता है।)

अत्र समिति उपसर्गपूर्वकस्य ज्ञाधातोः प्रयोगः। अतः कर्मणि पितृशब्दे 'संज्ञोऽन्यतरस्यां कर्मणि' इत्यनेन सूत्रेण विकल्पेन तृतीया-विभक्तिः 'पित्रा' इति सिद्धं भवति। यदा तृतीया न भवति तदा 'कर्तुरीप्सित' इत्यनेन पितृशब्दस्य कर्मसंज्ञा भवति। 'कर्मणि द्वितीया' इत्यनेन द्वितीया विभक्तिः तदा 'पितरम्' इति रूपं सिद्धम्।

**(५६८) -हेतौ। २।३।२३॥**

**हेत्वर्थे तृतीया स्यात् (१) द्रव्यादिसाधारणं निर्व्यापारं साधारणं च हेतुत्वम्। करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च। दण्डेन घटः। पुण्येन दृष्टो हरिः। फलमपीह हेतुः। अध्ययनेन वसति 'गम्यमानाऽपि क्रिया कारकविभक्तौ प्रयोजिका।' अलं श्रमेण। श्रमेण साध्यं नास्तीत्यर्थः इह साधनक्रियां प्रति श्रमः कारणम्। शतेन शतेन वत्सान् पाययति पयः। शतेन परिच्छिद्येत्यर्थः (४) अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया (वा. ५०४०)। दास्या संयच्छते कामुकः। धर्म्ये तु भार्यायै संयच्छति।**

---

५६८ - **पदच्छेदः** - हेतौ (सप्तम्यन्तपदम्)

**अनुवृत्तिः** - तृतीया।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - हेतुर्नाम कारणम्। हेत्वर्थे तृतीया भवति।

**विशेषार्थः** - (१) द्रव्यादि... दृष्टो हरिः।

भट्टोजिः अत्र हेतुत्वकरणत्वयोः भेदं दर्शयति। द्रव्यं गुणं क्रियां च यः जनसः, स्वयं च व्यापाररहितः स्यात् सः हेतुः। यथा 'दण्डेन घटः'। अत्र दण्डः घटद्रव्यं जनयति। दण्डः य स्वयं व्यापारवान् नास्ति। दण्डः घटस्य निमित्तकरणमस्ति। निमित्तकारणमेव अत्र हेतुरिति उच्यते।

यत् केवलं क्रियां जनयति व्यापारवान् च भवेत् तत करणम्। यथा 'रामः' रावणं बाणेन हन्ति। इत्यत्र बाणः व्यापारवान् अस्ति। हननक्रियां च जनयति अतः बाणः अत्र करणम्।

(२) फलमपि...।

'अध्ययनेन वसति।' इत्यत्र वासक्रियां प्रति अध्ययनं हेतुः। निमित्तकारणं नास्ति। अध्ययनं तु वासक्रियायाः फलम्। अतः अध्ययनशब्दात् तृतीया कथं प्रवृत्तो भविष्यति। भट्टोजिः हेतुरित्यस्य फलमित्यपि अर्थं करोति। अध्ययन-शब्दे तृतीया प्रवृत्ता भवति।

(३) गम्यमाना...

वाक्ये क्रिया स्पष्टरूपेण निर्दिष्टा न स्यात्; क्रिया अध्याहृता, अनुमानेन गम्या या स्यात् तथापि सा (क्रिया) कारकविभक्तिं प्रवर्तयति। यथा 'अलं श्रमेण।' एतत्कार्यं श्रमसाध्यं नास्ति। इत्यर्थः अत्र साध्यक्रियां प्रति श्रमः करणकारकम् अस्ति। क्रिया गम्यमाना वर्तते तथापि करणवाचकः श्रमशब्दः तृतीयायां प्रयुक्तः।

(४) अशिष्टव्यवहारे...

वाक्ये यदा दाण्धातोः प्रयोगः भवेत् अशिष्टव्यवहारस्य च निर्देशः भवेत् तदा चतुर्थ्यर्थे तृतीया प्रयुज्यते। यथा 'कामुकः दास्या संयच्छते।' अत्र कामुकशब्देन अशिष्टव्यवहारः सूचितः। दासी अत्र सम्प्रदानमस्ति तथापि अशिष्टव्यवहारकारणात् दासीशब्दात् अत्र चतुर्थ्यर्थे तृतीया प्रयुक्ता।

## स्वाध्यायः

**१. प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) कर्तृकरणयोः का विभक्तिः भवति?

(क) प्रथमा (ख) द्वितीया (ग) तृतीया (घ) चतुर्थी

(२) क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः .......... स्यात्?

(क) कर्म (ख) कर्ता (ग) सम्प्रदानम् (घ) करणम्

(३) करणसंज्ञा केन सूत्रेण भवति?

(क) स्वतन्त्रः कर्ता (ख) कर्तृकरणयोस्तृतीया (ग) साधकतमं करणम् (घ) हेतौ

(४) प्रकृत्यादिगणशब्दानां का विभक्तिः भवति?

(क) प्रथमा (ख) द्वितीया (ग) तृतीया (घ) चतुर्थी

(५) दिवः साधकतमस्य का संज्ञा भवति?

(क) कर्म (ख) कर्ता (ग) सम्प्रदानम् (घ) करणम्

(६) आवसति वैकुण्ठं हरिः कः आधारः?

(क) प्रधानस्य (ख) अप्रधानस्य (ग) कर्मसंज्ञकस्य (घ) एकमपि न

(७) 'येनाङ्गविकारः' सूत्रस्य किमुदाहरणम्?

(क) अक्ष्णा काणः (ख) पुत्रेण सहागतः पिता

(ग) जटाभिस्तापसः (घ) पित्रा पितरं वा संजानीते

(८) 'इत्थम्भूतलक्षणे' इति कीदृशं सूत्रमस्ति?

(क) विधिसूत्रम् (ख) अतिदेशसूत्रम् (ग) संज्ञासूत्रम् (घ) नियमसूत्रम्

(९) 'पिता वा संजानीते' इति रूपं कस्मिन् सूत्रे विद्यते?

(क) इत्थम्भूतलक्षणे (ख) हेतौ

(ग) येनाङ्गविकारः (घ) संज्ञोऽन्यतरस्यां कर्मणि

(१०) हेत्वर्थे का विभक्तिः?

(क) प्रथमा (ख) द्वितीया (ग) तृतीया (घ) चतुर्थी

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) किं नाम उपकारकम्?

(२) प्रकृष्टोपकारकस्य का संज्ञा भवति?

(३) 'प्रकृत्या चारुः' इत्यस्य कोऽर्थः?

(४) सह युक्तेऽप्रधानगौणकर्तुः का विभक्तिः भवति?

(५) 'जटाभिस्तापसः' इत्यत्र किं लक्षणम्?

(६) किन्नाम हेतुत्वम्?

(७) 'अशिष्टव्यवहारे...' पूर्तिङ्करोतु।

**३. सविस्तरम् उत्तराणि लिखत।**

(१) 'क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्' इत्यत्र प्रकृष्टोपकारकस्य कः अर्थः?

(२) 'येनाङ्गविकारः' इत्यत्र अङ्गविकारः किम् इति स्पष्टयतु।

(३) हेतुत्वकरणत्वयोः भेदं दर्शयतु?

**४. अधोलिखित रूपाणि साधयतु।**

(१) रामेण बाणेन हतो बाली।

(२) अक्षैः अक्षान् वा दीव्यति।

(३) पुत्रेण सहागतः पिता।

(४) अक्ष्णा काणः।

(५) जटाभिस्तापसः।

(६) दण्डेन घटः।

(७) अलं श्रमेण।

**५. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायत।**

(१) कर्तृकरणयोस्तृतीया।

(२) अपवर्गे तृतीया।

(३) हेतौ।

**६. सूत्रोदाहरणैः समायोजनं करोतु।**

| **(अ)** | **(ब)** |
|---|---|
| (१) अक्षैः अक्षान्वा दीव्यति। | (१) अपवर्गे तृतीया। |
| (२) अह्ना क्रोशेन वा अनुवाकोऽधीतः। | (२) इत्थम्भूतलक्षणे। |
| (३) पुत्रेण सहागतः पिता। | (३) दिवः कर्म च। |
| (४) अक्ष्णा काणः। | (४) सहयुक्तेऽप्रधाने। |
| (५) जटाभि-स्तापसः। | (५) येनाङ्गविकारः। |

**छात्रप्रवृत्तिः**

- प्रधानाध्यापकस्य मार्गदर्शने एकं सुभाषितं विलिख्य अन्वयं पदपरिचयं समासं च भावार्थं च लिखत।

●

# ११

# सम्प्रदानकारकम्

**प्रस्तावना**

अस्मिन् सम्प्रदान प्रकरणे विविधसूत्रैः सम्प्रदान संज्ञा भवति। अस्मिन् प्रकरणे विविधेषु-अर्थेषु, योगेषु-प्रयोगेषु च भिन्नैः सूत्रैः सम्प्रदान संज्ञा भवति। यथा-रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणार्थे स्पृह्यते प्रयोगे इष्टः इत्यस्य, क्रुधाद्यर्थानां प्रयोगे यं प्रति क्रोधः तस्य सम्प्रदान संज्ञा भवति। नमः स्वस्ति स्वाहा आदिशब्दानां प्रयोगे सति तेषां शब्दानां सम्प्रदान संज्ञा भवति यस्य सम्प्रदान संज्ञा भवति तस्य 'चतुर्थी सम्प्रदाने' इति सूत्रेण चतुर्थी विभक्ति जायते इति।

---

**(५६९) -कर्मणा यमभिप्रैति स सम्प्रदानम्। १।४।३२॥**

**दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्।**

---

**५६९ - पदच्छेद :** - कर्मणा, यम्, अभिप्रैति, सः, सम्प्रदानम्।

**अनुवृत्तिः** - कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - सम्प्रदीयते यस्मै तत् सम्प्रदानम् इति अन्वर्थ संज्ञा इयम्। अतः दानस्य कर्मणा यमभिप्रैति सः सम्प्रदानसंज्ञकः भवतीत्यर्थः। दाता यमुद्दिश्य दानकर्म कुर्यात्तस्य सम्प्रदानसंज्ञा भवति।

**(५७०) -चतुर्थी सम्प्रदाने। २।३।१३॥**

**विप्राय गां ददाति अभिहित इत्येव। दीयतेऽस्मै दानीयो विप्रः (१) क्रियया यमभिप्रैति सोऽपिसम्प्रदानम् (वा. १०८५)। पत्ये शते (२) यजेः कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा। (वा. १०८६) पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः।**

---

**५७० - पदच्छेदः** - चतुर्थी, सम्प्रदाने।

**अनुवृत्तिः** - अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - (१) अनुक्ते सम्प्रदाने चतुर्थी भवति। यथा विप्राय गां ददाति। इत्यत्र विप्रम् उद्दिश्य दानकर्म भवति। ददाति इति क्रियापदस्य इति प्रत्ययेन कर्त्रर्थः उक्तः। सम्प्रदानमत्र अनुक्तः।

अतः अनुक्तसम्प्रदाने अत्र चतुर्थी। उक्ते सम्प्रदाने प्रथमा भवति। 'दानीयः विप्रः' अत्र अनीयरप्रत्ययेन सम्प्रदानमुक्तम् अतः विप्रशब्दात् प्रथमा।

**विशेषार्थः** - (१) क्रियया (वा. १०८५) यम् उद्दिश्य अकर्मकक्रिया भवेत् सोऽपि सम्प्रदानसंज्ञकः भवति। यथा 'पत्ये शेते'। पतिम् उद्दिश्य शयनक्रिया भवतीत्यर्थः। (२) यजधातोः कर्मणः करणसंज्ञा भवति। सम्प्रदानस्य च कर्मसंज्ञा भवति यथा 'पशुना रुद्रं यजते।' याजकः पशुं रुद्राय ददाति इत्यर्थः।

**(५७१) -रुच्यर्थानां प्रीयमाणः। १।४।३३॥**

**रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात्। हरये रोचते भक्तिः (१) अन्यकर्तृकोऽभिलाषो रुचिः। हरिनिष्ठप्रतीतेर्भक्तिः कर्त्री (२) 'प्रीयमाणः' किम्? देवदत्ताय रोचते मोदकः पथि।**

---

**५७१ - पदच्छेदः** - रुच्यर्थानाम्, प्रीयमाणः।

**अनुवृत्तिः** - सम्प्रदानम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - रुच्यर्थानां धातूनां प्रयोगे यः प्रीयमाणः भवेत्तस्य सम्प्रदनसंज्ञा भवति। यथा 'हरये' भक्तिः रोचते। अत्र हरिः प्रीयमाणः प्रीत्याश्रयः। तस्य भक्तौ प्रीतिः रुचिः। रुच्धातोः प्रयोगः। अतः हरिशब्दात् चतुर्थी।

**विशेषार्थः** - (१) अभि + लषधातोः कर्तुः ऊपेक्षया रुचधातोः कर्ता भिन्नः। प्रीत्याश्रयकर्तृकः किञ्चिद्विषयकः इच्छाविशेषः अभिलाषः। यथा 'हरिः' भक्तिम् अभिलषति। भक्त्या समुत्पाद्यमाना प्रीतिः हरौ अस्ति। अतः प्रीत्याश्रयः हरिः। तस्यात्र सम्प्रदानसंज्ञा न भवति। प्रीत्याश्रयापेक्षया यदन्यत्, तत्कर्तृकाभिलाषः रुचिः। यथा 'हरये भक्तिः रोचते।' अत्र प्रीत्याश्रयः हरिः।

तदपेक्षया अन्यत् भक्तिः। अस्मिन् वाक्ये कर्ता न तु हरिः। 'अत्र प्रीत्याश्रयस्य सम्प्रदानसंज्ञा।' अभिलषते। प्रयोगे प्रीत्याश्रयः एव कर्ता भवति। रोचतेः प्रयोगे प्रीत्याश्रयः कर्ता न भवति, किन्तु अन्यत् कारकम् एव कर्ता भवति। (२) प्रीयमाणः। 'देवदत्ताय रोचते मोदकः पथि।' इत्यस्मिन्वाक्ये पथः प्रीयमाणत्वाभावात् सम्प्रदानसंज्ञा न भवति।

**(५७२) -श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः। १।३।३४॥**

**एषां प्रयोगे बोधयितुमिष्टः सम्प्रदानं स्यात्। गोपी स्मरणात् कृष्णाय श्लाघते। ह्नुते। तिष्ठते शपते वा। 'ज्ञीप्स्यमानः' किम्? देवदत्ताय श्लाघते पथि।**

---

**५७२ - पदच्छेदः** - श्लाघह्नुङ्स्थाशपां, ज्ञीप्स्यमानः।

**अनुवृत्तिः** - सम्प्रदानम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - श्लाघादीनां धातूनां प्रयोगे ज्ञीप्स्यमानस्य सम्प्रदानसंज्ञा भवति। यथा 'गोपी स्मरणत् कृष्णाय श्लाघते।' मन्मथपीडावशात् गोपी आत्मस्तुत्या विरहवेदनां कृष्णं बोधयतीत्यर्थः। गोपी कृष्णं बोधयितुमत्र क्रियां करोति। अतः कृष्णः ज्ञीप्स्यमानः। अतः कृष्णस्य सम्प्रदानसंज्ञा, 'चतुर्थी सम्प्रदाने' इत्यनेन चतुर्थी।

**विशेषार्थः** - ज्ञीप्स्यमानः किम्?

देवदत्ताय श्लाघते पथि। इत्यत्र पथः ज्ञीप्स्यमानः नास्ति। अतः तस्य सम्प्रदानसंज्ञा न विहिता।

**(५७३) -धारेरुत्तमर्ण। १।४।३५॥**

**धारयतेः प्रयोगे उत्तमर्ण उक्तसंज्ञः स्यात्। भक्ताय धारयति मोक्षं हरिः। उत्तमर्णः किम्? देवदत्ताय शतं धारयति ग्रामे।**

---

**५७३ - पदच्छेदः** - धारे, उत्तमर्णः।

**अनुवृत्तिः** - सम्प्रदानम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - णिजन्त धृ धातोः प्रयोगाय उत्तमर्णस्य सम्प्रदानसंज्ञा भवति।

**(५७४) -स्पृहेरीप्सितः। १।४।३६॥**

**स्पृह्यतेः प्रयोगे इष्टः सम्प्रदानं स्यात्। पुष्पेभ्यः स्पृह्यति। 'ईप्सितः किम्?' पुष्पेभ्यो वने स्पृह्यति। ईप्सितमात्रे इयं संज्ञा। प्रकर्षविवक्षायां तु परत्वात्कर्मसंज्ञा। पुष्पाणि स्पृह्यति।**

---

**५७४ - पदच्छेदः** - स्पृहेः, ईप्सितः।

**अनुवृत्तिः** - सम्प्रदानम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** – स्पृह्यतेः प्रयोगे इष्टस्य सम्प्रदानसंज्ञा भवति। अन्यस्थानिकं द्रव्यं नियतकाले पुनरर्पणबुद्धया गृहीतम् ऋण-मित्युच्यते। तत्र ऋणस्य गृहीता उत्तमर्णः ऋणस्यार्पयिता उत्तमर्णः। धारयतेः प्रयोगे उत्तमर्णस्य ऋणधातुः सम्प्रदानसंज्ञा भवति। यथा 'हरिः मोक्षं भक्ताय धारयति।' भक्तसम्बन्धी यः मोक्षः तं हरिः धारयति। पूजयन् हि भक्तः तुलसीदलादिद्रव्यं प्रयच्छति। तञ्च गृह्णन् तुष्टः हरिः तत्प्रदत्तद्रव्यं मोक्षदानेन निष्क्रीणाति। एवं भक्तः उत्तमर्णः अतः तस्य सम्प्रदानसंज्ञा, चतुर्थी च।

**साधनिकाः** – (१) 'पुष्पेभ्यः स्पृह्यति।' अत्र स्पृह्यतेः प्रयोगः अस्ति। पुष्पाणि च इष्टानि। अतः पुष्पाणां सम्प्रदानसंज्ञा।

'चतुर्थी सम्प्रदाने' इत्यनेन पुष्पशब्दात् चतुर्थी। (२) यदा केवलं ईप्सितः स्यात् एव सम्प्रदानसंज्ञा भवति। यदा ईप्सित तमः स्यात्तदा तु 'कर्तुरीप्सिततमं कर्म' इत्यनेन कर्मसंज्ञा भवति। 'कर्मणि द्वितीया' इत्यनेन द्वितीया भवति यथा पुष्पाणि स्पृह्यति।

**(५७५) -क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः। १।४।३७॥**

**क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स उक्तसंज्ञः स्यात्। हरये क्रुध्यति द्रुह्यति, ईर्ष्यति असूयति वा। 'यं प्रति कोपः' किम्? भार्यामीर्ष्यति। मैनामन्योऽद्राक्षीदिति। क्रोधोऽमर्षः। द्रोहोऽपकारः। ईर्ष्या अक्षमा। असूया गुणेषु दोषाविष्करणम्। द्रोहादयोऽपि कोपप्रभवा एवं गृह्यन्ते। अतो विशेषणं सामान्येन 'यं प्रति कोपः' इति।**

---

५७५ - **पदच्छेदः** – क्रुधद्रुहेर्ष्यासूयार्थानां, यं, प्रति, कोपः।

**समासः** – क्रुधश्च, द्रुहश्च, ईर्ष्यश्च, असूयश्च – क्रुधद्रुहेर्ष्यासूयाः तेषां अर्थाः – क्रुध द्रुहेर्ष्यासूयार्थाः, क्रुधद्रुहेर्ष्यासूयार्थानामिव अर्था येषां ते – क्रुधद्रुहेर्ष्यासूयार्थाः तेषाम् – द्वन्द्वगर्भित-बहुव्रीहि।

**अनुवृत्तिः** – सम्प्रदानम्, कारके।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – क्रुध्यति, द्रुह्यति ईर्ष्यति असूर्यात इत्येतेषां तत्पर्यायाणां च प्रयोगे यं प्रति कोपः सः सम्प्रदानसंज्ञां प्राप्नोति।

**(५७६) -क्रुधद्रुहोरूपसृष्टयोः कर्म। १।४।३८॥**

**सोपसर्गयोरनयोर्योगे यं प्रति कोपः तत्कारकं कर्मसंज्ञं स्यात्। क्रूरमभिक्रुध्यति, अभिद्रुह्यति वा।**

---

५७६ - **पदच्छेदः** – क्रुधद्रुहोः, उपसृष्टयोः, कर्म।

**अनुवृत्तिः** – यं प्रति कोपः, कारके।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – उपसर्गयुक्तस्य क्रुध्धातोः उपसर्गयुक्तस्य च द्रुह्धातोः योगे च प्रति कोपः, तस्य कारकस्य कर्मसंज्ञा भवति।

**साधनिकाः** – क्रूरमभिक्रुध्यति

(क्रूर पर क्रोध या द्रोह करता है)

क्रूरम् अभिक्रुध्यति। इत्यत्र अभिपूर्वकस्य क्रुधधातोः प्रयोगः अतः 'क्रुधद्रुहोरूपसृष्टयोः कर्म' इत्यनेन क्रूरशब्दस्य कर्मसंज्ञायाम् 'कर्मणि द्वितीया' इत्यनेन द्वितीयायाम् उक्तं रूपं सिद्धम्।

**(५७७) -राधीक्ष्योर्यस्य विप्रश्नः। १।४।३९॥**

**एतयोः कारकं सम्प्रदानं स्यात् यदीयो विविधः प्रश्नः क्रियते। कृष्णाय राध्यति, ईक्षते वा। पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः।**

---

५७७ - **पदच्छेदः** - राधीक्ष्योः, यस्य, विप्रश्नः।

**अनुवृत्तिः** - सम्प्रदानम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - राधीक्ष्योः प्रयोगे यद्विषयकस्य विप्रश्नः क्रियते तत्कारकं सम्प्रदानं भवति।

**साधनिकाः** - कृष्णाय राध्यति ईक्षते वा

(गर्ग कृष्ण के शुभाशुभ विचार करते है)

कृष्णसम्बन्धिशुभाशुभरूपं फलं पर्यालोचयति इत्यर्थः अत्र 'राधीक्ष्योर्यस्य विप्रश्नः' इति सूत्रेण 'सम्प्रदानसंज्ञायां चतुर्थी' सम्प्रदाने इत्यनेन चतुर्थी।

**(५७८) -प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता। १।४।४०॥**

**आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनारूपस्य व्यापारस्य कर्ता सम्प्रदानं स्यात्। विप्राय गां प्रतिशृणोति आश्रृणोति वा। विप्रेण मह्यं देहीति प्रवर्तितस्तत्प्रतिजानीते इत्यर्थः।**

---

५७८ - **पदच्छेदः** - प्रत्याङ्भ्यां, श्रुवः, पूर्वस्य, कर्ता।

**अनुवृत्तिः** - सम्प्रदानम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - प्रतिपूर्वकः आङ्पूर्वकश्च श्रुधातुः। यदा वाक्ये प्रयुक्तः स्यात् तदा पूर्वः प्रेरकः कर्ता सम्प्रदानं भवति।

**साधनिकाः** - विप्राय गां प्रतिश्रृणोति।

(ब्राह्मण के लिये गाय देना स्वीकार करता है)

विप्रः पूर्वं राजानं प्रेरयति यत्। मह्यं गां देहीति। ततः राजा प्रतिज्ञां करोति। विप्रः अत्र पूर्वप्रवर्तनारूपत्यापाखान् अस्ति। अतः तस्य 'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता। इति सम्प्रदानसंज्ञायाम्' सम्प्रदाने चतुर्थी इति चतुर्थी कृते उक्तं रूपं सिद्धम्।

**(५७९) -अनुप्रतिगृणश्च। १।।/४१॥**

**आभ्यां गृणातेः कारकं पूर्वव्यापारस्य कर्तृभूतमुक्तसंज्ञं स्यात्। होत्रेऽनुगृणाति प्रतिगृणाति वा। होता प्रथमं शंसति, तमध्वर्युः प्रोत्साहयतीत्यर्थः।**

---

५७९ - **पदच्छेदः** - अनुप्रति, गृणः, च।

**अनुवृत्तिः** - पूर्वस्य कर्ता, सम्प्रदानम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - अनुपूर्वकस्य प्रतिपूर्वकस्य च गृधातोः कारकं पूर्वव्यापारस्य कर्ता सम्प्रदानं भवति। प्रोत्साहयति

**साधनिकाः** - होत्रे अनुगृणाति (होता को प्रोत्साहित करने के लिये अध्वर्युं मन्त्र बोलता है।)

पूर्वं होता मन्त्रं पठति। अध्वर्युः होतारं अतः होतृशब्दस्य 'अनुप्रतिगृणश्च' इत्यनेन सम्प्रदानसंज्ञायाम्, 'चतुर्थी सम्प्रदाने' इत्यनेन चतुर्थी।

**(५८०) -परिक्रयणे सम्प्रदानमन्यतरस्याम्। १।४।४४॥**

**नियतकालं भृत्या स्वीकरणं परिक्रयणं तस्मिन्साधकतमं कारकं सम्प्रदानसंज्ञं वा स्यात्। शतेन शताय वा परिक्रीतः। 'तादर्थ्ये-चतुर्थी वाच्या' (वा. १४५८)। मुक्तये हरिं भवति। 'क्लृपि सम्पद्यमाने च' (वा. १४५९) भक्तिर्ज्ञानाय कल्पते सम्पद्यते, जायते इत्यादि। 'उत्पातेन ज्ञापिते च' (वा. १४६०) वाताय कपिला विद्युत् 'हितयोगे च' (१४६१)। ब्रह्मणाय हितम्।**

---

५८० - **पदच्छेदः** - परिक्रयणे, सम्प्रदानम्, अन्यतरस्याम्।

**अनुवृत्तिः** - साधकतमम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - तुभ्यम् एतावद् वेतनं दीयते, वेतनं, गृह्णन् एतावन्तं कालं त्वं मम कर्मकरो भव। इत्येवं परिमितकालं भृत्या स्वीकरणं परिक्रयणम्। परिक्रयणे यत् साधकतमं तत् विकल्पेन सम्प्रदानसंज्ञकं भवति।

**साधनिकाः** - शतेन शताय वा परिक्रीतः। (सौ रूपये पर रखता है)

शतेन शताय वा परिक्रीतः। नियतकालं भृत्या स्वीकरणं परिक्रयणम्। तत्साधकतरस्य शतस्य 'परिक्रयणे सम्प्रदानमन्यतरस्याम्' इत्यनेन विकल्पेन सम्प्रदानसंज्ञायाम् 'चतुर्थी सम्प्रदाने' इति चतुर्थी 'शताय' इति। सम्प्रदानत्वाभावे शतस्य 'साधकतमं करणम्' इत्यनेन करणसंज्ञायाम् 'कर्तृकरणयोस्तृतीया' इत्यनेन तृतीया 'शतेन' इति।

**(५८१) -क्रियार्थोपपदस्य च कर्मणि स्थानिनः। २।३।१४॥**

**क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात्। फलेभ्यो याति। फलान्याहर्तुं यातीत्यर्थः। नमस्कुर्मो नृसिंहाय। नृसिंहम् - अनुकूलयितुमित्यर्थः। एवं 'स्वयम्भुवे नमस्कृत्य' इत्यादावपि।**

---

५८१ - **पदच्छेदः** - क्रियार्थोपपदस्य, च, कर्मणि, स्थानिनः।

**अनुवृत्तिः** - चतुर्थी, अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - क्रिया अर्थः प्रयोजनं यस्याः सा क्रियार्था। क्रिया उपपदं यस्य अस्ति। तस्य अप्रयुज्यमानस्य तुमुन्नन्तस्य कर्मणि चतुर्थी भवति।

**साधनिकाः** - फलेभ्यः याति (फल लाने के लिए जाता हे।)

फलेभ्यः याति। फलानि आहर्तुं याति इत्यर्थः। फलान्याहरणाय यानक्रिया भवति। अतः यानक्रिया क्रियार्था। क्रिया इदृशी क्रिया उपपदेशस्य तस्य तुमन्नन्तस्य आहर्तुमित्यस्य कर्म फलानि। यदा तुमुन्नन्तस्य स्थानि वाक्ये अप्रयुज्यमानः भवेत् तदा तस्य कर्मणि चतुर्थी भवति। फलेभ्यः याति इति।

**(५८२) -तुमर्थाच्च भाववचनात्। २।३।१५॥**

**'भाववचनाश्च' इति सूत्रेण यो विहितस्तदन्ताच्चतुर्थी स्यात्। यागाय याति। यष्टुं यातीत्यर्थः।**

---

५८२ - **पदच्छेदः** - तुमर्थात्, च, भाववचनात्।

**अनुवृत्तिः** - क्रियार्थोपपदस्य च कर्मणि स्थानिनः, चतुर्थी, अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - भगवता पाणिनिना 'भावे' इति सूत्रेण भावः = सिद्धा क्रिया इत्यर्थाद धातोः घञ्प्रत्ययस्य विधानं कृतम्। पच् + घञ् > अ = पाकः। यज् + घञ् > अ = यागः इत्यादयः भाववचनशब्दा इति उच्यन्ते। भाववाचकाः अपि यदा क्रियार्थाक्रिया उपपदे भवति तदा भविष्यति काले प्रवृत्ता भवन्ति इति 'भावववचनाश्च ३।३।११ इत्यनेन सूत्रेण भगवता उक्तम्। तुमर्थात् भाववचनात् चतुर्थी भवति।

**साधनिकाः** - यागाय याति (यज्ञ करने के लिए जाता है)

यागाय याति। यष्टुं याति इत्यर्थः। यागः भाववचनशब्दः। 'याति' अत्र क्रियार्था क्रिया। यजनक्रियार्थम्। अत्र यागक्रिया भवति। एवं क्रियार्था क्रिया उपपदे अस्ति, अतः भाववचनयागशब्दात् 'तुमर्थाच्च भाववचनात्' इति सूत्रेण चतुर्थी प्रवृत्ता।

**(५८३) -नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च। २।३।१६॥**

**एभिर्योगे चतुर्थी स्यात्। हरये नमः। 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' नमस्करोति देवान्। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। 'अलमिति पर्याप्त्यर्थग्रहणम्' (वा. १४६२)। तेन दैत्येभ्यो हरिरलं, प्रभुः समर्थः, शक्तः इत्यादि। प्रभ्वादियोगे षष्ठ्यपि साधुः। 'तस्मै प्रभवति-' स एषां ग्रामणीः इति निर्देशात्। तेन 'प्रभुर्बुभूषुर्भुवनत्रयस्य' इति सिद्धम्। वषडिन्द्राय। चकारः पुनर्विधानार्थः। तेनाशीर्विवक्षायां परामपि। 'चतुर्थी चाशिषि-' इति षष्ठीं बाधित्वा चतुर्थ्येव भवति। स्वस्ति गोभ्यो भूयात्।**

---

**५८३ - पदच्छेदः** - नम.... योगात्, च।

**अनुवृत्तिः** - चतुर्थी।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - वाक्ये यदा एतेषां नमः इत्यादीनां शब्दानां प्रयोगः भवेत् तदा एतैः शब्दैः योगे चतुर्थी विभक्तिः प्रयुज्यते।

**विशेषार्थः** - अलमित्यनेन अव्ययेन पर्याप्त्यर्थकानां शब्दानां ग्रहणं कर्तव्यम्। तेन प्रभुः समर्थः शक्तः इत्यादीनां शब्दानां योगे अपि चतुर्थी प्रयुज्यते। तेन दैत्येभ्यः हरिः प्रभुः। पाण्डवाः कौरवेभ्यः समर्थाः। इत्यादि सिद्धम्।

**साधनिकाः** - हरये नमः। (हरि को नमस्कार है)

हरये नमः। हरिम् उद्दिश्य नमनम् इत्यर्थः। अत्र नमः अव्ययपदं प्रयुक्तम्। तस्य योगे हरिशब्दात् नमःस्वस्ति इत्यादिना सूत्रेण चतुर्थी।

**(५८४) -मन्यकर्मण्यनादरे विभाषाऽप्राणिषु। २।३।१७॥**

**प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात्तिरस्कारे। न त्वां तृणं मन्ये तृणाय वा। श्यना निर्देशात्तानादिकयोगे न। न त्वां तृणं मन्वे। अप्राणिष्वित्यपनीय 'नौकाकान्नशुकश्रृगालवर्जेष्विति वाच्यम्' (वा. १४६४) तेन 'न त्वां नावमन्नं वा मन्ये' इत्यत्राऽप्राणित्वेऽपि चतुर्थी न। 'न त्वां शुने मन्ये' इत्यत्र प्राणित्वेऽपि भवत्येव।**

---

**५८४ - पदच्छेदः** - मन्यकर्मणि, अनादरे, विभाषा, अप्राणिषु।

**अनुवृत्तिः** - चतुर्थी, अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'मन ज्ञाने' दिवादिः श्यन् विकरणः। मनु अवबोधने तनादिरुविकरणः। अत्र अन्येति रचना निर्देशात् दैवादिकस्य ग्रहणम्। मन्धातोः कर्म यदा प्राणिनः स्यात्तदा वाक्ये तिरस्कारश्च द्योतितः भवेत् तदा मन्यतेः कर्मणि विकल्पेन चतुर्थी भवति।

**विशेषार्थः** - अप्राणिष्वित्य... (वा. १४६४) यत् उक्तमस्ति भगवता सूत्रे अप्राणिषु इति तदपनीय नौ-काक-अन्न-शुक-शृगाल-वर्जेषु-इति वक्तव्यम्।

**साधनिकाः** - न त्वां तृणं तृणाय (मै तुम्हें तिनके के बराबर भी नहीं समजता)

अत्र मन्धातोः प्रयोगः। अनादरद्योतकं कर्म तृणमस्ति। अतः 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' इत्यनेन सूत्रेण कर्मणः चतुर्थी। पक्षे यदा चतुर्थी न भवति तदा तृणशब्दस्य 'कर्तुरीप्सिततमं कर्म' इत्यनेन कर्मसंज्ञा 'कर्मणि द्वितीया' इत्यनेन द्वितीयायां कृतायां तृणम् इति सिद्धं भवति।

**(५८५) -गत्यर्थकर्मणि द्वितीया चतुर्थ्यौ चेष्टायामनध्वनि। २।३।१२॥**

**अध्वभिन्ने गत्यर्थानां कर्मण्येते स्तश्चेष्टायाम्। ग्रामं ग्रामाय वा गच्छति। 'चेष्टायाम्' किम्? मनसा हरिं व्रजति। 'अनध्वनि' इति किम्? पन्थानं गच्छति। गन्त्राऽधिष्ठितेऽध्वन्येवायं निषेधः। यदा तूत्पथात्पन्था एवाक्रमितुमिष्यते तदा चतुर्थी भवत्येव। उत्पथेन पथे गच्छति।**

---

५८५ - **पदच्छेदः** - गत्यर्थकर्मणि, द्वितीया-चतुर्थ्यौ, चेष्टायाम्, अनध्वनि।

**अनुवृत्तिः** - अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - गत्यर्थानां धातूनाम् अध्वभिन्ने कर्मणि द्वितीया चतुर्थी वा भवति चेष्टायाम्।

**विशेषार्थः** - अध्ववाचके तु कर्मणि एतत्सूत्रं प्रवृत्तं न भवति। अतः अध्ववाचकात् चतुर्थी न भवति। ततः द्वितीया एव भवति। यथा 'पन्थानं गच्छति।' अत्र अध्ववाचकः 'पन्थानम्' इति शब्दः प्रयुक्तः। अतः चतुर्थी न प्रवृत्ता।

**साधनिकाः** - ग्रामं ग्रामाय वा गच्छति। (गाँव को जाता है।)

ग्रामं ग्रामाय वा गच्छति। ग्रामः अत्र गम्धातोः कर्म। वाक्ये चेष्टा अपि द्योतिता भवति। केवलं मनसा गमनं न भवति। अतः ग्रामशब्दात् चतुर्थी प्रवृत्ता। पक्षे चतुर्थी न भवति तदा ग्रामशब्दात् द्वितीयायां कृतायां 'ग्रामं' इति रूपम्।

## स्वाध्यायः

**१. प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) दानस्य कर्मणा यमभिप्रैति स ......... संज्ञः स्यात्?

(क) कर्म (ख) करण (ग) सम्प्रदान (घ) अपादान

(२) अनुक्ते सम्प्रदाने का विभक्तिः?

(क) प्रथमा (ख) द्वितीया (ग) तृतीया (घ) चतुर्थी

(३) उक्ते सम्प्रदाने का विभक्तिः?

(क) प्रथमा (ख) द्वितीया (ग) तृतीया (घ) चतुर्थी

(४) स्पृह्यतेः प्रयोगे इष्टस्य सम्प्रदानसंज्ञा केन सूत्रेण भवति?

(क) स्पृहेरीप्सितः (ख) अनुप्रतिगृणश्च (ग) रुच्यर्थानां प्रीयमाणः (घ) धारेरुत्तमर्णः

(५) 'मुक्तये हरिं भजति' इति कस्योदाहरणम्?

(क) क्लृपि सम्पद्यमाने च (ख) उत्पातेन ज्ञापिते च

(ग) तादर्थ्ये चतुर्थी वाच्या (घ) हितयोगे च

(६) 'यागाय याति' इति कस्य सूत्रस्योदाहरणं विद्यते?

(क) अनुप्रतिगृणश्च (ख) राधीक्ष्योर्यस्य विप्रश्नः

(ग) परिक्रमणे सम्प्रदानमन्यतरस्याम् (घ) तुमर्थाच्च भाववचनात्

(७) 'पितृभ्यः स्वधा' इति रूपे केन सूत्रेण चतुर्थी विभक्तिः भवति?

(क) चतुर्थी सम्प्रदाने (ख) तुमर्थाच्च भाववचनात्

(ग) नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च (घ) परिक्रयणे सम्प्रदानमन्यतरस्याम्

२. **एकैकवाक्येन उत्तराणि लिखत।**

(१) दाता यमुद्दिश्य दानकर्म कुर्यात्तस्य का संज्ञा भवति?

(२) श्लाघादीनां धातूनां प्रयोगे कस्य सम्प्रदानसंज्ञा भवति?

(३) क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः तस्य सम्प्रदानसंज्ञा केन सूत्रेण भवति?

(४) प्रत्याङ्पूर्वकस्य कस्य धातोः वाक्यप्रयोगेण पूर्वप्रेरककर्तुः सम्प्रदानसंज्ञा भवति?

(५) 'शतेन शताय वा परिक्रीतः' इत्यस्य कोऽर्थः?

(६) 'नमःस्वस्ति...' सूत्रार्थः कः?

(७) 'गत्यर्थकर्मणि....' पूर्तिङ्कुरु।

३. **सविस्तरम् उत्तराणि लिखत।**

(१) क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्।

(२) ज्ञीप्स्यमानः किम्? देवदत्ताय श्लाघते पथि।

(३) अलमिति पर्याप्त्यर्थग्रहणम्।

४. **अधोलिखितरूपाणि साधयतु।**

(१) विप्राय गां ददाति।

(२) गोपी स्मरात् कृष्णाय श्लाघते।

(३) पुष्पेभ्यः स्पृह्यति।

(४) हरये क्रुध्यति।

(५) क्रूरम् अभिक्रुध्यति।

(६) कृष्णाय राध्यति।

(७) यागाय याति।

(८) हरये नमः।

(९) न त्वां तृणं मन्ये तृणाय वा।

(१०) ग्रामं ग्रामाय वा गच्छति।

५. **अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायत।**

(१) रुच्यर्थानां प्रीयमाणः।

(२) स्पृहेरीप्सितः।

(३) गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि।

६. **'अ' विभागं 'ब' विभागेन सह योजयतु।**

| (अ) | (ब) |
|---|---|
| (१) क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् | (१) मुक्तये हरिं भजति। |
| (२) हितयोगे च। | (२) भक्तिः ज्ञानाय सम्पद्यते। |
| (३) उत्पातेन ज्ञापिते च। | (३) ब्राह्मणाय हितम्। |
| (४) क्लृपि सम्पद्यमाने च। | (४) वाताय कपिला विद्युत्। |
| (५) तादर्थ्ये चतुर्थी वाच्या। | (५) पत्ये शेते। |

●

# १२

# अपादानकारकम्

**प्रस्तावना**

अस्मिन् अपादानकारके विंशतिः सूत्राणि सन्ति। अत्र अपादान-संज्ञकस्य 'अपादाने पञ्चमी' इति सूत्रेण पञ्चमी विभक्तिर्जायते। अतः पञ्चमीविभक्तेः अपादानकारकम् इति संज्ञा जायते। अस्मिन् प्रकरणे 'ध्रुवमपायेऽपादानम्' इति सूत्रेण अपाये विश्लेषे साध्ये अवधिभूतकारकस्य अपादान-संज्ञा क्रियते।

अपादानस्य परिभाषा भर्तृहरिणा वाक्यपदीये उक्तं तद्यथा-

**'अपाये यदुदासीनं चलं वा यदि वाऽचलम्।**
**ध्रुवमेवातदावेशात् तदपादानमुच्यते॥'**

अपाये (पृथक्त्वे) विश्लेषे सति यदुदासीनं तद् चलम् - अचलं वा स्यात् तथाऽपि 'ध्रुवम्' एव मन्यते कारणं तु तदृ वियोगकारकक्रियायाः आश्रयो नास्त्यतः अपादानम् इत्युच्यते।

---

**(५८६) -ध्रुवमपायेऽपादानम्। १।४।२४॥**

**अपायो विश्लेषः तस्मिन्साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात्।**

---

५८६ - **पदच्छेदः** - ध्रुवम्, अपाये, अपादानम्

**अनुवृत्तिः** - कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - विश्लेषे साध्ये अवधिभूतं कारकम् अपादानसंज्ञं स्यात्। विभागाश्रयस्य अपादानसंज्ञा भवति।

**(५८७) -अपादाने पञ्चमी। २।३।२८॥**

**ग्रामादायाति। धावतोऽश्वात्पतति। 'कारकम्' किम्? वृक्षस्य पर्णं पतति। 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' (वा. १०७९)। पापाज्जुगुप्सते विरमति। धर्मात्प्रमाद्यति।**

---

५८७ - **पदच्छेदः** - अपादाने, पञ्चमी

**अनुवृत्तिः** - अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अपादानसंज्ञकात् शब्दात् पञ्चमी-विभक्तिः प्रवर्तते।

**विशेषार्थः** - जुगुप्सा-विराम-प्रमादार्थकानां धातूनां योगे जुगुप्साविषयस्य विरामविषयस्य प्रमादविषयस्य च अपादानसंज्ञा भवति। यथा पापात् जुगुप्सते। अत्र जुगुप्सायाः विषयः पापम्। तस्य 'जुगुप्साविरामप्रमादार्थानामुपसंख्याम्' इत्यनेन सूत्रेण अपादानसंज्ञा 'अपादाने पञ्चमी' इत्यनेन पञ्चमी।

**साधनिका :** - ग्रामाद् आयाति (गाँव से आता है।)

क्रियायाः कर्ता अत्र ग्रामात् विश्लिषति। ग्रामः अत्र विभागाश्रयः। अतः ग्रामशब्दस्य 'ध्रुवमपायेऽपादानम्' इति सूत्रेण अपादानसंज्ञा। अपादाने पञ्चमी इत्यनेन पञ्चमी।

**(५८८) -भीत्रार्थानां भयहेतुः। १।४।२५॥**

**भयार्थानां त्राणार्थानां च प्रयोगे हेतुस्तदपादानं स्यात्। चोराद् बिभेति। चोरात् त्रायते। 'भयहेतुः' किम्? अरण्ये बिभेति, त्रायते वा।**

५८८ - **पदच्छेदः** - भीत्रार्थानां, भयहेतुः।

**अनुवृत्तिः** - अपादानम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - भयार्थानां त्राणार्थानां धातूनां प्रयोगे भयहेतोः अपादानसंज्ञा भवति।

**साधनिका :** - चोराद् बिभेति (चोर से डरता है)

अत्र भयहेतुः चोरः। अतः चोरशब्दस्य भीत्रार्थानां भयहेतुः इत्यनेन अपादानसंज्ञा। 'अपादाने पञ्चमी' इत्यनेन पञ्चमी।

**(५८९) -पराजेरसोढः। १।४।२६॥**

**पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यात्। अध्ययनात्पराजयते। ग्लायतीत्यर्थः। 'असोढः' किम्? शत्रून्पराजयते। अभिभवतीत्यर्थः।**

---

५८९ - **पदच्छेदः** - पराजेः, असोढः।

**अनुवृत्तिः** - अपादानम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - पराजेः प्रयोगे सोढुम् अशक्यस्य पदार्थस्य अपादानसंज्ञा भवति।

**साधनिका :** - अध्ययनात् पराजयते (पढाई से भागता है अर्थात् पढाई के श्रम को सहन नहीं कर सकता)

अध्ययनात्पराजयते। वाक्ये पराजेः प्रयोगः वर्तते। अध्ययनम अत्र असह्यः अर्थः। अतः अध्ययनस्य प्रकृत सूत्रेण अपादानसंज्ञा 'अपादाने पञ्चमी' इत्यनेन पञ्चमी।

**(५९०) -वारणार्थानामीप्सितः। १।४।२७॥**

**प्रवृत्तिविघातो वारणम्। वारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात्। यवेभ्योः गां वारयति। 'इप्सितः' किम्? यवेभ्यो गां वारयति क्षेत्रे।**

---

५९० - **पदच्छेदः** - वारणार्थानाम्, ईप्सितः।

**अनुवृत्तिः** - अपादानम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - वारणार्थानां प्रयोगे ईप्सितस्य अर्थस्य अपादानसंज्ञा भवति।

**साधनिका :** - यवेभ्यः गां वारयति (जौ से गाय को हटाता है)

भक्षणार्थः यवाभिमुखीं गां निवारयतीत्यर्थः। अत्र यवसंयोगात् प्रागेव निवारणं भवति। अतः संयोग पूर्वकविश्लेषाभावात् 'ध्रुवमपायेऽपादानम्' इत्यस्य अप्राप्तिः। वारणार्थानामीप्सितः इत्यनेन यवानाम् ईप्सितत्वात् अपादानसंज्ञा। गोः ईप्सिततमत्वात् कर्मसंज्ञा, कर्मणि द्वितीया इत्यनेन द्वितीया।

**(५९१) -अन्तर्धौ येनादर्शनमिच्छति। १।४।२८॥**

**व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात्। मातुर्निलीयते कृष्णः। अन्तर्धौ किम्? चौरान् न दिदृक्षते। इच्छतिग्रहणं किम्? अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात्। (देवदत्ताद्यज्ञदत्तो निलीयते)**

---

५९१ - **पदच्छेदः** - अन्तर्धौ, येन, अदर्शनम्, इच्छति।

**अनुवृत्तिः** - अपादानम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - व्यवधानेन स्वविषये यत्कर्तृकदर्शनस्य अभावम् इच्छति तद् अपादानं भवति।

**साधनिका :** – मातुः निलीयते कृष्णः (कृष्ण माता से छिपता है)

माता तं न पश्येत् इति कृष्णः इच्छति। कुड्यादिना च प्रच्छन्नः भवति। अतः मातृशब्दस्य प्रकृतसूत्रेण अपादानसंज्ञा। 'अपादाने पञ्चमी' इत्यनेन मातृशब्दात् पञ्चमी।

**(५९२) -आख्यातोपयोगे। १।४।२९॥**

**नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात्। उपाध्यायादधीते। उपयोगे किम्? नटस्य (गाथां) श्रृणोति।**

---

५९२ - **पदच्छेदः** - आख्याता, उपयोगे।

**अनुवृत्तिः** - अपादानम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - यत्र नियमपूर्वकं विद्यास्वीकारः स्यात् तत्र अध्यापयिता अपादानं भवति।

**साधनिका :** - उपाध्यायाद् अधीते (गुरु से पढ़ रहा है)

उपाध्यायं समीपं गत्वा शिष्यः अध्ययनं करोति। अत्र नियमपूर्वकः विद्यास्वीकारः अस्ति। अत्र अध्यापयितुः उपाध्यायस्य अनेन सूत्रेण अपादानसंज्ञा। 'अपादाने पञ्चमी' इत्यनेन पञ्चमी। यत्र नियमपूर्वकविद्यास्वीकारः न स्यात् तत्र विद्यादातुः अपादानसंज्ञा न भवति। 'नटस्य गाथां श्रृणोति।' इत्यत्र नटगाथातः- अपि विद्यास्वीकारः भवति। नटः विद्यादानं न करोति। सः तु केवलं गाथां श्रावयति। अतः उपयोगाभावे नटस्य अपादानं न भवति।

**(५९३) -जनिकर्तुः प्रकृतिः। १।४।३०॥**

**जायमानस्य हेतुरपादानं स्यात्। ब्रह्मणः प्रजाः प्रजायन्ते।**

---

५९३ - **पदच्छेदः** - जनिकर्तुः। प्रकृतिः।

**अनुवृत्तिः** - अपादानम्, कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - प्रकृतिः इत्यस्य हेतुः अर्थः। उत्पद्यमानस्य हेतुः अपादानसंज्ञकः भवति।

**साधनिका :** - ब्रह्मणः प्रजाः प्रजायन्ते (ब्रह्मा से प्रजा उत्पन्न होती है)

इत्यत्र प्रजायाः प्रकृतिः ब्रह्म। अतः ब्रह्मण 'जनिकर्तुः प्रकृतिः' इत्यनेन अपादानसंज्ञायाम् 'अपादाने पञ्चमी' इत्यनेन पञ्चमी।

**(५९४) -भुवः प्रभवः। १।४।३१॥**

**भवनं भूः। भूकर्तुः। प्रभवस्तथा। हिमवतो गङ्गा प्रभवति। तत्र प्रकाशते इत्यर्थः। ल्यब्लोपे कर्मण्यधिकरणे च (वा. १४७४-१४७५) प्रासादात्प्रेक्षते। आसनात्प्रेक्षते। प्रासादमारुह्य आसने उपविश्य प्रेक्षते इत्यर्थः। श्वशुराज्जिह्रेति। श्वशुरं वीक्ष्येत्यर्थः। गम्यमानाऽपि क्रिया कारकविभक्तीनां निमित्तम् (वा. ५०४१) कस्मात् त्वम्? नद्याः। यतश्चाध्वकालनिर्माणं ततः पञ्चमी (वा. १४७७) तद्युक्तादध्वनः प्रथमासप्तम्यौ। (वा. १४७८)। वनाद् ग्रामो योजनं-योजने वा। कार्तिक्या आग्रहायणी मासे।**

---

५९४ - **पदच्छेदः** - भुवः। प्रभवः।

**अनुवृत्तिः** - अपादानम्, कर्तुः। कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - भुवः कर्ता भूकर्ता। भूकर्तुः यत् प्रभवस्थानम् उत्पत्तिस्थानं भवति तत्र अपादानं भवति।

**विशेषार्थः** - ल्यब्लोपे कर्मण्यधिकरणे च। वार्तिकः ल्यबन्तस्य अदर्शने सति गम्यमानतदर्थम्प्रति कर्मणि-अधिकरणे च पञ्चमी भवति। यथा-प्रासादात्प्रेक्षते। प्रासादम् आरुह्य प्रेक्षते इत्यर्थः। 'ल्यब्लोपे इत्यादिना कार्तिकेन कर्मभूते प्रासादे पञ्चमी।'

**साधनिका :** – हिमवतो गङ्गा प्रभवति (हिमालय से गङ्गा निकलती है।)

हिमवान् गङ्गाया प्रभवस्थानम् अस्ति। अतः 'भुवः प्रभवः' इत्यनेन हिमवच्छब्दस्य अपादानसंज्ञायाम् अपादाने पञ्चमी इत्यनेन पञ्चमी।

**(५९५) –अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते। २।३।२९॥**

**एतैः योगे पञ्चमी स्यात्। अन्येत्यर्थग्रहणम्। इतरग्रहणं प्रपञ्चार्थम्। अन्यो भिन्न इतरो वा कृष्णात्। आराद्वनात्। ऋते कृष्णात्। पूर्वो ग्रामात्। दिशि दृष्टः शब्दो दिक्शब्दः। तेन सम्प्रति देशकालवृत्तिना योगेऽपि भवति। चैत्रात्पूर्वः फाल्गुनः। अवयववाचियोगे तु न। 'तस्य परमाम्रेडितम्' (सू. ८३) इति निर्देशात् पूर्वं कायस्य। अञ्चूत्तरपदस्य तु दिक्शब्दत्वेऽपि 'षष्ठ्यतसर्थ-'। आच्-दक्षिणा ग्रामात्। आहि-दक्षिणाहि ग्रामात्। 'अपादाने पञ्चमी' इति सूत्रे 'कार्तिक्याः प्रभृति इति भाष्यप्रयोगात्प्रभृत्यर्थयोगे पञ्चमी। भवात्प्रभृति आरभ्य वा सेव्यो हरिः। 'अपपरिबहिः' इति समासविधानाद् ज्ञापकाद् बहिर्योगे पञ्चमी। ग्रामाद् बहिः।'**

---

५९५ – **पदच्छेदः** – अन्या...... युक्ते।

**अनुवृत्तिः** – पञ्चमी।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – अन्यादिभिः योगे पञ्चमी विभक्तिः भवति। अत्र 'अन्य' इति अर्थग्रहणं कर्तव्यम्। तेन तत्पर्यायाणाम् अपि प्रयोगे पञ्चमी भवति।

**साधनिका :** – चैत्रात् पूर्वः फाल्गुनः (चैत्र से पहले फाल्गुन आता है)

चैत्रात्पूर्वः फाल्गुनः 'अन्यारात्' इत्यादि सूत्रे दिशि दृष्टः शब्दः दिक् शब्दः। प्रयोगकाले दिक्शब्दः दिशायाः वाचकः भवेन्न वा भवेत्तथापि तद्योगे पञ्चमी भवति। चैत्रात्पूर्वः फाल्गुनः इत्यत्र पूर्वशब्दः दिशायाः वाचकः नास्ति। कालस्य वाचकः वर्तते। तथापि तद्योगे चैत्रशब्दे पञ्चमी प्रवृत्ता।

**(५९६) –अपपरी वर्जने। १।४।८८॥**

**एतौ वर्जने कर्मप्रवचनीयौ स्तः।**

---

५९६ – **पदच्छेदः** – अपपरी, वर्जने।

**अनुवृत्तिः** – कर्मप्रवचनीयाः, निपाताः।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – अपः परिः च वर्जनार्थे कर्मप्रवचनीयसंज्ञकौ भवतः।

**(५९७) –आङ्मर्यादावचने। १२।४।८९॥**

**आङ्मर्यादायामुक्तसंज्ञः स्यात्। वचनग्रहणादभिविधावपि।**

---

५९७ – **पदच्छेदः** – आङ्, मर्यादावचने।

**अनुवृत्तिः** – कर्मप्रवचनीयाः, निपाताः।

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – मर्यादा इत्यस्मिन् अर्थे आ इत्यस्य कर्मप्रवचनीयसंज्ञा भवति।

**विशेषार्थः** – वचनग्रहणाद्..... अभिविधिः च अभिविध्यर्थे।

(१) मर्यादा (२) अभिविधिः च। अभिविध्यर्थे अपि आङित्यस्य कर्मप्रवचनीयसंज्ञा भवेद् एतदर्थं सूत्रकारेण सूत्रे वचनग्रहणं कृतम्।

**(५९८) –पञ्चम्याङ्परिभिः। २।३।१०॥**

एतैः कर्मप्रवचनीयैः योगे पञ्चमी स्यात्। अप हरेः परि हरेः संसारः। परिरत्र वर्जने। लक्षणादौ तु हरिं परि। आ मुक्तेः संसारः। आ सकलाद् ब्रह्म।

---

५९८ - **पदच्छेदः** - पञ्चमी, अपाङ्परिभिः।

**अनुवृत्तिः** - कर्मप्रवचनीययुक्ते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अप आङ् परि इत्येतैः कर्मप्रवचनीयैः योगे पञ्चमी स्यात्।

**साधनिका :** - अप हरेः संसारः। (हरि के बिना संसार = जन्ममरण का चक्र)

हरिं वर्जयित्वा संसारः इत्यर्थः। वर्जनार्थे अपेत्यस्य 'अपरीवर्जने' इत्यनेन प्रवचनीयसंज्ञायां 'पञ्चम्यपाङ्परिभिः' इत्यनेन अपयोगे हरिशब्दात् पञ्चमी।

**(५९९) -प्रतिः प्रतिनिधिप्रतिदानयोः। १।४।९२॥**

**एतयोरर्थयोः प्रतिरुक्तसंज्ञः स्यात्।**

---

५९९ - **पदच्छेदः** - प्रतिः, प्रतिनिधिप्रतिदानयोः।

**अनुवृत्तिः** - कर्मप्रवचनीयाः, निपाताः।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - प्रतिनिर्यातनं प्रतिदानम् एतयोः अर्थयोः प्रतेः कर्मप्रवचनीयसंज्ञा भवति।

**(६००) -प्रतिनिधिप्रतिदाने च यस्मात्। २।३।११॥**

**अत्र कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्।**

---

६०० - **पदच्छेदः** - प्रतिनिधि-प्रतिदाने, च, यस्मात्।

**अनुवृत्तिः** - पञ्चमी, कर्मप्रवचनीययुक्ते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यत्सम्बन्धिनी प्रतिनिधिप्रतिदाने तस्मात् कर्मप्रवचनीययुक्तात् पञ्चमी भवति।

**(६०१) -अकर्तर्यृणे पञ्चमी। २।३।२४॥**

**कर्तृवर्जितं यदृणं हेतुभूतं ततः पञ्चमी स्यात्। शताद् बद्धः। अकर्तरि किम्? शतेन बन्धितः।**

---

६०१ - **पदच्छेदः** - अकर्तरि ऋणे, पञ्चमी।

**अनुवृत्तिः** - हेतौ

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अकर्तरि हेतुभूते ऋणे पञ्चमी भवति।

**साधनिका :** - शताद् बद्धः (सौ रूपए के ऋण से बंध गया)

नियमितकाले प्रत्यर्पणाभावे सति सुवर्णादिशतेन ऋणेन हेतुना अधमर्णः बद्धः इत्यर्थे। शतम् अत्र बन्धक्रियायाः हेतुभूतम् ऋणम् अस्ति। अतः 'अकर्तर्यृणे पञ्चमी' इत्यनेन शतशब्दात् पञ्चमी।

**(६०२) -विभाषा गुणेऽस्त्रियाम्। २।३।२५॥**

**गुणो हेतावस्त्रीलिङ्गे पञ्चमी वा स्यात्। जाड्याद् जाड्येन वा बद्धः (१) गुणे किम्? धनेन कुलम्। (२) 'अस्त्रियाम्' किम्? बुद्ध्या मुक्तः (३) विभाषा इति, योगविभागादगुणे स्त्रियां च क्वचित्। धूमादग्निमान्। नास्ति घटोऽनुपलब्धेः।**

---

६०२ - **पदच्छेदः** - विभाषा, गुणे, अस्त्रियाम्।

**अनुवृत्तिः** - हेतौ, पञ्चमी।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - गुणे हेतौ पञ्चमी विकल्पेन भवति। स्त्रीलिङ्गे पञ्चमी न भवति। जाड्याद् बद्धः इत्यत्र जाड्यमिति गुणवाचकः शब्दः। बन्धनक्रियया: हेतुः जाड्यम्। अतः जाड्यशब्दात् पञ्चमी। पञ्चम्याः विकल्पेन विधानात् पञ्चम्याः अभावे 'हेतौ' इत्यनेन तृतीया भवति।

**विशेषार्थः** - (१) गुणे हैतो एव पञ्चमी भवति। अगुणे हेतौ पञ्चमी न भवति। यथा-धनेन कुलम्। अत्र धनशब्दः द्रव्यवाचकः अस्ति, न गुणवाचकः। अतः धनशब्दात् पञ्चमी न भवति। 'हेतौ' इत्यनेन तृतीया भवति। (२) बुद्धया मुक्तः इत्यत्रापि पञ्चमी न भवति। यद्यपि बुद्धिः गुणः मुक्तेः हेतुः अपि वर्तते तथापि अस्त्रियाम् इति निषेधात् पञ्चमी न भवति। बुद्ध्याः स्त्रीत्वात्। (३) पर्वतः धूमाद् अग्निमान्। अत्र धूमः अग्निज्ञानस्य हेतुः अस्ति। किन्तु धूमः तु द्रव्यं न तु गुणः। तत्कथं धूमाद् इति पञ्चमी भविष्यति।

अत्र इदं समाधानम्। 'विभाषा गुणेऽस्त्रियाम्' इति सूत्रं द्विधा विभज्यते। विभाषा इति सूत्रम्, गुणेऽस्त्रियाम् इति द्वितीयं सूत्रम्। 'विभाषा' इति प्रथमे सूत्रे पूर्वसूत्रात् पञ्चमी इत्यनुवर्तते। विभाषा पञ्चमी भवति इति प्रथमस्य विभाषा सूत्रस्य अर्थः। अगुणे स्त्रियां च क्वचित् पञ्चमी भवति। तेन धूमाद् अग्निमान् इति प्रयोगः भवति।

'गुणेऽस्त्रियाम्' इति द्वितीयसूत्रे विभाषा इति पञ्चमी इति च अनुवर्तते। तेन गुणे अस्त्रियाम् च पञ्चमी भवति।

**(६०३) -पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्। २।३।३२॥**

**एभिर्योगे तृतीया स्यात् पञ्चमीद्वितीये च। अन्यतरस्यां ग्रहणं समुच्चयार्थम्। पञ्चमीद्वितीये चानुवर्तेते। पृथग्रामेण रामं वा। एवं विना नाना।**

---

६०३ - **पदच्छेदः** - पृथग्विनानानाभिः, तृतीया, अन्यतरस्याम्।

**अनुवृत्तिः** - द्वितीया, पञ्चमी।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पृथग्, विना, नाना इत्यव्ययैः योगे द्वितीया, तृतीया, पञ्चमी च भवन्ति।

**साधनिका** : - पृथग् रामेण

अत्र पृथग् इत्यस्य योगे रामशब्दः। अतः रामशब्दात् पृथग्विनानाना-इत्यादिना सूत्रेण द्वितीया तृतीया पञ्चमी च भवन्ति। तेन पृथग् रामं पृथग् रामेण पृथग् रामात् इति रूपाणि सिद्ध्यन्ति।

**(६०४) -करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य। २।३।१३॥**

**एभ्योऽद्रव्यवचनेभ्यः करणे तृतीयापञ्चम्यौ स्तः। स्तोकेन स्तोकाद्वा मुक्तः। द्रव्ये तु स्तोकेन विषेण हतः।**

---

६०४ - **पदच्छेदः** - करणे, च, स्तोकाल्पकृच्छ्रकतिपयस्य, असत्त्ववचनस्य।

**अनुवृत्तिः** - तृतीया, पञ्चमी, अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - स्तोक अल्प, कृच्छ्र, कतिपय एभ्यः चतुर्भ्यः अद्रव्यवचनेभ्यः करणे तृतीया पञ्चमी च भवतः।

**साधनिका** : - स्तोकेन स्तोकाद्वा मुक्तः (सरलता से छूटा)

स्तोकमत्र मुक्त्याः करणम्। अतः 'करणे च' इत्यादिना सूत्रेण स्तोक-शब्दात् पञ्चमी कृते 'स्तोकाद् मुक्तः' सिद्ध्यति। यदा तृतीया भवति तदा 'स्तोकेन मुक्तः' इति प्रयोगः सिद्ध्यति।

**(६०५) -दूरान्तिकार्थेभ्यो द्वितीया च। २।३।३५॥**

**एभ्यो द्वितीया स्यात् ज्चात्पञ्चमीतृतीये च। प्रातिपदिकार्थमात्रे विधिरयम्। ग्रामस्य दूरं दूरात् दूरेण वा, अन्तिकम्-अन्तिकात् अन्तिकेन वा। असत्त्ववचनस्य इत्यनुवृत्तेर्नेह दूरः पन्थाः।**

---

६०५ - **पदच्छेदः** - दूरान्तिकार्थेभ्यः, च।

**अनुवृत्तिः** - (अन्यतरस्याम्) पञ्चमी, तृतीया।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - दूरान्तिकार्थेभ्यः शब्देभ्यः द्वितीया, तृतीया, पञ्चमी च भवन्ति।

**विशेषार्थः** - दूरः पन्थाः। इत्यादौ दूरशब्दः द्रव्यवचनः। अद्रव्यवचने एव एताः विभक्तयः भवन्ति। साधनिका ग्रामस्य दूराद् दूरं दूरेण वा। प्रकृतसूत्रेण दूरशब्दात् द्वितीया, तृतीया, पञ्चमी च भवन्ति। तेन ग्रामस्य दूराद् दूरं दूरेण इति रूपाणि सिद्ध्यन्ति।

## स्वाध्यायः

**१. प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) अपादानसंज्ञकात् शब्दात् का विभक्तिः प्रवर्तते?

(क) द्वितीया (ख) चतुर्थी (ग) पञ्चमी (घ) षष्ठी

(२) विश्लेषे साध्ये अवधिभूतं कारकं .......... संज्ञं स्यात्?

(क) अपादान (ख) सम्प्रदान (ग) कर्म (घ) कर्तृ

(३) वारणार्थानां प्रयोगे ईप्सितस्यार्थस्य केन सूत्रेण अपादानसंज्ञा भवति?

(क) आख्यातोपयोगे (ख) जनिकर्तुः प्रकृतिः (ग) वारणार्थानामीप्सितः (घ) पराजेरसोढः

(४) 'आख्यातोपयोगे' इति सूत्रस्य किमुदाहरणम्?

(क) उपाध्यायादधीते (ख) ब्रह्मणः प्रजाः प्रजायन्ते

(ग) मातुर्निलीयते कृष्णः (घ) यवेभ्यो गां वारयति

(५) 'जनिकर्तुः प्रकृतिः' इत्यस्य सूत्रप्रकारः कः?

(क) विधिसूत्रम् (ख) अधिकारसूत्रम् (ग) नियमसूत्रम् (घ) संज्ञासूत्रम्

(६) अन्यादिभिः योगे का विभक्तिर्भवति?

(क) षष्ठी (ख) द्वितीया (ग) पञ्चमी (घ) चतुर्थी

(७) मर्यादा इत्यर्थे 'आ' इत्यस्य केन कर्मप्रवचनीयसंज्ञा भवति?

(क) आङ्मर्यादावचने (ख) पञ्चम्यपाङ्परिभिः (ग) अपपरी वर्जने (घ) एतेष्वेकमपि न।

(८) प्रतिनिधिप्रतिदाने कर्मप्रवचनीययुक्तात् का विभक्तिः भवति?

(क) पञ्चमी (ख) षष्ठी (ग) द्वितीया (घ) चतुर्थी

(९) अकर्तर्यृणे ...........।

(क) द्वितीया (ख) षष्ठी (ग) पञ्चमी (घ) चतुर्थी

(१०) पृथग्-विना-नाना इत्यव्ययानां योगे काः विभक्तयः भवन्ति?

(क) द्वितीया, तृतीया, चतुर्थी (ख) द्वितीया, तृतीया, पञ्चमी

(ग) तृतीया, चतुर्थी, पञ्चमी (घ) चतुर्थी, पञ्चमी, षष्ठी

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) विभागाश्रयस्य का संज्ञा भवति?

(२) 'चोराद् बिभेति' अत्र भयहेतुः कः?

(३) पराजेः प्रयोगे कस्य अपादानसंज्ञा भवति?

(४) 'मातुर्निलीयते कृष्णः' इत्यस्य कोऽर्थः ?

(५) वर्जनार्थे कयोः उपसर्गयोः कर्मप्रवचनीयसंज्ञा भवति ?

(६) अप-आङ्-परि इत्येतैः कर्मप्रवचनीयैः योगे केन सूत्रेण पञ्चमी स्यात् ?

(७) कस्मिन्नर्थे प्रतेः कर्मप्रवचनीयसंज्ञा भवति ?

(८) 'अकर्तृर्यृणे पञ्चमी' इति सूत्रस्य कोऽर्थः ?

(९) गुणे हेतौ पञ्चमी विकल्पेन भवति वा न ?

(१०) 'करणे स्तोकाल्प.....' पूर्तिङ्करोतु।

**३. सविस्तरम् उत्तराणि लिखत।**

(१) 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' इति वार्तिकं स्पष्टयत।

(२) ल्यब्लोपे कर्मण्यधिकरणे च।

(३) 'अस्त्रियाम् किम् ?' बुद्ध्या मुक्तः।

**४. अधोलिखित-रूपाणि साधयतु।**

(१) ग्रामाद् आयाति।

(२) चोराद् बिभेति।

(३) यवेभ्यो गां वारयति।

(४) उपाध्यायादधीते।

(५) हिमवतो गङ्गा प्रभवति।

(६) शताद् बद्धः।

(७) जाड्याद् बद्धः।

(८) ब्रह्मणः प्रजाः प्रजायन्ते।

(९) स्तोकाद् मुक्तः।

(१०) ग्रामस्य दूरं, दूरात्, दूरेण वा।

**५. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायत।**

(१) अपादाने पञ्चमी।

(२) आङ्मर्यादावचने।

(३) विभाषा गुणेऽस्त्रियाम्।

**६. 'अ' विभाग 'ब' विभागेन योजयन्तु।**

| (अ) | (ब) |
|---|---|
| (१) अन्तर्धौ येनादर्शनम्... | (१) कतिपयस्यासत्ववचनस्य। |
| (२) प्रतिनिधिप्रतिदाने च... | (२) द्वितीया च। |
| (३) दूरान्तिकार्थेभ्यो... | (३) इच्छति। |
| (४) करणे च स्तोकाल्पकृच्छ्र... | (४) तृतीयाऽन्यतरस्याम्। |
| (५) पृथग्विनानानाभिः... | (५) यस्मात्। |

●

# (१३)

# षष्ठी विभक्तिः

**प्रस्तावना**

कारकप्रातिपदिकार्थभिन्नः स्वस्वामिभावादि सम्बन्धः शेषः इत्युच्यते। अस्मिन् प्रकरणे 'षष्ठी शेषे' इति सूत्रेण शेषार्थे षष्ठी विभक्तिः भवति। यदा कर्मादीनां क्रियया सह केवलः सम्बन्धः विवक्षितः स्यात्, सम्बन्ध-प्रकार-विशेषे - ईप्सिततमत्वम्, साधकतमत्वं विश्लेषणादि न स्यात् तत्र कर्मादयः संज्ञाः न भवन्ति तदा तत्र षष्ठी विभक्तिर्जायते। अस्मिन् प्रकरणे (२६) षड्विंशतिः सूत्राणि सन्ति।

---

**(६०६) -षष्ठी शेषे। २।३।५०॥**

**कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः। तत्र षष्ठी स्यात्। राज्ञः पुरुषः। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। सतां गतम्। सर्पिषो जानीते। मातुः स्मरति। एधोदकस्योपस्कुरुते। भजे शम्भोश्चरणयोः। फलानां तृप्तः।**

---

**६०६ - पदच्छेदः** - षष्ठी, शेषे

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उक्ताद् अन्यः शेषः कर्मकर्तृकरणसम्प्रदानापादानाधिकरणानि उक्तानि। प्रातिपदिकार्थश्च उक्तः। षड्भ्यः कारकेभ्यः प्रातिपदिकार्थातिरिक्तः। स्वस्वामिभावादिसम्बन्धः तत्र षष्ठी स्यात्। आदिशब्देन जन्यजनकभावः अवयवावयविभावः पाठ्यपाठकभावादिसम्बन्धः च गृह्यते।

**विशेषार्थः** - कर्मत्वकर्तृत्वादीनामपि सम्बन्धत्वविवक्षायां षष्ठी एव। न तु कारकविभक्तयः। यथा मातुः स्मरति। माता अत्र कर्म भवितुं योग्यम्। किन्तु यत्र कर्मत्वेन विवक्षा भवेत्। सम्बन्धसामान्यस्य च विवक्षा भवेत् तत्र षष्ठी स्यात्। अतः मातृशब्दात् षष्ठी। यदि कर्मत्वेन विवक्षा भवेत्तर्हि द्वितीया भवेत् एवं - मातरं स्मरति इति।

**(६०७) -षष्ठी हेतुप्रयोगे। २।३।२६॥**

**हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतोर्वसति।**

---

**६०७ - पदच्छेदः** - षष्ठी, हेतुप्रयोगे।

**अनुवृत्तिः** - हेतौ।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - हेतुत्वे द्योत्ये हेतुशब्दात् षष्ठी भवति।

**साधनिका :** - अन्नस्य हेतोः वसति। (अन्न के कारण रहता है।)

अन्नम् अत्र वसनक्रियायाः हेतुः। एवं हेतुः, अत्र द्योतते अतः प्रकृतसूत्रेण हेतुशब्दात् षष्ठी।

**(६०८) -सर्वनाम्नस्तृतीया च। २।३।२७॥**

**सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च। केन हेतुना वसति। कस्य हेतोः। निमित्तपर्याय-प्रयोगे सर्वासां प्रायदर्शनम् (वा. १०७३)। किं निमित्तं वसति, केन निमितेन, कस्मै निमित्ताय इत्यादि। एवं किं कारणम्, को हेतुः, किं प्रयोजनम् इत्यादि। प्रायग्रहणादसर्वनाम्नः प्रथमा-द्वितीये न स्तः। ज्ञानेन निमित्तेन हरिः सेव्यः। ज्ञानाय निमित्ताय इत्यादि।**

---

६०८ - **पदच्छेदः** - सर्वनाम्नः, तृतीया, च।

**अनुवृत्तिः** - षष्ठी, हेतुप्रयोगे, हेतौ।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यत्र सर्वनाम्नः हेतुशब्दस्य च प्रयोगः भवेत् हेतुः च द्योतितः भवेत् तत्र तृतीया-षष्ठी च भवतः।

**विशेषार्थः** - निमित्त...(वा.) निमित्तशब्दस्य तत्पर्यायाणां च प्रयोगे सर्वासां विभक्तीनां प्रयोगः भवति। यथा 'किं निमित्तं वसति।' अत्र किमिति सर्वनाम्नः प्रयोगः निमित्तशब्दस्य च प्रयोगः। अतः 'निमित्तपर्याय-इत्यादिना वार्तिकेन निमित्त-शब्दात् द्वितीया।' केन निमित्तेन, कस्मै निमित्ताय इत्यादयः प्रयोगाः अपि भवन्ति।

**साधनिका :** - केन हेतुना वसति। (किस हेतु से रहता है।)

अत्र किमिति सर्वनाम्नः हेतुशब्दस्य च प्रयोगः। हेतुश्च द्योतितो भवति। अतः हेतुशब्दात् तृतीया प्रकृतेन सूत्रेण भवति। पक्षे यदा षष्ठी भवति तदा 'कस्य हेतोः वसति' इति रूपं भवति।

**(६०९) -षष्ठ्यतसर्थप्रत्ययेन। २।३।३०॥**

**एतद्योगे षष्ठी स्यात्। 'दिक्शब्द-' इति पञ्चम्याः, अपवादः। ग्रामस्य दक्षिणतः, पुरः, पुरस्तात्, उपरि, उपरिष्टात्।**

---

६०९ - **पदच्छेदः** - षष्ठी, अतसर्थप्रत्ययेन।

**समासः** - अतसर्थः अर्थो यस्य स अतसर्थः, अतसर्थः प्रत्ययः अतसर्थप्रत्ययः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'दक्षिणोत्तराभ्यामतसुच्' इति सूत्रेण भगवता पाणिनिना अतसुच्प्रत्ययः विहितः। तस्यार्थः दिग्देशकालरूपः स एव अर्थः यस्य सः अतसर्थप्रत्ययः। तस्य योगे षष्ठी भवति।

**विशेषार्थः** - 'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' इत्यारभ्य 'आहि च दूरे' इति सूत्रपर्यन्तं प्रत्ययः विहितः। देशकालवाचिशब्देभ्यः अस्ताति, इत्यादयः प्रत्ययाः भवन्ति। आरम्भे 'अस्ताति' प्रत्ययः स्यात् तथापि सूत्रकारेण अस्तात्यर्थकं न कथितम् लाघवार्थम्, 'अतसर्थ' इत्थेवं कथितम्। अतसर्थप्रत्ययस्य योगे क्रमशः अतसुच्ऽ अस्ताति, रिल, एवं रिष्टाति उक्तरूपेषु एते प्रत्ययाः भवन्ति।

**साधनिका :** - ग्रामस्य दक्षिणतः। (गाँव से दक्षिण की और, आगे, ऊपर की ओर)

अस्मिन् रूपे 'अन्याराादितरर्ते' इत्यादिना सूत्रेण प्राप्तां पञ्चमीं प्रबाध्य 'षष्ठ्यतसर्थप्रत्ययेन इति अतसुच् प्रत्ययान्ते दक्षिणतः इति शब्दस्य योगे ग्रामशब्दस्य षष्ठी विभक्तिर्जाता।'

**(६१०) -एनपा द्वितीया। २।३।३१॥**

**एनबन्तेन योगे द्वितीया स्यात्। 'एनपा' इति योगविभागात्षष्ठ्यपि। दक्षिणेन ग्रामं ग्रामस्य वा। एवम् उत्तरेण।**

---

६१० - **पदच्छेदः** - एनपा, द्वितीया।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - 'एनपा' इति योगः विभज्यते। 'षष्ठ्यतसर्थ' इति पूर्वसूत्रात् षष्ठी अनुवर्तते। एनबन्तेन षष्ठी स्याद् इत्यर्थः। द्वितीया इति योगान्तरम्। अत्र 'एनपा' इति अनुवर्तते। एनबन्तेन योगे द्वितीया स्यादित्यर्थः।

**साधनिका :** - (दक्षिणेन ग्रामं - ग्रामस्य वा) (गाँव की दक्षिण की ओर)

'दक्षिणेन' इति 'एनप्' प्रत्ययान्तं पदम्। तद्योगे ग्रामशब्दस्य 'एनपा द्वितीया' इत्यनेन द्वितीया तथा एनपा इति योगविभागाद् ग्रामशब्दस्य षष्ठी, उक्तं रूपं जातम्।

**(६११) -दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्। २।३।३४॥**

**एतैर्योगे षष्ठी स्यात्पञ्चमी च। दूरं निकटे ग्रामस्य ग्रामाद् वा।**

---

६११ - **पदच्छेदः** - दूरान्तिकार्थैः, षष्ठी, अन्यतरस्याम्।

**अनुवृत्तिः** - पञ्चमी

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - दूरान्तिकार्थैः शब्दैः योगे षष्ठी स्यात् पञ्चमी च।

**साधनिका :** - दूरं ग्रामस्य। (गाँव से दूर)

अत्र दूरशब्दस्य योगे ग्रामशब्दः। अतः 'दूरान्तिकार्थैः' इत्यादिना सूत्रेण ग्रामशब्दात् षष्ठ्यां कृतायाम् उक्तं रूपं सिद्धम्। यदा ग्रामशब्दात् पञ्चमी भवति तदा 'दूरं ग्रामात्' इति रूपं सिद्ध्यति।

**(६१२) -ज्ञोऽविदर्थस्य करणे। २।३।५१॥**

**जानाते रज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात्। सर्पिषो ज्ञानम्।**

---

६१२ - **पदच्छेदः** - ज्ञः, अविदर्थस्य, करणे।

**अनुवृत्तिः** - षष्ठी शेषे।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ज्ञानार्थकभिन्नस्य ज्ञाधातोः करणं यदा शेषत्वेन विवक्षितं भवति तदा षष्ठी भवति।

**साधनिका :** - सर्पिषः ज्ञानम्। (घी के कारण होने वाली प्रवृत्ति)

अत्र ज्ञानस्य करणं सर्पिः शेषत्वेन विवक्षितम् अस्ति। अतः सर्पिष् शब्दात् षष्ठी-विभक्तिर्भवति।

**(६१३) -अधीगर्थदयेशां कर्मणि। २।३।५८॥**

**एषां कर्मणि शेषे षष्ठी स्यात्। मातुः स्मरणम्। सर्पिषो दयनम्, ईशनं वा।**

---

६१३ - **पदच्छेदः** - अधीगर्थदयेशां, कर्मणि।

**अनुवृत्तिः** - षष्ठी शेषे।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अधिपूर्वकस्य इक्धातोः तदर्थकादधातोः दयधातोः ईशधातोश्च कर्मणि षष्ठी भवति।

**साधनिका :** - मातुः स्मरणम्।

(माता का स्मरण करता है।)

मातृशब्द अत्र कर्मकारकम् अस्ति। किन्तु कर्मकारकम् अत्र विवक्षितं नास्ति। अतः शेषत्वेन 'अधीगर्थ....' इति सूत्रेण मातृशब्दस्य षष्ठी विभक्तिर्जाता।

**(६१४) -कृञः प्रतियत्ने। २।३।५३॥**

**प्रतियत्नो गुणाधानम्। कृञः कर्मणि शेषे षष्ठी स्याद् गुणाधाने। एधो दकस्योपस्करणम्।**

---

६१४ - **पदच्छेदः** - कृञः, प्रतियत्ने।

**अनुवृत्तिः** - कर्मणि, शेषे षष्ठी।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - प्रतियत्नशब्दस्य अर्थः गुणाधानम् भवति। कृञ् धातोः कर्मकारकं कर्मत्वेन विवक्ष्यते तदा कर्मणि षष्ठी विभक्तिर्भवति गुणाधाने।

**साधनिका :** - एधो दकस्योपस्करणम्। (ईंधन का जल में उष्णता आदि उत्पन्न करना)

एधसम्बन्धिदकसम्बन्धि परिष्करणम्। अत्र कृञ्धातोः प्रयोगः एधोदके च गुणाधानमपि भवति। अतः कृञः कर्मणि शेषत्वेन विवक्षायां 'कृञः प्रतियत्ने' इत्यनेन षष्ठ्यां कृतायां रूपसिद्धिर्भवति।

**(६१५) -रुजार्थानां भाववचनानामज्वरेः। २।३।५४॥**

**भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात्। चोरस्य रोगस्य रुजा। 'अज्वरिसन्ताप्योरिति वाच्यम् (वा.) रोगस्य चौरज्वरः, चौरसन्तापो वा। रोगकर्तृकं चौरसम्बन्धि-ज्वरादिकमित्यर्थः।'**

---

६१५ - **पदच्छेदः** - रुजार्थानाम्, भाववचनानाम्, अज्वरेः।

**अनुवृत्तिः** - कर्मणि, शेषे षष्ठी।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - रुजार्थकधातुतः साधितानि भावाचक-नामानि यदा कर्तृरूपेण प्रवर्तन्ते तदा तेषां कर्मकारकस्य शेषार्थे षष्ठी भवति। ज्वरार्थकधातुतः साधितस्य भाववाचक शब्दस्य कर्मणि षष्ठी न भवति।

**साधनिका :** - चौरस्य रोगस्य रुजा। (रोगकर्तृक चोरसम्बन्धिनी पीडा)

साधितः भाववाचकः शब्दः रोगः। रोगः पीडोत्पादने कर्ता चौरः कर्म। अतः 'रुजार्थानाम्' इत्यादिना सूत्रेण कर्मणि षष्ठ्यां कृतायां चौरस्य इति रूपं जातम्।

**(६१६) -आशिषि नाथः। २।३।५५॥**

**आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी स्यात्। सर्पिषो नाथनम्। 'आशिषि' इति किम्? माणवकनाथम्। तत्सम्बन्धिनी याञ्चेत्यर्थः।**

---

६१६ - **पदच्छेदः** - आशिषि, नाथः।

**अनुवृत्तिः** - कर्मणि, षष्ठी शेषे।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - आशीरर्थस्य नाथृधातोः कर्मणि शेषत्वविवक्षायां षष्ठी भवति।

**साधनिका :** - सर्पिषः नाथनम्। (घृतसम्बन्धि इच्छा का आशीर्वाद)

अत्र सर्पिषं मे भूयाद् इति इच्छा आशासनम्। अत्र नाथृधातुः आशिषि अर्थे प्रयुक्तः। अतः 'आशिषि नाथः' इत्यनेन कर्मीभूतात् सर्पिश्शब्दात् शेषत्वविवक्षायां षष्ठी भवति।

**(६१७) -जासिनिप्रहणनाटक्राथपिषां हिंसायाम्। २।३।५६॥**

**हिंसार्थानामेतेषां शेषे कर्मणि षष्ठी स्यात्। चौरस्योज्जासनम्। निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा। चौरस्य निप्रहणनम् प्रणिहननम्-निहननम् प्रहणनं वा। नट अवस्कन्दने चुरादिः चौरस्योन्नाटनम्। चौरस्य क्राथनम्। वृषलस्य पेषणम्। 'हिंसायाम्' किम्? धानापेषणम्।**

---

६१७ - **पदच्छेदः** - जासि-निप्रहण-नाथ-क्राथ-पिषाम्, हिंसायाम्।

**अनुवृत्तिः** - कर्मणि, शेषे षष्ठी।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - जासि, निप्र-इत्युपसर्गपूर्वकाणां हन, नाट, क्राथपिष् धातूनां हिंसार्थानां योगे कर्मणि संबंधमात्र-विवक्षायां षष्ठी विभक्ति-र्भवति।

**साधनिका :** - चौरस्योज्जासनम्। (चोर को पीटना)

अत्र 'जसुताडने' जसु हिंसायाम् इति धातोः प्रयोगः। तस्य कर्मणः 'चौर' शब्दस्य 'जासि-निप्रहण...' अनेन सूत्रेण षष्ठी विभक्ति 'चौरस्योज्जासनम्' जातम्।

**(६१८) -व्यवहृपणोः समर्थयोः। २।३।५७॥**

**शेषे कर्मणि षष्ठी स्यात्। द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता। शतस्य व्यवहरणं पणनं वा। 'समर्थयोः' किम्? शलाकाव्यवहारः। गणनेत्यर्थः। ब्राह्मणपणनं स्तुतिरित्यर्थः।**

---

**६१८ - पदच्छेदः** - व्यवहृपणोः। समर्थयोः।

**अनुवृत्तिः** - कर्मणि, षष्ठी शेषे।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - वि-अव-इत्यनयोः उपसर्गपूर्वकहृधातोः पण्धातोः च कर्मणि षष्ठी भवति।

**साधनिका :** - शतस्य व्यवहरणं पणनं वा। (सौ रूपये का लेन-देन करना या जूआ खेलना)

शतस्य व्यवहरणं शतं व्यवहरति इत्यर्थः। अत्र वि+अव उपसर्गपूर्वकस्य हृधातोः प्रयोगः। 'शत' इति कर्म। अतः 'व्यवहृपणोः समर्थयोः' इति सूत्रेण कर्मत्वात् शत-शब्दस्य षष्ठी विभक्तिः।

**(६१९) -दिवस्तदर्थस्य। २।३।५८॥**

**द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्यात्। शतस्य दीव्यति। 'तदर्थस्य' किम्? ब्राह्मणं दीव्यति। स्तौतीत्यर्थः।**

---

**६१९ - पदच्छेदः** - दिवः, तदर्थस्य।

**अनुवृत्तिः** - कर्मणि, षष्ठी, अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पूर्वसूत्रे निर्दिष्टयोः व्यवहृपणोः अर्थः एव तदर्थ इत्यस्य अर्थः। तदेव आह वृत्तौ द्यूतार्थस्य इति। द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिव्धातोः कर्मणि शेषत्वविवक्षायां षष्ठी विभक्तिर्भवति।

**साधनिका :** - शतस्य दीव्यति। (सौ रूपये का व्यापार करता है)

शतं दीव्यति इति शतम् अत्र दिवुधातोः कर्म। किन्तु 'दिवस्तदर्थस्य' इत्यनेन सूत्रेण दिव्धातोः कर्मणि षष्ठी।

**(६२०) -विभाषोपसर्गे। २।३।५९॥**

**पूर्वयोगापवादः। शतस्य शतं वा प्रतिदीव्यति।**

---

**६२० - पदच्छेदः** - विभाषा, उपसर्गे।

**अनुवृत्तिः** - दिवस्तदर्थस्य। कर्मणि, षष्ठी, अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उपसर्गे सति व्यवहृपणार्थस्य दिवः कर्मणि विकल्पेन षष्ठी भवति।

**साधनिका :** - शतस्य शतं वा प्रतिदीव्यति। (सौ रूपये दाव पर लगाता है)

अत्र प्रत्युपसर्गपूर्वकस्य दिव्धातोः प्रयोगः। अतः 'विभाषा उपसर्गे' इति सूत्रेण विकल्पेन षष्ठी तथा च 'कर्मणि द्वितीया' इत्यनेन द्वितीया शतम् इति रूपं जायते।

**(६२१) -प्रेष्यब्रुवोर्हविषो देवता सम्प्रदाने। २।३।६१॥**

**देवतासम्प्रदानेऽर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणोर्हविषो वाचकाच्छब्दात् षष्ठी स्यात्। अग्नये छागस्य हविषो वपायाः मेदसः प्रेष्य अनुब्रूहि वा।**

---

**६२१ - पदच्छेदः** - प्रेष्यब्रुवोः, हविषः, देवतासम्प्रदाने।

**अनुवृत्तिः** - ब्राह्मणे, कर्मणि, षष्ठी, अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** – 'देवताम् उद्दिश्य हविः दीयते' प्र+इष् धातुः ब्रूधातुः च यदा देवताम् उद्दिश्य 'हविः दीयते' इत्यर्थे प्रयुज्येते तदा अनयोः धात्वोः कर्मणि हविषः वाचकाच्छब्दात् षष्ठी भवति।

**साधनिका :** – **अग्नये छागस्य हविषः वपायाः भेदसः प्रेष्य।**

(अग्नि देवता के लिए छात्र सम्बन्धि हवि–वपा नामक मेदोरूप को समर्पित करो)

अत्र देवताम् उदिश्य हविष्यान्नस्य संदर्भः। वाक्ये च प्रेष्य इत्यस्य प्रयोगः। अतः कर्मीभूताः हविर्विशेषवाचकाः छागेत्यादयः शब्दाः षष्ठ्यां प्रयुक्ताः।

**(६२२) –कृत्वोऽर्थप्रयोगे कालेऽधिकरणे। २।३।६४॥**

**कृत्वोऽर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात्। पञ्चकृत्वोऽह्नो भोजनम्। द्विरह्नो भोजनम्। शेषे किम्? द्विरहन्यध्ययनम्।**

---

६२२ – **पदच्छेदः** – कृत्वोऽर्थप्रयोगे, काले, अधिकरणे।

**अनुवृत्तिः** – षष्ठी शेषे, अनभिहिते।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – कृत्वसुच् सुच् इत्यादयः क्रियायाः आवृत्तिदर्शकाः प्रत्ययाः। एतेषां प्रत्ययानां प्रयोगे कालवाचिनि अहन्–शब्दे 'कृत्वोऽर्थ' इत्यादिना सूत्रेण विहिता वा कथिता।

**साधनिका :** – पञ्चकृत्वोऽह्नो भोजनम्। (दिन में पाँचबार भोजन)

पञ्चवारम् अधिकारणीभूतं यदहः तत्सम्बन्धि भोजनम् इत्यर्थः। अत्र कृत्वप्रत्ययस्य प्रयोगः। अतः कालवाचिनि अहन् शब्दे कृत्वोऽर्थ इत्यादिना सूत्रेण षष्ठी विभक्तिर्जाता।

**(६२३) –कर्तृकर्मणोः कृति। २।३।६५॥**

**कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्। कृष्णस्य कृतिः। जगतः कर्ता कृष्णः। 'गुणकर्मणि वेष्यते' (वा.) नेता अश्वस्य स्रुघ्नस्य स्रुघ्नं वा। 'कृति किम्? तद्धिते मा भूत्। कृतपूर्वी कटम्।'**

---

६२३ – **पदच्छेदः** – कर्तृकर्मणोः, कृति।

**अनुवृत्तिः** – षष्ठी, अनभिहिते।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – कृदन्तानां योगे कर्तरि कर्मणि च षष्ठी भवति।

**विशेषार्थः** – यस्मिन् प्रयोगे केवलं कर्तुः प्रयोगः केवलं कर्मणः वा प्रयोगः स्यात् तत्र एव इदं सूत्रं चरितार्थम्। कर्तुः प्रयोगः यथा – रामस्य गमनम्। कर्मणः प्रयोगः यथा गीतायाः पठनम्। यत्र कर्तुः कर्मणः च उभयोः उपादानं स्यात् तत्र 'उभयप्राप्तौ कर्मणि' इत्यनेन कर्मणि षष्ठी भवति। न तु कर्तरि। यथा दुग्धस्य पानं बालिकायाः। 'शेषे विभाषा' इति वार्तिकेन कर्तरि अपि विकल्पेन षष्ठी भवति।

**साधनिका :** – कृष्णस्य कृतिः। (कृष्ण की रचना)

अत्र कृदन्तस्य कृतिशब्दस्य कृतेः योगे कृष्णशब्दः। अतः 'कर्तृकर्मणोः कृति' इत्यनेन सूत्रेण कृष्णशब्दात् षष्ठी भवति।

**(६२४) –उभयप्राप्तौ कर्मणि। २।३।६६॥**

**उभयोः प्राप्तिर्यस्मिन्कृति तत्र कर्मण्येव षष्ठी स्यात्। आश्चर्यो गवां दोहोऽगोपेन। 'स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः' (वा.)। भेदिका बिभित्सा वा रुद्रस्य जगतः। 'शेष विभाषा' (वा.)। स्त्रीप्रत्यये इत्येके। विचित्रा जगतः कृतिर्हरेः – हरिणा वा। केचिदविशेषेण विभाषामिच्छन्ति। शब्दानामनुशासनमाचार्येण – आचार्यस्य वा।**

---

६२४ - **पदच्छेदः** - उभयप्राप्तौ, कर्मणि।

**अनुवृत्तिः** - कृति, षष्ठी, अनभिहिते।

**सूत्रप्रकारः** - नियमसूत्रम्।

**सरलार्थः** - यस्मिन् कृति कर्तुः कर्मणः च उभयोः उपादानं स्यात् तत्र कर्मणि एव षष्ठी भवति।

**साधनिका :** - आश्चर्यो गवां दोहोऽगोपेन। (जो गोपग्वाला नहीं है, उससे गायों का दुहा जाना आश्चर्य की बात है।)

अत्र दोहः कृत्प्रत्ययान्तशब्दः। अतः 'कर्तृकर्मणोः कृति' इत्यनेन कर्तृवाचकस्य अगोपशब्दस्य कर्मवाचकस्य च गोशब्दस्य षष्ठी प्राप्ता भवति। किन्तु 'उभयप्राप्तौ कर्मणि' इत्यनेन कृदन्तयोगे कर्तृकर्मणोः उभयोः उपादाने सति केवलं कर्मणि एव षष्ठी प्रयुज्यते। अतः गोशब्दस्य षष्ठी। कर्तृवाचकस्य अगोपशब्दस्य तु 'कर्तृकरणयोस्तृतीया' इत्यनेन तृतीया प्रयुक्ता।

**(६२५) -क्तस्य च वर्तमाने। २।३।६७॥**

**वर्तमानार्थस्य क्तस्य योगे षष्ठी स्यात्। न लोक इति निषेधस्यापवादः। राज्ञां मतो बुद्धः पूजितो वा।**

---

६२५ - **पदच्छेदः** - क्तस्य, च, वर्तमाने।

**अनुवृत्तिः** - षष्ठी, अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - वर्तमानार्थस्य क्तप्रत्ययस्य योगे कर्तृवाचकः शब्दः षष्ठ्यां प्रयुज्यते।

**विशेषार्थः** - अस्मिन् सूत्रेइच्छार्थे, बुद्ध्यर्थे, पूजार्थे मतिबुद्धि-पूजार्थेभ्यः च वर्तमाने क्त प्रत्ययः विहितः। न-लोकाव्यय इति सूत्रेण षष्ठयाः निषेधः प्राप्तो भवति।

**साधनिका :** - राज्ञां मतः। (राजा का चहेता, मान्य, पूजित)

अत्र मतः, बुद्धः, पूजितः, एषु शब्देषु 'क्त' प्रत्ययः वर्तमानार्थे प्रयुक्तः। अतः एतेषां योगे 'क्तस्य च वर्तमाने' इत्यनेन राजन् शब्दस्य षष्ठी विभक्तिर्जाता।

**(६२६) -अधिकरणवाचिनश्च। २।३।६८॥**

**क्तस्य योगे षष्ठी स्यात्। इदमेषामासितं शयितं गतं भुक्तं वा।**

---

६२६ - **पदच्छेदः** - अधिकरणवाचिनः, च।

**अनुवृत्तिः** - क्तस्य, षष्ठी, अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अधिकरणवाचिनः क्तस्य योगे कर्तृवाचकः शब्दः षष्ठ्यां प्रयुज्यते।

**विशेषार्थः** - 'क्तोऽधिकरणे च' इत्यनेन धातोः अधिकरणार्थे क्तप्रत्ययः विहितः। अतः आस्यते अस्मिन् इति आसनम्, शेते अस्मिन इति शयितम्। इत्यादीनि रूपाणि सिद्ध्यन्ति।

**साधनिका :** - इदमेषामासितम्। (यह इनका आसन है।)

आसितम् शयितम् - इत्यस्मिन् शब्दे अधिकरणार्थे 'क्त' प्रत्ययः प्रयुक्तः। अतः 'अधिकरणवाचिनश्च' इत्यनेन आसितम् इत्यस्य योगे प्रयुक्तस्य इदमिति सर्वनाम्नः षष्ठी विभक्तिर्जाता।

**(६२७) -न लोकाव्ययनिष्ठाखलर्थतृनाम्। २।३।६९॥**

**एषां प्रयोगे षष्ठी न स्यात्। लादेशः-कुर्वन् कुर्वाणो वा सृष्टिं हरिः। उः - हरिं दिदृक्षुः अलङ्करिष्णुर्वा। उकः-दैत्यान्घातुको हरिः। 'कमेरनिषेधः' (वा.) लक्ष्म्याः कामुको हरिः। अव्ययं जगत्सृष्ट्वा सुखं कर्तुं निष्ठा विष्णुना हताः दैत्याः, दैत्यान्हतवान्विष्णुः। खलर्थाः-ईषत्करः प्रपञ्चो हरिणा। तृन् इति**

**प्रत्याहारः 'शतृशानचौ' इति तृशब्दादारभ्य तृनो नकारात्। शानन्-सोमं पवमानः। चानश्+आत्मानं मण्डयमानः। शतृ-वेदमधीयन्। तृन्-कर्ता लोकान्। 'द्विषः शतुर्वा' (वा.) मुरस्य मुरं वा द्विषन्। सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः। शेषे षष्ठी तु स्यादेव। ब्राह्मणस्य कुर्वन्। नरकस्य जिष्णुः।**

---

६२७ - **पदच्छेदः** - न, लोकाव्ययनिष्ठाखलर्थतृनाम्।

**अनुवृत्तिः** - षष्ठी, अनभिहिते।

**सूत्रप्रकारः** - विधि(निषेध)सूत्रम्।

**सरलार्थः** - लकारस्थाने प्रयुक्तादेशरूपाणां कृदन्तप्रत्ययान्तानां शब्दानाम् 'उ' प्रत्ययान्तशब्दानाम् उक्प्रत्ययान्तशब्दानां, अव्ययस्वरूपकृदन्तशब्दानाम्, निष्ठाप्रत्ययान्तानां, क्तक्तवतुप्रत्ययान्तानां शब्दानां, खलर्थकृदन्तशब्दानां, तृन्प्रत्याहारे पठितप्रत्ययैः साधितकृदन्तशब्दानां प्रयोगे कर्तरि कर्मणि च षष्ठी न स्यात्।

**साधनिका :** - हरिं दिदृक्षुः। (हरि को देखने का इच्छुक)

हरिं दिदृक्षुः इत्यत्र दृश् धातोः सन्नन्तात् 'सनाशंसभिक्ष उः' इत्यनेन उ इति कृत्प्रत्ययः कृदन्तयोगे कर्तृकर्मणोः कृति इत्यनेन हरिशब्दात् षष्ठी प्राप्ता। उप्रत्ययान्तत्वात् 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' इति सूत्रेण षष्ठीनिषेधः। 'कर्तुरीप्सिततमं कर्म' इति हरिशब्दस्य कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण हरिशब्दस्य द्वितीया विभक्ति र्जाता।

**(६२८) -अकेनोर्भविष्यदाधमर्ण्ययोः। २।३।७०॥**

**भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनश्च योगे षष्ठी न स्यात्। सतः पालकोऽवतरति। व्रजं गामी। शतं दायी।**

---

६२८ - **पदच्छेदः** - अकेनोः, भविष्यदाधमर्ण्ययोः।

**अनुवृत्तिः** - न, षष्ठी, अनभहिते।

**सूत्रप्रकारः** - विधि (निषेध) सूत्रम्।

**सरलार्थः** - 'भविष्यति' इत्यर्थे अकप्रत्ययान्तशब्दानां योगे, 'भविष्यति' 'आधमर्ण्य' इति अनयोः अर्थयोः इनप्रत्ययान्तशब्दानां योगे च कर्मणि षष्ठी न भवति।

**साधनिका :** - सतः पालकोऽवतरति। (सज्जनों का पालन करनेवाला आवतार लेता है।)

सतः पालकोऽवतरति। इत्यत्र ण्वुल्प्रत्यये 'भविष्यति' अर्थे विहितत्वात् 'कर्तृकर्मणोः कृति' इति कर्मणः सत् शब्दस्य षष्ठी प्राप्ता 'अकेनोर्भविष्यदाधमर्ण्ययोः' इत्यनेन षष्ठी निषेधे। 'कर्मणि द्वितीया' इत्यनेन द्वितीया जाता।

**(६२९) -कृत्यानां कर्तरि वा। २।३।३१॥**

**षष्ठी वा स्यात्। मया मम वा सेव्यः हरिः। कर्तरि इति किम्? गेयो माणवकः साम्नाम्। 'भव्यगेयय...' इति कर्तरि यद्विधानादनभिहितं कर्म। अत्र योगो विभज्यते। कृत्यानाम्। उभयप्राप्तौ इति न इति चानुवर्तते। तेन नेतव्या व्रजं गावः कृष्णेन। ततः कर्तरि वा। उक्तोऽर्थः।**

---

६२९ - **पदच्छेदः** - कृत्यानां, कर्तरि, वा।

**अनुवृत्तिः** - षष्ठी, अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कृत्याः इत्यधिकृत्य विहिताः कतिपयकृत्प्रत्ययाः तद्योगेकर्तरि षष्ठी वा स्यादित्यर्थः।

**साधनिका :** - मया मम वा सेव्यः हरिः। (मेरे द्वारा हरि की सेवा करनी चाहिए।)

षेवृ सेवायाम् 'ऋहलोर्ण्यत्' इति कर्मणि ण्यत्प्रत्ययः। अस्मच्छब्दार्थस्य कर्तुः अभिहितत्वात् विकल्पेन षष्ठी। पक्षे 'कर्तृकरणयोस्तृतीया' इति तृतीया।

**(६३०) -तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्। २।३।७२॥**

**तुल्यार्थैर्योगे तृतीया वा स्यात्पक्षे षष्ठी। तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा। 'अतुलोपमाभ्यां' किम्? तुला उपमा वा कृष्णस्य नास्ति।**

---

६३० - **पदच्छेदः** - तुल्यार्थैः, अतुलोपमाभ्यां, तृतीया, अन्यतरस्याम्।

**अनुवृत्तिः** - षष्ठी शेषे।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - तुल्यार्थैः योगे विकल्पेन तृतीया भवति। पक्षे षष्ठी भवति। यद्यपि तुलोपमेति शब्दौ तुल्यार्थौ। तथापि तद्योगे षष्ठी न भवति। 'अतुलोपमाभ्याम्' इति निर्देशात्।

**साधनिका :** - तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा। (कृष्ण के सदृश)

तुल्यार्थानाम् अत्र प्रयोगः। अतः तद्योगे कृष्णशब्दात् विकल्पेन तृतीया 'तुल्यार्थैरतुलो' इति सूत्रेण। पक्षे षष्ठी।

**(६३१) -चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः। २।३।७३॥**

**एतदर्थैर्योगे चतुर्थी वा स्यात्पक्षे षष्ठी। आयुष्यं चिरञ्जीवितं कृष्णाय कृष्णस्य वा भूयात्। एवं मद्रं भद्रं कुशलं निरामयं सुखं शम् अर्थः प्रयोजनं हितं पथ्यं वा भूयात्। आशिषि किम्? देवदत्तस्यायुष्यमस्ति। व्याख्यानात्सर्वत्रार्थग्रहणम्। मद्रभद्रयोः पर्यायत्वादन्यतरो न पठनीयः।**

---

६३१ - **पदच्छेदः** - चतुर्थी, च, आशिषि, आयुष्यमद्रभद्रकुशलसुखार्थहितैः।

**अनुवृत्तिः** - षष्ठी शेषे, अन्यतरस्याम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - आशिषि अर्थे प्रयुक्तानाम् आयुष्य, मद्र, भद्र, कुशल, सुखार्थ, हितोर्थकानां शब्दानां योगे विकल्पेन चतुर्थी भवति। (पक्षे षष्ठी भवति।)

**विशेषार्थः** - आशिषि एव एतेषां योगे चतुर्थी भवति अन्यार्थे प्रयुक्तानाम् एतेषां योगे चतुर्थी न भवति। यथा देवदत्तस्य आयुष्यम् अस्ति। अत्र आयुष्यशब्दः आशिषि नास्ति अतः तद्योगे देवदत्तशब्दात् चतुर्थी न प्रवृत्ता।

**साधनिका :** - आयुष्यं चिरञ्जीवितं कृष्णाय कृष्णस्य वा भूयाद्। (कृष्ण आयुष्मान् या चिरंजीवि हों)

अत्र कृष्णाय आशीः दीयते। आयुष्यशब्दः अत्र आशिषि प्रयुक्तः। अतः तद्योगे कृष्णशब्दात् चतुर्थी। यदा चतुर्थी न भवति तदा षष्ठी।

## स्वाध्यायः

**१. प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) 'षष्ठी शेषे' सूत्रेऽस्मिन् किं रूपं भवति?

(क) सर्पिषो जानीते (ख) पुरस्तात् (ग) सर्पिषो ज्ञानम् (घ) दूरं ग्रामस्य

(२) 'सर्वनाम्नस्तृतीया च' इति सूत्रेण का विभक्तिः भवति?

(क) पञ्चमी, षष्ठी (ख) तृतीया, चतुर्थी (ग) तृतीया, षष्ठी (घ) द्वितीया, तृतीया

(३) 'अधीगर्थदयेशां कर्मणि' सूत्रप्रकारं लिखतु।

(क) संज्ञासूत्रम् (ख) परिभाषासूत्रम् (ग) नियमसूत्रम् (घ) अधिकारसूत्रम्

(४) 'हरिं दिदृक्षुः' इत्यस्मिन् रूपे षष्ठीनिषेधः केन सूत्रेण भवति?

(क) कर्तृकर्मणोः कृति (ख) एनपा द्वितीया

(ग) आशिषि नाथः (घ) न लोकाव्ययनिष्ठाखलर्थतृनाम्

(५) कृदन्तानां योगे कर्तरि कर्मणि च .......... भवति।

(क) सप्तमी (ख) द्वितीया (ग) षष्ठी (घ) तृतीया

(६) 'व्रजं गामी' रूपेऽस्मिन् इनि प्रत्ययः केन सूत्रेण भवति?

(क) गमेरिनिः (1ख) षष्ठी चानादरे (ग) यतश्च निर्धारणम् (घ) अधिरीश्वरे

(७) 'भविष्यति आधमर्ण्य' इत्यनयोः अर्थयोः योगे का विभक्तिर्न भवति?

(क) प्रथमा (ख) तृतीया (ग) षष्ठी (घ) पञ्चमी

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) हेतुशब्दस्य प्रयोगे का विभक्तिः भवति?

(२) 'एनपा द्वितीया' सूत्रेण किं भवति?

(३) 'चतुर्थी चाशिष्या...' सूत्रपूर्तिं करोतु।

(४) तुल्यार्थैः योगे विकल्पेन का विभक्तिः भवति?

(५) 'कर्तृकर्मणोः कृति' सूत्रस्य सरलार्थं लिखतु।

(६) 'सर्वनाम्नस्तृतीया च' सूत्रे किं वार्तिकम् आगच्छति?

(७) 'विभाषोपसर्गे' इति सूत्रेण किं रूपं सिद्धं भवति?

**३. सविस्तरम् उत्तराणि लिखत।**

(१) 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्' इति वार्तिकस्य चर्चां करोतु।

(२) 'एनपा' इति योगविभागात्षष्ठ्यपि इति पङ्क्तेः सोदाहरणमर्थविस्तारं करोतु।

(३) आशिषि किम्? देवदत्तस्यायुष्यमस्ति। व्याख्यात।

**४. अधोलिखितरूपाणि साधयतु।**

(१) राज्ञः पुरुषः। (२) ग्रामस्य दक्षिणतः।

(३) चौरस्य रोगस्य रुजा। (४) शतस्य दीव्यति।

(५) व्रजं गामी। (६) मया मम वा सेव्यः हरिः।

(७) चौरस्योज्जासनम्।

**५. अधोलिखितानि सूत्राणि सविस्तरं व्याख्यायत।**

(१) षष्ठी शेषे।

(२) कर्तृकर्मणोः कृति।

(३) क्तस्य च वर्तमाने।

**६. 'अ' विभागं 'ब' विभागेन योजयत।**

| (अ) | (ब) |
|---|---|
| (१) हेतुत्वे द्योत्ये हेतुशब्दात् षष्ठी। | (१) एनपा द्वितीया। |
| (२) सर्वनाम्नः हेतुशब्दप्रयोगे तृतीया षष्ठी। | (२) षष्ठी हेतुप्रयोगे। |
| (३) एनप्-प्रत्यायान्तयोगे द्वितीया। | (३) सर्वनाम्नस्तृतीया च। |
| (४) दूरान्तिकार्थैः शब्दैः योगे षष्ठी पञ्चमी। | (४) अधीगर्थदयेशां कर्मणि। |
| (५) अधिपूर्वकस्य इक्-धातोः कर्मणि षष्ठी। | (५) दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्। |

●

# 14

# अधिकरणकारकम्।

**प्रस्तावना**

अस्मिन् प्रकरणे पञ्चदशसूत्राणि सन्ति। अत्र कर्तृनिष्ठक्रियायाः कर्मनिष्ठक्रियायाः आधारस्य अधिकरण-संज्ञा भवति। कर्तृकर्मान्यतरव्यवधानेन क्रियाश्रयः कारकम् अधिकरणसंज्ञं स्याद् इति। तदाह-आचार्यो हरिः

**कर्तृकर्मव्यवहितामसाक्षाद् धारयत् क्रियाम्।**
**उपकुर्वत् क्रियासिद्धैः शास्त्रेऽधिकरणं स्मृतम्॥**

यस्य अधिकरण-संज्ञा भवति तस्य 'सप्तम्यधिकरणे च' इति सूत्रेण सप्तमीविभक्तिर्भवति।

---

**(६३२) -आधारोऽधिकरणम्। १।४।४५॥**

**कर्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारः कारकम् 'अधिकरणसंज्ञः' स्यात्।**

---

**६३२ - पदच्छेदः** - आधारः, अधिकरणम्।

**अनुवृत्तिः** - कारके।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - कर्तृनिष्ठक्रियायाः कर्मनिष्ठक्रियायाः आधारस्य अधिकरणसंज्ञा भवति।

(१) कर्तृनिष्ठक्रियायाः उदाहरणम् - 'बालकः गृहे क्रन्दति।' अत्र क्रन्दनक्रियायाः आश्रयः बालकः कर्ता। बालके विद्यमानायाः क्रियायाः आधारः गृहम्।

(२) कर्मनिष्ठक्रियायाः उदाहरणम् शिक्षकः विद्यालये ग्रन्थं लिखति। अत्र लेखनक्रियायाः आश्रयः शिक्षकः न कर्ता। फलाश्रयः ग्रन्थः कर्म। कर्मभूते ग्रन्थे वर्तमानस्य फलस्य आधारः विद्यालयः।

**(६३३) -सप्तम्यधिकरणे च। २।३।३६॥**

**अधिकरणे सप्तमी स्यात् चकाराद् दूरान्तिकार्थेभ्यः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्मास्ति। वनस्य दूरे अन्तिके वा। दूरान्तिकार्थेभ्यः - (सू. ६०६) इति विभक्तित्रयेण सह चतस्रोऽत्र विभक्तयः फलिताः। 'क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम्' (वा.) अधीती व्याकरणे। अधीतमनेनेति विग्रहे 'इष्टादिभ्यश्च' इति कर्तरीनिः। 'साध्वसाधुप्रयोगे च' (वा.-१८७५) साधुः कृष्णो मातरि असाधुर्मातुले। 'निमित्तात्कर्मयोगे' निमित्तमिह फलम्। योगः संयोगसमवायात्मकः। चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥ हेतुतृतीयाऽत्रप्राप्ता। सीमा अण्डकोशः। पुष्कलको-गन्धमृगः। योगविशेषे किम्? वेतनेन धान्यं लुनाति।**

---

**६३३ - पदच्छेदः** - सप्तमी, अधिकरणे, च।

**अनुवृत्तिः** - दूरान्तिकार्थेभ्यः, अनभिहिते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - आध्रियते अस्मिन् इति आधारः। आधारस्त्रिविधः।

(१) औपश्लेषिकः। उपश्लेषः संयोगादिसम्बन्धः तत्प्रयोज्य आधारः औपश्लेषिकः।

(अ) कर्तृद्वारकस्य औपश्लेषिकस्य उदाहरणम् – (देवदत्तः) 'कटे आस्ते' अत्र आसनक्रियायाः कर्ता देवदत्तः। कर्तारं देवदत्तं धरन् कटः परोक्षरूपेण आसनक्रियाम् अपि धरति। अतः कटः अधिकरणकारकम्। 'सप्तम्यधिकरणे च' इत्यनेन अधिकरणे सप्तमी भवति।

(ब) कर्मद्वारकस्य औपश्लेषिकस्य उदाहरणम् – (देवदत्तः) स्थाल्यां (तण्डुलान्) पचति। पच् धातोः अर्थः विक्लितिरूपफलं, तदनुकूलक्रिया च। पाकक्रियाश्रयः देवदत्तः कर्ता। विक्लित्तिरूपफलाश्रयः तण्डुलाः कर्म। कर्मभूतेषु तण्डुलेषु वर्तमानस्य विक्लितिरूपफलस्य आधारः स्थाली। अतः स्थाली अधिकरणम्।

(२) वैषयिकः। विषयतासम्बन्धकृत आधारः वैषयिकः। यथा –'मोक्षे इच्छास्ति।' मोक्षस्य विषयतासम्बन्धेन आधारत्वम्।

(३) अभिव्यापकः – सकलावयवव्याप्तिकृत आधारः अभिव्यापकः यथा – 'सर्वस्मिन्' आत्मा अस्ति।

**(६३४) -यस्य च भावेन भावलक्षणम्। २।३।३७॥**

**यस्य क्रियया क्रियान्तरं लक्ष्यते, ततः सप्तमी स्यात्। गोषु दुह्यमानासु गतः। 'अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च' (वा.) सत्सु तरत्सु असन्त आसते। असत्सु तिष्ठत्सु सन्तस्तरन्ति। सत्सु तिष्ठत्सु असन्तस्तरन्ति असत्सु तरत्सु सन्तस्तिष्ठन्ति।**

---

६३४ - **पदच्छेदः** - यस्य, च, भावेन, भावलक्षणम्।

**अनुवृत्तिः** - सप्तमी।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यस्य कर्तुः कर्मणः वा क्रियया अनया क्रिया लक्षिता भवेत्, तस्मिन् कर्तरि कर्मणि वा सप्तमी भवति।

**साधनिका :** - गोषु दुह्यमानासु गतः। (गायों के दुहे जाते हुए वह गया।)

देवदत्तः कदा गतः? इति प्रश्नस्य इदम् उत्तरम्। अत्र गमनक्रिया लक्ष्या। गोदोहनकालः लक्षकः। लक्षकगोदोहनक्रि या अन्या गमनक्रिया लक्षिता भवति। अतः गोदोहनक्रियावाचकः दुह्यमानशब्दः 'यस्य च भावेन' इति सूत्रेण सप्तम्यां प्रयुक्तः। दोहनक्रियाया आश्रयभूतः गोशब्दः अपि सप्तम्यां प्रयुक्तः।

**(६३५) -षष्ठी चानादरे। २।३।२८॥**

**अनादराधिक्ये भावलक्षणे षष्ठी-सप्तम्यौ स्तः। रुदति रुदतो वा प्रावाजीत्। रुदन्तं पुत्रादिकमनादृत्य सन्यस्तवानित्यर्थः।**

---

६३५ - **पदच्छेदः** - षष्ठी, च, अनादरे।

**अनुवृत्तिः** - यस्य च भावेन भावलक्षणम्, सप्तमी।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अनादरे गम्यमाने सति यस्य क्रियाया क्रियान्तरं लक्ष्यते ततः षष्ठी सप्तमी च।

**साधनिका :** - रुदति रुदतः वा प्राव्राजीत् (रोते हुए को छोडकर बिना परवाह किये परिव्राजक बन गया।)

कदा संन्यस्तवानिति प्रश्ने उत्तरम् इदम्। अत्र रोदनक्रियया प्रवजनक्रिया लक्ष्यते। अतः 'यस्य य भावेन भावलक्षणम्' इति सप्तमी प्राप्ता। अत्र अनादरे गम्यमाने सति सप्तमीं बाधित्वा। 'षष्ठी चानादरे' इत्यनेन षष्ठीसप्तम्यौ स्तः।

**(६३६) -स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च। २।३।३९॥**

**एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः। षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थ्यं वचनम्। गवां गोषु वा स्वामी। गवां गोषु वा प्रसूतः। गा एवानुभवितुं जात इत्यर्थः।**

---

६३६ - **पदच्छेदः** - स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैः, च।

**अनुवृत्तिः** - षष्ठी, सप्तमी।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - स्वामी, ईश्वर, अधिपति, दायाद, साक्षि, प्रतिभू, प्रसूत एतैः शब्दैः योगे षष्ठी सप्तमी च भवतः।

**साधनिका :** - गवां-गोषु वा स्वामी (गायों का मालिक)

अत्र 'स्वामीश्वर' इत्यादिना सूत्रेण स्वामिशब्दस्य योगे गोशब्दात् षष्ठीसप्तम्यौ।

**(६३७) -आयुक्तकुशलाभ्यां चासेवायाम्। २।३।४०॥**

**आभ्यां योगे षष्ठीसप्तम्यौ स्तस्तात्पर्येऽर्थे। आयुक्तो व्यापारितः। आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा। 'आसेवायाम्' किम्? आयुक्तो गौः शकटे। ईषद्युक्त इत्यर्थः।**

---

६३७ - **पदच्छेदः** - आयुक्तकुशलाभ्यां, च, आसेवायाम्।

**अनुवृत्तिः** - षष्ठी, सप्तमी।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - आयुक्तशब्दस्य कुशलशब्दस्य च योगे तात्पर्येति अर्थे षष्ठीसप्तम्यौ भवतः।

**साधनिका :** - आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा। (हरिपूजन में संलग्न)

अत्र 'आयुक्त...' इत्यादिना सूत्रेण आयुक्तशब्दयोगे हरिपूजनशब्दात् षष्ठीसप्तम्यौ।

**(६३८) -यतश्च निर्धारणम्। २।३।४१॥**

**जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः। नृणां नृणु वा द्विजः श्रेष्ठः। गवां-गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावञ्छीघ्रः। छात्राणां छात्रेषु वा मैत्रः पटुः।**

---

६३८ - **पदच्छेदः** - यतः, च, निर्धारणम्।

**अनुवृत्तिः** - षष्ठी, सप्तमी।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - जात्या गुणेन क्रियया संज्ञया वा समुदायाद् एकदेशस्य पृथक्करणं निर्धारणम्। यस्मात् समुदायाद् निर्धारणं तत्समुदायवाचकः शब्दः षष्ठ्यां सप्तम्यां वा प्रयुज्यते।

**साधनिका :** - नृणां नृषु वा द्विजः श्रेष्ठः (मनुष्यो में ब्राह्मण श्रेष्ठ है)

अत्र नृशब्दः मनुष्यसमुदाये वर्तते। मनुष्यसमुदायाद् द्विजस्य अत्र पृथक्करणम् अस्ति। अतः यतश्च निर्धारणम् इति षष्ठीसप्तम्यौ।

**(६३९) -पञ्चमी विभक्ते। २।३।४२॥**

**विभागो विभक्तम्। निर्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात्। माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः।**

---

६३९ - **पदच्छेदः** - पञ्चमी, विभक्ते।

**अनुवृत्तिः** - यतश्च निर्धारणम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - निर्धार्यमाणस्य यत्र अभेदः स्यात् तत्र 'यतश्च निर्धारणम्' इति षष्ठीसप्तम्यौ भवतः। यत्र निर्धायमाणस्य भेदः स्यात्तत्र पञ्चमी।

**साधनिका :** - माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः। (मथुरावासी पाटलिपुत्र वालों से अधिक धनी है।) अत्र मथुराणां पाटलिपुत्राणां च मध्ये भेदः। अतः 'पञ्चमी विभक्ते' इत्यनेन पाटलिपुत्रकशब्दात् पञ्चमी।

**(६४०) -साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः। २।३।८३॥**

**आभ्यां योगे सप्तमी स्यादर्चायाम् न तु प्रतेः प्रयोगे। मातरि साधुर्निपुणो वा। 'अर्चायाम्' किम्? निपुणो राज्ञो भृत्यः। इह तत्त्वकथने तात्पर्यम्। 'अप्रत्यादिभिरिति वक्तव्यम्' (वा.) साधुर्निपुणो वा मातरं प्रति परि अनु वा।**

---

६४० - **पदच्छेदः** - साधुनिपुणाभ्याम्, अर्चायाम्, सप्तमी, अप्रतेः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - प्रशंसार्थकस्य साधुशब्दस्य निपुणशब्दस्य च योगे सप्तमी भवति। 'प्रति' इत्यस्य योगे सप्तमी न भवति।

**साधनिका :** - मातरि साधुः निपुणः वा। (माता के प्रति सज्जन अथवा माता की सेवा में निपुण) मातरं प्रति हितकारी इत्यर्थः। अत्र प्रशंसार्थकस्य साधुशब्दस्य निपुणशब्दस्य व प्रयोगः। अतः तद्योगे 'साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः' इत्यनेन मातृशब्दात् सप्तमी।

**(६४१) -प्रसितोत्सुकाभ्यां तृतीया च। २।३।४४॥**

**आभ्यां योगे तृतीया स्यात् चात्सप्तमी च। प्रसित उत्सुको वा हरिणा हरौ वा।**

---

६४१ - **पदच्छेदः** - प्रसितोत्सुकाभ्यां, तृतीया, च।

**अनुवृत्तिः** - सप्तमी।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - प्रसितशब्दस्य उत्सुकशब्दस्य च योगे तृतीया भवति, सप्तमी च।

**(६४२) -नक्षत्रे च लुपि। २/३/४५॥**

नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्वार्थस्तत्र वर्तमानात्तृतीयासप्तम्यौ स्तोऽधिकरणे। मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्। मूले श्रवणे इति वा। 'लुपि किम्'? पुष्ये शनिः।

---

६४२ - **पदच्छेदः** - नक्षत्रे, च, लुपि।

**अनुवृत्तिः** - तृतीया, सप्तमी।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यदा नक्षत्रवाचीशब्दः प्रकृत्यर्थे प्रयुक्तः स्यात् 'लुप्' संज्ञया च प्रत्ययलोपः भवेत् तदा अधिकरणे तृतीयासप्तम्यौ स्तः।

**साधनिका :** - मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् (मूलनक्षत्र से युक्त काल में देवी का आवाहन करें और श्रवणनक्षत्र से युक्त काल में विसर्जन करें)

मूलेति श्रवणेति च नक्षत्रवाचकौ। एतौ प्रकृत्यर्थे स्तः, अतः एतौ तृतीयायां प्रयुक्तौ। पक्षे सप्तम्यपि प्रयोक्तुं शक्यते।

**(६४३) -सप्तमीपञ्चम्यौ कारकमध्ये। २।३।७॥**

**शक्तिद्वयमध्ये यौ कालाध्वनौ ताभ्यामेते स्तः। अद्य भुक्त्वाऽयं द्वहे द्व्यहाद्वा भोक्ता। कर्तृशक्त्योर्मध्येऽयं कालः। इहस्थोऽयं क्रोशे-क्रोशाद्वा लक्ष्यं विध्येत्। कर्तृकर्मशक्त्योर्मध्येऽयं देशः। अधिकशब्देन योगे। सप्तमी पञ्चम्याविष्येते। 'तदस्मिन्नधिक' इति यस्मादधिकम्... इति च सूत्रनिर्देशात्। लोके लोकाद्वा अधिको हरिः।**

---

६४३ - **पदच्छेदः** - सप्तमीपञ्चम्यौ, कारकमध्ये।

**अनुवृत्तिः** - कालाध्वनोः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - द्वयोः कारकशक्त्योः मध्ये यः कालवाचकः मार्गवाचकश्च शब्दः भवेत्, ततः पञ्चमीसप्तम्यौ भवतः।

**(६४४) -अधिरीश्वरे। १।४।९७॥**

**स्वस्वामिसम्बन्धे अधिः कर्मप्रवचनीयसंज्ञः स्यात्।**

---

६४४ - **पदच्छेदः** - अधिः, ईश्वरे।

**अनुवृत्तिः** - कर्मप्रवचनीयाः, निपाताः।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - स्वस्वामिसम्बन्ध अधीत्यस्य कर्मप्रवचनीयसंज्ञा भवति।

**(६४५) -यस्मादधिकं यस्य चेश्वरक्वनं तत्र सप्तमी। २।३।९॥**

**अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात्। उप परार्धे हरेर्गुणाः परार्धादधिका इत्यर्थः। ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी। अधि भुवि रामः। अधि रामे भूः। 'सप्तमी शौण्डैः' इति समासपक्षे तु रामाधीना। अषडक्ष....। इत्यादिना खः।**

---

६४५ - **पदच्छेदः** - यस्माद्, अधिकं, यस्य, च, ईश्वरवचनं, तत्र, सप्तमी।

**अनुवृत्तिः** - कर्मप्रवचनीययुक्ते।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - परार्धादधिकाः हरेः गुणाः इत्यर्थः। अत्र उपेत्यस्य कर्मप्रवचनीय संज्ञायाम्। 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' इत्यनेन उपेत्यस्य योगे परार्धशब्दात् सप्तमी।

**(६४६) -विभाषा कृञि॥ १।४।९८॥**

**अधिः करोतौ प्राक्संज्ञो वा स्यादीश्वरेऽर्थे। यदत्र मामधिकरिष्यति। विनियोक्ष्यत इत्यर्थः। इह विनियोक्तुरीश्वरत्वं गम्यते। अगतित्वात् 'तिङि चोदात्तवति' इति निघातो न। इति सप्तमी विभक्तिः।**

---

६४६ - **पदच्छेदः** - विभाषा, कृञि।

**अनुवृत्तिः** - अधिः, कर्मप्रवचनीयाः, निपाताः।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - कृञ्धातौ परे अधीत्यस्य ईश्वरेऽर्थे कर्मप्रवचनीय संज्ञा भवति।

**साधनिका :** - यदत्र मामधिकरिष्यति (जो मुझे यहाँ नियुक्त करेगा)

अस्मिन्विषये माम् अधिकरिष्यति इति यत्तद्युक्तम् इत्यर्थः। अत्र अधीत्यस्य 'विभाषा कृञि' इत्यनेन कर्मप्रवचनीयसंज्ञायां तद्योगे मामिति द्वितीया।

## स्वाध्यायः

**१. प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) अधिकरणसंज्ञा केन सूत्रेण भवति?

(क) षष्ठी चानादरे (ख) विभाषा कृञि (ग) अधिरीश्वरे (घ) आधारोऽधिकरणम्।

(२) अधिकरणे का विभक्तिः भवति?

(क) चतुर्थी (ख) सप्तमी (ग) पञ्चमी (घ) षष्ठी

(३) आधारः कतिविधः?

(क) द्विविधः (ख) चतुर्विधः (ग) त्रिविधः (घ) पञ्चविधः

(४) 'यदत्र मामधिकरिष्यति' रूपे मुख्यसूत्रं किमस्ति?

(क) नक्षत्रे च लुपि। (ख) विभाषा कृञि।

(ग) यस्य च भावेन भावलक्षणम्। (घ) प्रसितोत्सुकाभ्यां तृतीया च।

(५) 'अधिरीश्वरे' सूत्रस्य किं कार्यम्?

(क) कर्मप्रवचनीयसंज्ञा (ख) आर्धधातुकसंज्ञा (ग) अधिकरणसंज्ञा (घ) सार्वधातुकसंज्ञा

(६) 'आयुक्तकुशलाभ्यां चा सेवायाम्' इत्यस्य सूत्रप्रकारं लिखतु।

(क) संज्ञासूत्रम् (ख) विधिसूत्रम् (ग) नियमसूत्रम् (घ) परिभाषासूत्रम्

(७) 'साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः' सूत्रेऽस्मिन् किं रूपं भवति?

(क) मातरि साधुः निपुणः वा (ख) नृणां नृषु वा द्विजः श्रेष्ठः

(ग) गवां गोषु वा स्वामी (घ) गोषु दुह्यमानासु गतः

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) आधारः कतिविधः? के च ते?

(२) 'स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च' सूत्रस्य किं कार्यम्?

(३) 'सप्तम्यधिकरणे च' सूत्रे किं वार्तिकम् अस्ति?

(४) 'आयुक्तकुशलशब्दयोः योगे का विभक्तिः भवति?'

(५) 'अधिरीश्वरे' सूत्रस्य सरलार्थं लिखतु।

(६) 'माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः' रूपेऽस्मिन् मुख्यं सूत्रं किम्?

(७) 'यस्मादधिकं....' सूत्रस्य पूर्तिं करोतु?

**३. सविस्तरम् उत्तराणि लिखत।**

(१) स्वामीश्वराधि.... सूत्रपूर्तिं कृत्वा सोदाहरणं व्याख्यानं करोतु।

(२) साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः। व्याख्यां करोतु।

**४. अधोलिखितरूपाणि साधयतु।**

(१) गोषु दुह्यमानासु गतः।

(२) रुदति रुदतः वा प्राव्राजीत्।

(३) नृणां नृषु वा द्विजः श्रेष्ठः।

(४) मातरि साधुः निपुणः वा।

(५) माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः।

(६) गवां-गोषु वा स्वामी।

(७) आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा।

**५. अधोलिखितानि सूत्राणि सविस्तारं व्याख्यायत।**

(१) आधारोऽधिकरणम्।

(२) सप्तम्यधिकरणे च।

**६. 'अ' विभागं 'ब' विभागेन सह योजयतु।**

| (अ) | (ब) |
|---|---|
| (१) आयुक्तकुशलाभ्यां... | (१) साक्षिप्रतिभूप्रसूतेश्च। |
| (२) स्वामीश्वराधिपतिदायाद... | (२) चेश्वरवचनं तत्र सप्तमी। |
| (३) यस्य च भावेन... | (३) कारकमध्ये। |
| (४) यस्मादधिकं यस्य... | (४) भावलक्षणम्। |
| (५) सप्तमीपञ्चम्यौ... | (५) चासेवायाम्। |

●

# (१५)

# विशिष्टपरिभाषाणां विमर्शः

**प्रस्तावना**

हलन्तपुल्लिङ्गतः कारकप्रकरणं यावत् याः परिभाषाः समागताः सन्ति, तासाम् अत्र निर्देशः कृतः वर्तते। परिभाषायाः स्वरूपं यथा

**परितः भाषन्ते इति परिभाषा**

**अनियमे नियम-कारिणी परिभाषा**

यत्र सूत्रे नियमे अर्थघटनं सारल्येन न भवति तत्र परिभाषा द्वारा अर्थघटनं भवति। यथा सुधी + उपास्यः इत्यत्र ईकारस्य स्थाने कः आदेशः भवेत् इति प्रश्ने 'स्थानिवदादेशोऽनल्विधौ' 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' इति परिभाषानुसारेण ईकारस्य स्थाने यकारो भवति।

१ - **अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्**

अङ्गाधिकारे निष्पन्नं यत् कार्यं तस्मिन् सति अन्यस्य अङ्गकार्यस्य प्रवृत्तिः न भवति अर्थात् पुनः अङ्गाधिकारविहितं कार्यं न भवति इत्यर्थः।

यथा - यूयमित्यत्र युष्मद्शब्दात्, जस् तत्स्थाने अम् आदेशे, **'शेषे लोपः'** इत्यनेन सूत्रेण यूय + अम् इत्यवस्थायां स्थानिवद्भावेन पुनः प्राप्तस्य शी आदेशस्य अनया परिभाषया निवारणं क्रियते। अत्र अङ्गस्य अधिकारेण **'ङे प्रथमयोरम्'** इत्यनेन सूत्रेण जसः स्थाने अमादेशः विहितः। अतः पुनः अङ्गाधिकारविहितं कार्यं न भवति।

२ - **अकृतव्यूहाः पाणिनीयाः।**

न कृतः विशिष्टः ऊहः = निश्चयः शास्त्रप्रवृत्तिविषयः यैः ते अकृतव्यूहाः। न कृतः अकृतः व्यूहः प्रकृतिप्रत्ययविवेचनं यैः ते अकृतव्यूहाः। शास्त्रप्रवृत्तेः निमित्तं भविष्यत्काले निमित्तस्य विनाशोन्मुखं दृष्टवा तत्प्रयुक्तं न कुर्वन्ति इत्यर्थः।

यथा - प्रतीचः इत्यत्र 'प्रति + अञ्च् + अस्' इत्यवस्थायाम् **'अनिदितां - हल उपधायाः क्ङिति'** इत्यनेन सूत्रेण नकारस्य लोपे 'प्रति + अच् + अस्' इति जाते। **'अचः'** इत्यनेन अकारस्य लोप प्रवृत्ति समये अन्तरङ्गत्वात् यणि प्राप्ते अनया परिभाषया निवारणं क्रियते। तदनुसारेण अच् इत्यस्य **'अचः'** इत्यनेन अकारस्य लोपप्रवृत्तिसमये अन्तरङ्गत्वात् यणि प्राप्ते अनया परिभाषया निवारणं क्रियते। तदनुसारेण च् इत्यस्य **'अचः'** इत्यनेन विनाशोन्मुखं लोपकार्यं दृष्ट्वा यणादेशो न भवति। एवमेव - सेदुषः इत्यत्र 'सेद् क्वसु' इत्यवस्थायाम् अनुबन्धलोपे सेद् क्वस् बहुवचने शस्-प्रत्यये, अनुबन्धलोपे 'सेद् + वस् + अस्' इत्यवस्थायां वस् इत्यस्य वकारस्य इडागमेः अन्तरङ्गत्वेऽपि न प्रवृत्तिः। यतो हि तत्प्रवृत्तौ निमित्तस्वरूप वकारस्य विनाशः सम्प्रसारणेन् उकारत्वेन अवश्यम्भावी। अतः 'प्रक्षालनाद् हि पङ्कस्य दूरादस्पर्शनं वरम्॥'

३ - **प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्।**

**'वनो र च'** इत्यनेन सूत्रेण वन्नन्तात् तदन्तात् च प्रातिपदिकात् स्त्रियां ङीप् भवति। अत्र वन् पदस्य अभीष्टार्थः **'वन् अन्त'** तथा वन्नन्तान्तप्रातिपदिकत्वेन स्वीक्रियते। ननु वन् ग्रहणेन 'वन् प्रत्ययान्तं तदन्तस्य कथं लभ्यत इत्यत आह-

**'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्' इति परिभाषा।**

यस्मात् प्रकृतिभूतात् शब्दात् यः प्रत्ययो विहितः तदादेः सः प्रकृतिभूतः शब्दः आदिः, यस्य तस्य तदन्तस्य स प्रत्ययः अन्तः यस्य समुदायस्य तस्य च ग्रहणं भवति। तेन **'वनो र च'** इति सूत्रे वन् प्रत्ययान्तस्य तदन्तस्य च ग्रहणं भवति। अर्थात् प्रकृतिप्रत्ययसमुदायस्य तन्मध्यवर्तिनश्च ग्रहणमित्यर्थः।

४ - **लाश्रयमनुबन्धकार्यं नादेशानाम्।**

वक्ष्यमाणा इत्यत्र वच परिभाषणे इत्यस्मात् कर्मणि लृट् **'लृटः सद्वा'** इत्यनेन तस्य शानजादेशे, स्य प्रत्यये कुत्वषत्वे **'आने मुक्'** इत्यनेन मुगागमे, णत्वे, टाप् प्रत्यये वक्ष्यमाणा इति रूपं सिद्ध्यति। अत्र लृडादेशस्य स्थानिवत्त्वेन टित्त्वात् उगित्त्वात् च **'टिड्ढाणञ्द्वय...'** इत्यनेन सूत्रेण ङीप् प्राप्नोति। परंतु **'यासुट् परस्मैपदेषूदात्तो ङिच्च'** इत्यस्मिन् यासुटो ङित्वेन 'लाश्रयमनुबन्धकार्यं नादेशानाम्' इति परिभाषा ज्ञापकात् अत्र ङीप् न भवति। लकारमाश्रितमित्संज्ञाविधानम् आदेशे न स्यात् इति परिभाषायाः अर्थः।

५ - **ताच्छीलके णेऽपि।**

तच्छीले भवः ताच्छीलिकः तस्मिन् णप्रत्यये सति तदन्तादपि ङीप् भवति इत्यर्थः। ताच्छीलिकेऽण् प्रत्ययान्ताद् अण्कार्यं ङीप् भवतीति भावः। यथा - चौरी इत्यत्र चुरा शीलमस्या इति विग्रहे छत्रादित्वात् णः आदिवृद्धिः **'यस्येति च'** इत्याकारस्य लोपे और शब्दात् ङीपि पुनः यस्येति च इत्यनेन णकारलोपे चौरी इति रूपं सिद्धयति।

६ - **उपपदविभक्तेः कारकविभक्तिर्बलीयसी।**

नमस्करोति देवान् इत्यत्र नमः स्वस्ति... इत्यनेन सूत्रेण चतुर्थीविभक्तिः प्राप्ताभवति अत आह-उपपद विभक्तेः कारक विभक्तिर्बलीयसी। पदान्तरयोगनिमित्तिका विभक्तिः उपपदविभक्तिः। तदपेक्षया वस्तु अथवा व्यक्तेः साक्षात् क्रियया सह अन्वयं सूचयितुम् प्रथमादिविभक्तीनां प्रयोगः क्रियते तदासा कारकविभक्तिः इति उच्यते। उपपदविभक्तेः कारक विभक्तिः बलीयसी अतः नमस्करोति देवान् इत्यस्मिन् वाक्ये नमः इति पदेन चतुर्थी तथा नमस्करोति इति क्रियया देवान् इत्यत्र द्वितीया विभक्तिः भवति। कारकविभक्तेः प्राबल्यत्त्वात् द्वितीया न तु चतुर्थी।

## स्वाध्यायः

१. **प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) 'ङे प्रथमयोरम्' इत्यस्मिन् सूत्रे ङे इत्यस्य स्थाने कः आदेशः भवति?

(क) टा (ख) जस् (ग) अम् (घ) सु

(२) यूयम् इत्यत्र का विभक्तिः?

(क) द्वितीया (ख) चतुर्थी (ग) प्रथमा (घ) तृतीया

(३) विनाशोन्मुखं दृष्ट्वा के कार्यं न कुर्वन्ति?

(क) मीमांसकाः (ख) नैयायिकाः (ग) पौराणिकाः (घ) वैयाकरणाः

(४) प्रतीचः इत्यत्र नकारस्य लोपःकेन सूत्रेण भवति?

(क) इदितो नुम् धातोः (ख) अनिदितां हल उपधायाः क्ङिति

(ग) नलोपः प्रातिपदिकान्तस्य (घ) नलोपो नञः

(५) यासुडागमः केन सूत्रेण भवति ?

(क) सुट्तिथोः (ख) यासुट् परस्मैपदेषूदात्तो ङिच्च

(ग) ङः सि धुट् (घ) छे च

(६) चौरी इत्यत्र आदिवृद्धिः केन सूत्रेण भवति ?

(क) वृद्धिरेचि (ख) वृद्धिरादैच् (ग) आटश्च (घ) अचो ञ्णिति

(७) नमस्करोति देवान् इत्यत्र का विभक्तिः बलीयसी ?

(क) चतुर्थी (ख) द्वितीया (ग) तृतीया (घ) पंचमी

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) अङ्गकार्ये कृते पुनः किं न भवति ?

(२) युष्माकम् इति का विभक्तिः किं वचनम् ?

(३) प्रत्ययग्रहणे यस्मात् कस्य ग्रहणं भवति ?

(४) मुगागमः केन सूत्रेण भवति ?

(५) टिड्ढाणञ्.... इति सूत्रेण कः प्रत्ययो भवति ?

(६) अकृतः इत्यत्र कः समासः ?

(७) का नाम परिभाषा ?

**३. सविस्तरम् उत्तराणि लिखत।**

(१) 'अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्' इत्यस्याः परिभाषायाः एकम् उदाहरणं सविस्तरं लिखतु।

(२) 'अकृतव्यूहाः...' इत्यस्याः परिभाषायाः का आवश्यकता ?

(३) का उपपद-विभक्तिः ? का कारकविभक्तिः ?

(४) 'लाश्रय'इत्यस्यां परिभाषायां लाश्रयं नाम किम् ? इति लिखतु।

**४. अधोलिखिताः परिभाषाः सविस्तरं व्याख्यात।**

(१) अकृतव्यूहाः पाणिनीयाः।

(२) प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्।

(३) उपपद-विभक्तेः कारकविभक्तिर्बलीयसी।

(४) लाश्रयमनुबन्धकार्यं नादेशानाम्।

●

16

# वैयाकरणसिद्धान्तकौमुदीस्थनियतांशगणपाठः

**प्रस्तावना**

**धातुसूत्र गणोणादि वाक्यलिङ्गानुशासनम्।**
**आगमःप्रत्ययादेशा उपदेशाः प्रकीर्तिताः॥**

इति कारिकानुसारं गणस्य प्रक्रियानुसारं महती उपयोगिता अस्ति। अतः अत्र गणस्य हलन्तपुल्लिङ्गतः कारकप्रकरणं यावत् गणसूत्राणां यत्र यत्र योगः वर्तते तेषां अत्र समासीकृत्य लिखिता सन्ति।

**हलन्तपुल्लिङ्गतः कारक-प्रकरण पर्यन्तो गणपाठः**

१ - **नषट्स्वस्रादिभ्यः (४.१.१०)** स्वसृ, तिसृ, चतसृ, ननान्दृ, दुहितृ, यातृ, मातृ अस्मिन् गणे सप्त शब्दाः सन्ति।

२ - **स्वरादिनिपातमव्ययम् (१.१.३७)** अव्यय प्रकरणस्य प्रथम सूत्रमिदमस्ति तत्र गणपाठो निर्दिष्टः।

३ - **अजाद्यतष्टाप् (४.१.४)** अजा, एडका, कोकिला, चटका, अश्वा, मूषिका, बाला, होडा, पाका, वत्सा, मन्दा, विलाता, पूर्वाविहाणा (पूर्वापहाणा) उपरापहाणा। सम्भस्त्राजिनशणपिण्डेभ्यः फलात्।

सदच् काण्डप्रान्तशतैकेभ्यः पुष्पात्। शूद्रा चामहत्पूर्वा जातिः। कुञ्चा, उष्णिहा, देवविशा, ज्येष्ठा, कनिष्ठा। मध्यमा पुंयोगेऽपि (मूल्यान्नञः) द्रंष्ट्रा।

४ - **(वा.) क्षिपकादीनां च।** क्षिपका, ध्रुवका, चरका, सेवका, करका, चटका, अपका, लहका, अलका, कन्यका, ध्रुवका, एडका, आकृतिगणोऽयम्।

५ - **नित्यं सपत्न्यादिषु (४.१.३५)** समान, एक, वीर, पिण्ड, श्व (शिरि) मातृ, भद्र, पुत्र (दासात्छन्दसि)

६ - **षिद् गौरादिभ्यश्च - (४.१.४१)** गौर मत्स्य शृङ्ग पिङ्गल, हय गवय मुकय ऋष्य, (पुट तूण) द्रुण, द्रोण हरिण कोकण (काकणः पटर उणक (आमल) आमलक, कुबल, बिम्ब, बदर, कर्कर, (कर्करक) तर्कार शर्कार, पुष्कर, शिखण्ड, सलद, शष्कण्ड, सनन्द, सुषम, सुषव, अलिन्द, गडुल, षाण्डश, आढक आनन्द, अश्वत्थसृपाट, आखक (आपच्चिक) शष्कुल सूर्य (सूर्म) सूप, यूष (पूष) यूथ, सूपे मेथ वल्लक, घातक सल्लक, मालक, मालत, साल्वक वेतस वृक्ष (वृस) अतस (उभय) भृङ्ग, मह मठ, छेद, पेश, मेंद, श्वयन्, तक्षन्, अनडुही, अनड्वाही, एषणः, करणे। देह देहल काकादन, गवादन, तेजन् रजन लवण, औदगाहमानि, आदमाहमानि गौतम (गोतम) (पारक) अयस्थूल (अयः सथूण) भौरिकि भौलिकि भौलिङ्गि यान मेध आलम्बि, आलजि, अलब्धि, आलक्षि, केवाल, आवक, आरट, नट, टोट, नोट, मूलाट, शातन (पीतन) जातन, पाठन, (पानठ) आस्तरण अधिकरण अधिकार अग्रहायणी (आग्रहायणी) प्रत्यवरोहणी (सिचन) सुमङ्गलात्, संज्ञायाम्। अण्डर सुन्दर, मण्डल मन्थर, मङ्गल, पट, पिण्ड, (षण्ड) उर्द, गुर्द, शम, सूद, औड, (आर्द) ह्रद (छद) पाण्ड (भाण्डल) भाण्ड (लोहाण्ड) कदर, कन्दर, कदब, तरुण, तलुन, कल्माष, बृहत् 'महत्' (सोम) सौधर्म।

रोहिणीनक्षत्रे। रेवतीनक्षत्रे विकल निष्कल पुष्कल कटाच्छ्रोणि वचने। पिप्पल्यादयश्च। पिप्पली हरितकी (हरीतकी) कौशीतकी, शमी, वरी, शरी, पृथिवी, कोष्टु, मातामह पितामह इति गौरादिः।

७ - **बाह्वादिभ्यश्च (४.१.४५)** बहु, पद्धति, अञ्चति, अङ्कति, अंहति, शकटि, (शकति)। शक्तिः शस्त्रे। शारि, वारि, राति, राभि, (शाधि) अहि कपि, यष्टि मुनि (इतः प्राण्यङ्गात) कृदिकारादक्तिनः। सर्वतोऽक्तिन्नर्थादित्येके चण्ड, अराल, कृपण, कमल, विकट, विशाल, विशङ्कट, भरुज, ध्वज (चन्द्रभागा नद्याम्) कल्याण उदार पुराण अहन् क्रोड, नख, खुर शिखा, बाल शफ, गुद। आकृतिगणोऽयम्। तेन भग, गल, राग, इत्यादि।

८ - **शार्ङ्गरवाद्यञो ङीन् - (४.१.७३)** शर्ङ्गरव, कापटव, गौग्गलुवष ब्राह्मण, वैद, गौतम, काण्डेलय, आमकृतेय (आतिचेय) आतिधेय अशोकेय, वात्सायन, मौञ्जायन, कैकस, काव्य, शैव्य, एहि-पर्येहि, आश्मरश्य औदपान अराल, चण्डाल, वतण्ड।

भोगवत् गौरिमतोः संज्ञायां धादिषु (६.३.४३) नित्यम् ह्रस्वार्थम्। नृनरयोर्वृद्धिश्च।

९ - **(वा.) प्रकृत्यादिभ्यः उपसंख्यानम्, प्रकृति,** प्राय, गोत्र, सम, विषम, द्विद्रोण, पञ्चक, साहस्र।

१० -**(वा.) नौ-काकान्न शुकशृगालवर्जेष्विति वाच्यम्** नौ, काक, अन्न शुक, शृंगाल।

## स्वाध्यायः

**१. प्रदत्तानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत।**

(१) तिसृ, चतसृ, ननान्दृ, इत्यादि-शब्दाः कस्मिन् गणे आगच्छन्ति।

(क) स्वरादिनिपातमव्ययम् (ख) षिद्-गौरादिभ्यश्च

(ग) बह्वादिभ्यश्च (घ) न षट्स्वस्रादिभ्यः

(२) टाप्-प्रत्ययः केन सूत्रेण भवति?

(क) अजाद्यतष्टाप् (ख) जातेरस्त्रीविषयादयोपधात्

(ग) टाबृचि (घ) डावुभाभ्यामन्यतरस्याम्

(३) षिद्गौरादिभ्यश्च इति सूत्रेण कः प्रत्ययो भवति?

(क) टाप् (ख) डाप् (ग) चाप् (घ) ङीष्

(४) चटका इत्यत्र कः प्रत्ययो भवति?

(क) अजाद्यतष्टाप् (ख) आदाचार्याणाम् (ग) टाबृचि (घ) क्षिपकादीनां च

(५) ङीन् प्रत्ययो केन सूत्रेण भवति?

(क) शार्ङ्गरवाद्यञो ङीन् (ख) नित्यं सपत्न्यादिषु (ग) षिद्गौरादिभ्यश्च (घ) बह्वादिभ्यश्च

(६) ऊङ् प्रत्ययः केन सूत्रेण भवति?

(क) संज्ञायाम् (ख) अचिश्नु (ग) ङःसि धुट् (घ) इदितो नुम्धातोः

(७) बहु, पद्धति, अञ्चति, इत्यादयः शब्दाः कस्मिन् गणे आयान्ति?

(क) न षट्स्वस्रादिभ्यः (ख) नित्यं सपत्न्यादिषु (ग) बह्वादिभ्यश्च (घ) षिद्गौरादिभ्यश्च

**२. एकैकवाक्येन उत्तराणि लिखत।**

(१) क्षिपका, ध्रुवका, चरका, एते शब्दाः कस्मिन् गणे आगच्छन्ति?

(२) गौरी इत्यत्र कः प्रत्ययः?

(३) बह्वादिगणस्य पञ्चशब्दान् लिखन्तु।

**३. सविस्तरम् उत्तराणि लिखत।**

(१) प्रकरणेऽस्मिन् कति गणसूत्राणि सन्ति?

(२) 'न षट्स्वस्रादिभ्यः' इत्यस्मिन् गणसूत्रे कति शब्दाः सन्ति, तेषान्नामानि लिखतु।

(३) 'षिद्गौरादिभ्यश्च' इत्यस्मिन् सूत्रे 'गौरादिभ्यः' इति पदस्य अर्थं लिखतु।'

(४) 'नौकाकान्न...' इति वार्तिकं पूरयित्वा तस्मिन् गणे कति शब्दाः सन्ति, इति विलिख्य तेषां नामानि लिखतु।

●

# सूत्रसूचिः


| क्रमाङ्क | वार्तिकानि | सूत्रक्रमाङ्क |
|---|---|---|
| | **अ** | |
| ५३९ | अकथितं च | १-४-५१ |
| ६०१ | अकर्तर्यृणे | २-३-२४ |
| ६२८ | अकेनोर्भवि | २-३-७० |
| ४१६ | अचः | ६-४-१६८ |
| ४५४ | अजाद्यतष्टाप् | ४-१-४ |
| ५५६ | अतिरति क्रमणे | १-४-९५ |
| ४२५ | अत्वसन्तस्य | ६-४-१४ |
| ४३७ | अदस औ | ७-२-१०७ |
| ४१९ | अदसोऽसे | ८-२-८० |
| ४२६ | अधिकरणवाचि | २-३-६८ |
| ५५४ | अधिपरी | १-४-५३ |
| ५४४ | अधिरीश्वरे | १-४-९७ |
| ५४३ | अधिशीङ् | १-४-४६ |
| ६१३ | अधीगर्थद | २-३-५८ |
| ५६२ | अन उपधा | ४-१-२८ |
| ५३६ | अनभिहिते | २-३-१ |
| ३४६ | अनाप्यकः | ७-२-११२ |
| ४१५ | अनिदितां | ६-४-२४ |
| ४०३ | अनुदात्तं सर्वं | ८-१-१८ |
| ४६९ | अनुपसर्जनात् | ४-१-१४ |
| ५७९ | अनुप्रतिगृणश्च | १-४-४१ |
| ५४७ | अनुर्लक्षणे | १-४-८४ |
| ४६० | अनोबहुव्रीहेः | ४-१-१२ |
| ५४५ | अन्तरान्तरेण | २-३-४ |
| ५९१ | अन्तर्धौयेना | १-४-२८ |
| ४८९ | अन्तर्वत्पति | ४-१-३२ |
| ४९७ | अन्यतो ङीष् | ४-१-४० |
| ५९५ | अन्यारादि | २-३-२९ |
| ५९६ | अपपरी | १-४-८८ |

| क्रमाङ्क | वार्तिकानि | सूत्रक्रमाङ्क |
|---|---|---|
| ४८० | अपरिमाण | ४-१-२२ |
| ५६३ | अपवर्गे | २-३-६ |
| ५८७ | अपादाने पञ्चमी | २-३-२८ |
| ५५७ | अपिः पदार्थ | १-४-९६ |
| ४४२ | अपो भि | ७-४-४८ |
| ४६७ | अभाषित | ७-३-४८ |
| ५४३ | अभिनिविशश्च | १-४-४७ |
| ५५३ | अभिरभागे | १-४-९१ |
| ३३३ | अम् संबुद्धौ | ७-१-९९ |
| ३६४ | अर्वणस्त्रसा | ६-४-१२७ |
| ४५२ | अव्ययादाप्सुपः | २-४-८२ |
| ४५१ | अव्ययीभावश्च | १-१-४१ |
| ३७१ | अष्टन आ | ७-२-८४ |
| ३७२ | अष्टाभ्य | ७-१-२१ |
| ५०९ | अस्वाङ्गपूर्व | ४-१-५३ |
| ४४३ | अहन् | ८-२-६८ |
| | **आ** | |
| ५९२ | आख्यातोपयोगे | १-४-२९ |
| ५९७ | आङ्मर्यादाव | १-४-८९ |
| ४४५ | आच्छीनद्यो | ७-१-८० |
| ४६८ | आदाचार्याणाम् | ७-३-४९ |
| ३४८ | आद्यन्तवदेक | १-१-२१ |
| ६३२ | आधारोऽधि | १-४-४५ |
| ४१२ | आमन्त्रितं | ८-१-७२ |
| ४७५ | आयनेयीनीयि | ७-१-२ |
| ६३७ | आयुक्त कुशला | २-३-४० |
| ५२९ | आवट्याच्च | ४-१-७५ |
| ६१६ | आशिषि नाथः | २-३-५५ |
| ४३० | आ सर्वनाम्नः | ६-३-९१ |

| क्रमाङ्क | वार्तिकानि | सूत्रक्रमाङ्क |
|---|---|---|
| | **इ** | |
| ३२८ | इग्यण: | १-१-४५ |
| ३६६ | इतोऽत्सर्व | ७-१-८६ |
| ५२० | इतो मनुष्यजाते: | ४-१-६५ |
| ५६६ | इत्थंभूतलक्षणे | २-३-२१ |
| ३५० | इदमोऽन्वादेशे | २-४-३२ |
| ३४४ | इदोऽय् पुंसि | ७-२-१११ |
| ५०५ | इन्द्रवरुण | ४-१-४९ |
| ३५६ | इन्हन्पूषार्य | ६-४-१२ |
| | **उ** | |
| ४५५ | उगितश्च | ४-१-६ |
| ३६१ | उगिदचां | ७-१-७० |
| ४२० | उद ईत् | ६-४-१३९ |
| ४६५ | उदीचामात: | ७-३-४६ |
| ५४४ | उपान्वध्याङ् | १-४-४८ |
| ५५१ | उपोऽधिके च | १-४-८७ |
| ६२४ | उभय प्राप्तौ | ३-३-६६ |
| ४२६ | उभे अभ्यस्तम् | ६-१-५ |
| | **ऊ** | |
| ६२४ | ऊङुत: | ४-१-६६ |
| ४८३ | ऊधसोऽनङ् | ५-४-१३१ |
| ५२४ | ऊरूत्तरपदादौ | ४-१-६९ |
| | **ऋ** | |
| ३७३ | ऋत्विग्दधृक् | ३-२-५९ |
| | **ए** | |
| ३९६ | एकवचनस्य च | ७-१-३२ |
| ३२६ | एकाचो बशो | ८-२-३७ |
| ४३४ | एत ईद्बहुवचने | ८-२-८१ |
| ६१० | एनपा द्वितीया | २-३-३१ |
| | **क** | |
| ६०४ | करणे च | २-३-३३ |
| ५३५ | कर्तुरीप्सिततमं | १-४-४९ |

| क्रमाङ्क | वार्तिकानि | सूत्रक्रमाङ्क |
|---|---|---|
| ५६१ | कर्तृ-करणयो | २-३-१८ |
| ६२३ | कर्तृ-कर्मणो कृति | २-३-६५ |
| ५६९ | कर्मणा यमभि | १-४-३२ |
| ५३७ | कर्मणि द्वितीया | २-३-२ |
| ५४७ | कर्मप्रवचनीया: | १-४-८३ |
| ४९१ | काण्डान्तात्क्षेत्रे | ४-१-२३ |
| ५३३ | कारके | १-४-२३ |
| ५५८ | कालाध्वनो | २-३-५ |
| ३४२ | किम: क: | ७-२-१०३ |
| ६१४ | कृञ: प्रतियत्ने | २-३-५३ |
| ६२९ | कृत्यानां कर्तरि वा | २-३-७१ |
| ६२२ | कृत्वोर्थ प्रयोगे | २-३-६४ |
| ३७४ | कृदतिङ् | ३-१-९३ |
| ४४९ | कृन्मेजन्त: | १-१-३९ |
| ४८८ | केवलमामक | ४-१-३० |
| ४७७ | कौरव्यमाण्डूका | ४-१-१९ |
| ६२५ | क्तस्य च वर्तमाने | २-३-६७ |
| ५०७ | क्तादल्पाख्यायाम् | ४-१-५१ |
| ४५० | क्त्वातो सुन्कसुन: | १-१-४० |
| ५८१ | क्रियार्थोपपदस्य | २-३-१४ |
| ५०६ | क्रीतात्करण पूर्वात् | ४-१-५० |
| ५७५ | क्रुधद्रुहेर्ष्या | १-४-३७ |
| ५७६ | क्रुधद्रुहोपरूप | १-४-३८ |
| ३७७ | क्विन्प्रत्यस्य कु: | ८-२-६२ |
| | **ग** | |
| ५४० | गतिबुद्धि | १-४-५२ |
| ५८५ | गत्यर्थ कर्मणि | २-३-१२ |
| | **ङ** | |
| ३८२ | ङे प्रथमयोरम् | ७-१-२८ |
| | **च** | |
| ३३१ | चतुरनडुहो | ७-१-९८ |
| ६३१ | चतुर्थी-चाशिष्या | २-३-७३ |

| क्रमाङ्क | वार्तिकानि | सूत्रक्रमाङ्क |
|---|---|---|
| ५७० | चतुर्थी संप्रदाने | २-३-१३ |
| ३७८ | चोः कुः | ८-२-३० |
| ४१७ | चौ | ६-३-१३८ |
| | **ज** | |
| ४२८ | जक्षित्यादयः षट् | ६-१-६ |
| ५९३ | जनिकर्तुः प्रकृतिः | १-४-३० |
| ५१८ | जातेरस्त्रीविष | ४-१-६३ |
| ५०० | जानपदकुण्ड | ४-१-४२ |
| ६१७ | जासिनिप्रहण | २-३-५६ |
| ६१२ | ज्ञोऽविदर्थस्य | २-३-५१ |
| | **ट** | |
| ४५८ | टाबृचि | ४-१-९ |
| ४७० | टिड्ढाण | ४-१-१५ |
| | **ड** | |
| ४६१ | डाबुभाभ्या | ४-१-१३ |
| | **त** | |
| ५३८ | तथायुक्तं | १-४-५० |
| ३४१ | तदोः सः सावन | ७-२-१०६ |
| ४४८ | तद्धितश्चासर्व | १-१-३८ |
| ५३० | तद्धिताः | ४-१-७६ |
| ३९८ | तव ममौ | ७-२-९६ |
| ४२३ | तिरसस्तिर्यलोपे | ६-३-९४ |
| ३९४ | तुभ्यमह्यौ ङयि | ७-२-९५ |
| ५८२ | तुमर्थाच्च भाव | २-३-१५ |
| ६३० | तुल्यार्थैरतुलोप | २-३-७२ |
| ५४९ | तृतीयार्थे | १-४-८५ |
| ४०६ | तेमयावेक | ८-१-२२ |
| ४२९ | त्यदादिषु | ३-२-६० |
| ३८९ | त्वमावेकवचने | ७-२-९७ |
| ४०७ | त्वामौ द्वितीयायाः | ८-१-२३ |
| ३८७ | त्वाहौ सौ | ७-२-९४ |
| | **थ** | |
| ३६७ | थोन्थः | ७-१-८७ |

| क्रमाङ्क | वार्तिकानि | सूत्रक्रमाङ्क |
|---|---|---|
| | **द** | |
| ३४५ | दश्च | ७-२-१०९ |
| ३२५ | दादेर्धातोर्घः | ८-२-३२ |
| ४८६ | दामहायनान्ताच्च | ४-१-२७ |
| ५१५ | दिक्पूर्वपदान्ङीप् | ४-१-६० |
| ३३७ | दिव उत् | ६-१-१३१ |
| ३३६ | दिव औत् | ७-१-८४ |
| ५६२ | दिवः कर्म च | १-४-४३ |
| ६१९ | दिवस्तदर्थस्य | २-३-५८ |
| ६०५ | दूरान्तिकार्थेभ्यो | २-३-३५ |
| ६११ | दूरान्तिकार्थैः | २-३-३४ |
| ४७९ | द्विगोः | ४-१-२१ |
| ३५१ | द्वितीयाटौस्स्वेनः | २-४-३४ |
| ३९० | द्वितीयायां च | ७-२-८७ |
| | **ध** | |
| ५७३ | धारेरुतमर्णः | १-४-३५ |
| ५८६ | ध्रुवमपाये | १-४-२४ |
| | **न** | |
| ५१२ | न क्रोडादिब | ४-१-५६ |
| ६४२ | नक्षत्रे च | २-३-४५ |
| ५१४ | नखमुखात्सं | ४-१-५८ |
| ३५२ | न ङिसम्बुद्ध्योः | ८-२-८ |
| ४०८ | न चवाहाहै | ८-१-२४ |
| ५८३ | नमः स्वस्तिस्वाहा | २-३-१६ |
| ५३९ | न मु ने | ८-२-३ |
| ६२७ | न लोकाव्यय० | २-३-६९ |
| ३५३ | नलोप सुप्स्वर० | ८-२-२ |
| ५३१ | नशे र्वा | ८-२-६३ |
| ३५५ | न संयोगाद्वम | ६-४-१३७ |
| ३६३ | न सम्प्रसारणे | ६-१-३७ |
| ४४० | नहो धः | ८-२-३४ |
| ४२४ | नाञ्चेः पूजायाम् | ६-४-३० |

| क्रमाङ्क | वार्तिकानि | सूत्रक्रमाङ्क |
|---|---|---|
| ४२७ | नाभ्यस्ताच्छतुः | ७-१-७८ |
| ४१३ | नामन्त्रिते | ८-१-७३ |
| ५११ | नासिकोदरौष्ठः | ४-१-५५ |
| ४८७ | नित्यं संज्ञाछ | ४-१-२९ |
| ४९२ | नित्यं सपत्न्यादिषु | ४-१-३५ |
| ४३४ | नुम्विसर्जनीय | ८-३-५८ |
| ३४९ | नेदमदसोरकोः | ७-१-११ |
| ३७० | नोपधायाः | ६-४-७ |
| | **प** | |
| ५२३ | पङ्गोश्च | ४-१-६८ |
| ५३९ | पञ्चमीविभक्ते | २-३-४२ |
| ५९८ | पञ्चम्यपाङ् | २-३-१० |
| ३९७ | पञ्चम्या अत् | ७-१-३१ |
| ४९० | पत्युर्नो यज्ञ | ४-१-३३ |
| ३६५ | पथिमथ्यृ | ७-१-८५ |
| ४०१ | पदस्य | ८-१-१६ |
| ४०२ | पदात् | ८-१-१७ |
| ५८९ | पराजेरसोढः | १-४-२६ |
| ४८० | परिक्रयणे | १-४-४४ |
| ४०९ | पश्यार्थैश्चना | ८-१-२५ |
| ५१९ | पाक-कर्ण-पर्ण० | ४-१-६४ |
| ४१४ | पादः पत् | ६-४-१३० |
| ४५७ | पादोऽन्यतरस्याम् | ४-१-८ |
| ५०४ | पुंयोगादाख्या | ४-१-४८ |
| ४३६ | पुंसोऽसुङ् | ७-१-८९ |
| ४८२ | पुरुषात्प्रमाणे | ४-१-२४ |
| ४९३ | पूतक्रतोरैच | ४-१-३६ |
| ६०३ | पृथग्विनानाना | २-३-३२ |
| ५९९ | प्रतिः प्रतिनिधि | १-४-९२ |
| ६०० | प्रतिनिधिप्रति | २-३-११ |
| ४६३ | प्रत्यस्थात्कात् | ७-३-४४ |
| ५७८ | प्रत्याङ्भ्यां | १-४-४० |
| ३८७ | प्रथमायाश्च | ७-२-८८ |
| ६४१ | प्रसितोत्सुका | २-३-४४ |
| ४७३ | प्राचां ष्फः | ४-१-१७ |
| ५३२ | प्रातिपदिकार्थ | २-३-४६ |
| ६२१ | प्रेष्यब्रुवोर्ह | २-३-६१ |
| | **ब** | |
| ४०५ | बहुवचनस्य | ८-१-२१ |
| ४८४ | बहुव्रीहेरुधसो | ४-१-२५ |
| ५०८ | बहुव्रीहेश्चान्तो | ४-१-५२ |
| ५०३ | बह्वादिभ्यश्च | ४-१-४५ |
| ५२२ | बाह्वन्तात्संज्ञा | ४-१-६७ |
| | **भ** | |
| ४६७ | भस्त्रैषाजाज्ञा | ७-३-४७ |
| ३६८ | भस्य टेर्लोप | ७-१-८८ |
| ५८८ | भीत्रार्थानां | १-४-२५ |
| ५९४ | भुवः प्रभवः | १-४-३१ |
| ३९५ | भ्यसोऽभ्यम् | ७-१-३० |
| | **म** | |
| ३६० | मघवा बहुलम् | ६-४-१२८ |
| ४५९ | मनः | ४-१-११ |
| ४९५ | मनोरौ वा | ४-१-३८ |
| ५८४ | मन्यकर्मण्य | २-३-१७ |
| ३८३ | मपर्यन्तस्य | ७-२-९१ |
| ३४१ | मो नो धातोः | ८-२-६४ |
| | **य** | |
| ४४१ | यः सौ | ७-२-११० |
| ५२८ | यङश्चाप् | ४-१-७४ |
| ४७१ | यञश्च | ४-१-१६ |
| ६३८ | यतश्च निर्धा | २-३-४१ |
| ६४५ | यस्मादधिकं | २-३-९ |
| ६३४ | यस्य च भावेन | २-३-३७ |
| ३७६ | युजेरसमासे | ७-१-७१ |

| क्रमाङ्क | वार्तिकानि | सूत्रक्रमाङ्क | क्रमाङ्क | वार्तिकानि | सूत्रक्रमाङ्क |
|---|---|---|---|---|---|
| ३८६ | युवावौ द्विवचने | ७-२-९२ | ४९४ | वृषाकप्यग्नि | ४-१-३७ |
| ४०४ | युष्मदस्मदो: | ८-१-२० | ३७५ | वेरपृक्तस्य | ६-१-६७ |
| ३९३ | युष्मदस्मदोर | ७-२-८६ | ५०२ | वोतो गुणवचन | ४-१-४४ |
| ३९९ | युष्मदस्मद्भ्यां | ७-१-२७ | ६१८ | व्यवहृपणो: | २-३-५७ |
| ४३१ | यूनस्ति: | ४-१-७७ | | **श** | |
| ३८८ | यूयवयौ जसि | ७-२-९३ | ४४६ | शप्श्यनोर्नित्यम् | ७-१-८१ |
| ५६५ | येनाङ्गविकार: | २-३-२० | ३४० | शरोऽचि | ८-४-४९ |
| ३९२ | योऽचि | ७-२-८९ | ३९१ | शसो न | ७-१-२९ |
| | **र** | | ५२७ | शार्ङ्गरवा | ४-१-७३ |
| ५७७ | राधीक्ष्योयस्य | १-४-३९ | ३८५ | शेषे लोप: | ७-२-९० |
| ५७१ | रुच्यर्थानां | १-४-३३ | ५०१ | शोणात्प्राचाम् | ४-१-४३ |
| ६१५ | रुजार्थानां भाव | २-३-५४ | ५७२ | श्लाघह्नुङ् | १-४-३४ |
| ३३९ | रो: सुपि | ८-३-१६ | ३६२ | श्वयुवमघो | ६-४-१३३ |
| ४३३ | र्वोरूपधाया | ८-२-७६ | | **ष** | |
| | **ल** | | ४७४ | ष: प्रत्ययस्य | १-३-६ |
| ५५२ | लक्षणेत्थंभू | १-४-९० | ३३८ | षट्चतुर्भ्यश्च | ७-१-५५ |
| | **व** | | ६३५ | षष्ठी चानादरे | २-३-३८ |
| ४५६ | वनो र च | ४-१-७ | ६०६ | षष्ठी शेषे | २-३-५० |
| ४७८ | वयसि प्रथमे | ४-१-२० | ६०७ | षष्ठी हेतुप्रयोगे | २-३-२६ |
| ४९६ | वर्णादनुदात्ता | ४-१-३९ | ६०९ | षष्ठ्यतसर्थ | ३-३-३० |
| ३३४ | वसुस्त्रंसु | ८-२-७२ | ४९८ | षिड्गौरादिभ्यश्च | ४-१-४१ |
| ४३५ | वसो: सम्प्रसारणम् | ६-४-१३१ | ३६९ | ष्णान्ता षट् | १-१-२४ |
| ३२७ | वा द्रुहमुह | ८-२-३३ | | **स** | |
| ४४४ | वानपुंसकस्य | ७-१-७९ | ५२५ | संहितशफलक्ष | ४-१-७० |
| ५९१ | वारणार्थानामी | १-४-२७ | ५१७ | सख्यशिश्वीति | ४-१-६२ |
| ३२९ | वाह ऊठ् | ६-४-१३२ | ४८५ | संख्याव्ययादे | ४-१-२६ |
| ५४६ | विभाषा कृञि | १-४-९८ | ५२६ | संज्ञायाम् | ४-१-७२ |
| ६०३ | विभाषा गुणेऽस्त्रि | २-३-२५ | ५६७ | संज्ञोऽन्यतर | २-३-२२ |
| ४९१ | विभाषा सपूर्वस्य | ४-१-३४ | ४१० | सपूर्वाया: | ८-१-२६ |
| ६२० | विभाषोपसर्गे | २-३-५९ | ६४३ | सप्तमीपञ्चम्यौ | २-३-७ |
| ३७९ | विश्वस्य वसु | ६-३-१२८ | ६३३ | सप्तम्यधिकरणे | २-३-३६ |
| ४१८ | विष्वग्देवयोश्च | ६-३-९२ | ४२१ | सम: समि | ६-३-९३ |

| क्रमाङ्क | वार्तिकानि | सूत्रक्रमाङ्क | क्रमाङ्क | वार्तिकानि | सूत्रक्रमाङ्क |
|---|---|---|---|---|---|
| ३३० | सम्प्रसारणाच्च | ६-१-१८ | ४५३ | स्त्रियाम् | ४-१-३ |
| ५३३ | सम्बोधने च | २-३-४७ | ४३२ | स्पृशोऽनुदके | ३-२-५८ |
| ४७६ | सर्वत्र लोहितादि | ४-१-१८ | ५७४ | स्पृहेरीप्सितः | १-४-३६ |
| ६०८ | सर्वनाम्नस्तृतीया | २-३-२७ | ५५९ | स्वतंत्रः कर्ता | १-४-५४ |
| ५१३ | सहनञ्विद्यमान | ४-१-५७ | ४४७ | स्वरादिनिपात | १-१-३७ |
| ५६४ | सहयुक्तेऽप्रधाने | २-३-१९ | ५१० | स्वाङ्गाच्चोप | ४-१-५४ |
| ४२२ | सहस्य सध्रिः | ६-३-९५ | ५१० | स्वामीश्वराधिपति | २-३-३९ |
| ३३५ | सहेः साडः सः | ८-३-५६ | | **ह** | |
| ५६० | साधकतमं | १-४-४२ | ३५९ | हन्तेरत्पूर्वस्य | ८-४-२२ |
| ६४० | साधुनिपुणाभ्यां | २-३-४३ | ४७२ | हलस्तद्धितस्य | ६-४-१५० |
| ३१७ | सान्तमहतः | ६-४-१० | ३५४ | हलि च | ८-२-७७ |
| ४११ | सामन्त्रितम् | २-३-४८ | ३४७ | हलि लोपः | ७-२-११३ |
| ३३२ | सावनडुहः | ७-१-८२ | ५५० | हीने | १-४-८६ |
| ५५५ | सुः पूजायाम् | १-४-९४ | ५४१ | हक्रोरन्यतर | १-४-५३ |
| ४९९ | सूर्यतिष्यागस्त्य | ६-४-१४९ | ५६८ | हेतौ | २-३-२३ |
| ३५७ | सौ च | ६-४-१३ | ३२४ | हो ढः | ८-२-३१ |
| ३८० | स्कोः संयोगा | ८-२-२९ | ३५८ | हो हन्तेर्ञ्णिन्नेषु | ७-३-५४ |

●

# हलन्तपुँल्लिङ्गतः कारकान्तभागस्य अकारादिक्रमेण वार्तिक सूचिः


| वार्तिकानि | सूत्रक्रमाङ्क |
|---|---|
| **अ** | |
| अकर्मकधातुभिर्योगे | ५३९ |
| अज्वरिसन्ताप्यो | ६१५ |
| अनपत्याधिकारस्था | ४७२ |
| अन्त्यात्पूर्वो | ४४३ |
| अन्वादेशे नपुंसके | ४४२ |
| अप्रत्यादिभिरिति | ६४० |
| अप्राणिष्वित्य | ५८४ |
| अभितः परितः | ५४४ |
| अभिवादिदृशो | ५४१ |
| अभुक्त्यर्थस्य न | ५४४ |
| अर्यक्षत्रियाभ्यां | ५०५ |
| अर्हाणां कर्तृत्वे | ६३४ |
| अष्टका | ४६४ |
| असितपलितयो | ४९६ |
| अस्य सम्बुद्धौ | ४३६ |
| **आ** | |
| आचार्यादणत्वं च | ५०५ |
| आदिखाद्योर्न | ५४० |
| आब्ग्रहणं व्यर्थ | ४५२ |
| आमनडुहः | ४९८ |
| आशिषि वुनश्च | ४६४ |
| आसुरेरूपसंख्या | ४७७ |
| **इ** | |
| इयं त्रिसूत्री | ४९३ |
| **उ** | |
| उत्तरपद लोपेन | ४६४ |
| उत्पातेन | ५८० |
| उपमानात्पक्षाच्च | ५११ |
| उभसर्वतसोः कार्या | ५४४ |
| **ए** | |
| एकतिङ् वाक्यम् | ४०७ |
| एते वांनावादय | ४०७ |
| **औ** | |
| औत्त्वप्रतिषेधः | ४३७ |

| वार्तिकानि | सूत्रक्रमाङ्क |
|---|---|
| **क** | |
| कबरमणिविष | ५११ |
| कमेरनिषेधः | ६२७ |
| कर्मणः करणसंज्ञा | ५७० |
| क्तस्येन्विषयस्य | ६३३ |
| क्रियया यमभि | ५७० |
| क्षिपकादीनां च न | ४६४ |
| **ख** | |
| खरूपंयोगोपधान्न | ५०२ |
| **ग** | |
| गुणकर्मणि वेष्यते | ६२३ |
| **ङ** | |
| ङावुत्तरपदे | ३५२ |
| **च** | |
| चयो द्वितीयाः | ४४३ |
| **छ** | |
| छन्दसि क्नमेके | ४९६ |
| **ज** | |
| जल्पतिप्रभृती | ५४० |
| जातान्तान्न | ५०८ |
| जातिपूर्वादिति | ५०८ |
| जुगुप्साविराम | ५८७ |
| **त** | |
| तद्युक्तादध्वनः | ५९४ |
| तस्य दोषः | ४३४ |
| तादर्थ्ये चतुर्थी | ५८० |
| तारका ज्योतिषि | ४६४ |
| तिष्यपुष्ययोर्न | ४९९ |
| त्यकनश्च निषेधः | ४६४ |
| त्यक्त्यपोश्च | ४६३ |
| त्रिचतुर्भ्यां हायन | ४८६ |
| **द** | |
| दृशेश्च | ५४० |
| द्विषः शतुर्वा | ६२७ |

| वार्तिकानि | सूत्रक्रमाङ्क |
|---|---|
| **ध** | |
| धात्वन्तयकोस्तु | ४६५ |
| **न** | |
| नञ्स्नञीक | ४७० |
| नानर्थकेऽलोन्त्य | ३४७ |
| निमित्तपर्यायप्रयोगे | ६०८ |
| नियन्तृकतृकस्य | ५४० |
| नीलादोषधौ | ५०० |
| नील्या अन्व | ५०० |
| **प** | |
| पाणि गृहीती | ५०८ |
| पालकान्तान्न | ५०४ |
| पिशङ्गादुप | ४९६ |
| पुच्छाच्च | ५११ |
| पूर्वत्रासिद्धेन | ४३४ |
| प्रकृत्या दिभ्य | ५६१ |
| प्राणिनि च | ५०० |
| **ब** | |
| बहुव्रीहौ वा | ४५६ |
| बहूर्जिनुम्प्रतिषेधः | ४४३ |
| **भ** | |
| भक्षेरसिंहार्थस्य न | ५४० |
| **म** | |
| मत्स्यस्य ङ्याम् | ५१८ |
| मातरि षिच्च | ४९९ |
| मामक-नरकयोः | ४६३ |
| मूलान्नञः | ४५४ |
| **य** | |
| यतश्चाध्वकाल | ५९४ |
| यवनाल्लिप्याम् | ५०५ |
| यवाद्दोषे | ५०५ |
| **र** | |
| रज्ज्वादिपर्युदास | ५२१ |
| **ल** | |
| ल्यब्लोपे कर्म | ५९४ |
| **व** | |
| वनो न हश | ४५६ |
| वयस्य चरम | ४७८ |
| वयोवाचकस्यैव | ४८६ |
| वर्णकातान्तवे | ४६४ |
| वर्तका शकुनौ | ४६४ |
| **श** | |
| शब्दायते र्न | ५४० |
| शूद्रा चामहत्पू | ४५४ |
| शेषे विभाषा | ६२४ |
| श्वसुरस्योकारा | ५२३ |
| **ष** | |
| षाद्यञश्चाब्वाच्यः | ५२८ |
| **स** | |
| संज्ञायां वा | ५०० |
| संबुद्धौ नपुंसकानां | ३६८ |
| सम्भस्राजिन | ४५४ |
| सदच्काण्डप्रान्त | ४५४ |
| समानवाक्ये | ४०७ |
| सूतकापुत्रिका | ४६४ |
| सूर्यागस्त्ययोच्छ | ४९९ |
| सूर्यादेवतायां वा | ५०४ |
| स्त्रियाम् | ४८४ |
| स्त्रीप्रत्यययो रफा | ६२४ |
| **ह** | |
| हयगवयमुकय | ५१८ |
| हितयोगे च | ५८० |
| हिमारण्ययोर्महत्त्वे | ५०५ |
| अकृतव्यूहाः | ४१७ |
| अङ्गकार्ये कृते | ३८८ |
| अनन्तरस्य विधिर्वा | ३५९ |
| अनिनस्म-ग्रहण | ३४९ |
| उपपदविभक्तेः | ३८३ |
| ताच्छीलिके णेऽपि | ४७० |
| नानर्थकेऽलोऽन्त्यविधि | ३४७ |
| प्रकृतिवदनुकरणम् | २८३ |
| प्रत्ययग्रहणे यस्मात्स | ४५६ |
| लाश्रयमनुबन्ध | ४७० |


● ● ●